आनन्दाश्रमसंस्कृतग्रन्थाः
ग्रन्थाङ्कः १०८

श्रीभगवत्पतञ्जलिविरचितं

# व्याकरणमहाभाष्यम् ।

( तत्राङ्गाधिकारः ) ।

नागोजीभट्टविरचितोद्द्योतसमलंकृतकैयटोपाध्यायकृतप्र-
दीपसमुद्भासितम् ।

षष्ठाध्यायस्थचतुर्थपादमारभ्य सप्तमाध्यायगतद्वितीयपादस्थप्रथमा-
ह्निकान्तः प्रथमो भागः ।

एतत्पुस्तकं
वे० शा० सं० रा० शंकरशास्त्री मारुलकर
इत्येतैः संशोधितम् ।

तच्च
बी. ए. इत्युपपदधारिभिः
विनायक गणेश आपटे
इत्येतैः

पुण्याख्यपत्तने
श्रीमन् ' महादेव चिमणाजी आपटे ' इत्यभिधेय-
महाभागप्रतिष्ठापिते
आनन्दाश्रममुद्रणालये
आयसाक्षरैर्मुद्रयित्वा
प्रकाशितम् ।

शालिवाहनशकाब्दाः १८६० ।
खिस्ताब्दाः १९३८ ।

( अस्य सर्वेऽधिकारा राजशासनानुसारेण स्वायत्तीकृताः ) ।

मूल्यं पादोनं रूपकत्रयम् ( २।१२ ) ।

## आदर्शपुस्तकोल्लेखपत्रिका ।

अस्य सकैयटाङ्गाधिकारभाष्यस्य तथैव विवरणस्य च पुस्तकानि यैः परहितैकप्रवणस्वान्तैः संस्करणे सहायभूतानि प्रदत्तानि तेषां नामादीनि पुस्तकानां संज्ञाश्च कृतज्ञतया निर्दिश्यन्ते–

### सकैयटभाष्यम्–

( क. ) इति संज्ञितम्–वे० शा० व्याकरणकोविद गणपतिशास्त्री शेंड्ये इत्येतेषाम् ।

( ख. ) इति संज्ञितम्–पुण्यपत्तनीयसंस्कृतपाठशालापुस्तकालयस्थम् ।

( ग. ) इति संज्ञितम्–आनन्दाश्रमपुस्तकसंग्रहालयान्तर्गतम् ।

( घ. ) इति संज्ञितम्– " " "

( ङ. ) इति संज्ञितम्–वे० शा० व्याकरणाचार्य–महेश्वरशास्त्री जोशी इत्येतेषाम् ।

( च. ) इति संज्ञितम्–वे० शा० पण्डितप्राण–भगवान्शास्त्री धारूरकर इत्येतेषाम् ।

### विवरणम्–

( क. ) इति संज्ञितम्–वे० शा० सं० शा० म० म० वासुदेवशास्त्री अभ्यंकर इत्येतैः प्रायः परिशोध्य प्रदत्तम् ।

( ख. ) इति संज्ञितम्–आनन्दाश्रमग्रन्थसंग्रहालयस्थम् ।

( ग. ) इति संज्ञितम्–रत्नागिरीयसंस्कृतपाठशालापुस्तकालयस्थम् ।

समाप्तेयमादर्शपुस्तकोल्लेखपत्रिका ।

# महाभाष्यभूमिका ।

पायादपायाज्जगदीश्वरो नः ।

—:+×+:—

सुप्रथितमेवैतदासेतुहिमाचलं यच्छब्दब्रह्मापरनाम्नीं भगवतीं विबुधगिरं स्वरूपतः सामग्र्येण प्रतिपदं निरूपयन्नान्तमधिगतवान् भगवान् सुरगुरुरपि । तदुक्तं व्याकरणमहाभाष्ये पस्पशाह्निके—अनभ्युपाय एष शब्दानां प्रतिपत्तौ प्रतिपदपाठः । एवं हि श्रूयते—बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच नान्तं जगाम । बृहस्पतिश्च प्रवक्ता । इन्द्रोऽध्येता । दिव्यं वर्षसहस्रमध्ययनकालः । नान्तं जगाम । किं पुनरद्यत्वे, यः सर्वथा चिरं जीवति स वर्षशतं जीवतीति ( व्या० भा० पृ० १६ ) । शतायुर्वै पुरुष इति श्रुतेर्वर्षशतं जीवतीत्युक्तम् । वस्तुतोऽस्मिन्कलिकाले मनुष्याणां सहस्रेषु कश्चिदेवैको वर्षशतं जीवति ।

तथा सर्वदर्शनसंग्रहे पाणिनिदर्शने माधवाचार्यैरुक्तम्—अधीतिबोधाचरणप्रचारणैश्चतुर्भिरुपायैर्विद्योपयुक्ता भवति । तत्राध्ययनकालेनैव सर्वमायुरुपयुक्तं स्यात् । तस्मादनभ्युपायः शब्दानां प्रतिपत्तौ प्रतिपदपाठ इति । अतो दुरवगमस्यातिगम्भीरस्य महतः शब्दार्णवस्य पारं जिगमिषवः सारस्वतं सारं जिघृक्षवो जनाः समाश्रयन्ते सुखकरीं राजपद्धतिमिव व्याकरणशास्त्रतरणीम् । तत्र—

नृत्तावसाने नटराजराजो ननाद ढक्कां नवपञ्चवारम् ।
उद्धर्तुकामः सनकादिसिद्धानेतद्विमर्शे शिवसूत्रजालम् ॥

इति चतुर्दशसूत्रव्याख्यायां नन्दिकेश्वरकृतकाशिकायामुक्तत्वात्पणिपुत्रात्पाणिनाद्वाख्यां संजातः पाणिनिनामा मुनिस्तपःसमाराधितान्महेश्वराड्डमरुनिनादेन अइउणित्यादिचतुर्दशसूत्ररूपमाक्षरसमाम्नायं लब्ध्वा तदाधारेण

संज्ञा च परिभाषा च विधिर्नियम एव च ।
अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणम् ॥

इत्युक्तलक्षणाक्रान्तां वृद्धिरादैजित्यादिसूत्राणामष्टाध्यायीमारचय्य तत्र प्रकृ-

तयः प्रत्ययाः स्थानिन आदेशा आगमा धातवो लकाराः समासास्तत्रोदात्तादिस्वरांश्चेत्येतत्कल्पयित्वा तेषामेकस्मिल्लँक्ष्ये युगपत्प्राप्तौ परत्वनित्यत्वान्तरङ्गत्वोत्सर्गापवादभावैस्तान् यथायथं व्यवस्थाप्य निखिलं शब्दजातमेकतन्त्यामिव तस्यां नियन्त्रितवान्। सूत्रलक्षणं तु—

अल्पाक्षरमसंदिग्धं सारवद्विश्वतोमुखम्।
अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः॥ इति।

वररुच्यपरपर्यायः कात्यायनमुनिरपि तपसा चन्द्रमौलिं समाराध्य तत्प्रसादाल्लब्धदिव्यदृष्टिस्तेषु पाणिनीयसूत्रेषु न्यूनतां संपश्यंस्तत्पूर्त्यै वार्तिकानि बहून्यारचयामास। वार्तिकलक्षणं तु—

उक्तानुक्तदुरुक्तार्थचिन्ता यत्र प्रवर्तते।
तं ग्रन्थं वार्तिकं प्राहुर्वार्तिकज्ञा विचक्षणाः॥ इति।

तदनु कियत्यप्यनेहसि व्यतिक्रान्ते श्रीमन्नारायणाज्ञया तत्पर्यङ्कभूतः शेषः पृथिव्यां कस्मिंश्चिदरण्येऽवततार। तत्र तपश्चरन्तीं कांचन ऋषिपत्नीं गोणिकानाम्नीं साध्वीं दृष्टवान्। दर्शनमात्रेणैव च तेजःप्रभावाच्चाकितमनाः प्रणष्टदंशबुद्धिस्तां मातरमित्यभिमन्यते स्म। सा च श्रीसवितारमुद्दिश्य तपस्यन्ती महाप्राज्ञं पुत्रं मे देहीति मनसिकृत्य निमीलितनयना यावत्सूर्यायार्घ्यं ददाति तावदेवायं शेषः सूर्यप्रेरणया तस्या अञ्जलौ सूक्ष्मशिशुरूपेणाऽऽगत्यार्घ्येण सह मुनिरूपधारी भूमौ निपपात। दिव्याकृतिं तेजःपुञ्जमिव तं बालकं संवीक्ष्य एष मे पुत्रः श्रीसवितृप्रसादात्प्राप्त इति मनसा निश्चित्य तदुत्तमाङ्गमुपाघ्रायाञ्जलेः पतित इति कृत्वा तं पतञ्जलिनाम्ना आहूतवती। स च तां मातरं नमस्कृत्य तदनुज्ञां लब्ध्वा दक्षिणोदधितटे भगवन्तं श्रीशंकरं तपसा समाराध्य तदनुग्रहलब्धदिव्यदृष्टिर्व्याकरणशास्त्रे भाष्यं विरचयेत्यनुज्ञातः पतञ्जलिर्लोकोपकृतये महाभाष्यं विरचयांबभूव। अध्ययनार्थमागतांश्छात्रान् विधूतफणासहस्रमण्डलो जवनिकान्तर्हितो भूत्वा जवनिकापसारणे कृतनिर्बन्धो महाभाष्यमध्यापयामास। अथ कदाचित्ते वाऽसरूपसूत्र (पा. सू. ३।१।९४) पर्यन्तं वृत्ताध्ययना जवनिकान्तःस्थस्वरूपदिदृक्षया मृत्युनेव प्रेरिता जवनिकापसारणं चक्रुः। कृतागसस्ते दृष्टिमात्रेणैव च भस्मसाद्बभूवुः। तेष्वेकस्त-

दानीं तत्र दैववशादसंनिहितोऽवशिष्टोऽभूत् । तदनु स्वमातरं गोणिकां प्रणम्यावतारकृत्यं समाप्य त्रिदिवं गतायां स्वमातरि स्वयमपि स्वस्वरूपमगमत्पतञ्जलिः। तदेतत्सर्वं म. म. वासुदेवशास्त्रिगुरुचरणैः पतञ्जलिचरितं च रामभद्रदीक्षितैरित्थमभिधायीत्युपक्रम्य विस्तरेण निरूपितं तस्य सारांशः संक्षेपेण मया संगृहीतः। नागोजीभट्टास्तु पतञ्जलिश्चायं गोनर्ददेशे कस्यचिदृषेरञ्जलेः संध्याकरणसमये पतित इत्यैतित्त्यं लघुशब्देन्दुशेखरे शकन्ध्वादिषु पररूपं वाच्यमिति वार्तिकविचारप्रसङ्गेन पतञ्जलिरूपसाधनावसरे प्राहुः। पतञ्जलिश्चायं ख्रिस्ताब्दात्प्रागेकशतकात्पूर्वमासीदितीतिहासप्रमाणज्ञा वदन्ति ।

त एते व्याकरणशास्त्रप्रवर्तकाचार्याः पाणिनिकात्यायनपतञ्जलिमुनयः शब्द एव ब्रह्मेति शब्दब्रह्मवादिनो भवन्ति । स भूरिति व्याहरत् । स भुवसृजत । इत्युपनिषदि सर्वस्याः सृष्टेः शब्दपूर्वकत्वाभिधानात् । पाणिनिदर्शने माधवाचार्यैरप्युक्तम्—जगन्निदानं स्फोटाख्यो निरवयवो नित्यः शब्दो ब्रह्मैवेति हरिणाऽभाणि ब्रह्मकाण्डे—

अनादिनिधनं ब्रह्म शब्दतत्त्वं तदक्षरम् ।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ॥ (वाक्यपदीयम् १।१) इति ।

आद्यन्तरहितं शब्दरूपं ब्रह्म । तच्चानिमित्तकत्वादक्षरं विकारशून्यम् । तदेव च जगद्रूपेण भासते । यस्माच्छब्दब्रह्मणः सकाशाज्जगतो रचना भवतीति तदर्थः। तथा च श्रीशंकरपूज्यपादवदद्वयब्रह्मवादिन एते मुनय इति प्रतीयते ।

ननु परमार्थभूता या संविन्निर्विकल्पकं केनापि विशेषेण रहितं सामान्यज्ञानं तद्रूपा याऽखिलपदार्थानुगता सत्ता सैव घटपटादिसंबधिभेदेन घटत्वपटत्वादिजातिरूपा घटपटादिशब्दानामर्थ इति जातिसमुद्देशे प्रतिपादितम् । तथा च घटत्वादिकमपरं सामान्यं परमार्थतस्ततो भिन्नं न भवतीति सर्वेषां शब्दानां ब्रह्मतत्त्वं वाच्यं तस्य वाचकश्च स्फोटरूपः शब्द इति वाच्यवाचकयोर्भेदस्य सकललोकप्रसिद्धत्वादद्वैतापत्तिः।

यद्यपि ' कथाप्रसङ्गेन जनैरुदाहृतात्तवाभिधानाद्व्यथते नतानन: ' इत्यादावभिधानश्रवणमात्रेण व्यथाया वर्णानात्तथाऽनुभावाच्च शब्दार्थयोस्तादात्म्यं लभ्यते तथाऽप्याध्यासिकं तन्नतु वास्तविकम् । अध्यासो नामान्यत्रा-

न्यधर्मावभासः । तदुक्तम्—शब्दार्थप्रत्ययानामितरेतराध्यासात्संकरः ( पा. यो. सू. ३ । १७ ) गौरिति शब्दो गौरित्यर्थो गौरिति ज्ञानमिति शब्दार्थज्ञानानां समानाकारतानुभवात्संकरो विवेकाग्रहणम् । वस्तुतस्तेषां भेद एवेत्युक्त्या वृत्तौ नागोजीभट्टैस्तेषामध्यासमूलकत्वमेव प्रदर्शितम् । पातञ्जलमहाभाष्येऽप्युक्तम्—' संकेतस्तु पदपदार्थयोरितरेतराध्यासरूपः स्मृत्यात्मको योऽयं शब्दः सोऽर्थो योऽर्थः स शब्दः ' इति । तादात्म्यं च तद्भिन्नत्वे सति तदभेदेन प्रतीयमानत्वम् । एतच्च भेदाभेदघटितमपि यत्र य उद्भूतरूपत्वेन विवक्ष्यते तत्र स प्रकाशितो भवति । ततश्च भेदस्योद्भूतरूपत्वेन विवक्षायां तस्य वाचकः प्रणवः । ( पा. यो. सू. १ । २९ ) इति वैयधिकरण्येन निर्देशः कृतः । अत एव राहोः शिर इति भेदेन निर्देशः संगच्छते । अभेदस्योद्भूतत्वरूपेण विवक्षायाम्—' ओमित्येकाक्षरं ब्रह्म ' इति सामानाधिकरण्येन निर्देशो दृश्यते । तथा च कथमेते मुनयोऽद्वैतवादिन इति कल्पनाऽवकल्पत इति वाच्यमिति चेदुच्यते—

अद्वितीयस्य शब्दब्रह्मणः स्फोटस्य शब्दार्थोभयसंस्काररूपाविद्यामिश्रितत्वात्तदुभयोपादानत्वेन शब्दार्थात्मकस्य सर्वस्य जगद्रूपकार्यस्य स्फोटब्रह्मरूपत्वात् । उपादानत्वमपि विवर्तवादमवलम्ब्य रज्जौ भुजंगवन्मिथ्याभूतस्य जगतोऽनादिमिथ्यावभासानिमित्तकल्पनयेति । ततश्च शब्दार्थयोस्तादात्म्यमेव पारमार्थिकम् । भेदस्तु काल्पनिकत्वात्प्रातिभासिक इति तत्त्वम् ।

एतदनुसंधायैव सर्वदर्शनसंग्रहे पाणिनिदर्शने माधवाचार्यैरुक्तम्—अभ्युपगताद्वितीयत्वनिर्वाहाय वाच्यवाचकयोरविभागः प्रदर्शितः—

वाच्या सा सर्वशब्दानां शब्दाच्च न पृथक्ततः ।
अपृथक्त्वेऽपि संबन्धस्तयोर्जीवात्मनोरिव ॥

( आनन्दाश्रममुद्रितपुस्तके पृ० ११६ ) इति ।

सा ब्रह्मसत्ता सर्वशब्दानां वाच्या । ततो वाचकात्स्फोटरूपाच्छब्दाच्च न पृथक् । रज्जूरगादिवदपृथग्भूतयोः शब्दार्थयोर्ब्रह्मण्यध्यस्तत्वेन परमार्थतस्तयोरपृथग्भावस्यैव लाभात् । एवं वाच्यवाचकयोरभेदेऽपि तयोः संबन्धः केवलं कल्पनावशाद्भासते न तु वास्तवः । परमार्थतस्त्वभेद एवेत्यर्थः । तत्र दृष्टान्तो

यथा जीवात्मपरमात्मनोर्वास्तवाभेदेऽपि कल्पनावशाद्व्यवहारदशायां नियम्य-नियामकभावः संबन्धस्तयोर्भासते तद्वदिति तदर्थः ।

अत्रेदं बोध्यम्—भौतिकादिप्रलये नियतकालं भोगो येषां तादृशां सर्वप्राणिकर्मणामुपभोगेन प्रक्षयाल्लीनभुक्तभोग्यसर्वप्राणिका माया चेतन ईश्वरे लीयते। लयश्चायमपुनःप्रादुर्भावफलको नाऽऽत्यन्तिकः । नाशादुत्तरं सर्गानुपपत्तेः । नापि सर्वथाऽभानम् । प्रतिभासमात्रशरीरस्य मिथ्यावस्तुनोऽनवभासे तदभावस्यैवाऽऽपत्तेः। किंत्वन्तःकरणादीनामविद्यायां सूक्ष्मशक्तिरूपेण वासनाभिः सह कार्यप्रवृत्त्यभावपूर्वकं सुप्तवदवस्थानम् । अविद्यायाश्च ब्रह्मणि । ततश्च रज्जूरगादिवदपृथग्भूतस्याऽऽत्मन्यध्यस्तस्याखिलप्रपञ्चस्य शुद्धे ब्रह्मणि लयो भवति। स च न मृदि घटस्येवानुपलब्धिरूपः किंतु रज्ज्वामहेरिव । ततोऽपरिभुक्तप्राणिकर्मफलोपभोगसमयवशेन सिसृक्षावशात् ‘ एकोऽहं बहु स्याम् ’ इति भगवतो बुद्धिर्जायते । सैव मायावृत्तिरित्युच्यते । ततो बिन्दुरूपमव्यक्तं त्रिगुणं जायते । अस्माद्बिन्दोः शब्दब्रह्मापरनामधेयं वर्णादिविशेषरहितं ज्ञानप्रधानं सृष्ट्युपयोग्यवस्थाविशेषरूपं चेतनमिश्रं नादमात्रमुत्पद्यते। एतज्जगदुपादानं स्फोट-रव-परादिशब्दैर्व्यवह्रियते । तदुक्तम्—

> बिन्दोस्तस्माद्भिद्यमानाद्रवोऽव्यक्तात्मकोऽभवत् ।
> स एव श्रुतिसंपन्नैः शब्दब्रह्मेति गीयते ॥ इति ।

एतत्सर्वत्र व्याप्तमपि प्राणिनां मूलाधारे ज्ञातमर्थं विवक्षोः पुंस इच्छया जातेन प्रयत्नरूपेण संस्कृतपवनेनाभिव्यज्यते । षण्णवत्यङ्गुलो देहोच्छ्रायः। तत्राष्टचत्वारिंशदध उपरि च परित्यज्य मध्ये मूलाधार इति प्राहुः । तत्राभिव्यक्तं शब्दब्रह्म स्वप्रतिष्ठतया निष्पन्दं परा वागित्युच्यते । एतदेव शब्दब्रह्मार्थभावेन विवर्तते । अविद्यामिश्रितत्वेन तत्त्वादप्रच्युतमेकं भेदानुकारेणासत्यानेकरूपतां प्रतिभासयति । यथा रज्जुः स्वप्रतिकृतैव सती मायया सर्पाकारेण प्रतिभासते तद्वत् । एवं चाऽऽरम्भवादपरिणामवादौ परित्यज्य विवर्तवादाश्रयणादद्वैतवादिनो व्याकरणशास्त्रप्रवर्तकाचार्या इति सर्वं रमणीयम् । विस्तरस्त्वत्र लघुमञ्जूषायां सटीकमुद्रितपुस्तके १७५–१७७ पृष्ठेषु द्रष्टव्यः । निरुक्तभाष्ये षष्ठाध्यायस्थचतुर्थपादारभ्य सप्तमाध्यायसमाप्तिपर्यन्तमङ्गाधिकारसत्त्वात्तद्गतं भाष्यमङ्गाधिकारभाष्यमिति व्यव-

ह्रियते । तदुपरि जैयटसुतकैयटकृता व्याख्या भाष्यप्रदीप इति कैयट इति चोच्यते । कैयटोपरि भट्टनागेशकृता विवरणापरपर्याया भाष्यप्रदीपोद्द्योतनाम्नी टीका कैयटाशयं विवृण्वती परस्परविरोधपरिहारेण शास्त्रार्थान्निश्चिन्वती भाष्यस्थगूढसिद्धान्तान्प्रकाशयन्ती सर्वोत्कृष्टत्वेन चकास्ति साऽप्यत्र निवेशिता। येयमिदानीं सुदुर्लभा संजाता । नैतावदेव किंतु क्वापि मुद्रितेत्यपि न कर्णपथमारोहति । अतोऽत्र दूरदेशे मुद्रितस्यापि सकैयटाङ्गाधिकारभाष्यस्य मुद्रणे स्थेयान्प्रयत्नोऽङ्गीकृतः संस्थाकार्यनिर्वाहकैः । तदेवं वेदत्रयीमिवातिगम्भीरां ग्रन्थत्रयीं संशोधयितुर्मम मतिमान्द्यादनुपस्थितेर्भ्रान्तेः पुरुषधर्मत्वाद्वा कीलकयोजकानवधानाद्वा यानि स्थले स्थले स्खलितानि तत्प्रदर्शनेन मामनुगृह्णन्तु दयालवः पण्डिताः । येन द्वितीयावृत्तौ तत्परिमार्जनाय प्रयतिष्ये इति सविनयं संप्रार्थ्य श्रीसच्चिदानन्दचरणयोः समर्पयति त्रिदलमिव विवरणकैयटसंवलिताङ्गाधिकारभाष्यस्य प्रथमं भागम्—

| | |
|---|---|
| पुण्यपत्तने<br>शके १८६० ज्ये० शु० १५<br>भानुवासरे. | मारुलकरोपाह्वः शंकरशास्त्री<br>भारद्वाजः । |

ॐ तत्सद्ब्रह्मणे नमः ।

उद्द्योतसमलंकृतप्रदीपसमुद्भासितं

# पातञ्जलव्याकरणमहाभाष्यम् ।

( तत्राङ्गाधिकारः ) ।

## अङ्गस्य ॥ ६ । ४ । १ ॥

आ कुतोऽयमधिकारः । आ सप्तमाध्यायपरिसमाप्तेरङ्गाधिकारः । यद्या सप्तमाध्यायपरिसमाप्तेरङ्गाधिकारो गुणो यङ्लुकोः [ ७. ४. ८२ ] इति यङ्लुग्ग्रहणं कर्तव्यम्* । प्रागभ्यासविकारेभ्यः+ पुनरङ्गाधिकारे सति प्रत्ययलक्षणेन× सिद्धम् । अस्तु तर्हि प्रागभ्यासविकारेभ्योऽङ्गाधिकारः । यदि प्रागभ्यासविकारेभ्योऽङ्गाधिकारो वव्रश्च÷ वकारस्य संप्रसारणं प्राप्नोति । आ सप्तमाध्यायपरिसमाप्तेः पुनरङ्गाधिकारे सत्युरदत्वस्य स्थानिवद्भावान्न संप्रसारणे संप्रसारणम् [ ६. १. ३७ ] इति प्रतिषेधः सिद्धो भवति* । स

---

**प्र०—अङ्गस्य । आ कुत इति ।** अवधिविशेषनिश्चये प्रमाणमदृष्ट्वा पृच्छति । इतरो वव्रश्चेत्यादिसिद्धिं प्रयोजनमभिसंधायाऽऽह—**आ सप्तमाध्यायपरिसमाप्तेरिति** । इतरोऽस्मिन्पक्षे गौरवमुद्भावयितुमाह—**यदि तर्हीति** । न लुमताऽङ्गस्येत्यनेनाङ्गाधिकारविहिते कार्ये प्रतिषिध्यमान इति भावः । न लुमता तस्मिन्निति पाठे तूभयथा दोषप्रसङ्गाल्लुग्ग्रहणं कर्तव्यमेव । **उरदत्वस्येति ।** व्रश्चेर्लिटि द्विर्वचने कृते रेफस्य संप्रसारणं च प्राप्नोति हलादिःशेषेण निवृत्तिश्च । तत्र हलादिःशेषात्संप्रसारणं विप्रतिषेधेनेति पूर्वविप्रतिषेधादुभयेषां ग्रहणाद्वा संप्रसारणम् । उरदत्त्वम् । तस्याङ्गाधिकारे विधीयमानस्याङ्गेन प्रत्ययस्याऽऽक्षेपात्परानिमित्तत्वात्स्थानिवद्भावान्न संप्रसारणे संप्रसारणमिति वकारस्य संप्रसारणनिषेधः सिध्यति । प्रागभ्यासविकारेभ्यस्त्वङ्गाधिकार उरदत्वस्यापरानिमित्तत्वात्स्थानिवद्भावाप्रसङ्गः । तत्र यदा प्रतिषेधवचनात्परस्य तावद्यणः संप्रसारणं क्रियते पूर्वस्य तु प्राप्तं

---

**उ०—अङ्गस्य ।** ननु प्रत्यय इत्याद्यधिकारेषु विचारमकृत्वेह विचारकरणे बीजमाह—**अवधीति** । अन्यत्र लक्ष्यसिद्ध्यादिनाऽवधिनिर्णय इह तु न तथा प्रमाणमुत्पश्याम इति प्रश्न इत्याशयः । **गौरवमिति** । लक्ष्यसिद्धिरूपप्रयोजनसत्त्वेऽपीत्यर्थः । क्रियत न्यास एवेति वक्ष्यमाणपरिहारस्याऽऽशयमत्रैव दर्शयति—**न लुमता तस्मिन्निति** । उभयथा पक्षद्वयेऽपीत्यर्थः । **उभयेषां ग्रहणाद्वेति** । अनुवृत्त्यैव सिद्धे उभयेषां ग्रहणं पुनर्विधानद्वारा हलादिशेषबाधकमित्यर्थः । **अङ्गेन प्रत्ययस्याऽऽक्षेपादिति** । अङ्गसंज्ञानिमित्तकस्यास्य तद्द्वारा परनिमित्तकत्वात्स्थानिवत्त्वमिति भावः । **प्रतिषेधवचनादिति** । यदि पूर्वस्य प्रथमं संप्रसारणं स्यात्तदा निर्वृत्तप्रतिषेधायोगात्प्रतिषेधवचनमनर्थकं स्यादित्यर्थः ।

---

* १. १. ६३. + ७. ४. ५८. × १. १. ६२ ÷ ६. १. १७; ७. ४. ६६; १. १. ५१; ७. ४. ६०. *१. १. ५७.

चेदानीमपरिहारो भवति । यत्तदुक्तमङ्गान्यत्वाच्च सिद्धमिति* । अस्तु तर्ह्या सप्तमाध्यायपरिसमाप्तेरङ्गाधिकारः । ननु चोक्तं गुणो यङ्लुकोरिति यङ्लुग्ग्रहणं कर्तव्यमिति । क्रियते न्यास एव ।

किं पुनरियं स्थानषष्ठी । अङ्गस्य स्थान इति । एवं भवितुमर्हतिं+ ।

**अङ्गस्येति स्थानषष्ठी चेत्पञ्चम्यन्तस्य चाधिकारः ॥ १ ॥**

अङ्गस्येति स्थानषष्ठी चेत्पञ्चम्यन्तस्य चाधिकारः कर्तव्यः । अङ्गादित्यपि वक्तव्यम् । अनुच्यमाने ह्यतो भिस ऐस्भवतीत्यत इति पञ्चम्यङ्गस्येति स्थानषष्ठी तत्राशक्यं विविभक्तिकत्वादत इति पञ्चम्याऽङ्गं विशेषयितुम्× । तत्र

---

प्र०—संप्रसारणं संप्रसारणे परतः प्रतिषिध्यते तदैतदुदाहरणम् । यदा तु संप्रसारणभाविनि यणि परतः पूर्वस्य संप्रसारणप्रतिषेध इति पक्षः समाश्रीयते तदा वव्रश्चेति सिद्धमेवेत्यप्रयोजनमुरदत्त्वेऽङ्गाधिकारस्य । **अङ्गान्यत्वाच्च सिद्धमिति** । सन्वल्लघुनि चङ्पर इत्यत्रामीमपदित्यादौ सन्वद्भावादभ्यासलोपः प्राप्नोति इति चोदिते परिहारः । अङ्गान्यत्वाच्च सिद्धमिति । सन्यङ्गानां मीमादीनामभ्यासलोप इत्युच्यत एतान्यङ्गान्तराणीत्यभ्यासलोपाभावः । सति चाभ्यासविकारेऽङ्गाधिकारेऽयं परिहार उपपद्यते नान्यथा । एष तु परिहारस्तत्रैव दूषयिष्यत इह तु सिद्धवदुपन्यस्तः । **किं पुनरिति** । यदाऽङ्गस्येति शब्दस्वरूपमनपेक्षितार्थमधिक्रियते तदा षष्ठी स्थानेयोगेत्यस्याः परिभाषाया उपस्थानं नास्ति । अनेकसंबन्धसंभवे संबन्धविशेषप्रतिपादनफलत्वात्तस्याः परिभाषायाः । यदा त्वर्थाधिकारपक्षस्तदा परिभाषोपस्थानमिति द्वैतसंभवात्प्रश्नः । आचार्यदेशीयः परिभाषाश्रयेणाऽऽह—**एवं भवितुमर्हतीति** । चोदक आह—**अङ्गस्येति** । **स्थानषष्ठी चेदिति** । चशब्दात्षष्ठ्यन्तस्य चेति विज्ञेयम् । **तत्राशक्यं विविभक्तिकत्वादिति** । ननु चात इति संबन्धादङ्गस्येत्यस्य विभक्तिविपरिणामो भविष्यति । यथोच्चानि देवदत्तस्य गृहा-

---

उ०—**यदा त्विति** । तत्र कृते संप्रसारणादौ निषेधसामर्थ्यात्पुनः संप्रसारणं नेति भावः । भाष्ये दूषणान्तरमाह—**स चेदानीमिति** । प्रागभ्यासविकारेभ्योऽङ्गाधिकारे सति स वक्ष्यमाणोऽपरिहारश्च भवतीत्यर्थः । **अङ्गान्तराणीति** । ण्यन्तत्वादिति भावः । **सिद्धवदिति** । तस्योक्तिसंभवोऽपि न स्यादिति अत्रोच्यत इति भावः । नन्वत्र शास्त्रे परिभाषोपस्थितेर्नियतत्वात्किं पुनरिति प्रश्नानुपपत्तिरत आह—**यदाऽङ्गस्येति** । तत्र शब्दाधिकारे तत्र तत्रोपस्थितस्य यत्र यादृशार्थयोग्यता तत्र तादृशार्थकत्वं भविष्यति । अर्थाधिकारे तु परिभाषोपस्थित्या तदर्थकस्य यत्रान्वययोग्यत्वाभावस्तत्र तदनुपस्थितिरेव स्यात्तत्र कस्य पक्षस्य ग्रहणमिति प्रश्नोपपत्तिरित्यर्थः । **चशब्दादिति** । पञ्चम्यन्तस्य चेति चशब्दादित्यर्थः । **विपरिणाम इति** । एनमित्यस्य विशेषापेक्षायां देवदत्तामिति प्रतीतेरिति भावः ।

---

* ७, ४. ९३ + १. १. ४९. × ७ १ ९.

को दोषः । अकारात्परस्य भिस्मात्रस्यैस्भावो भवतीतीहापि प्रसज्येत । ब्राह्मणभिस्सा ओदनभिस्सटेति ।

**अवयवषष्ठ्यादीनां चाप्रसिद्धिः ॥ २ ॥**

अवयवषष्ठ्यादयश्च न सिध्यन्ति । तत्र को दोषः । शास इदङ्हलोः [ ६. ४. ३४ ] इति शासेश्चान्त्यस्य स्यादुपधामात्रस्य च । ऊदुपधाया गोहः [ ६. ४. ८९ ] इति गोहेश्चान्त्यस्य स्यादुपधामात्रस्य च ।

**सिद्धं तु परस्परं प्रत्यङ्गप्रत्ययसंज्ञाभावात् ॥ ३ ॥**

---

प्र०—ण्यामन्त्रयस्वैनमिति । उच्यते । सर्वनामपरामर्शादत्र विपरिणामः । इह तु नान्तरीयकमुत्तरार्थत्वादङ्गस्येत्यस्योपस्थानं स्यादिति कुतो विभक्तिविपरिणामः । यद्येवं विशेष्यासंनिधानादकारान्तादिति कथं तदन्तविधिः । नेदमदसोरकोरिति प्रतिषेधात्सप्तमीशौण्डैरित्यादेर्वा ज्ञापकात्तदन्तविधिर्भविष्यति । क्वचिदकारात्परस्येति पाठः । भिःसाभिःसटाशब्दावोदनतद्विकारयोर्वाचकौ । **अवयवषष्ठ्यादीनामिति** । आदिशब्दो निमित्तषष्ठीपरिग्रहार्थः । ठस्येक इत्यत्राङ्गस्य निमित्तं यष्ठस्तस्येक इत्याश्रीयते । ननु च षष्ठीस्थानेयोगेत्यत्रैव विचारितं तत्किमर्थं पुनर्विचार्यते । ऊदुपधाया गोह इत्यत्र गोह इत्येषा स्थानषष्ठी स्यादित्येवं तत्र विचारितम् । इह त्वङ्गस्येत्यस्यां स्थानषष्ठ्यां विज्ञायमानायां तत्सामानाधिकरण्याद्गोह इत्यपि स्थानषष्ठी स्यादिति विचार्यते । ततश्च स्थानषष्ठ्या अन्त्येऽल्युपसंहारादुपधाग्रहणाच्च गोहोऽन्त्यस्योत्त्वमुच्येत, उपधामात्रस्य च । आद्यं तावच्चोद्यं परिहर्तुमाह—**सिद्धं त्विति** । प्रत्ययोत्पत्तौ प्रकृतेर्नि-

---

उ०—संबन्धानुपपत्तिर्विभक्तिविपरिणामे प्रमाणं स्यादत आह—**इह त्विति** । तथा चात्र संबन्ध एव नेति न तदनुपपत्तिः प्रमाणमिति भावः । भाष्येऽकारान्तात्परस्येति पाठमाश्रित्य शङ्कते—**यद्येवमिति** । अङ्गस्येत्यस्य संबन्धाभाव इत्यर्थः । **नेदमदसोरिति** । भिसाऽऽक्षिप्तप्रकृतिविशेषणत्वेन तदन्तविधाविदं ज्ञापकम् । यद्यपीद्रूपलोपे अ भिसित्यत्र तदन्तविध्यभावेऽपि प्राप्तेः प्रतिषेध उपपद्यते तथाऽप्यदसः स ज्ञापकः, अकोरिति प्रतिषेधश्चेति भावः । ऐस्विधायकं तु विष्णुवाचकाशब्दादर्थवतो भिस ऐस्विधानेन चरितार्थमित्यभिमानः । तदन्तविध्यभावेऽपि अकारात्परत्वेनेदं सर्वमुपपन्नं वर्णग्रहणे नार्थवत्परिभाषा प्रकृत्याक्षेपे च न मानमित्याशयेनाऽऽह—**क्वचिदकारात्परस्येति** । **ओदनतद्विकारयोरिति** । दग्धौदनो हि भिःसटा । भिःसा स्त्री भक्तमन्धोऽन्नं, भिःसटा दग्धिकेति कोशादिति भावः । **अङ्गस्य निमित्तमिति** । अन्यथा कर्मठेऽतिप्रसङ्गः स्यादिति भावः । अतो भिस इत्यतोऽस्य को विशेष इति चिन्त्यम् । तस्मादादिशब्दस्याऽऽश्रयवाचितया तदाश्रयाणां कार्याणामप्रतिपत्तिरित्यर्थ उचितः । **स्थानषष्ठी स्यादिति** । षष्ठी स्थानेयोगेति नियमादिति भावः । अङ्गप्रत्ययसंज्ञयोः परस्परापेक्षत्वं कथमत आह—**प्रत्ययोत्पत्ताविति** । प्रत्ययसंज्ञाविशिष्टस्योत्पत्तावित्यर्थः । संज्ञिनोर्निमित्तत्वेन च संज्ञ-

सिद्धमेतत् । कथम् । परस्परं प्रत्यङ्गप्रत्ययसंज्ञे भवतः । अङ्गसंज्ञां प्रति प्रत्ययसंज्ञा प्रत्ययसंज्ञां प्रत्यङ्गसंज्ञा । किमतो यत्परस्परं प्रत्यङ्गप्रत्ययसंज्ञे भवतः ।

**संबन्धषष्ठीनिर्देशश्च ॥ ४ ॥**

---

**प्र०**–मित्तत्वेनाऽऽश्रयणात्प्रकृतिमन्तरेण प्रत्ययो नास्ति प्रत्यये परतोऽङ्गसंज्ञाविधानात्प्रत्ययानपेक्षमङ्गं नास्ति । तत्रान्यतरस्मिन्नुपादीयमानेऽव्यभिचारादितरस्याऽऽक्षेप इत्यर्थः । इतरस्तु सत्यपि परस्पराक्षेपे स्थानषष्ठ्यां सत्यां संबन्धान्तरस्य विनाशं मत्वाऽऽह— **किमत इति । संबन्धषष्ठीनिर्देशश्चेति** । अयं भावः । प्रतिसूत्रमङ्गस्येत्यस्य शब्दरूपस्योपस्थाने यत्र विशिष्टसंबन्धो निमित्तनिमित्तिभावादिकः संभवति तत्र परिभाषाया उपस्थानाभावः । यत्रानेकसंबन्धसंभवस्तत्र संबन्धान्तरव्यवच्छेदफलायाः परिभाषाया उपस्थानम् । तत्र संबन्धसामान्येऽनाश्रितविशेषेऽङ्गस्येति षष्ठी न तु स्थान्यादेशसंबन्ध एवेत्ययमर्थः संबन्धषष्ठीनिर्देशश्चेति । अधिकारस्य पारार्थ्याद्वक्ष्यमाणानेकसंबन्ध्यनु-

---

**उ०**–योर्निमित्तत्वं भगवतोक्तम् । ननु परस्परापेक्षत्वोपपादनस्य क उपयोगस्तत्राऽऽह— **तत्रान्यतरस्मिन्निति** । यथाऽत्रैवाङ्गनिमित्तस्य भिस इत्युक्त्या तस्य प्रत्ययत्वे लब्धे तेन प्रातिपदिकरूपप्रकृत्याक्षेपः । आक्षेपश्च प्रातिपदिकात्परस्य भिस इति वाक्यैकदेशत्वानुमानम् । भिस इत्यस्य यस्माद्विहितस्तदादेरित्यस्य योग्यतया पञ्चम्यन्तस्य वा एतदर्थमेवात्र स्थाने भाष्ये परस्परं प्रतीत्युक्तम् । अन्यथा प्रत्ययसंज्ञां प्रत्यङ्गसंज्ञेत्येवाङ्गस्येत्यस्य संबन्धषष्ठीत्वोपपत्तौ तदनुपयोगः स्पष्ट एव । तत्राङ्गनिमित्तस्येत्यस्याभावे ब्राह्मणभिस्सेत्यत्रातिप्रसङ्गः । प्रातिपदिकात्परस्येत्यस्याभावे तदन्तविध्यलाभः । विभक्तिविपरिणामेनाङ्गात्परस्येत्यर्थेऽपि ब्राह्मणभिःसेत्यत्रातिप्रसङ्गः । प्रत्ययलक्षणेन ब्राह्मणेत्यस्याङ्गत्वात् । प्रत्यासत्तिस्तु दुर्ज्ञेयेत्युभयोपादानम् । किंच भिसः प्रत्ययस्यैव ग्रहणमित्यत्र न मानमिति प्रत्यासत्तिरतिदुर्ज्ञेयेति भावः । वस्तुतोऽदन्तादित्यस्य न फलमित्याक्षेपोऽत्र व्यर्थः । परस्परं प्रतीतिस्वरूपकथनमेव दृष्टान्तार्थमित्याहुः । परास्पराक्षेपे तत्प्रयोजके निमित्तनिमित्तिभावे इत्यर्थः । विनाशः अप्रतीतिः । किमत इत्यादेरुत्तरं भाष्ये— **सबन्धषष्ठीनिर्देशश्चेति** । संबन्धसामान्ये या षष्ठी तदन्तस्य शब्दस्यायं निर्देश इति वार्तिकार्थ इत्यभिप्रेत्याऽऽह—अयंभाव इति । यथाश्रुते तु सर्वस्याः षष्ठ्याः संबन्धषष्ठीत्वादनुपपत्तिः स्पष्टैव । **यत्र विशिष्टेति** । अतो भिस ऐस्, युवोरनाकावित्यादौ निमित्तनिमित्तिभावः । ऊदुपधाया इत्यादाववयवावयविभाव एवेति । तत्रानियमाभावान्नियमार्थपरिभाषाया अनुपस्थितिरित्यर्थः । **अयमर्थः संबन्धषष्ठीनिर्देशश्चेति** । संबन्धषष्ठीनिर्देशश्चेत्यस्यायमर्थ इत्यन्वयः । क्वचित्तु तथैव पाठः । नन्वर्थाधिकारपक्षे षष्ठीस्थान इति परिभाषणात्स्थानसंबन्ध एव षष्ठी युक्तेत्यत आह—**अधिकारस्येति** । एवं चाधिकारपरिभाषयोः पारार्थ्याद्गुणत्वेन परस्परमसंबन्धात्परिभाषा नोपतिष्ठते इत्यर्थः । नन्वेवं

संबन्धषष्ठीनिर्देशश्चायं कृतो भवति। अङ्गस्य यो भिस्शब्द इति। किंचाङ्गस्य भिस्शब्दः। निमित्तम्। यस्मिन्नङ्गमित्येतद्भवति। कस्मिंश्चैतद्भवति। प्रत्यये। एवमप्यवयवषष्ठ्यादयोऽविशेषिता भवन्ति। अवयवषष्ठ्यादयोऽपि संबन्ध एव। एवमपि स्थानमाविशेषितं भवति। स्थानमपि संबन्ध एव। एवमपि न ज्ञायते क्व स्थानषष्ठी क्व विशेषणषष्ठीति। यत्र षष्ठ्यन्ययोगं नापेक्षते सा स्थानषष्ठी। यत्र ह्यन्ययोगमपेक्षते सा विशेषणषष्ठी।

कानि पुनरङ्गाधिकारस्य प्रयोजनानि—

---

प्र०—ग्रहाय संबन्धसामान्यमुपादाय प्रवृत्ता षष्ठी प्रतियोगमुपतिष्ठमाना यथासंभवं संबन्धविशेषफलोपतिष्ठते। इह तु प्रतियोग्यनुपादानादपर्याप्ता विशेषमवगमयितुम्। ततो यथा देवदत्तस्येति संबन्धमात्राश्रयेणोपात्ता षष्ठी पुत्रः पाणिः कम्बल इत्येवमादिभिर्विजातीयः संबन्धिभिः संबध्यमाना विशेषावगतिनिमित्ततां यात्येवमङ्गस्येत्यपि। तत्र शब्दस्वरूपं वाऽधिक्रियतामर्थो वा संबन्धमात्रलक्षणः। उभयथा दोषाभावात्। तत्राङ्गस्य भिसा संबन्धान्तरं न संभवतीति भिसा निमित्तनिमित्तिभावः समाश्रीयत इति ब्राह्मणभिस्सादावतिप्रसङ्गाभावः। इतरो यथोक्तमर्थमप्रतिपद्य निमित्तनिमित्तिभाव एव संबन्धेऽङ्गस्येति षष्ठीत्यनेनोक्तमिति मत्वा पृच्छति—**एवमपीति**। इतरः पूर्वोक्तेनाभिप्रायेणाऽऽह—**अवयवषष्ठ्यादय इति**। स्थानसंबन्धः सर्वथा परित्यक्त इति मत्वाऽऽह—**एवमपीति**। **स्थानमपि संबन्ध एवेति**। संबन्धनिमित्तत्वात्संबन्ध इत्यर्थः। **यत्र षष्ठीति**। सामर्थ्याद्विषयविभागोऽवतिष्ठत इत्यर्थः। ऊदुपधाया गोह इत्यवयवस्योपादानादङ्गस्य गोह इत्युपधापेक्षाऽवयवषष्ठी संपद्यते। अतो भिस ऐसित्यादौ तु निमित्तषष्ठी। संबन्धविशेषावधारणहेत्वभावे तु स्थानषष्ठीत्यर्थः। **कानि पुनरिति**। अर्थव-

---

उ०—संबन्धसामान्यार्था षष्ठी कथमुत्तरत्र विशेषमुपस्थापयेदत आह—**वक्ष्यमाणेति**। सामान्यशब्दस्यापि योग्यतावशाल्लक्षणया वा तत्र तत्र विशेषोपस्थापकत्वामिति भावः। ननु यथोत्तरत्र विशेषे पर्यवसानं तथेहापि स्यादत आह—**इह त्विति**। ननूक्तन्यायेनावयवषष्ठ्यादीनामपि सिद्धत्वादेवमपीत्यादिप्रश्नासङ्गतिरत आह—**इतर इति**। भाष्ये—**अविशेषिता इति**। असंगृहीता इत्यर्थः। भाष्येऽवयवषष्ठ्यादयोऽपि संबन्धे एव जायन्त इत्यर्थः। यद्वा तद्वाच्यावयवत्वादयोऽपि संबन्धेऽन्तर्भूता इत्यर्थः। **स्थानसंबन्धः सर्वथेति**। संबन्धद्वयमेवानेन गृहीतमिति भावः। ननु प्रसङ्गोऽर्थो वा स्थानं तन्निरूपितो हि संबन्धो नतु तदेव संबन्धोऽत आह—**संबन्धनिमित्तत्वादिति**। संबन्धिनौ हि संबन्धस्य निमित्तं निमित्तनिमित्तिनोरभेदोपचारादेवमुक्तिरित्यर्थः। **संबन्धविशेषेति**। यथा हन्तेर्ज इत्यादौ। अन्यं योगं नापेक्षत इति भाष्यस्य स्थानातिरिक्तसंबन्धिनं नापेक्षत इत्यर्थः। अन्ययोगसंबन्धमिति पाठे अन्यसंबन्धिनिरूपितं संबन्धमपेक्षत इत्यर्थः। यद्यपि स्थानषष्ठ्यपि

### अङ्गाधिकारस्य प्रयोजनं संप्रसारणदीर्घत्वे ॥ ५ ॥

हल उत्तरस्य संप्रसारणस्य दीर्घो भवति* । हूतः जीनः संवीतः शूनः । अङ्गस्येति किमर्थम् । निरुतम् दुरुतम् ।

### नाम्सनोश्च ॥ ६ ॥

नाम्सनोश्च दीर्घत्वे प्रयोजनम् । नामि दीर्घो भवति+ । अग्नीनाम् वायूनाम् । अङ्गस्येति किमर्थम् । क्रिमिणां× पश्य । पामनां पश्य । सनि दीर्घो भवति÷ । चिचीषति तुष्टूषति । अङ्गस्येति किमर्थम् । दधि सनोति । मधु सुनोति ।

### लिङ्यत्वे ॥ ७ ॥

लिङ्येत्वे* प्रयोजनम् । ग्लेयात् म्लेयात् । अङ्गस्येति किमर्थम् । निर्यायात् निर्वायात् ।

### अतो भिस ऐस्त्वे ॥ ८ ॥

अतो भिस ऐस्त्वे++ प्रयोजनम् । वृक्षैः प्लक्षैः । अङ्गस्येति किमर्थम् । ब्राह्मणभिस्सा ओदनभिस्सटा ।

---

**प्र०**—दृग्रहणप्रत्ययग्रहणाभ्यां सर्वस्येष्टस्य सिद्धिं मत्वा प्रश्नः । **संप्रसारणदीर्घत्व इति** । हल इत्यत्राङ्गस्येत्यस्यानुवृत्तस्याऽऽवृत्त्याऽङ्गस्येत्यनेन हल्विशेष्यते संप्रसारणेन चाङ्गं विशेष्यत इति तदन्तविधिर्भवतीत्ययमर्थो भवति—अङ्गावयवाद्धलो यदुत्तरं संप्रसारणं तदन्तस्याङ्गस्य दीर्घो भवतीति । **हूत इति** । ह्वेञः क्तः । **जीन इति** । ज्या वयोहानौ । ग्रहिज्यादिसूत्रेण संप्रसारणम् । ल्वादिभ्य इति निष्ठातकारस्य नत्वम् । **संवीत इति** । व्येञ् संवरणे । क्तः । यजादित्वात्संप्रसारणम् । संप्रसारणान्ताङ्गग्रहणाद्विद्ध इत्यादौ दीर्घाभावः । **निरुतमिति** । वेञो निरुपसृष्टस्य निष्ठायां संप्रसारणम् । **क्रिमिणामिति** । क्रिमयोऽस्यां सन्तीति पामादित्वान्नप्रत्ययः । टाप्प्रत्ययः । द्वितीयैकवचनम् । लाक्षणिकत्वादस्य न भवतीति चेन्न । प्रतिपदोक्तस्य नामोऽभावात्षष्ठीबहुवचनस्यापि नुटि कृते लाक्षणिकमेव नामिति रूपम् । **दधि सनोतीति** । सानुबन्धोऽयं धातुरिति चेत् । प्रत्ययोऽपि नकारेत्संज्ञकत्वात्सानुबन्धकः । धातोश्चाव्यभिचारी नकार इति तस्यैव ग्रहणप्र-

---

**उ०**—विशेषणषष्ठ्येव तथाऽपि ब्राह्मणवसिष्ठन्यायेन निर्देशः । हल इत्यत्राङ्गस्येत्यस्य द्वेधोपकारं दर्शयति—**हल इत्यत्रेति** । आवृत्तिफलं दर्शयति—**विद्ध इत्यादाविति** । **क्रिमयोऽस्यामिति** । क्रिमिशब्दस्य नप्रत्ययापेक्षयाऽङ्गत्वेऽपि नाम्निरूपिताङ्गत्वाभावाद्दीर्घाभाव इत्यर्थः । **सानुबन्धक इति** । षणु दान इत्युकारानुबन्धत्वात् । ननु येनानुबन्धेन सानुबन्धत्वं तदनुच्चारण एव निरनुबन्धकपरिभाषाप्रवृत्तिरित्यत आह—**धातोश्चेति** । अङ्गाधिकाराभावे दधि सिनोति, इत्यादावेव स्यान्नतु चिचीषतीत्यादाविति भाष्याशय इति

---

* ६ ४. २. + ६, ४. ३ × ५, २, १००. ÷ ६. ४. १६ * ६. ४. ६८. ++ ७. १. ९.

## लुङादिष्वडाटौ ॥ ९ ॥

लुङादिष्वडाटौ* प्रयोजनम् । अकार्षीत् ऐहिष्ट । अङ्गस्येति किमर्थम् । प्राकरोत् उपैहिष्ट ।

## इयङुवङ्युष्मदस्मत्तातङामिनुडानेमुक्केह्रस्वयिदीर्घभितत्वानि ॥ १० ॥

इयङुवङौ+ प्रयोजनम् । श्रियौ श्रियः । भ्रुवौ भ्रुवः । अङ्गस्येति किमर्थम् । श्र्यर्थम् भ्र्वर्थम् । युष्मदस्मदोः प्रयोजनम् । साम आकम् [ ७. १. ३३ ] युष्माकम् अस्माकम् । अङ्गस्येति किमर्थम् । युष्मत्साम । अस्मत्साम । तातङ्× प्रयोजनम् । जीवताद्भवान् । अङ्गस्येति किमर्थम् । पच हि तावत्त्वम् । जल्प तु तावत्त्वम् । आमि नुट् ÷प्रयोजनम् । कुमारीणाम् किशोरीणाम् । अङ्गस्येति किमर्थम् । कुमारी आमित्याह । किशोरी आमित्याह । आने मुक् [ ७. २. ८२ ] प्रयोजनम् । पचमानः यजमानः । अङ्गस्येति किमर्थम् । प्राणः । के ह्रस्वः *प्रयोजनम् । किशोरिका कुमारिका । अङ्गस्येति किमर्थम् । कुमारीं कायति कुमारीकः । यि दीर्घः++ प्रयोजनम् ।

---

प्र०—सङ्गः । **पच हि इति** । हितू निपातौ । तत्राऽऽशिषि लोटो हेरन्यतरस्यां तातङ्विधानात्पक्षे तदभावादतो हेरिति हेर्लुकि कृते निपातयोरपि तुह्योः प्रतिव्यक्ति लक्षणप्रवृत्तौ अभावोपक्रमेऽपि तातङ्प्रसङ्गः। तथा चोच्यते—विभाषिताः प्रयोजयन्ति द्रोग्धा द्रोग्धा द्रोढा द्रोढेति । **प्राण इति** । प्रपूर्वस्यानितेर्घञि वृद्धौ च कृतायां प्र आन इति स्थिते मुक्प्रसङ्गः सार्वधातुकाधिकारेऽनपेक्ष्यमाणे । ननु धातूपसर्गयोरेकादेशेनान्तरङ्गत्वाद्भाव्यं न तु वृद्ध्या । नैतदस्ति । वार्णादाङ्गस्य बलीयस्त्वात् । तथा च प्रत्यय इत्यादौ सवर्णदीर्घत्वाभावः । अत्र तु लाक्षणिकत्वेनापि मुक्निरासो वक्तुं शक्यते । **कुमारिकेति** । अल्पाद्यावर्थे प्रागि-

---

उ०—भावः । अङ्गाधिकारे तु सनि परेऽङ्गस्य दीर्घ इत्यर्थे प्रत्यासत्त्या सन्प्रत्ययस्यैव तन्निरूपिताङ्गस्यैव च ग्रहणान्न दोष इति बोध्यम् । नन्वेकस्या आकृतेरिति न्यायादभावोपक्रमे कथं तद्भावोऽत आह—**अभावोपक्रमेऽपीति** । तिङ्व्यक्तिविषयेऽभावोपक्रमेऽपि निपातविषये तदभावात्तत्प्रसङ्ग इति भावः । किंच सार्थकानेकविषये एवैष न्यायः । नचाभावोऽर्थवानित्यर्थं दृष्टान्तव्याजेनाऽऽह—**तथा चेति** । सर्वस्य द्वे इत्यत्र पूर्वत्रासिद्धीयमद्विर्वचने इत्यस्य प्रयोजनत्वेनैतद्भगवता वक्ष्यते । तत्र हि तदभावे घत्वादिभ्यः पूर्वं द्वित्वे द्रोग्धा द्रोढेत्येव स्यादित्यापादितम् । तच्चैतन्न्यायस्य सार्वत्रिकत्वाङ्गीकारे विरुध्येत । मम तु घढयोरनर्थकत्वान्न तद्विषये एतन्न्यायप्रवृत्तिरिति न दोष इति भावः । **सार्वधातुकाधिकार इति** । रुदादिभ्यः सार्वधातुक इत्यतः । **वार्णादाङ्गस्येति** । असमानकालप्राप्तिकेऽपि तन्न्यायप्रवृत्तिः । यत्र तु नेष्टा तत्रानित्यत्वमाश्रयणीयमिति भावः । अत एव प्रत्यय इत्यत्र सवर्णदीर्घं बाधित्वा गुणः । सुट्कात्पूर्व इति सूत्रभाष्योक्तरीत्या तु शङ्कैवेयं निर्दला । **लाक्षणिकत्वेनापीति** ।

---

*६. ४. ७१. ७२. +६. ४. ७७. ×७. १. ३५. ÷७. १. ५४. *७. ४. १३. ++७. ४. २५.

चीयते स्तूयते । अङ्गस्येति किमर्थम् । दधियानम् मधुयानम् । भि तत्वं** प्रयोजनम् । अद्भिः अद्भ्यः । अङ्गस्येति किमर्थम् । अब्भारः अब्भक्षः । नैतानि सन्ति प्रयोजनानि । कथम्—

**अर्थवद्ग्रहणप्रत्ययग्रहणाभ्यां सिद्धम् ॥ ११ ॥**

अर्थवद्ग्रहणप्रत्ययग्रहणाभ्यामेवैतानि सिद्धानि । क्वचिदर्थवद्ग्रहणे नानर्थकस्येत्येवं भविष्यति क्वचित्प्रत्ययाप्रत्यययोर्ग्रहणे प्रत्ययस्यैव ग्रहणं भवतीति । अथवा प्रत्यय इति प्रकृत्याङ्गकार्यमध्येष्ये । यदि प्रत्यय इति प्रकृत्याङ्गकार्यमधीषे प्राकरोत् उपेहिष्ट उपसर्गात्पूर्वमडाटौ प्राप्नुतः । सिद्धं तु प्रत्ययग्रहणे

प्र०—वात्कः । **कुमारीक इति** । अत्रापि लाक्षणिकत्वात्कस्य ह्रस्वाभावः सिध्यति । **क्वचिदर्थवद्ग्रहण इति** । अयं परिहारो निरुतं विद्ध इत्यादौ संप्रसारणदीर्घत्वे न संभवति । तत्र क्रिमिणामित्यत्र नाम्न प्रत्ययो नाप्यर्थवान् प्रत्ययत्रयार्थस्य परस्परानन्वयादिति दीर्घाप्रसङ्गः। **दधि सनोतीति** । सनोऽप्रत्ययत्वाद्दीर्घाभावः । निर्यायादित्यादौ संयोगादेरानर्थक्यादेत्वाभावः । अडाटोस्तु नायं परिहारः । ब्राह्मणभिस्सेत्यादौ भिसोऽप्रत्ययत्वादानर्थक्याच्चैसोऽप्रसङ्गः । इयङुवङोस्तु नायं परिहारः । वर्णग्रहणेषु परिभाषाद्वयस्यानुपस्थानाद्यथेको यणचीति दध्याशयतीत्यादावप्रत्ययेऽप्यनर्थकेऽप्यचि यणादेशो भवत्येवं श्र्यर्थमित्यादावियङुवङ्प्रसङ्गः । **युष्मत्सामेति** । साम्नोऽप्रत्ययत्वादानर्थक्याच्चाकमोऽप्रसङ्गः । तुह्योर्निपातयोरप्रत्ययत्वात्तातङोऽप्रसङ्गः । एवमामोऽप्रत्ययस्यानुकरणस्य नुडभावः । प्राण इत्यत्राऽऽनस्याप्रत्ययत्वान् मुगभावः। भि तत्वेऽयं परिहारो नोपपद्यते । वर्णग्रहणात् । अत एवाव्यापकत्वमस्य परिहारस्य मत्वाऽऽह—**अथवेति** । **सिद्धं त्विति** । यत्र प्रत्ययो निमित्तत्वेनोपादीयते तत्र पूर्वः कार्यित्वेन गृह्यमाणो यस्मात्स विहितस्तदादिर्गृह्यते । एतच्चाङ्गसंज्ञासूत्रे योगविभागेन साधितम् । यत्र तु प्रत्यय एव कार्यित्वेनोपादीयते तत्र तदन्तग्रहणमिति द्वे एते परिभाषे ।

उ०—निरनुबन्धपरिभाषालक्षणपरिभाषाभ्यामुभयग्रहणस्य संभवाच्चिन्त्यमिदम् । भाष्ये क्वचित्प्रत्ययग्रहणेऽप्रत्ययस्य नेतीति पाठः । **न प्रत्यय इति** । प्रत्ययत्रयसमुदायस्याप्रत्ययत्वादिति भावः । **अडाटोस्त्विति** । सोपसर्गस्यार्थवत्त्वात् । प्रत्ययग्रहणपरिभाषाया असंभवाच्च । लुङा धात्वाक्षेपेण शक्यवारणमिदम् । **वर्णग्रहणेष्विति** । इयङादिविधावङ्गाधिकाराभावे प्रत्ययस्यासंनिधानादज्रूपवर्णाश्रय एव स इति भावः। अङ्गाधिकारे तु इवर्णाद्यन्ताङ्गस्य निमित्तेऽजादौ प्रत्यये परतः प्रत्यासत्त्या तस्यैवाङ्गस्येयङादीत्यर्थो बोध्यः । आमोऽप्रत्ययत्वे हेतुः—अनुकरणस्येति । **तत्र पूर्व इति** । प्रत्ययविधौ चापश्चम्या इति निषेधात्तदन्तविधेरभाव **इति भावः**। न च प्रत्यये इत्यधिकारेऽपि उक्तरीत्या परस्पराव्यभिचारादङ्गाक्षेपेण सिद्धे परिभाषापर्यन्तधावनमफलमिति वाच्यम् । प्रत्ययस्योत्पत्तावङ्गापेक्षत्वेऽपि ज्ञाने तदपेक्षत्वाभावेन शास्त्रे तदाक्षेपे मानाभाव इत्याशयात् । **योगविभागेनेति** । यस्मात्प्रत्ययविधिस्तदादिप्रत्यय इत्यनेनेत्यर्थः। **द्वे एते इति**। आद्या योगविभागसिद्धा। अन्त्या तदन्तपरिभाषासिद्धेति **बोध्यम्**।

** ७, ४. ४८.

यस्मात्स तदादितदन्तविज्ञानात्** । सिद्धमेतत् । कथम् । प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदन्तस्य च ग्रहणं भवतीत्येवमुपसर्गात्पूर्वमडाटौ न भविष्यतः ।

**हलः । ६ । ४ । २ ।**

इह कस्मान्न भवति । तृतीयः++ ।

**अण्प्रकरणादृकारस्याप्राप्तिः ।**

अण्प्रकरणादृकारस्य दीर्घत्वं न भविष्यति । अण इति वर्तते । क प्रकृतम् । ढ्रलोपे पूर्वस्य दीर्घोऽणः [ ६. ३. १११ ] इति । तद्वा इकः काशे [ १२३ ] इत्यनेनेग्ग्रहणेन व्यवच्छिन्नं न शक्यमनुवर्तयितुम् ।

**इग्ग्रहणस्य चाण्विशेषणत्वात् ।**

अण्विशेषणमिग्ग्रहणम् । अण इक इति । यदि तर्ह्यण्विशेषणमिग्ग्रहणं चौ× दीर्घो भवतीतीह न प्राप्नोति । अवाचा अवाचे । नैष दोषः । अण्ग्रहणमनुवर्तत इग्ग्रहणं निवृत्तम् । एवमपि कर्तृचा कर्तृचे अत्र न प्राप्नोति । यथाल-

---

प्र०—अङ्गाधिकारप्रत्याख्यानाय प्रत्ययाधिकारे क्रियमाणे न किंचित्प्रयोजनं दृश्यते । अतो भिस ऐसित्यादिषु विविभक्तिकत्वाद्भिसादीनां प्रत्ययेन संबन्धो दुरुपपादः । हल इति संप्रसारणदीर्घत्वं च निरुतं दुरुतमित्यादौ न परिहृतं भवति ।

हलः । अण्ग्रहणमिक्ग्रहणेन विच्छिन्नमिति मत्वाऽऽह—**इह कस्मादिति । अण्विशेषणमिति** । प्रकाश इत्यादावकारस्य दीर्घनिवृत्त्यर्थमिकाऽण्विशेष्यत इत्यर्थः । **अवाचेति** । चावित्यत्रेग्ग्रहणानुवर्तनादकारस्य दीर्घाप्रसङ्गः । यथेकः काशे इत्यत्र विरोधाभावादाणिकोः संबन्ध एवं योगान्तरेऽपीति भावः । लक्ष्यनिबन्धनापेक्षावशादधिकाराणां निवृत्त्यनुवृत्ती इति मत्वाऽऽह—**नैष दोष इति । एवमपीति** । केवलाण्ग्रहणानुवृत्तावपि दोष इत्यर्थः । तन्निवृत्तौ त्वचूपरिभाषोपस्थानादृकारस्यापि दीर्घः सिध्यति । **यथालक्षणमिति** । मा भूदत्र दीर्घत्वमित्यर्थः । अथाऽऽनन्त्यात्प्रयोगविषयस्य कर्तृचेत्यादिप्रयोगः स्यादित्युच्यते तत्रापि ब्रूमः—**अथवेति** । चावित्यत्रोभयाननुवर्तनात्कर्तृच इत्यादिसिद्धिः ।

---

उ०—अयं परिहारः प्रौढ्येत्याह—**अङ्गाधिकारेति । न किंचित्प्रयोजनमिति** । अक्षरसाम्येन लाघवाभावात् । मात्राधिक्येन गौरावाच्चेति भावः । विभक्तिपरिणामेन कथंचित्संबन्धस्योपपादयितुं शक्यत्वेऽप्याह—**हल इतीति** । तस्मादङ्गाधिकारः कर्तव्य इति भगवतो गूढाभिसंधिरिति भावः । नैतानीत्यादिग्रन्थ एकदेश्युक्तिरिति तात्पर्यम् ।

**हलः** । ननु ढ्रलोप इत्यतोऽण्ग्रहणानुवृत्तेः पूर्वेणाण्ग्रहणात्तृतीये दीर्घाप्राप्तिरत आह—**अण्ग्रहणमिति** । इकः काश इतीक्ग्रहणेनेत्यर्थः । **मा भूदत्रेति** । अप्रयुक्ते लक्षणाप्रवृ-

---

** १. ४. १३. ++ ५. २. ५५. × ६. ३. १३८.

क्षणमप्रयुक्ते । अथवोभयं निवृत्तम् । कस्मान्न भवति तृतीय इति । निपातनात् । किं निपातनम् । द्वितीयतृतीयचतुर्थतुर्याण्यन्यतरस्याम् [ २. २. ३ ] इति ।

## नामि । ६ । ४ । ३ ।

किमर्थमामः सनकारस्य ग्रहणं क्रियते न आमि दीर्घ इत्येवोच्येत । केनेदानीं सनकारके भविष्यति । नुडयमाम्भक्त आम्ग्रहणेन ग्राहिष्यते । अत उत्तरं पठति ।

नामि दीर्घ आमि चेत्स्यात्कृते दीर्घे न नुड्भवेत् ।

नामि दीर्घ आमि चेत्स्यात्कृते दीर्घत्वे न नुट् स्यात् । अग्नीनाम् इन्दूनाम् । इदमिह संप्रधार्यम् । दीर्घत्वं क्रियतां नुडिति* किमत्र कर्तव्यम् । परत्वान्नुट् । नित्यं दीर्घत्वम् । कृतेऽपि नुटि प्राप्नोत्यकृतेऽपि । नित्यत्वाद्दीर्घत्वे कृते ह्रस्वाश्रयो नुड्न प्राप्नोति । एवं तर्ह्याहायं ह्रस्वान्तान्नुडिति न च ह्रस्वान्तोऽस्ति तत्र वचनाद्भविष्यति ।

प्र०–**नामि** । नुड्दीर्घयोरेकविषयत्वादुभयानुग्रहाय पूर्वं नुटि कृतेऽव्यवधायकत्वादागमानां दीर्घो भविष्यत्यन्तरेण सनकारकनिर्देशमिति मत्वाऽऽह–**किमर्थमिति** । इतरश्चोदकबुद्धिपरीक्षार्थमाह–**केनेदानीमिति** । चोदकः स्वाभिप्रायमाह–**आमिति** । **नामि दीर्घ इति** । योऽयं नामि दीर्घ उच्यते स यद्यामीति सूत्रन्यासेनाऽऽमि स्यात्तदा नित्यत्वान्नुटं बाधित्वा दीर्घे प्रवृत्ते ह्रस्वान्तत्वाभावादग्नीनामित्यादौ नुण्न स्यादित्यर्थः । इतरस्त्वनवकाशत्वादशक्यो नुड्बाधितुमिति मत्वाऽऽह—**इदमिहेति** । नन्वनवकाशत्वाद्विप्रतिषेधानुपपत्तौ कथमुच्यते परत्वान्नुडिति । एवं मन्यते द्वावपि नुड्दीर्घावनवकाशौ तत्राङ्गप्रत्यययोर्युगपन्निमित्तनिमित्तिभावाभावादवश्याश्रयितव्ये क्रमे विप्रतिषेधोपपत्तिः । वाक्यकारेण तु संभवमात्रमाश्रित्योक्तं द्वौ प्रसङ्गावन्यार्थावेकस्मिन्युगपत्प्राप्नुतः स विप्रतिषेध इति । तत्रानवकाशत्वात्पुनःप्रसङ्गविज्ञानाद्दीर्घत्वम् । **नित्यं दीर्घत्वमिति** । तिसृणां चतसृणां नृणामित्यत्र सावकाशो नुडग्नीनामित्यादौ नित्यत्वाद्दीर्घेण बाध्यते । **तत्र वचनादिति** । भूतपूर्वगत्येति भावः । **वच-**

उ०–**नामि** । नन्वसति सनकारग्रहणे नित्यत्वात्पूर्वं दीर्घे कृते ह्रस्वान्तस्य विधीयमानो नुट्न स्यादत आह—**नुड्दीर्घयोरिति** । **अव्यवधायकत्वादिति** । नुट आम्भक्तत्वेन तद्ग्रहणेन ग्रहणादित्यर्थः । **तिसृणां नृणामिति** । भिन्नविषयसत्त्वादिति

(प्र० cont.) **-नेरीदृशं** लक्ष्यमेव नास्तीत्यर्थः । **सिद्धिरिति** । वस्तुतो लाघवमाश्रित्यैवोभयनिवृत्तिरुच्यते इति बोध्यम् ।

* ७. १. ५४

वचनाद्यत्र तन्नास्ति

**नेदं वचनाल्लभ्यम्** । अस्ति ह्यन्यदेतस्य वचने प्रयोजनम् । किम् । यत्र दीर्घत्वं प्रतिषिध्यते । तिसृणाम् चतसृणामिति * । नैतदस्ति प्रयोजनम् । इह तावच्चतसृणामिति षट्चतुर्भ्यश्च [ ७. १. ५५ ] इत्येवं भविष्यति । तिसृणामिति त्रिग्रहणमपि तत्र प्रकृतमनुवर्तते । क्व प्रकृतम् । त्रेस्त्रयः [ ५३ ] इति । इदं तर्हि । त्वं नृणां + नृपते जायसे शुचिः । नैकमुदाहरणं ह्रस्वग्रहणं प्रयोजयति । तत्र वचनाद्भूतपूर्वगतिर्विज्ञास्यते । ह्रस्वान्तं यद्भूतपूर्वमिति । उत्तरार्थं तर्हि सनकारग्रहणं कर्तव्यम् ।

नोपधायाश्च चर्मणाम् ।

नोपधाया नामि यथा स्यात् × इह मा भूत् । चर्मणाम् वर्मणामिति ।

नामि दीर्घ आमि चेत्स्यात्कृते दीर्घे न नुड्भवेत् ।
वचनाद्यत्र तन्नास्ति नोपधायाश्च चर्मणाम् ।

---

**प्र०—नादिति** । वचनात्स्यादिति चेत् । यत्र दीर्घत्वं नास्ति तत्र वचनस्य चरितार्थत्वात्सांप्रतिकसद्भावे भूतपूर्वगत्याश्रयणस्यायुक्तत्वादग्नीनामित्यादौ कृते दीर्घे नुण्न स्यादित्यर्थः । तिसृणामित्यादौ नुटोऽन्यथासिद्धत्वाद्ध्रस्वलक्षणो नुडनवकाश एवेति दर्शयन्नाह—**नैतदस्ति**। **नैकमुदाहरणमिति** । अन्यथा नृनद्यापो नुडिति ब्रूयात् । तदेवं वचनसामर्थ्याद्भूतपूर्वगत्या नुटः सिद्धत्वान्नार्थः सनकारनिर्देशेनेति स्थिते प्रयोजनान्तरोपन्यासः । **उत्तरार्थमिति** । **नोपधायाश्चेति** । चशब्दस्तदर्थे ।

---

**उ०**—मत्त्वेत्युक्तम् । द्वावपि । नुड्विषयपरिहारेण दीर्घस्यावकाशाभाव इव दीर्घविषयपरिहारेण नुटोऽप्यवकाशभाव इत्यभिमानः । **तत्राङ्गेति** । नुट्यङ्गस्य निमित्तत्वं प्रत्ययस्य निमित्तित्वं दीर्घे तु विपरीतम् । विरोधमात्रस्य विप्रतिषेधशब्दवाच्यत्वादत्र परत्वेन व्यवस्थोक्तेति भावः । सावकाशयोरिवानवकाशयोरपि विरोधे शास्त्रप्रवृत्तिरुचितेति तात्पर्यम् । नन्वेवं विप्रतिषेधलक्षणमसंगतं स्यादत आह—**वाक्यकारेण त्विति** । सावकाशयोर्विप्रतिषेधः प्रायेण संभवतीति तथोक्तमिति भावः । वस्तुतोऽत्र विप्रतिषेधसूत्राप्रवृत्तावप्युभयोश्चारितार्थ्यायान्यत्र पूर्वप्रवृत्तौ परत्वस्य नियामकताया दृष्टत्वेन नुटि दीर्घ इति भाष्यतात्पर्यम् । नित्यस्याप्यनवकाशो बाधक इत्याशङ्क्य नुटः सावकाशत्वमाह—**तिसृणामिति** । द्वयोर्निरवकाशयोः परत्वमिव नित्यत्वमपि वक्तुं शक्यमिति व्यर्थैषोक्तिरिति तत्त्वम् । **नृनद्याप इति**। न च भूतपूर्वगत्याश्रयणे पदां दतामित्यादावतिप्रसङ्गः। शसुप्रभृतिष्वित्यत्र विवक्षित( विषय )सप्तम्याश्रयणेन भूतपूर्वगत्याऽपि ह्रस्वान्तात्परत्वाभावादित्याशयः । किंच ह्रस्वत्वं नाम मात्राकालिकात्वम् । तत्र सामर्थ्याद्विशेषणभूतमात्राकालिकत्वांश एव भूतपूर्वगतिर्नतु विशेष्यभूतत्वांशेऽपि मानाभावादित्याशयः । एतद्भाष्यप्रामाण्या-

---

* ६. ४. ४ + ६. ४. ६. × ६. ४. ७; ७ १. ५५.

इन्हन्पूषार्यम्णां शौ । ६ । ४ । १२ ।

सौ च । ६ । ४ । १३ ।

हनः क्वावुपधादीर्घत्वप्रसङ्गः ॥ १ ॥

हनः क्वावुपधालक्षणं दीर्घत्वं प्राप्नोति । अनुनासिकस्य क्विझलोः क्ङिति [ १५ ] इति । तस्य प्रतिषेधो वक्तव्यः । वृत्रहणौ वृत्रहण इति । नियमवचनात्सिद्धम् । इन्हन्पूषार्यम्णां शौ सौ चेत्येतस्मान्नियमवचनाद्दीर्घत्वं न भविष्यति ।

नियमवचनात्सिद्धमिति चेत्सर्वनामस्थानप्रकरणे नियमवचनादन्यत्रानियमः ॥ २ ॥

नियमवचनात्सिद्धमिति चेत्सर्वनामस्थानप्रकरणे* नियमवचनादन्यत्र नियमो न प्राप्नोति । क्वान्यत्र । वृत्रहाणि भ्रूणहनि । एवं तर्हि

प्र०—इन्हन् । हनः क्वाविति । वृत्रं हतवान् । ब्रह्मभ्रूणेति क्विप् । तत्रानुनासिकस्य क्विझलोरिति सर्वत्र दीर्घत्वं प्राप्नोति । सर्वनामस्थाने तु नोपधायाः सर्वनामस्थाने चासंबुद्धाविति प्राप्नोति । तत्र सर्वनामस्थाने वृत्रहणावित्यादौ नियमविधानसामर्थ्याद्द्वयोरप्युभयोर्निवृत्तिः सिध्यति तथाऽपि सर्वनामस्थानप्रकरणात्सर्वनामस्थान एव दीर्घस्य नियमेन निवृत्त्या भाव्यं नान्यत्रेति वृत्रहणीति सप्तम्येकवचने विभाषा ङिश्योरित्यल्लोपाभावपक्षेऽनुनासिकलक्षणदीर्घप्रसङ्गः । सर्वत्र च हनः क्वौ दीर्घत्वप्रसङ्गान्न क्वचिदल्लोपः स्यात् । इतरस्तु यथोक्तमभिप्रायमप्रतिपद्य दूषणार्थं सर्वनामस्थानमुपन्यस्यति—वृत्रहणाविति । अत्र चेद्दीर्घत्वं मन्यसे तन्न । यतो नियमवचनात्सिद्धमिति नियमविधानसामर्थ्यात्सर्वस्य दीर्घस्य व्यावर्तनामित्यर्थः । इदानीं चोदकः स्वाभिप्रायं प्रकाशयन्नाह—नियमवचनात्सिद्धमिति चेदिति । एव तर्हीति ।

उ०—त्रिचतुर्भ्य इत्यस्य गौणेऽपि प्रवृत्तिः । अप्रवृत्तौ मानाभावाच्च । बहुवचनं तु द्विवचनप्रयोगे गौरवाल्लाघवार्थं भविष्यति । अत्राप्रवृत्तिसाधकभाष्यान्तरस्याभावाच्चेति प्रियचतसृणामित्यादौ केन नुडिति न वाच्यम् ।

इन्हन्पू० । सर्वनामस्थानप्रकरणादिति । सर्वनामस्थाने चेद्दीर्घः शिस्वोरेवेति नियमादिति भावः । दोषान्तरमप्याह—सर्वत्र चेति । नित्याल्लोपविषयेऽपीत्यर्थः । अल्लोपापेक्षया दीर्घस्यान्तारङ्गत्वात्तत्र कृते तपरकरणाल्लोपो न स्यादिति भावः । नन्वेवं पूर्वपाक्षिणोऽपि वृत्रहणावित्यादावभयोर्दीर्घयोर्निवृत्तेरिष्टत्वेन वृत्रहणीत्येवोदाहर्तुमुचितमित्याशङ्क्य वृत्रहणौ वृत्रहण इति नियमवचनात्सिद्धमित्येकवाक्यरूपं परिहारवादिनो वचनमित्याह—इतरस्त्विति । दूषणार्थमिति । चोदकं दूषयितुमित्यर्थः । तदेव वाक्यशेषाध्याहारेण योजयति—अत्र

* ६. ४. ८.

दीर्घविधिर्य इहेन्प्रभृतीनां तं विनियम्य सुटीति सुविद्वान्।

दीर्घविधिर्य इहेन्प्रभृतीनां तं सर्वनामस्थाने विनियम्य। इन्हन्पूषार्यम्णां सर्वनामस्थाने दीर्घो भवति। किमर्थमिदम्। नियमार्थम्। इन्हन्पूषार्यम्णां सर्वनामस्थान एव नान्यत्र।

शौ नियमं पुनरेव विदध्यात्।

ततः शौ। शावेव सर्वनामस्थाने नान्यत्र। ततः सौ। सावेव सर्वनामस्थाने नान्यत्र।

भ्रूणहनीति तथाऽस्य न दुष्येत् ॥ १ ॥

तथाऽस्य भ्रूणहनीति न दोषो भवति।

शास्मि निवर्त्य सुटीत्यविशेषे शौ नियमं कुरु वाऽप्यसमीक्ष्य।

---

प्र०—अत्र तु योगविभागः क्रियते। तत्राऽऽद्येन नियमेनान्तरङ्गोऽप्यनुनासिकलक्षणो दीर्घो निवर्त्यते द्वितीयेन वृत्रहणावित्यादौ सर्वनामस्थानलक्षणः। सुट्ग्रहणं सर्वनामस्थानोपलक्षणामिति शसादेशोऽपि शिर्गृह्यते। इतिशब्दो हेतौ। स च भिन्नक्रमः। न दुष्येदित्यनेन च संबध्यते। **शावेवेति**। अस्मिन्नियमे स्थिते सौ चेति सूत्रं विध्यर्थं संपद्यते। यदा तु शौ सौ चेति यौगपद्येनापेक्ष्यते तदा प्रत्ययद्वयाश्रयो नियमः क्रियते। भाष्यकारस्तु यौगपद्याश्रयं नियमक्रममाश्रित्य व्याचष्टे—**ततः साविति**। एवं योगविभागेन चोद्यं परिहृत्यैकस्मिन्नपि योगे परिहर्तुमाह—**शास्मीति**। शास्म्युपदिशामि तं प्रकारं येनैकयोगेऽपि दोषाभावः। पूर्ववत्सुटीत्येकदेशेन सर्वनामस्थानं लक्ष्यते। सर्वनामस्थानग्रहणं निवर्त्यानाश्रितसर्व-

---

उ०—**चेदिति**। दीर्घत्वं दीर्घत्वप्राप्तिम्। एकयोगे नियमद्वयस्यालाभादाह—**योगविभाग इति**। **अन्तरङ्गोऽपीति**। सामर्थ्यादित्यर्थः। भाष्ये सर्वनामस्थान एव इत्यस्य तद्विषय एवेत्यर्थः। अयं च हन्विषय एव। अन्येषां ग्रहणमुत्तरार्थमिति भावः। तेन वृत्रहणावित्यादौ न दीर्घः। एवं वृत्रघ्नः स्त्री वृत्रघ्नीत्यादावपि न दीर्घः। अन्यथा वृत्रहाणीति स्यात्। अत एव वार्तिकेन समफलता। एतेनान्यत्रेत्यस्य सुबानन्तर्येणेत्यर्थः। नियमस्य सजातीयापेक्षत्वादित्यपास्तम। **इतिशब्द इति**। सुटीति इत्यत्रेतिशब्द इत्यर्थः। **न दुष्येदित्यनेनेति**। एवं पुनरेवेत्येवकारोऽपि नेत्यनन्तरं योज्यः। तदयमर्थः। तथा योगद्वये सति इति हेतोः। नियमद्वयपरतया व्याख्यानाद्धेतोः। अस्याऽऽचार्यस्य भ्रूणहनीति नैव दुष्येदिति। एतेनेतिशब्दस्य हेत्वर्थत्वे तथेति व्यर्थं स्यादित्यपास्तम्। कथं तर्हि भाष्ये सौ चेत्यस्य नियमार्थमुक्तमत आह—यदा त्विति। एवमपि वाक्यद्वयेन नियमद्वयकथनमयुक्तमत आह—**भाष्यकारस्त्विति**। एकवाक्यतया यौगपद्याश्रयो यो नियमस्तं स्पष्टप्रतिपत्तये वाक्यभेदेन क्रममाश्रित्य विवृणोतीत्यर्थः। **एकस्मिन्नपीति**। लाघवाश्रयेणेति भावः। **प्रत्ययत्वमात्राश्रयेणेति**।

अथवा निवृत्ते सर्वनामस्थानप्रकरणेऽविशेषेण शौ नियमं वक्ष्यामि । इन्हन्पूषार्यम्णां शावेव । ततः सौ । सावेव । इहापि तर्हि नियमान्न प्राप्नोति । इन्द्रो वृत्रहायते* ।

**दीर्घविधेरुपधानियमान्मे हन्त यि दीर्घविधौ च न दोषः ॥ २ ॥**

उपधालक्षणदीर्घत्वस्य नियमो न चैतदुपधालक्षणं दीर्घत्वम् ।

**सुट्यपि वा प्रकृतेऽनवकाशः शौ नियमोऽप्रकृतप्रतिषेधे ।**

---

**प्र०**–नामस्थानत्वविशेषे प्रत्ययत्वमात्राश्रयेण शौ नियमं कुरु। असत्यपि शास्त्रीयेऽधिकारेऽपेक्षाकृतः संबन्धः स्यादिति तन्निवृत्त्यर्थमाह–**असमीक्ष्येति** । सर्वनामस्थानं विशेषमनपेक्ष्य शौ नियमः क्रियमाणः प्रत्ययेन तुल्यजातीये सर्वत्र प्रत्ययान्तरे दीर्घनिवृत्तिं करोतीत्यर्थः। **इहापीति** । विशेषानाश्रयणात्। वृत्रहेवाऽऽचरतीति क्यङ्। अकृत्सार्वधातुकयोरिति दीर्घः। **दीर्घविधेरिति** । इह यदि येन नाप्राप्त इत्याश्रीयते तदाऽनुनासिकलक्षणस्यैव दीर्घस्य नियमेन व्यावृत्तिः स्यात्। अथ मध्येऽपवादा इत्याश्रीयते तथाऽपि सर्वनामस्थाने चासंबुद्धावित्यस्यैव व्यावृत्तिप्रसङ्ग इत्यनपेक्षितविशेषं दीर्घत्वमात्रं निवर्त्यते। तत्रोपधाग्रहणानुवृत्त्याऽजन्तलक्षणदीर्घत्वस्याकृत्सार्वधातुकयोरिति प्राप्तस्य नियमेनाव्यावर्तनाद्दोषाभावः । हन्तेर्यः हन्तियः। तस्मिन्यो दीर्घविधिस्तत्र न दोषः । क्वचित्तु हन्तेति निपातोऽभिमुखीकरणार्थः पठ्यते। यिग्रहणस्योपलक्षणार्थत्वाद्दण्डीभूत इत्यत्र च्वावपि न दोषः। एकस्मिन्नपि योगे सर्वनामस्थानानुवृत्तावपि दोषं परिहर्तुमाह–**सुट्यपि वेति** । अपिशब्दो भिन्नक्रमः । अप्रकृतप्र-

---

**उ०**–अत एव वृत्रघ्नीति सिध्यति। **अपेक्षाकृत इति** । नियमस्य सजातीयव्यावर्त्यापेक्षाकृत इत्यर्थः। वार्तिके सुटीति निवर्त्यासमीक्ष्यानपेक्ष्य वेत्यन्वयः। अपिः पादपूरणे। **विशेषानाश्रयणादिति** । सर्वनामस्थानत्वरूपसुप्त्वरूपविशेषानाश्रयणादित्यर्थः। **दीर्घविधेरिति** । सामान्योक्तौ बीजमाह–**यदीति** । इदं हन्विषयवाक्याभिप्रायेण । इन्नादिविषये तेन येन नाप्राप्त्यभावादिति बोध्यम्। **अनपेक्षितविशेषं दीर्घत्वमात्रमिति** । बाध्यसामान्यचिन्तयेति भावः। विशेषचिन्तायां दोषादिति तात्पर्यम्। हन्तियीति पाठं व्याचष्टे–**हन्तेरिति** । य इत्यत्राकार उच्चारणार्थः। हन्तेः संबन्धश्च ततः परं श्रूयमाणत्वमेव। **दीर्घविधाविति** । निर्धारणसप्तमी। दीर्घविधीनां मध्ये य उपधालक्षणदीर्घस्तस्य नियमाद्यकारे योऽजन्तलक्षणो दीर्घस्तत्र न दोष इत्यर्थः। वृत्रहायतेः कर्तरि क्विपि वृत्रहा। वृत्रहामित्यादावपि दीर्घो भवत्येव। **दण्डीभूत इति** । दण्डिन्शब्दाच्च्विः। न चैवं पथीनतीत्यादौ माधवाद्युदाहृतो दीर्घो विरुध्येत। इष्टापत्तेः। हन्तेः क्त्वायुपधादीर्घत्वप्रतिषेध इति वार्तिके हन्ग्रहणादिन्नादिभ्य आचारक्विबेव नेत्येके। **अनुवृत्तावपीति** । प्रकरणानुरोधादिति भावः। **अपिशब्द इति** । अप्रकृतप्रतिषेधेऽपि व्याप्रियत इत्यर्थ इति भावः। वार्तिके सुटीति सर्वनामस्थानोपलक्षणम्। अन-

---

* ३. १. ११; ७. ४. २५.

अथवाऽनुवर्तमाने सर्वनामस्थानग्रहणेऽनवकाशः शौ नियमोऽप्रकृतस्यापि दीर्घत्वस्य नियामको भविष्यति। कथम्।

यस्य हि शौ नियमः सुटि नैतत्तेन न तत्र भवेद्विनियम्यम् ॥ ३ ॥

यस्य हि शिः सर्वनामस्थानं न तस्य सुट्। यस्य सुट्सर्वनामस्थानं न तस्य शिः*। तत्र सर्वनामस्थानप्रकरणे नियम्यं नास्तीति कृत्वाऽविशेषेण शौ नियमो विज्ञास्यते।

दीर्घविधिर्य इहेन्प्रभृतीनां तं विनियम्य सुटीति सुविद्वान्।
शौ नियमं पुनरेव विदध्याद्भ्रूणहनीति तथाऽस्य न दुष्येत् ॥ १ ॥
शास्मि निवर्त्य सुटीत्यविशेषे शौ नियमं कुरु वाऽप्यसमीक्ष्य।
दीर्घविधेरुपधानियमान्मे हन्त थि दीर्घविधौ च न दोषः ॥ २ ॥
सुटचपि वा प्रकृतेऽनवकाशः शौ नियमोऽप्रकृतप्रतिषेधे।
यस्य हि शौ नियमः सुटि नैतत्तेन न तत्र भवेद्विनियम्यम् ॥ ३ ॥

---

प्र०—तिषेध इत्यनेन संबध्यते इह द्विविधं सर्वनामस्थानं शिः सुट् च। शिर्नपुंसकसंबन्धी सुट् स्त्रीपुंसयोः। सुडनपुंसकस्येति वचनात्। तत्र तुल्यजातीयापेक्षे नियम आश्रीयमाणे व्यवच्छेद्याभावादनर्थक एव नियमः स्यादिति नियमविधिसामर्थ्याच्च सर्वस्य दीर्घस्य नियमेन व्यावृत्तिरित्यर्थः। **यस्य हीति**। यस्य नपुंसकस्य संबन्धिनि शौ नियमः क्रियते सुटि सर्वनामस्थानसंज्ञक एतन्नपुंसकं नास्त्यनपुंसकस्येति वचनात्। तेन कारणेन तत्र सवर्नामस्थाने सुटि नियन्तव्यं दीर्घत्वं न संभवतीति सामर्थ्यादविशेषेण नियम आश्रीयते। एतदुक्तं भवति। यदि तुल्यजातीयापेक्षो नियम आश्रीयते तदा शेर्नपुंसकलिङ्गसंबन्धित्वं सर्वनामस्थानत्वं चास्तीति तदाश्रयेण नियमे विज्ञायमानेऽयमर्थः स्यादिन्हन्पूषार्यम्णां नपुंसकानां शावेव सर्वनामस्थाने दीर्घो भवति न सर्वनामस्थानान्तर इति। न च तेषां नपुंसकानामन्यत्सर्वनामस्थानमस्तीति नियमविधानसामर्थ्यात्प्रकरणापन्नं सर्वनामस्थानत्वं सामर्थ्यप्रापितसंनिधानं च नपुंसकत्वमुभयमप्यविशेषादनपेक्ष्य प्रत्ययमात्रे स्त्रीपुंनपुंसकसंबन्धिनि दीर्घत्वव्यावृत्तिः क्रियत इति सर्वमिष्टं सिद्धम्।

---

उ०—वकाश इति हेतुगर्भविशेषणम्। **तत्र तुल्यजातीयेति**। शेर्नपुंसकसंबन्धित्वादिन्नादीनां नपुंसकानां श्यन्यसर्वनामस्थानाभावान्नियमबाध्यस्यासंभव इति भावः। एवं तात्पर्यमुक्त्वा श्लोकोत्तरार्धं योजयति—**यस्य नपुंसकस्येति**। तत्र नपुंसके सर्वनामस्थाने सुटि तत्संज्ञके सुटि नियन्तव्यमिति। वार्तिके विनियमे साधुर्विनियम्यमिति तद्धितान्तं नतु कृदन्तम्। अनुपसर्गे यमो यद्विधानेन सोपसर्गाण्ण्यतः प्राप्तेः। **उभयमपि**। **अविशेषादिति**। श्रुतिप्रापितोऽत्र नियम इति तद्विरोधिनोर्लिङ्गप्रकरणयोरविशेषाद्बाध इत्यर्थः। अत्रोभयमपीत्युपलक्षणम्। सर्व-

---

*१. १ ४२. ४३.

## अत्वसन्तस्य चाधातोः । ६ । ४ । १४ ।

### अत्वसन्तस्य दीर्घत्वे पित उपसंख्यानम् ॥ १ ॥

अत्वसन्तस्य दीर्घत्वे पित उपसंख्यानं कर्तव्यम् । गोमान् यवमान्* । किं पुनः कारणं न सिध्यति । अननुबन्धकग्रहणे हि सानुबन्धकस्य ग्रहणं नेत्येवं पितो न प्राप्नोति । अननुबन्धकग्रहण इत्युच्यते सानुबन्धकस्येदं ग्रहणम् । एवं तर्हि तदनुबन्धकग्रहणेऽतदनुबन्धकस्य ग्रहणं नेत्येवं पितो न प्राप्नोति । तत्तर्ह्युपसंख्यानं कर्तव्यम् । न कर्तव्यम् । पकारलोपे कृते नातुबन्तं भवत्य-

---

प्र०— **अत्वसन्तस्य चाधातोः । अत्वसन्तस्येति** । सूत्रन्यासप्रदर्शनपरमिदम् । अत्वन्तविषयं तु वचनम् । **अननुबन्धकग्रहण इति** । उकारस्यानुबन्धस्य सूत्रोपात्तत्वात्तद्व्यतिरिक्तानुबन्धाभावेनाननुबन्धकत्वमवसेयम् । भाष्यकारस्त्वनुबन्धमात्राभावेऽननुबन्धकव्यपदेशो युक्तः । इह चानुबन्ध उकारोऽस्तीति मत्वाऽऽह—अननुबन्धकग्रहण इत्युच्यत इति । परिभाषान्तरमाश्रित्याऽऽह—**एवं तर्हीति** । स एवानुबन्धो यस्यासौ तदनुबन्धकः । स चान्यश्चानुबन्धो यस्य सोऽतदनुबन्धकः । यद्येवं क्तवतोरपि ककारानुबन्धसद्भावाद्ग्रहणं न प्राप्नोति । उच्यते । आनन्तर्यलक्षणेऽनुबन्धानुबन्धवतोः संबन्धे तवतुशब्दस्य ककारोऽनुबन्धो न त्वतुशब्दस्य । मतुपः पकारोऽतुशब्दस्यानन्तर इति तेनासावनुबन्धवानिति तत्रैव दोषः । **पकारलोप इति** । अयमत्रार्थः । पकारोऽनुबन्धः प्रत्ययस्य न तु तदेकदेशस्य । ततश्च प्रत्ययैकदेशग्रहणादव्यापार एव पूर्वोक्तयोः परिभाषयोः श्रूयमाणश्च वर्णो रूपं भिन्द्यात् । न च पकारः श्रूयते । इतरस्तु श्रूयमाणस्यैव भेदकत्वे

---

उ०—नामस्थानत्वव्यापकतयोपस्थितं सुत्वमित्यपि बोध्यम् । अत्रापि पक्ष उपधाग्रहणमनुवर्त्याजन्तलक्षणदीर्घानियम इति बोध्यम् ।

**अत्वसन्तस्य । सूत्रन्यासेति** । नत्वसन्ते दोषप्रदर्शनपरं तदाह—**अत्वन्तेति** । ननु सानुबन्धकग्रहणात्कथमत्राननुबन्धकपरिभाषाप्रवृत्तिरित आह—**उकारस्येति** । सामर्थ्यादवधारणगर्भो बहुव्रीहिरित्याह—**स एवेति** । **स चान्यश्चेति** । तत्र नञ् भिन्नार्थक इत्यर्थः । अन्यत्वं चोपस्थितत्वात्तच्छब्दार्थापेक्षया बोध्यम् । तद्भिन्नानुबन्धस्येत्यर्थ उचितः । मूलोक्तार्थे सामानाधिकरण्याभावाद्बहुव्रीहिर्न स्यात् । नियतार्थेन केवलेन सहविवक्षासंभवान्न द्वंद्वगर्भः स इति कश्चित् । **क्तवतोरपीति** । भवत्वित्यादेरेव ग्रहणं स्यादिति भावः । **आनन्तर्यलक्षण इति** । तन्मूलकावयवत्वलक्षणेत्यर्थः । ननु सर्वत्रानुबन्धानामुपदेश एव लुप्तत्वात्कार्यप्राप्तिवेलायामसंनिधानेन स्मृत्योपस्थितानामेव विशेषकत्वाल्लोपोऽप्रयोजक इत्यत आह—**अयमत्रेति** । **प्रत्ययस्येति** । समुदायस्यैवान्यपदार्थत्वेनाऽऽश्रयणादिति भावः ।

---

*५. २. ९४.

त्वन्तमेव । यथैव तर्हि पकारलोपे कृते नातुबन्तमेवमुकारलोपेऽपि कृते नात्वन्तम् । ननु च भूतपूर्वगत्या भविष्यत्यत्वन्तम् । यथैव तर्हि भूतपूर्वगत्याऽत्वन्तमेवमतुबन्तमपि । एवं तर्ह्याश्रीयमाणे भूतपूर्वगतिरत्वन्तं चाऽऽश्रीयते नातुबन्तम् । न सिध्यति । इह हि व्याकरणे सर्वेष्वेव सानुबन्धकग्रहणेषु रूपमाश्रीयते यत्रास्यैतद्रूपमिति । रूपनिर्ग्रहश्च शब्दस्य नान्तरेण लौकिकं प्रयोगम् । तस्मिंश्च लौकिके प्रयोगे सानुबन्धकानां प्रयोगो नास्तीति कृत्वा द्वितीयः प्रयोग उपास्यते । कोऽसौ । उपदेशो नाम । उपदेशे चैतदतुबन्तं नात्वन्तम् ।

---

प्र०—उकारोऽपि लोपान्न भेदकः स्यादिति मत्वाऽऽह—**यथैवेति** । इतरस्तु भेदकत्वेनाऽऽश्रितस्य लुप्तस्यापि भूतपूर्वगत्या स्मृत्युपारूढस्य भेदकत्वं युक्तं मत्वाऽऽह—**भूतपूर्वगत्येति** । इतरस्तूभयोस्तुल्यं भूतपूर्वत्वं मत्वाऽऽह—**यथैवेति** । इतरो भेदकत्वेनाऽऽश्रीयमाणे भूतपूर्वगतिर्युक्ता नान्यत्रेति मत्वाऽऽह—**एवं तर्हीति** । इतरस्तु यथोपलब्धि स्मरणं न्याय्यं न तु मतुपः क्वचिदप्यत्वन्तत्वमुपलब्धमिति मत्वाऽऽह—**न सिध्यतीति** । सानुबन्धकप्रस्तावात्सानुबन्धकेष्वित्युक्तम् । **रूपनिर्ग्रहश्चेति** । रूपनिश्चय इत्यर्थः । **नान्तरेण लौकिकमिति** । अव्यभिचाराल्लौकिकस्य प्रयोगस्य प्राधान्येनोपादानं तदसंभवे तु शास्त्रीयप्रयोगाश्रय इत्याह—**तस्मिंश्चेति** । **उपदेशे चैतदिति** । पकारे सत्यत्वन्तत्वाभावात् । ड्यतस्त्वेकदेशं यतमाश्रित्य ययतोश्चातदर्थे इत्यत्र ग्रहणे प्राप्ते तदनुबन्धकपरिभाषया

---

उ०—नन्वस्तु समुदायानुबन्धत्वं तावताऽपि श्रुतिकृतो रूपभेदो दुर्वारोऽत आह—**श्रूयमाणश्चेति** । अत्रायं गूढोऽभिसंधिर्भगवतः सूत्रोपात्तान्तग्रहणं तदन्तविधिलब्धार्थोऽनुवाद एव । एवं चात्वन्ताङ्गस्योपधाया दीर्घ इत्यर्थः । एवं च प्रयोगे यकारलोपे कृतेऽत्वन्तमेवाङ्गमिति । **इतरस्तु श्रूयमाणस्येति** । एवं चात्वन्तत्वमपि नेत्यर्थः । ननु भूतपूर्वगत्याश्रयणेऽतुबन्तमेतन्नात्वन्तमेवेत्यत आह—इतरस्तु भेदकत्वेनेति । पकारस्तु तत्त्वेन नाऽऽश्रितोऽत्र सूत्र इति भावः। **इतरस्त्विति** । पूर्वोक्ताशयमजानन्नित्यर्थः । इतरो भेदकत्वेनेति । भूतपूर्वगत्या योऽनुनासिकोकारविशिष्टोऽत्तदन्ताङ्गस्य दीर्घ इत्यर्थ इति न दोषः । इतरः सूत्रेऽन्तग्रहणस्यानुवादकत्वमजानानोऽत्वन्तान्ताङ्गस्य दीर्घ इत्यर्थं मत्वाऽऽह—भाष्ये **न सिध्यतीति** । नन्वननुबन्धकग्रहणेऽपीह शास्त्रेऽग्रेढगित्यादौ रूपस्यैव ग्रहणमिति सानुबन्धकेष्विति विशेषणमयुक्तमत आह—**सानुबन्धकेति** । नान्तरेणेत्यादिना लौकिकप्रयोगस्य न्यायप्राप्तं ग्रहणमित्युक्तम् । तत्र हेतुमाह—**अव्यभिचारादिति** । शास्त्रीयं तु रूपं लोपादेशादिभिरपहाराद्व्यभिचारीत्यर्थः । **ड्यतस्त्विति**। वामदेवाड्ड्यड्ड्याविति विहितस्य । ण्यतस्त्वित्यपपाठः । ययतोश्चातदर्थे इत्यत्र तद्धितग्रहणानुवृत्तेः । षण्मासाण्ण्यच्चेति ण्यतो वा ग्रहणम् । तेन हि नञ उत्तरस्योपदेशे यो यत् श्रूयते तदन्तस्यान्तोदात्तत्वं विधीयते । प्रकृते तु उपदेशे यदन्तत्वं श्रूयते

यदि पुनरत्शब्दं गृहीत्वा दीर्घत्वमुच्येत। नैवं शक्यम् । इहापि प्रसज्येत । जगत् । जनगत् * । अर्थवद्ग्रहणे नानर्थकस्येत्येवमेतस्य न भविष्यति । इहापि तर्हि न प्राप्नोति । कृतवान् भुक्तवानिति । क्व तर्हि स्यात् । पचन् यजन् । न वा अत्रेष्यते । अनिष्टं च प्राप्नोति । इष्टं च न सिध्यति । तस्मादुपसंख्यानं कर्तव्यम् ।

**अज्झनगमां सनि । ६ । ४ । १६ ।**

**गमेर्दीर्घत्व इङ्ग्रहणम् ॥ १ ॥**

गमेर्दीर्घत्व इङ्ग्रहणं कर्तव्यम् । इङ्गमेरिति वक्तव्यम् + । इह मा भूत् । संजिगंसते वत्सो मात्रेति ।

**अग्रहणे ह्यनादेशस्यापि दीर्घप्रसङ्गः ॥ २ ॥**

अक्रियमाणे हीङ्ग्रहणेऽनादेशस्यापि दीर्घत्वं प्रसज्येत । संजिगंसते वत्सो मात्रेति ।

**न वा छन्दस्यनादेशस्यापि दीर्घत्वदर्शनादिङ्ग्रहणानर्थक्यम् ॥ ३ ॥**

---

प्र०—निवृत्तिः क्रियते । **यदि पुनरिति** । सूत्र उकारमनुच्चार्येत्यर्थः । ततोऽच्छब्दस्य केवलस्य च शास्त्रेऽभावात्प्रत्ययैकदेशग्रहणं भविष्यतीति नार्थः पित उपसंख्यानेन । **जगदिति** । द्युतिगमिजुहोतीनां द्वे चेति क्विप् । गमः क्वाविति मलोपः । जनं गच्छतीति । क्विप् चेति क्विप् । **पचन्निति** । अच्छब्दोऽत्रार्थवानित्यत्रैव दीर्घप्रसङ्गः । तस्माद्व्याप्त्यातिव्याप्तिलक्षणदोषद्वयप्रसङ्गादच्छब्दं गृहीत्वा दीर्घो विधातुमशक्य इत्युपसंख्यानं कर्तव्यमेव । अन्ये त्वसैवान्तशब्दस्य संबन्धो न त्वतुनेति व्याचक्षाणा मतुपो ग्रहणं साधयन्ति । अपरे त्वन्तग्रहणात्सामर्थ्यलब्धे तदन्तविधावधिकत्वाद्यथाकथंचित्तदन्तता गृह्यत इति मन्यमाना मतुपो ग्रहणं व्याचक्षते ।

**अज्झनगमां सनि** । इह बहवो गमयः । गम्लृ गताविति धातुः । णौ गमिरबोधने । सनि चेतीणादेशो गमिः । इण्वदिक इति वक्तव्यमितीकादेशः । इङश्चेतीङादेशश्च । तत्राविशेषात्सर्वप्रसङ्गे सत्याह—**गमेर्दीर्घत्व इति** । इण इक इङश्च गमिरेक एवाऽऽदेश इङोपलक्ष्यते ।

---

उ०—तदन्ताङ्गस्य दीर्घ इत्यर्थ इति दोषोपन्यास इति भावः । **अच्छब्दं गृहीत्वेति** । अतुग्रहणे त्वर्थवतोऽसंभवादेव तत्र परिभाषाया अप्रवृत्तिरिति भावः । **अन्ये त्वसैवेति** । एवं च भूतपूर्वगत्याऽनुनासिकोकारविशिष्टो योऽत्तदन्तं प्रयोगे श्रूयत इति न दोषः । न सिध्यतीत्यादि तु तस्मादुपसंख्यानं कर्तव्यमित्यन्तैकदेश्युक्तिरिति तदाशयः ।

**अज्झन** । इङ्ग्रहणादिणिगादेशस्यापि दीर्घत्वं नेति प्रतीयते । तच्चायुक्तम् । अनादेशस्यापि दीर्घत्वं प्रसज्येतेति वाक्यशेषविरोधात् । अचः स्थाने यौ हनिगमी इत्यग्रिमभाष्यविरोधाच्चेत्यत आह—**इण इक इत्यादि** । **आत्मनेपद इति** । भावकर्मणोरात्मनेपदे गमे-

---

* ३. २. १७८ ७६; ६. ४. ४०; ६. १. ७१. + २. ४. ४८.

न वेङ्ग्रहणं कर्तव्यम् । किं कारणम् । छन्दस्यनादेशस्यापि दीर्घत्वदर्शनात् । छन्दस्यनादेशस्यापि गमेर्दीर्घत्वं दृश्यते । स्वर्गं लोकं संजिगांसत् । छन्दस्यनादेशस्यापि गमेर्दीर्घत्वदर्शनादिङ्ग्रहणमनर्थकम् । यथैव तर्हि च्छन्दस्यनादेशस्यापि गमेर्दीर्घत्वं भवत्येवं भाषायामपि प्राप्नोति । तस्मादिङ्ग्रहणं कर्तव्यम् । न कर्तव्यम् । योगविभागः करिष्यते । अचः सनि । अजन्तानां सनि दीर्घो भवति । ततो हनिगम्योः । हनिगम्योश्च सनि दीर्घो भवति । अच इत्येव । अचः स्थाने यौ हनिगमी ।

अथोपधाग्रहणमनुवर्तत उताहो न * । किंचातः ।

**सनि दीर्घ उपधाधिकारश्चेद्व्यञ्जनप्रतिषेधः ॥ ४ ॥**

सनि दीर्घ उपधाधिकारश्चेद्व्यञ्जनस्य प्रतिषेधो वक्तव्यः । चिचीषति तुष्टूषतीत्येवमर्थम् । एवं तर्हि निवृत्तम् ।

**अनधिकार उक्तम् ॥ ५ ॥**

किमुक्तम् । हनिगमिदीर्घेष्वज्ग्रहणमिति + । नैष दोषः । उक्तमेतदह्रस्वो

---

प्र०—तथा च भाष्यकृत्परतो वक्ष्यति—अचः स्थाने यौ हनिगमी इति । एवं चेणिगादेशस्यापि गमेरात्मनेपद इडभावे दीर्घत्वेनं भाव्यमित्याहुः । **संजिगांसदिति** । संपूर्वाद्गमेः सन् । छान्दसत्वादिडभावः । लङ् । सकर्मकत्वात्परस्मैपदम् । बहुलं छन्दस्यमाङ्योगेऽपीत्यडभावः । **तस्मादिङ्ग्रहणमिति** । भाषायामनादेशस्य गमेर्दीर्घानिवृत्त्यर्थमित्यर्थः । छन्दसि तु वर्णव्यत्ययेन ह्रस्वस्य दीर्घः । ये त्विङ्ग्रहणमुपलक्षणार्थमिच्छन्ति तन्मतेनणादेशस्य गमेश्छन्दसि प्रयोगः । **योगविभाग इति** । अचः सनीत्येको योगः । तत्र दीर्घश्रुत्याऽच्परिभाषोपस्थानात्तदन्तस्य दीर्घे सिद्धेऽज्ग्रहणमुत्तरार्थं विज्ञायते । **अचः स्थाने इति** । संभवाद्गमिरेवात्र विशेष्यते न तु हनिः । सहनिर्देशात्तूभयोपादानम् । **चिचीषतीति** । अत्र चकारस्य दीर्घः प्राप्नोति । उपधाधिकारादजन्तस्य या उपधा तस्या दीर्घ इति सूत्रार्थव्यवस्थापनात् । **हनिगमिदीर्घेष्विति** । अचश्चेत्यत्र तच्छेषपक्ष आश्रीयमाण इहाज्ग्रहणं हनिगम्यर्थं कर्तव्यमित्यर्थः ।

---

उ०—रिट्परस्मैपदेष्वितीडभावात् । हलादौ सनि दीर्घो भवतीत्यर्थः । **सकर्मकत्वादिति** । 'समो गम्यृच्छि' इत्यत्राकर्मकादित्यनुवृत्तेरतादृशादेव पूर्ववत्सन इत्यात्मनेपदामित्यर्थः । **इणादेशस्येति** । अत्र पक्षे वर्णव्यत्ययो नाऽऽश्रयितव्यः । अनेनैव दीर्घसिद्धेः । केचित्तूक्तच्छान्दसप्रयोगे बोधनार्थत्वादिणोऽयं गमिः । किंतु गमेरेव धातूनामनेकार्थत्वाद्बोधने वृत्तिः । तत्राबोधन इति तु प्रतीषिषतीत्यादेः साधुत्वायेति भाष्यं सम्यगेवेत्याहुः । ननु हन्तेरजादेशत्वाभावाद्धनिगमी इत्यनुपपन्नमत आह—**गमिरेवेति** । नन्वच्परिभाषायां सत्यां कथं व्यञ्जनस्य दीर्घोऽत आह—**उपधाधिकारादिति** । **तच्छेष-**

---

* ६. ४. ७. + १ २ २८,

दीर्घः प्लुत इति यत्र ब्रूयादच इत्येतत्तत्रोपस्थितं द्रष्टव्यमिति * ।

च्छ्वोः शूडनुनासिके च । ६ । ४ । १९ ।

अथ ऊडादिः कस्मान्न भवति । आदिष्टिद्भवतीति + प्राप्नोति । कस्य पुनरादिः । वकारस्य । अस्तु । वकारस्य का प्रतिपत्तिः । लोपो व्योर्वलि [ ६. १. ६६ ] इति लोपो भविष्यति । नैवं शक्यम् । ज्वरत्वरस्रिव्यविमवामुपधायाश्च [ ६. ४. २० ] इति द्वावूठौ स्याताम् । एवं तर्हि

---

**प्र०—उक्तमेतदिति** । न तच्छेषो नापि तदपवादः। किं तर्हि द्वितीया षष्ठी प्रदेशेषु प्रादुर्भाव्यते । तत्र विशेषणविशेष्यभावस्य यथेष्टत्वाद्धनिगमिभ्यामाज्विशेष्यत इति सिद्धम् ।

**च्छ्वोः शूडनुनासिके च** । **अथेति** । च्छ्वोरिति एकाऽपि षष्ठी ग्रहणकशास्त्रे श्रुता प्रक्रियावाक्ये संबन्धिभेदाद्भिद्यते क्वचित्स्थानषष्ठी क्वचिदवयवषष्ठी । यथा फलिपाटिनमिमानिजनां गुक्पटिनाकिधतश्चेति भावः। **अस्त्विति**। रूपभेदाभावादङ्गस्य यो वकारस्तस्यानुनासिकादौ प्रत्यये परे क्वौ झलादौ च पर ऊडिति सूत्रार्थाश्रयणाद्वकारस्याऽऽदिरूड् भवति । **लोपो भविष्यतीति** । ननु नाप्राप्ते लोप आरभ्यमाण ऊठ् लोपस्य बाधकः प्राप्नोति । अत्र केचिदाहुः । भिन्नजातीयकत्वादागमेनाऽऽदेशो न बाध्यते यथा दधि ब्राह्मणेभ्यो दीयतां कम्बलः कौण्डिन्यायेति दध्नः कम्बलो न बाधकः। अन्ये त्वाहुः । व्यक्तौ पदार्थे प्रतिव्यक्ति लक्षणप्रवर्तनादूठि कृते यद्वलोपलक्षणं तदकृतार्थम् । न च तस्मिन्प्राप्त ऊडारभ्यत इति तत्प्रवर्तत एव । अकृते ऊठि यद्वलोपशास्त्रं तदेव बाध्यते संसर्गिभेदाद्धि वकारो भिद्यते । **द्वावूठाविति** । आगमिभेदादेको वकारात्पूर्व ऊट् स्यादपर उपधाया इति दोषः ।

---

**उ०—पक्ष इति**। अत्र पक्षे समावेशासंभवात्परिभाषाद्वयस्यापि निवृत्तौ सर्वादेशवारणायात्राज्ग्रहणं कर्तव्यमित्यचश्चेत्यत्रोक्तमित्यर्थः ।

**च्छ्वोः शू** । ननु टित्वेऽपि च्छ्वोरित्यस्याः शापेक्षया स्थानषष्ठीत्वस्याऽऽश्रयणावश्यकत्वादूडप्यादेश एव भविष्यति कथं दोषोद्भावनमत आह—**च्छ्वोरित्येकाऽपीति** । यथा फलीत्यत्र कुगागमोऽन्य आदेशाः । ननु वकारान्तरयाङ्गस्योडित्पर्थेऽङ्गस्याऽऽदिरूडिति कथं रूपे भेदाभावो वकारस्याऽऽदिरित्यसंगतं चात आह—**अङ्गस्येति** । लक्ष्यानुरोधाद्वैयधिकरण्येनान्वय इति भावः । वस्तुतोऽङ्गत्वानिमित्तेऽनुनासिकादौ वस्योडित्यर्थ इति भाष्याभिप्रायः । भाष्ये **वकारस्य का प्रतिपत्तिरिति** । तस्य कथमश्रवणमित्यर्थः । **भिन्नजातीयत्वादिति** । भिन्नफलकत्वादित्यर्थः । लोपो हि स्थानिनिवृत्तिफलकः । ऊठ् तु न तन्निवृत्तिफलक इति भावः । अत्रारुचिबीजं त्वपवादो नुग्दीर्घत्वस्येति ‘ दीर्घोऽकितः ’ इति सूत्रस्थभाष्यविरोधः । ननु कृते चाकृत ऊठि वस्यैव लोपप्राप्तेर्व्यक्तिभेदोऽसिद्धोऽत आह—**संसर्गिभेदादिति** । भिन्नसमुदायस्थत्वाद्वकारो भिद्यत इत्यर्थः । अन्ये तु वलोप ऊडनवकाश इत्यनवकाशत्वात्पूर्वमूठि ततो वलोपप्राप्तिः संभवत्येव । यत्र ह्युत्सर्गे कृतेऽपवादश्चरितार्थ-

---

* १. २. २८; + १. १. ४६.

नैष टित्। कस्तर्हि। ठित्। यदि तर्हि ठित् धौतः पट इत्येत्येधत्यूट्सु [ ६. १. ८९ ] इति वृद्धिर्न प्राप्नोति। चर्त्वे * कृते भविष्यति। असिद्धं+ चर्त्वं तस्यासिद्धत्वान्न प्राप्नोति। आश्रयात्सिद्धत्वं भविष्यति। असत्यन्यस्मिन्नाश्रयात्सिद्धत्वं स्यादस्ति चान्यः सिद्धो वाह ऊडितिXX। एषोऽपि ठित्करिष्यते। तत्रोभयोश्चर्त्वे कृत आश्रयात्सिद्धत्वं भविष्यति।

अथ क्ङिद्ग्रहणमनुवर्तत उताहो न÷÷। किंचातः।

**शूट्त्वे क्ङिदधिकारश्चेच्छः षत्वम् ॥ १ ॥**

शूट्त्वे क्ङिदधिकारश्चेच्छः षत्वं वक्तव्यम्** । प्रष्टा प्रष्टुम् प्रष्टव्यम्।

---

प्र०—**वृद्धिर्न प्राप्नोतीति**। टितस्तत्र निर्देशादस्य च ठित्त्वात्। **चर्त्वे कृत इति**। धौत इत्यत्र वकारस्योठि कृते ठकारस्य खरि चेति चर्त्वं क्रियते। कृते चर्त्व एत्येधत्यूट्स्वित्यत्रानुकृत इति भावः। **असिद्धं चर्त्वमिति**। पूर्वत्रासिद्धमिति। टकारान्तानुकरणे चर्त्वमसिद्धमित्येत्येधत्यूट्स्वित्यत्र वाह ऊडित्यस्योटो ग्रहणम्। **आश्रयादिति। एत्येधत्यूट्स्वित्यत्रोठ** एव कृतचर्त्वस्यानुकरणनिर्देशस्तत्र चर्त्वस्याऽऽश्रयात्सिद्धत्वमित्यर्थः। **अस्ति चान्य इति**। ततस्तस्यैव सूत्रे निर्देशो युक्तः। **तत्रोभयोरिति**। धौत इत्यादावठि कृते चर्त्वे च यट्टकारान्तं रूपं यच्च वाह ऊडित्यत्र ठकारस्य जश्त्वे वाऽवसान इति चर्त्वे तयोः सामान्येनैत्येधत्यूट्स्वित्यत्र निर्देश इति मन्यते। उभयोस्तु ठित्त्वे ठकारस्यैव जश्त्वे चर्त्वे च कृत एत्येधत्यूट्स्विति निर्देशोपपादनान्न किंचिच्चर्त्वस्याऽऽश्रयात्सिद्धत्वे प्रयोजनं दृश्यत इति चिन्त्यमेतत्। **अथेति**। स्वरितत्वप्रतिज्ञानस्य व्याख्यानाधीनत्वात्तदनुवृत्तौ छशां ष इति च्छग्रहणलिङ्गस्य दर्शनान्निवृत्तौ दिव उदिति तपरकरणलिङ्गदर्शनाच्च प्रश्नः। **शूट्त्व इति**। इह क्ङिदधिकारेऽक्ङिति तृजादौ शकाराभावात्षत्वे छग्रहणं कर्तव्यं क्ङितस्त्वननुवृत्तौ क्ङिति चाक्ङिति चानेन शकारो विधीयत इति षत्वविधौ छग्रहणं पृथक् न कर्तव्यं भवति। **तुक्प्रसङ्गश्चेति**। क्रियमाणेऽपि

---

उ०—स्तत्र सामान्यविशेषन्यायेन बाधे पुनरुत्सर्गाप्रवृत्तिरित्याहुः। स्पष्टा चेयं रीतिर्णेरिति गुणो यङ्लुकोरिति सूत्रे भाष्ये। **कृते चर्त्व इति**। ठित्करणाद्वृद्धिविधौ टान्तानुकरणसामर्थ्याच्चान्तरङ्गावपीत्संज्ञालोपौ पूर्वं न प्रवर्तेते इत्यभिमानः। **टकारान्तानुकरण इति**। वृद्धिविधिस्थ इत्यर्थः। **जश्त्वे चर्त्वे चेति**। सप्तमीबहुवचने पदत्वसत्त्वात्। **चिन्त्यमेतदिति**। एवं नैष टित् कस्तर्हि ठिदित्येव सिद्धान्त्युक्तिः। यदि तर्हीत्यादिभाष्यमेकदेश्युक्तिरिति तत्त्वमिति भावः। ननु स्वरितत्वकरणाकरणाभ्यामनुवृत्तिभावाभावयोः सुज्ञानत्वात्प्रश्नोऽयमयुक्तोऽत आह—**स्वरितत्वेति। पृथक् न कर्तव्यमिति**। शग्रहणेनैव सिद्धत्वादिति भावः। **अस्य**

---

*८. ४ ५५. +८. २. १ XX६ ४. १३२. ÷÷६. ४. १५. **८. २. ३६.

## तुक्प्रसङ्गश्च ॥ २ ॥

तुक्च प्राप्नोति**। निवृत्तेऽपि वै ङ्क्दिग्रहणेऽवश्यमत्र तुगभावार्थो यत्नः कर्तव्यः। अन्तरङ्गत्वाद्धि तुक्प्राप्नोति। च्छ्वोरिति संनिपातग्रहणं विज्ञायते। ननु चैवमप्यन्त्यस्य प्राप्नोति++। संनिपातग्रहणसामर्थ्यात्सर्वस्य भविष्यति। एवमप्यङ्गस्य प्राप्नोति। निर्दिश्यमानस्याऽऽदेशा भवन्तीत्येवमङ्गस्य न भविष्यति। यद्येवमुत्पुच्छयतेरप्रत्यय उत्पुडिति प्राप्नोति उत्पुदिति चेष्यते। तथा वाञ्छतेरप्रत्यये वान् वांशौ वांश इति न सिध्यति। यथालक्षणमप्रयुक्ते। तत्र त्वेतावान्विशेषः। अनुवर्तमाने ङ्क्दिग्रहणे छः षत्वं वक्तव्यं तत्र× चापि संनि-

---

प्र०—षत्वविधौ छग्रहणे पूर्वत्रासिद्धमिति षत्वस्यासिद्धत्वात्तुकि सति प्रत्ष्टेति प्राप्नोतीत्यर्थः। अस्य तु शकारस्य सिद्धत्वात्तुक् न भवति। **निवृत्तेऽपीति**। परमपि शत्वं बाधित्वा वर्णाश्रयत्वादन्तरङ्गत्वात्तुक् प्राप्नोति। वार्णादाङ्गं बलीय इत्येतच्चाऽऽङ्गवार्णयोर्युगपत्प्राप्तावपतिष्ठत इति तुकोऽश्रवणाय सतुक्निर्देशः कर्तव्य इत्यर्थः। **ननु चैवमपीति**। नानर्थकेऽलोऽन्त्यविधिरिति परिभाषा प्रयोजनाभावादनादृता। सतुक्केन च च्छकारेणाङ्गविशेषणात्तदन्तविधौ सत्यङ्गस्यार्थवत्त्वादलोऽन्त्यस्य प्रसङ्गः। **संनिपातग्रहणसामर्थ्यादिति**। अलोऽन्त्यविधौ सति सतुङ्निर्देशोऽनर्थकः स्यात्। वाञ्छतिनिवृत्त्यर्थत्वान्नानर्थक इति चेत्। वक्ष्यत एतद्यथालक्षणमप्रयुक्त इति। **उत्पुच्छयतेरिति**। पुतं छादयतीति पुच्छम्। कर्मण्यण्। पृषोदरादित्वाद्धातूपपदयोष्टिलोपः। पुच्छमुदस्यतीति णिङ्। ततः क्विप्। सतकारस्य छस्य शकारे कृते षत्वे जश्त्वे चोत्पुडिति भवति। यदा तु केवलः छः स्थानी तदा छस्य शकारे कृते तस्य च संयोगान्तत्वाल्लोपे तकारस्य श्रवणं सिध्यति। **तथेति**। तकारसहितस्य च्छस्य स्थानिनो निर्देशात्केवलस्य शकारो न प्राप्नोति। **यथालक्षणमिति**। उत्पुडिति वाञ्छाविति चास्त्वित्यर्थः। अथवाऽप्रयुक्ते न किंचिल्लक्षणं प्रवर्तते। प्रयुक्ता-

---

उ०—**तु शकारस्येति**। तृजुत्पत्त्यनन्तरं तुकं मन्यते। **अन्तरङ्गत्वादिति**। प्रत्ययोत्पत्तेः प्रागेव तुक्। छः शस्तु प्रत्ययापेक्षत्वाद्बहिरङ्ग इति भावः। परिभाषायां सत्यामप्यलोऽन्त्यस्येत्यस्य प्रसङ्गमाह—**सतुक्केन चेति**। पुतशब्दोऽकारान्तो गुह्यस्थानवाची। तदाह—**धातूपपदयोरिति**। णिङि णाविष्ठवदिति टिलोपः। **वाञ्छाविति चास्त्विति**। यस्य प्रचुरप्रयोगो न दृश्यते तस्यानन्तविषयत्वात्प्रयोगाणां क्वचित्प्रयोगसंभावनया लक्षणानुसारेण साधुत्वं द्रष्टव्यमिति भाष्यार्थ इति भावः। वास्तवमर्थमाह—**अथवेति**। प्रयुक्तविषयप्रवृत्तिरेव लक्ष-

---

** ८. २. १. ६. १. ७३. ++ १. १. ५२. × ८. २. ३६.

पातग्रहणं विज्ञेयम् ।

निवृत्ते दिव ऊड्भावः

निवृत्ते दिव ऊड्भावः प्राप्नोति । द्युभ्याम् द्युभिः । अस्तु । कथं द्युभ्याम् द्युभिरिति । ऊठि कृते दिव उत् [ ६. १. १३१ ] इत्युत्त्वं भविष्यति । न सिध्यति । आन्तर्यतो दीर्घस्य दीर्घः प्राप्नोति ।

तदर्थं तपरः कृतः ।

एवमर्थं तपरः क्रियते ।

---

प्र०—नामन्वाख्यानारम्भात् । **दिव ऊड्भावः प्राप्नोतीति** । ऊठोऽवकाशः स्यूतः स्यूतवानिति । उत्वस्यावकाशो विमलद्यु अहरिति । द्युभ्यामित्यादौ तु परत्वादूठ्प्रसङ्गः । **उत्वं भविष्यतीति** । **पुनः प्रसङ्गविज्ञानादेकदेशविकृतस्यानन्यत्वात्** । **दीर्घः प्राप्नोतीति** । भाव्यमानोऽप्युकारः सवर्णान् गृह्णातीति ऋत उदिति तपरत्वेन ज्ञापनात् । **तदर्थमिति** । दीर्घस्यापि मात्रिको यथा स्यादिति तपरत्वं कृतम् । किमुच्यत एतावान्विशेष इति । यावता दिवादीनां यङ्लुगन्तानां तिबादिषु भेदो भवति । ऊठि सति देद्योतीति भवत्यसति तु देदेतीति । नैष दोषः । छान्दसो यङ्लुक् । न चैते छन्दसि प्रयोगा दृश्यन्ते । भाषायां तु हुश्नुवोः सार्वधातुक इत्यत्र हुश्नुग्रहणाज्ज्ञापकात्क्वचिदेव यङ्लुक् भवति न सर्वत्र । अन्यथा यङोऽचि चेत्यत्र च्छन्दोग्रहणानुवृत्तिरनर्थिकैव स्यादिति भाष्यकारस्य दर्शनम् ।

---

उ०—णस्वभाव इति भावः । भाष्ये **तत्र चापि संनिपातग्रहणमिति** । प्रष्टा प्रष्टुमित्यादिसिध्यर्थं व्रश्चेति सूत्रेऽपि सतुकग्रहणं कर्तव्यमनुवृत्तिपक्षे इत्यर्थः । अत्रापि कार्यं प्रष्टुमित्यादिसिद्धये । निवृत्तिपक्षे त्वत्रैव कार्यं नतु तत्रेति तात्पर्यम् । ननु द्युभ्यामित्यादावुत्वस्य बाधकस्य सत्त्वात्कथमूठत आह—**ऊठ इति** । **देदेतीति** । लोपो व्योरिति सूत्रे भाष्ये वलोपस्य प्रत्याख्यानादत्र लोपश्चिन्त्यः । **न चैत इति** । एतच्चास्मादेव भाष्यादवसीयते । न चैवमपि वृक्षवृभ्यामित्यादावूड्भावाभावाभ्यां फले विशेषः । न च णिलोपटिलोपयोः स्थानिवत्त्वम् । न पदान्तेति निषेधादिति चेन्न । एषामप्यनभिधानात् । न च प्राङित्यादौ सोर्लोपे लुकि वा षत्वार्थं छ्ग्रहणमावश्यकम् । छोः शूडित्यनेन त्वत्र न निर्वाहः । वर्णाश्रयत्वेन लुका लुप्तत्वेन वा प्रत्ययलक्षणाभावादिति वाच्यम् । क्विब्निमित्तकशादेशस्य दुर्वारत्वात् । विचोऽसार्वत्रिकत्वाच्च । वस्तुतस्तु तद्भाष्यं पदकर्तव्यत्वाकर्तव्यत्वरूपविशेषमात्रपरम् । तदपि क्ङिद्ग्रहणानुवृत्तिज्ञापकबोधानाय । दिव उदिति तपरत्वं तु स्पष्टार्थमेव । भाव्यमानोकारसवर्णग्राहकत्वज्ञापकं तु ऋत उदित्येव । किंच तपरत्वं सुखोच्चारणार्थं बहुशो दृष्टम् । अनन्यथासिद्धछ्ग्रहणं त्वनुवृत्तिज्ञापकमेवेति गूढोऽभिसंधिः । एवं च प्रागुक्तलक्ष्याणामभावकल्पने न मानम् ।

क्व पुनः ङ्किद्ग्रहणं प्रकृतम् । अनुनासिकस्य क्विझलोः ङ्किति [ १५ ] इति । यदि तदनुवर्ततेऽज्झनगमां सनि [ १६ ] क्विझलोश्चेति क्विझलोरपि दीर्घत्वं प्राप्नोति । झलि तावन्न दोषः । सनं झल्ग्रहणेन विशेषयिष्यामः । सनि झलादाविति । क्वावप्याचार्यप्रवृत्तिर्ज्ञापयति नानेन क्वौ दीर्घत्वं भवतीति यदयं क्विब्वचिप्रच्छ्यायतस्तुकटप्रुजुश्रीणां दीर्घोऽसंप्रसारणं चेति दीर्घत्वं शास्ति* ।

इति श्रीभगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये षष्ठस्याध्यायस्य चतुर्थे पादे प्रथममाह्निकम् ॥

## असिद्धवदत्राऽऽभात् । ६ । ४ । २२ ।

प्र०—क्व पुनरिति । ङ्किद्ग्रहणानुवृत्तावन्यस्यापि तद्योगनिर्दिष्टस्यानुवृत्तिप्रसङ्गं मत्वा पृच्छति—सनि झलादाविति । तेनेणिगादेशस्य गमेरजादौ सनि दीर्घो न भवति । जिगमिषति । अधिजिगमिषतीति । यदयमिति । वाक्यकारो वच्यादिष्वजन्तानां दीर्घत्वं शास्ति । तेन ज्ञापयति मण्डूकप्लुत्यादिभिर्न्यायैरिहैव ङ्किद्ग्रहणं संबध्यते न पूर्वत्रेत्यर्थः ॥

इत्युपाध्यायजैयटपुत्रकैयटकृते महाभाष्यप्रदीपे षष्ठस्याध्यायस्य चतुर्थे पादे प्रथममाह्निकम् ॥

असिद्धवदत्राऽऽभात् । इह क्वचिदुपमानोपमेययोरभेदं विवक्षित्वा सामानाधिकरण्येन निर्देशः क्रियतेऽयं ब्रह्मदत्त इति । शास्त्रेऽपि षत्वतुकोरसिद्धः, लिट्कित्, गोतो णित् , इति च । तत्र सामर्थ्यादतिदेशप्रतिपत्तिः । क्वचित्तु प्रतिपत्तिलाघवाय भेदोपक्रमे वतिना निर्देशः क्रियते ब्रह्मदत्तवदयमिति । इहाप्यसिद्धवदत्राऽऽभादिति । अन्ये त्वाहुः । स्वाश्रयमपि यथा स्यादित्येवमर्थं वत्करणम् । तेन देभतुरित्यत्र स्वाश्रयैकहल्मध्यगताश्रयावेत्वाभ्यास-

उ०—लोपो व्योरिति सूत्रस्थवलोपप्रत्याख्यानपरभाष्यप्रामाण्यात्तेभ्यो यङ्लुग् नास्तीत्यन्यदेतत् । इदमेव ध्वनयितुं क्ङिद्ग्रहणानुवृत्तिपक्षे संभावितान्दोषान्परिहर्तुमाह—भाष्ये क्व पुनरित्यादि । अन्यथा लाघवसहकृतेन तपरकरणेन ज्ञापकेनाननुवृत्तेरेव युक्ततया यदि तदनुवर्तत इत्यादिग्रन्थासंगतिरेव स्यात् । ङ्किद्ग्रहणस्यानन्तरे प्रकृतत्वात्किं प्रश्नेनेत्यत आह—ङ्किद्ग्रहणेति । अन्यस्यापि क्विझल्रूपस्यापि । अनुवृत्तिप्रसङ्गम् । मध्यस्थाज्झनगमां सनीत्यत्रानुवृत्तिप्रसङ्गमित्यर्थः । क्ङिद्ग्रहणं तद्घटितनिमित्तसमुदायः । क्वचित्तु क्विग्रहणमित्येव पाठः । इति श्रीशिवभट्टसुतसतीगर्भजनागोजीभट्टकृते भाष्यप्रदीपोद्द्योते षष्ठस्याध्यायस्य चतुर्थपादे प्रथममाह्निकम् ॥

असिद्धवदत्राऽऽभात् । ननु वतिनिर्देशं विनाऽपि लिट्किदित्यादाविव वत्यर्थावगतौ किं वतिनेत्याशङ्क्य स्पष्टार्थं तदित्याह—इहेत्यादिना । अभेदमिति । सादृश्यमूलकमित्यर्थः । तेन देभतुरिति । श्रन्थिग्रन्थिदम्भिस्वञ्जीनामिति वक्तव्यमिति लिटः कित्त्वादनिदितामिति नलोपे तत्प्रयुक्तैत्वाभ्यासलोपौ भवत इत्यर्थः । स्वाश्रयैकेति । स्वाश्रयं यदेकहल्मध्यं

* ३. २. १७८ *.

असिद्धवचनं किमर्थम् ।

**असिद्धवचन उक्तम् ॥ १ ॥**

किमुक्तम् । तत्र* तावदुक्तम् । षत्वतुकोरसिद्धवचनमादेशलक्षणप्रतिषेधार्थमुत्सर्गलक्षणभावार्थं चेति । इहाप्यसिद्धवचनमादेशलक्षणप्रतिषेधार्थमुत्सर्गलक्षणभावार्थं च । आदेशलक्षणप्रतिषेधार्थं तावत् । आगहि जहि । गतः गतवानिति।

---

प्र०—लोपौ भवत इति । एतदपरे न मृष्यन्ति । सत्यसति वा वतावतिदेशेष्वातिदेशिकाविरुद्धस्वाश्रयकार्यानिवृत्तिः । सिद्धत्वासिद्धत्वयोर्विरोधात्कथं वतिना सिद्धत्वस्य प्रापणं कथं वा सिद्धत्वासिद्धत्वयोर्विषयविभागो लभ्यते । स्थानिवदित्यादौ तु वतिमन्तरेण संज्ञा स्यादिति वत्करणमतिदेशं गमयत्स्वाश्रयप्राप्त्यर्थं विज्ञायते । श्नसोरल्लोप इति तपरकरणाच्च लिङ्गात्क्वचित्सिद्धत्वं शक्यमनुमातुम् । अन्यथा आस्तामासन्नित्यादावाटोऽसिद्धत्वाल्लोपाप्रसङ्गात्किं तपरत्वेन । **असिद्धवचनं किमर्थमिति** । इह शास्त्रस्य कार्यार्थत्वात्कार्यस्य प्राधान्यादसिद्धत्वेन भाव्यम् । तदसिद्धावपि स्थानिनो निवृत्तत्वात्तल्लक्षणं कार्यं न प्राप्नोतीत्यव्याप्तिं मत्वा प्रश्नः । इतरो व्यापकत्वाच्छास्त्रासिद्धत्वं प्रदेशान्तर एव स्थापितं मन्यमान आह—**असिद्धवचन उक्तमिति** । उत्सर्गशब्देन सामान्यविषयत्वसाधर्म्यात्स्थान्यभिधीयते । **आगहीति** । शपो बहुलं छन्दसीति लुक् । **जहीति** । हन्तेर्जः । **गत इति** । अवयवलोपिनामतो लोपो नास्तीत्येतत्परिभाषार्थमुपदेशग्रहणानुवृत्त्या

---

उ०—तद्गतत्वाश्रयेत्यर्थः । **सत्यसति वेति** । अतिदेशस्वभाव एवायं यदतिदिश्यमानधर्माविरुद्धस्वाश्रयकार्यानिवृत्तिरिति वतावपि दोषस्तदवस्थ एवेति भावः । दोषान्तरमाह—**कथं वेति** । स्वाश्रये कार्ये सिद्धत्वं स्थानिकार्येऽसिद्धत्वमिति विषयविभागो दुर्लभः । विपरीतस्यापि तस्य वक्तुं शक्यत्वादिति भावः । नन्वेवं स्थानिवत्सूत्रे वत्करणं स्वाश्रयप्राप्त्यर्थमित्युक्तं विरुध्येतेत्यत आह—**स्थानिवदित्यादौ त्विति** । तत्राप्यतिदेशप्रापणद्वारा तत्स्वभावादेवाविरुद्धस्वाश्रयप्राप्त्यर्थतोक्ता नतु सामर्थ्यात् । यथा ब्राह्मणवदयं क्षत्रिय इत्युक्ते ब्राह्मण्यविरुद्धमद्यपानादेरेव निवृत्तिर्नतु युद्धादेस्तद्वदिति भावः । देभतुरित्यादौ तर्हि का गतिरत आह—**श्नसोरिति** । अस् तामिति स्थिते विप्रतिषेधे आभीयासिद्धत्वाभावस्य वक्ष्यमाणतयाऽऽडपेक्षया परत्वादल्लोपे तस्यासिद्धत्वात्पुनःप्रसङ्गविज्ञानेनाऽऽटि विकारान्यानुपूर्व्या ऐक्याभावाल्लोपे लक्षणस्येति न्यायाप्राप्त्या प्राप्ताटो लोपस्य वारणाय कृतं तपरत्वमाटोऽसिद्धत्वे व्यर्थं सत्तदनित्यतां ज्ञापयति—आटि तु नित्यत्वमेवेति। ज्ञापितेऽपि वैयर्थ्यमसिद्धत्वानित्यत्वेनाऽऽटोऽप्राप्तेरिति न शङ्क्यम् । आगहीत्यादेः प्रयोजनस्य स्पष्टत्वात्प्रश्नानुपपत्तेराह—**इह शास्त्रस्येति** । देवदत्तहन्तृहतन्यायेन शाधीत्याद्यसिद्धिरिति भावः । **उत्सर्गशब्देनेति** । यद्यप्युत्सर्गशब्दः सामान्यविधौ रूढस्तथाऽप्यत्र तत्साधर्म्यात्स्थानी लक्ष्यत इत्याशयः । गत इत्यसिद्धवद्भावं विनाऽपि सिध्यतीत्याह—**अवयवेति** । **परत्वादिति** । शास्त्रासिद्धत्व एत्त्वशाभावशास्त्राभ्यां

---

*६. १. ८६.

अनुनासिकलोपे जभावे च कृते* ऽतो लोपः [ ६. ४. ४८ ] अतो हेः [ १०५ ] इति च प्राप्नोति । असिद्धत्वान्न भवति । उत्सर्गलक्षणभावार्थं च । एधि शाधीति । अस्तिशास्त्योरेत्वशाभावयोः कृतयोर्झल्लक्षणं धित्वं+ न प्राप्नोति । असिद्धत्वाद्भवति ।

अथात्रग्रहणं किमर्थम् ।

**अत्रग्रहणं विषयार्थम् ॥ २ ॥**

विषयः प्रतिनिर्दिश्यते । अत्रैतस्मिन्ना भाच्छास्त्र आ भाच्छास्त्रमसिद्धं यथा स्यात् । इह मा भूत् । अभाजि× रागः÷ उपबर्हणमिति** ।

कानि पुनरस्य योगस्य प्रयोजनानि ।

---

प्र०—भाष्यकारः संपादयिष्यति। **एधीति**। परत्वान्नित्यत्वाच्च पूर्वमेत्त्वम्। शाधीत्यत्रापि नित्यत्वात्पूर्वं शाभावोऽल्विधित्वाच्च धित्वे नास्ति स्थानिवद्भावः। **अथात्रग्रहणमिति**। यथाऽङ्गस्येत्यादयोऽधिकारा अवध्युपादानमन्तरेणापि व्याख्यानाद्विशिष्टावधयो विज्ञायन्ते तथाऽसिद्धवदधिकारोऽप्याभाद्विज्ञायते। तत्राऽऽभाद्ग्रहणस्य विषयावधारणार्थत्वादत्रग्रहणं न कर्तव्यमिति भावः। **अत्रग्रहणं विषयार्थमिति**। विशिष्टो यो विषयः समानलक्षणस्तन्निर्देशार्थम्। तेन समानाश्रयमसिद्धं व्याश्रयं तु सिद्धमित्येषोऽर्थो वार्तिककारस्याभिमतः। भाष्यकारोऽमुमेवार्थं परस्तात्स्थापयिष्यति। संप्रति त्वाभाद्ग्रहणमधिकारस्य प्रतिपत्तिलाघवायावध्युपादानार्थं मत्वाऽसिद्धवद्भावस्याऽऽभाच्छास्त्रमेव विषयोऽत्रग्रहणेन निर्दिश्यत इति व्याचष्टे—**अभाजि**। **राग इति**। भञ्जेश्च चिणि, रञ्जेश्च, घञि च भावकरणयोरिति नलोपोऽत उपधाया इति वृद्धौ कर्तव्यायां नासिद्धो भवति। **उपबर्हणमिति**। बृहि वृद्धावित्यस्य बृंहरेच्यनिटीति नलोपो गुणेऽसिद्धो भवति। **कानि पुनरिति**। अन्यथा सिद्धिं मत्वा पृच्छति—

---

उ०—तत्कार्ययोरप्रमितेर्विधिशास्त्रं प्रति स्थानिवुद्धिरेवेति तन्निबन्धनकार्यसिद्धिरिति भावः। नन्वाभादित्यधिकारपरिमाणार्थमित्यत्रग्रहणं विषयावधारणार्थमावश्यकम्। आभीये कर्तव्य आभीयमसिद्धवदिति तत्किं प्रश्नेनेत्यत आह—**यथाऽङ्गस्येति**। **समानलक्षणमिति**। समानमेकं लक्षणं निमित्तमस्य तत्प्रतिपत्त्यर्थमित्यर्थः। अनुदात्तोपदेशेत्यादावस्योपस्थितावनुदात्तोपदेशादीनां क्ङिति लोपो भवति स चासिद्धवदत्रैव क्ङिति निमित्ते यदाभीयं प्राप्नोति तन्न कर्तव्यमित्यर्थादिति भावः। भाष्यकारेण तर्हि एवं रीत्या वार्तिकं कुतो न प्रत्याख्यातमत आह—**भाष्यकारेति**। अधिकारस्य प्रतिपत्तीति पाठः। प्रतिपत्तिलाघवायाधिकारस्यावध्युपादानार्थमाभाद्ग्रहणमित्यन्वयः। भाष्ये **अत्रैतस्मिन्निति**। अत्रेत्यस्य व्याख्या एतस्मिन्निति। तद्व्याख्यानमाभाच्छास्त्रे इति। **नासिद्ध इति**। वृद्धेराभीयत्वाभावादित्यर्थः। शासेः शासूवि-

---

* ६. ४. ३७; ३६. + ६. ४. ११९; ३५; १०१. × ६. ४. ३३; ७. २. ११६. ÷ ६. ४. २७; ७. २. ११६. ** ६. ४. २४; ७. ३. ८६.

**प्रयोजनं शैत्त्वं धित्वे ॥ ३ ॥**

शाभाव एत्त्वं च धित्वे प्रयोजनम् ** । एधि शाधीति । अस्तिशास्त्यो-रेत्त्वशाभावयोः कृतयोर्झलक्षणं धित्वं न प्राप्नोति । असिद्धत्वाद्भवति । शाभा-वस्तावन्न प्रयोजयति । एवं वक्ष्यामि शासू हौ शाहाविति। यत्वभूतः++सका-रस्तत्र साद्धित्वं धि च [ ८. २. २५ ] इति सकारस्य लोपः । अथवा आ हाविति वक्ष्यामि । एवमपि सकारस्य प्राप्नोति । उपधाया इति ×× वर्तते । उपधाया आत्वे कृते साद्धित्वं धि चेति सकारलोपः । अथवा न हाविति वक्ष्यामि । तत्रेत्त्वे ÷÷ प्रतिषिद्धे साद्धित्वं धि चेति सकारलोपः । एत्त्वमपि लोपापवादो विज्ञास्यते न च सकारस्य लोपः ***प्राप्नोति ।

**हिलोप उत्त्वे ॥ ४ ॥**

हिलोप उत्त्वे प्रयोजनम् + । कुर्वित्यत्र हिलोपे कृते सार्वधातुकपर उकार इत्युत्त्वं न प्राप्नोति । असिद्धत्वाद्भवति । एतदपि नास्ति प्रयोजनम् । वक्ष्यति × तत्र सार्वधातुकग्रहणस्य प्रयोजनं सार्वधातुके भूतपूर्वमात्रेऽपि यथा स्यादुत्त्वम् ।

**तास्तिलोपेण्यणादेशा अडाड्विधौ ॥ ५ ॥**

तलोपोऽस्तिलोप इणश्च यणादेशोऽडाड्विधौ प्रयोजनम् ÷ । अकारि ऐहीति । तलोपे कृते लुङीत्यडाटौ न प्राप्नुतः । असिद्धत्वाद्भवतः । अस्तिलोप इणश्च यणादेशः प्रयोजनम् । आसन् आयन्निति । इणस्त्योर्यण्लोपयोः कृतयोरनजा-

---

**प्र०—शासूहाविति** । इत्त्वबाधनाय शासिरेवाऽऽदेशः शासो विधीयतेऽतो झलन्तत्वात्सिद्धं धित्वमित्यर्थः। **धि चेति सस्य लोप इति**। धिसकारे सिचो लोप इति नाऽऽश्रीयते। चकाधीत्येव भवतीति निर्णेष्यते। **एत्त्वमपीति** । श्नसोरल्लोप इत्यस्य लोपस्यापवादोऽकारस्य स्थान एत्त्वं विधीयते श्नसोरल्लोप इत्यस्य विषयार्थस्यानुवर्तनात्तेन लोपविषय एत्त्वं भवतीत्यर्थः संपद्यते तदाह—**न च सकारस्येति** । **कुर्विति** । कृ उ हि इति स्थिते हिलुकः परत्वात्प्राग्गुणः, उत्त्वाच्च प्राङ् नित्यत्वाद्धिलुक्। तत उत्त्वं न प्राप्नोतीत्यसिद्ध-

---

**उ०**—धानं किमर्थमत आह—**इत्त्वबाधनार्थमिति** । मो राजीतिवदिति भावः।नचाऽऽहाविति न हाविति वा न्यासे शासेर्यङ्लुकि शाधीत्यसिद्धिरिति वाच्यम् । यङ्लुकश्छान्दसत्वादिति भावः । कथं पुनरेत्त्वं लोपापवादोऽत आह—**श्नसोरिति**। **अनुवर्तनादिति**। उत्सर्गसमानदेशा अपवादा इति न्यायेन तत्सिध्यति । भाष्यस्वरसोऽपि अत्रैव । ननूत्त्वमेव हि लुकः परत्वाद्भविष्यतीत्यत आह—**उत्त्वाच्चेति** । लुका लुप्तत्वाच्च प्रत्ययलक्षणं नेति भावः । भाष्ये

---

** ६. ४. ३५; ११९; १०१. ++ ८. ३. १७. ×× ६. ४. २४. ÷÷ ६. ४. ३४.
*** ६. ४. १११. + ६. ४. १०६; ११०. × ६. ४. ११०. ÷ ६. ४. १०४; १११; ८१; ७१; ७२.

दित्वादाड्न प्राप्नोति । असिद्धत्वाद्भवति । अस्तिलोपस्तावन्न प्रयोजयति । आचार्यप्रवृत्तिर्ज्ञापयति लोपादाड्बलीयानिति यदयं श्नसोरल्लोपः [ ६. ४. १११ ] इति तपरकरणं करोति । इण्यणादेशश्चापि न प्रयोजयति । यणादेशे * योगविभागः करिष्यते । इणो यण्भवति । तत एरनेकाचः । एश्चानेकाच इणो यण्भवति । ततोऽसंयोगपूर्वस्य यण्भवति । एरनेकाच इत्येव । सर्वेषामेव परिहारः । उपदेश इति ÷ वर्तते तत्रोपदेशावस्थायामेवाडाटौ भवतः । अथवाऽऽर्धधातुक इति ×× वर्तते । अथवा लुङ्लङ्लृङ्क्ष्वडिति द्विलकारको निर्देशः। लुङादिषु लकारादिष्विति । सर्वथा ऐज्यत औप्यतेति न सिध्यति । वक्ष्यत्येतदजादीनामटा सिद्धमिति ÷÷ ।

---

प्र०—त्वात्तु हिलुको भवति । **तल्लोपे कृत इति** । नित्यत्वात् । **यदयमिति** । तपरकरणस्य प्रयोजनमास्तामासन्नित्यादावाटि कृते वार्णादाङ्गं बलीय इत्येकादेशं बाधित्वा मा भूदाकारस्य लोप इति । यदि प्राग्लोपः स्यात्ततोऽनजादित्वादाटोऽभावात्तल्लोपनिवृत्तये तपरत्वं न कर्तव्यं स्यादित्यर्थः । **एरनेकाच इति** । आटमन्तरेणानेकाजिण्न भवतीति पूर्वमाड्भवतीत्यनुमीयते । ईयतुरित्यादौ योगविभागमन्तरेण यणः सिद्धत्वादाड्विध्यर्थमेव योगविभागो विज्ञायते । तेन नित्योऽपि यणादेशोऽकृत आटि न भवति । **तत्रोपदेशावस्थायामिति** । अन्तरङ्गानपि विधीन्बाधित्वा लुङाद्युपदेश एवाडाटौ भवत इत्यर्थः । **अथवेति** । आर्धधातुकग्रहणानुवृत्तिसामर्थ्यादकृतेषु लादेशेषु लावस्थायां लब्धार्धधातुकसंज्ञायामडाटौ भवत इत्यर्थः । **सर्वथेति** । त्रिष्वपि परिहारेषु यज्यादीनां लावस्थायां संप्रसारणाभावादनजादित्वादाटोऽभावादट् प्राप्नोतीत्यर्थः । **अटा सिद्धमिति** । आटश्चेति यत्सूत्रं तदटश्चेति क्रियते । अचीत्यधिकाराच्च हलि वृद्ध्यभावः । कथमायन्नासन्निति यावतेणस्त्योर्यल्लोपयोः कृतयोर्वृद्धिर्नास्ति । अन्तरङ्गत्वाद्वृद्धिर्भविष्यतीत्यदोषः । नानाश्रयत्वाच्च

---

उ०—**तत्र सार्वधातुकेति**। उप्रत्ययान्तकरोतेः सार्वधातुकपरत्वाव्यभिचारादिति भावः। न चात्रोत्त्वाभावार्थं तत् । तस्यानिष्टत्वात् । लुप्तप्रत्ययनिरूपिताङ्गस्य कार्ये एव न लुमतति निषेधाच्च। **वार्णादाङ्गं बलीय इत्येकादेशं बाधित्वेति** । वस्तुस्थितिकथनम् । **आटमन्तरेणेति** । अनेकाजिण एर्यणित्यर्थादिति भावः । नन्वीयतुरित्यादौ द्वित्वे यणर्थं योगविभागश्चरितार्थ इति कथं ज्ञापकोऽत आह—**ईयतुरित्यादौ हीति** । **यण इति** । इणो यणितीति भावः । **नित्योऽपीति** । योगविभागाभाव इति भावः । **अन्तरङ्गानपीति** । तिबाद्यपेक्षया अडाटौ लविशेषाङ्गादिबह्वपेक्षत्वाद्बहिरङ्गौ । अपिना परनित्यावपि । **अकृतेष्विति** । कृतेषु तेषु तिङ्शित्सार्वधातुकत्वादिति भावः । **यण्लोपयोरिति** । वृद्धेः पूर्वं परत्वादिति भावः । **अन्तरङ्गत्वादिति** । वार्णत्वाल्लादेशेभ्यः प्रागेवेति भावः । **नानाश्रयत्वादिति** । भिन्नकालत्वादि-

---

* ६. ४. ८२. ÷ ६. ४. ६२. ×× ६. ४. ४६. ÷÷ ६. ४. ७४

## अनुनासिकलोपो हिलोपाल्लोपयोर्जभावश्च ॥ ६ ॥

अनुनासिकलोपो हिलोपाल्लोपयोर्जभावश्च प्रयोजनम् ** । आगहि जहि । गतः गतवानिति । अनुनासिकलोपे कृते जभावे चातो हेरतो लोप इति च लोपः प्राप्नोति । असिद्धत्वान्न भवति । अनुनासिकलोपस्तावन्न प्रयोजयति । अल्लोप उपदेश इति ++ वर्तते । यद्युपदेश इति वर्तते धिनुतः कृणुतः अत्र* न प्राप्नोति । नैष दोषः । नोपदेशग्रहणेन प्रकृतिरभिसंबध्यते । किं तर्हि । आर्धधातुकमभिसंबध्यते । आर्धधातुकोपदेशे यदकारान्तमिति । जभावश्चापि न प्रयोजयति । हिलोपे ××× योगविभागः करिष्यते । अतो हेः । ततः उतश्च । उतश्च हेर्लुग्भवतीति । ततः प्रत्ययात् । प्रत्ययादित्युभयोः शेषः । अथ किमर्थमनुनासिकलोपो हिलोपाल्लोपयोर्जभावश्चेत्युच्यते नानुनासिकलोपजभावावल्लोपहिलोपयोरित्येवोच्येत । संख्यातानुदेशो ÷ मा भूदिति । अनुनासिकलोपो हिलोपे प्रयोजयति । मण्डूकि ताभिरागहि । रोहिदश्च इहाऽऽगहि । मरुद्भिरग्न आगहि ।

---

प्र०—वार्णादाङ्गं बलीय इति नास्ति । कृतायां वृद्धावासन्निति तपरकरणादाकारलोपाभावः । इणोऽपि वृद्धेरैकारस्य यणन भविष्यति । इणो यण् एरिति योगविभागादिकारान्तस्येणो यण्विधानात्तदभावाच्चाऽऽयादेशे कृत आयन्निति भविष्यति । **आर्धधातुकोपदेश इति** । आर्धधातुकोपदेशकाले यदकारान्तमङ्गं तस्याऽऽर्धधातुके परतो लोप इति सूत्रार्थः । तत्र धिन्विकृण्व्योर चेत्युप्रत्ययसंनियोगेनाकारस्य विधानादकारान्तत्वं धिन्विकृण्व्योरार्धधातुकोपदेशे भवतीति सिध्यत्यल्लोपस्तस्य च परनिमित्तकत्वात्स्थानिवद्भावाद्धिनुत इत्यादौ गुणाभावः । **प्रत्ययादित्युभयोः शेष इति** । समुदायापेक्षणात् । असंयोगपूर्वादित्यत्र तु भेदेनापेक्षणादानन्तर्यादुत इति संबध्यते न त्वत इति । **संख्यातानुदेशो मा भूदिति** । यद्यपि प्रयोजनाख्यानपरत्वाद्वाक्यस्य यथासंख्याभावस्तथाऽपि क्रमस्यान्यत्र व्यवस्थाहेतुत्वदर्शनादिहापि तदाशङ्का स्यादिति तन्निवारणायैवं निर्देशः कृतः । **आगहीति** । अत्रापि प्रत्ययादित्यस्योभयोः शेषत्वाद्धेर्लुगभावः सिध्यति ।

---

उ०—त्यर्थः । **योगविभागादिति** । इणो यणित्यत्र एरित्यपकृष्य संबध्यत इति तत्त्वम् । **आर्धधातुकोपदेशेति** । तत्फलं तु पत् । पयतेः क्विप् । नन्वनन्तरस्येति न्यायादुत इत्यस्यैव शेषः स्यादत आह—**समुदायेति** । न चैवं कादिभ्य आचारक्विबन्तेभ्यो. हय्धातोश्च यङ्लुकि यलोपे हिलोपानापत्तिः । अनभिधानेन तेभ्यो यङ्लुक एवाभावादित्याहुः । **यद्यपीति** । शास्त्रीयकार्य एव परिभाषाप्रवृत्तिरिति भावः । **क्रमस्यान्यत्रेति** । आद्यन्तावित्यादौ व्याकरणशास्त्रे समासवाक्ये यथासंख्यप्रवृत्त्या क्रमिकसंबन्धदर्शनादस्यापि तच्छास्त्रीयवाक्यत्वेन तदाशङ्का स्यादित्यर्थः । **सिध्यतीति** । तथा च नेदं प्रयोजनमिति भावः ।

---

** ६. ४. ३७; ३६; १०५; ४८. ++ ६. ४. ३७. * ३. १. ८०. ××× ६. ४. १०६. ÷ १. ३. १०.

## संप्रसारणमवर्णलोपे ॥ ७ ॥

संप्रसारणमवर्णलोपे प्रयोजनम् । मघोनः पश्य । मघोना मघोने । संप्रसारणे कृते यस्येति लोपः प्राप्नोति* । असिद्धत्वान्न भवति । नैतदस्ति प्रयोजनम् । वक्ष्यत्येतन्मघवन्शब्दोऽव्युत्पन्नं प्रातिपदिकमिति+ ।

## रेभाव आल्लोपे ॥ ८ ॥

रेभाव आल्लोपे प्रयोजनम् । किं स्विद्गर्भं प्रथमं दध्र आपः । रेभावे ××कृत आतो लोप इटि च [ ६. ४. ६४ ] इत्याकारलोपो न प्राप्नोति । असिद्धत्वाद्भवति । एतदपि नास्ति प्रयोजनम् । छान्दसो रेभावो लिट् च च्छन्दसि सार्वधातुकमपि भवति । तत्र सार्वधातुकमपिन्ङिद्भवतीति× ङित्त्वं श्नाभ्यस्तयोरातः [ ६. ४. ११२ ] इत्याकारलोपो भवति ।

यदि तर्ह्ययं योगो नाऽऽरभ्यते

उत्तु कृञः कथमोर्विनिवृत्तौ

इह कुर्वः कुर्मः कुर्यादित्युकारलोपे कृते सार्वधातुकपर उकार इत्युत्त्वं न प्राप्नोति÷÷ ।

---

प्र०—**मघोन इति** । मघमस्यास्तीति च्छन्दसीवनिपाविति वनिप् । असिद्धं बहिरङ्गमन्तरङ्ग इति परिभाषया संप्रसारणस्यासिद्धत्वं नास्ति । एषा हि परिभाषा वाह ऊडित्यत्र ज्ञापितत्वादाभाच्छास्त्रीया तस्यां प्रवर्तमानायामकारलोपसंप्रसारणयोरसिद्धत्वादन्तरङ्गबहिरङ्गयोर्युगपदनुपस्थानान्नाजानन्तर्य इति प्रतिषेधाद्वा । **अव्युत्पन्नमिति** । ततश्च तद्धिते विधीयमानोऽकारलोपो न भवति । व्याश्रयत्वादसिद्धत्वमपि न स्यादित्यव्युत्पत्तिपक्ष एवाऽऽश्रयणीयः । **रेभावे कृत इति** । नित्यत्वात् । **लिट् चेति** । सार्वधातुके शप् श्लौ द्विर्वचनेऽघोरितीत्वनिषेधादाकारलोपः । वार्तिककारोक्तेषु प्रयोजनेषु प्रत्याख्यातेषु श्लोकवार्तिककारोक्तप्रयोजनोपक्षेपः । **उत्तु कृञ इति** । **सार्वधातुकपर इति** ।

---

उ०—नन्वन्तरङ्गे यस्येति लोपे कर्तव्ये विभक्त्यपेक्षबहिरङ्गसंप्रसारणस्यासिद्धत्वादल्लोपाभावः सिद्धोऽत आह—**असिद्धमिति** । **नाजानन्तर्येति** । भस्येत्यधिकाराद्यस्येति लोपोऽजानन्तर्याश्रयः । अत्राऽऽद्यमेव समाधानं युक्तम् । नाजानन्तर्य इत्यस्याः सिद्धान्त्यसंमतत्वादिति बोध्यम् । अव्युत्पत्तिपक्षस्यावश्यांश्रयणीयतां दर्शयति—**आश्रयत्वादिति** । वन्नन्तस्य तु संप्रसारणविषये प्रयोग एव नास्तीति भावः । **अघोरितीति** । ई हल्यघोरित्यस्याभावे श्नाभ्यस्तयोरित्याल्लोप इति भावः । द्वित्वं तु श्लावित्यनेन । वार्तिकारः कात्यायनः । श्लोकवार्तिककारस्त्वन्य एवेति भावः । एवं प्रयोजनाभावादस्य योगस्यानारभ्यत्वे स्थिते श्लोकवार्तिककृता प्रयोजनान्युक्तानीति संगतिं दर्शयति—**प्रत्याख्यातेष्वित्यनेन** । भाष्ये **सार्वधातुकपर उकार इति** । अत उदिति सूत्र उतश्च प्रत्ययादित्यत उत इत्य-

---

* ६. ४. १३३; १४८, + ४ १, ७.×× ६. ४. ७६. × १. २. ४. ÷÷ ६ ४. १०८; १०९; ११०.

णेरपि चेटि कथं विनिवृत्तिः।

इह च कारयतेः कारिष्यते णेरनिटि[६. ४. ५१] इति णिलोपो न प्राप्नोति।

अब्रुवतस्तव योगमिमं स्याल्लुक्च चिणो नु कथं न तरस्य।

इह च अकारितराम् अहारितरामिति चिण उत्तरस्य तरस्य लुक्कथं न स्यात्**।

चं भगवान्कृतवांस्तु तदर्थं तेन भवेदिटि णेर्विनिवृत्तिः।

इह स्यसिच्सीयुट्तासिषु भावकर्मणोरुपदेशेऽज्झनग्रहदृशां वा चिण्वदिट् च [६. ४. ६२] किंच। णिलोपश्च।

---

प्र०–अथ सार्वधातुक एव परतः कस्मादुत्त्वं न क्रियते। नैवं शक्यम् । उकारलोप एव सत्युत्त्वं स्यात् कुरुत इत्यादौ तु विकरणेन व्यवधानान्न स्यात् । कुर्व इत्यादावपि स्थानिवद्भावाद्व्यवधानमिति चेत् । न । वचनादीदृशं व्यवधानमाश्रीयते । ननु च सार्वधातुकपर उकार इत्याश्रीयमाणे नित्यत्वात्कृतेऽप्युकारलोपे तल्लोपस्य स्थानिवद्भावादुत्त्वं भविष्यति। अत्र हि परत्वाद्गुणे कृत उकारलोपः । ततश्चानादिष्टादचः पूर्वस्य विधावस्त्येव स्थानिवद्भावः। प्रत्ययलक्षणं तु वर्णाश्रयत्वान्मा भूत्। एवं तर्हि परिहारान्तरस्य वक्ष्यमाणत्वात्स्थानिवत्त्वं भाष्यकृता नाऽऽश्रितम् । अथवा नित्यत्वात्पूर्वमुकारलोपः। पश्चाद्गुणः । कृते ह्युकारलोपे प्रत्ययलक्षणमिति गुणेन भाव्यम्। ततो लक्षणान्तरेण च प्राप्नुवन्विधिरनित्य इति गुणस्यानित्यत्वम्। ततश्चाऽऽदिष्टादचः पूर्वोऽकार इति तद्विधौ नास्ति स्थानिवद्भावः। ननु व्याश्रयत्वादुकारलोपस्यासिद्धत्वं न प्राप्नोति । म्वोरुकारलोपविधानात्सार्वधातुके पर उत्त्वविधानात् । नैतदस्ति । मकारवकारादौ प्रत्यय उकारलोपविधानादस्त्येव समानाश्रयत्वम्। **कारिष्यत इति** । प्रकृतिप्रत्ययाश्रयत्वादिण्णिलोपयोः समानाश्रयत्वम्। चं भगवानित्यादिना प्रयोजननिराकरणम् । **इट् चेति** । चकारेण णिलोपो विधीयत

---

उ०–नुवृत्तं सप्तम्या विपरिणम्यत इति भावः। उकारान्तस्य करोतेरित्यर्थस्तु न। करोतिशब्दबोधितधातोस्तदन्तत्वासंभवात् । तत्रानुवृत्तिमकृत्वा सार्वधातुक एवोत्त्वं विधीयतामिति शङ्कते—**अथेति**। **स्थानिवद्भावादिति** । अचः परस्मिन्नित्यनेन । ननु पूर्वमुकारलोपे पश्चाद्गुणेऽकारस्याऽऽदिष्टादचः पूर्वस्योत्त्वविधानात्कथं स्थानिवत्त्वमत आह—**अत्र हीति**। ननु कृताकृतप्रसङ्गित्वाद्गुणोऽपि नित्योऽत आह—**कृते हीति** । **प्रत्ययलक्षणमिति**। कार्यातिदेशादिति भावः । **म्वोरुकारेति** । तदीयनिमित्तसमुदायापेक्षयाऽस्याधिकनिमित्तकत्वादिति भावः। **मकारवकारादाविति**। अङ्गस्येति स्थानषष्ठी निमत्त इत्यध्याहारेणाङ्गनिमित्ते मकारवकारादावित्यर्थ इति भावः। **कारिष्यत इति**। चिण्वदिट्। ननु मकारवकारादौ प्रत्यय इत्यर्थे कृञो मनिनि गुणे उत्त्वं स्यादेवैतदेकवाक्यतयाऽन्वये कुरुत इत्यादौ

---

** ६. ४. १०४.

म्वोरपि ये च तथाऽप्यनुवृत्तौ

इहापि कुर्वः कुर्मः कुर्यादिति म्वोर्ये चेत्येतदप्यनुवर्तिष्यते** ।

चिण्लुकि च क्ङित एव हि लुक्स्यात् ।

चिण्लुक्यपि प्रकृतं क्ङिद्ग्रहणमनुवर्तते । क्व प्रकृतम् । गमहनजनखनघसां लोपः क्ङित्यनङि [ ६. ४. ९८. ] इति । तद्वै सप्तमीनिर्दिष्टं षष्ठीनिर्दिष्टेन चेहार्थः। चिण इत्येषा पञ्चमी क्ङितीति सप्तम्याः षष्ठीं प्रकल्पयिष्यति तस्मादित्युत्तरस्य [ १. १. ६७ ] इति ।

उत्तु कृञः कथमोर्विनिवृत्तौ णेरपि चेटि कथं विनिवृत्तिः ।
अब्रुवतस्तव योगमिमं स्याल्लुक्च चिणो नु कथं न तरस्य ।
चं भगवान्कृतवांस्तु तदर्थं तेन भवेदिटि णेर्विनिवृत्तिः ।
म्वोरपि ये च तथाऽप्यनुवृत्तौ चिण्लुकि च क्ङित एव हि लुक्स्यात् ।

आरभ्यमाणेऽप्येतस्मिन्योगे

**सिद्धं वसुसंप्रसारणमज्विधौ ॥ ९ ॥**

वसोः संप्रसारणमज्विधौ सिद्धं वक्तव्यम् । किं प्रयोजनम् । पपुषः पश्य

---

प्र०—इत्यर्थः । **म्वोरिति** । अत उत्सार्वधातुक इत्यत्र म्वोर्ये चेत्यनुवर्तनात्कुत उकारलोपेऽत उत्त्वं भविष्यतीत्यर्थः । मकारादिभिश्च वाक्यभेदेन सार्वधातुकस्य विशेषणात्कुरुत[1] इत्यादावुत्त्वं भवत्येवेति भावः । **आरभ्यमाणेऽपीति** । अनेकपरिहाराश्रयणे प्रतिपत्तिगौरवं मा भूदित्येवमर्थमारभ्यमाण इत्यर्थः । **पपुष इति** । ननु चान्तरङ्गत्वादिटा भाव्यम् । न च संप्रसारणे कृतेऽपीटोऽनिवृत्तिः । निमित्ताभावे[2] नैमित्तिकस्याप्य[3]भाव इत्यस्याः परिभाषाया भाष्यकारेणानाश्रयणात् । तथा च चावित्यत्रोक्तमिहान्ये चौ प्रत्यङ्गस्य प्रतिषेधमारभन्ते तदिहापि साध्यमित्यकारस्य निवृत्तावपि यणाद्यादेशानिवर्तनाच्चैतदुक्तम् । तथा च्छ्वोरित्यत्रोक्तमवश्यमत्र तुगभावार्थो यत्नः कर्तव्योऽन्तरङ्गत्वाद्धि तुकः प्राप्तिरिति कृतेऽपि शकारे कृतस्य तुकोऽनिवृत्तिं मत्वा चैतदुक्तम् । एवं

---

उ०—न स्यादत आह—**मकारादिभिश्चेति** । माद्यादौ सार्वधातुके गुण इत्यर्थ इति भावः । ननु प्रयोजनाभावादनारम्भे साधित आरम्भोक्तिर्न युक्तेत्यत आह—**अनेकेति** । **प्रतिषेधमारभन्त इति** । उक्तपरिभाषासत्त्वे हि तदारम्भो व्यर्थ एव स्यात् । ननु प्रविभज्यान्वाख्या-

---

** ६. ४. १०७; १०९; ११०.

---

१ क. ख. ग घ. ङ. °णादस्मेत्यादावुत्त्वाभावः । २ ख घ. °त्तापाये ३ ख. घ. °स्यपाय ।

तस्थुषः पश्य । निन्युषः पश्य चिच्युषः पश्य । लुलुवुषः पश्य पुपुवुषः पश्येति । वसोः संप्रसारणे कृतेऽचीत्याकारलोपादीनि यथा स्युरिति* । किं पुनः कारणं न सिध्यन्ति ।

**बहिरङ्गलक्षणत्वादसिद्धत्वाच्च ॥ १० ॥**

बहिरङ्गलक्षणं चैव हि वसुसंप्रसारणमसिद्धं च ।

**आत्त्वं यलोपाल्लोपयोः पशुषो न वाजान् चाखायिता चाखायितुम् ॥ ११ ॥**

आत्त्वं यलोपाल्लोपयोः सिद्धं वक्तव्यम् । किं प्रयोजनम् । पशुषो न वाजान् । पशुष+ इत्यात्त्वस्यासिद्धत्वादातो धातोः [६. ४. १४०]इत्याकारलोपो न प्राप्नोति । चाखायिता× चाखायितुमित्यात्त्वस्यासिद्धत्वाद्यस्य हलः [६. ४. ४९] इति यलोपः प्राप्नोति ।

**समानाश्रयवचनात्सिद्धम् ॥ १२ ॥**

समानाश्रयमसिद्धं भवति व्याश्रयं चैतत् । इह तावत्पपुषः पश्य तस्थुषः पश्य निन्युषः पश्य चिच्युषः पश्य लुलुवुषः पश्य पुपुवुषः पश्येति वसावाकारलोपादीनि वस्वन्तस्य विभक्तौ संप्रसारणम् । पशुष इति विटचात्त्वं विडन्तस्य विभक्तावाकारलोपः। चाखायिता चाखायितुमिति यङ्यात्त्वं यङन्तस्य चाऽऽर्धधातुके लोप इति । किं वक्तव्यमेतत् । न हि । कथमनुच्यमानं गंस्यते । अत्रग्रहणसामर्थ्यात् । ननु चान्यदत्रग्रहणस्य प्रयोजनमुक्तम् । किमुक्तम् । अत्रग्रहणं विषयार्थमिति÷ । अधिकारादप्येतत्सिद्धम् ।

---

प्र०—तर्हि नित्यशब्ददर्शने प्रविभज्यावयवेषु कल्प्यमानेष्वन्तरङ्गबहिरङ्गभावो नास्तीति पपा वस् अस् इति स्थिते नित्यत्वादिटं बाधित्वा संप्रसारणं भवत्याल्विधित्वाच्च स्थानिवत्त्वाभावादिटोऽप्रसङ्गः । अथवा संप्रसारणं तदाश्रयं च बलीयो भवतीत्यत्र विषये पूर्वमिट् न प्रवर्तते । **पशुष** इति। पशुं सनोतीति जनसनेति विट्। विड्वनोरित्यात्वम् । तस्यासिद्धत्वादातो धातोरित्याकारलोपाप्रसङ्गः। लक्षणप्रतिपदोक्तपरिभाषा त्वाल्लोपे नाऽऽश्रीयतेऽव्याप्तिप्रसङ्गात्। **चाखायितेति** । खनो यङि द्विर्वचनात्परत्वाद्ये विभाषेत्यात्वे द्विर्वचने च तृचि रूपम् ।

---

उ०—नेऽप्यन्तर्भूतनिमित्तत्वादिनाऽन्तरङ्गत्वं वक्तुं शक्यमेवेत्यरुचेराह—**अथवेत्यादि**। लिट्यभ्यासस्येति सूत्रस्थभाष्यविरुद्धमिदम्। तस्माद्विभज्यान्वाख्याने इटः पूर्वं प्रतिपदविधित्वेन शीघ्रोपस्थिततया संप्रसारणे ततोऽन्तरङ्गपरिभाषाया अनित्यत्वात्प्रतिपदविधिविषये तदप्रवृत्तेश्चेडभाव उस्निमित्तक एवाऽऽल्लोप इत्याशयः। **लक्षणेति**। एवं च लक्ष्यानुसारेण साऽत्र नाऽऽश्री-

---

* ६. ४. १३१; ६४; ८२; ७७. + ३. २. ६७; ६. ४. ४१. × ६. ४. ४३. ÷ ६. ४. २९.

५

इह पपुषः चिच्युषः लुलुवुषः द्वौ हेतू व्यपदिष्टौ बहिरङ्गलक्षणत्वं चासिद्धत्वं चेति। तत्र भवेदसिद्धत्वं प्रत्युक्तं बहिरङ्गलक्षणं तु नैव प्रत्युक्तम्। नैष दोषः। बहिरङ्गमन्तरङ्गमिति च प्रतिद्वंद्विभाविनावेतावर्थौ। कथम्। सत्य-

---

प्र०—**अधिकाराद्यपीति**। ततश्चाऽऽभाद्ग्रहणं विषयार्थमत्रग्रहणं तु समानाश्रत्वप्रसिद्ध्यर्थं संपद्यते। **असिद्धत्वं प्रत्युक्तमिति**। समानाश्रयत्वपरिग्रहात्। **बहिरङ्गलक्षणं त्विति**। यद्यपि नाजानन्तर्य इत्ययमत्र निषेधोऽवतरति तथाऽपि परिभाषायाः कारणाभावात्प्रसङ्ग एव नास्तीति प्रतिपादयितुमुपन्यासः। **प्रतिद्वंद्विभाविनाविति**। नहि वस्त्वन्तरानपेक्षमन्तरङ्गं बहिरङ्गं वा स्वभावसिद्धं किंचिदस्ति। परस्परापेक्षया युगपत्प्राप्तौ तयोरवस्थानाद्यथा स्योन इत्यत्र यण्गुणयोः। पपुष इत्यादौ तु युगपत्प्राप्तिर्नास्ति संप्रसारणप्राप्तिकाल आल्लोपादीनां निमित्ताभावादप्रसङ्गः। आल्लोपप्राप्तिकाले च निर्वृत्तं संप्रसारणम्। ततश्च निमित्तमेवाऽऽल्लोपादीनां संप्रसारणमिति नास्ति परिभाषोपस्थानमित्यर्थः। यद्येवं पचावेदमित्यादावपि नाक्रृते आद्गुण एत ऐ इत्यैत्वं प्राप्नोतीति निमित्तनिमित्तिभावात्परिभाषाया अनुपस्थानप्रसङ्गः। एवं तर्ह्यन्यथा व्याख्यायते। असिद्धं बहिरङ्गमन्तरङ्ग इत्येषा परिभाषा वाह ऊठित्यत्र ज्ञापितेत्याभाच्छास्त्रीया। अथवा विप्रतिषेधे परं कार्यमित्यत्रोपसंख्याताऽपि संज्ञापरिभाषाणां कार्यकालत्वाद्वसुसंप्रसारणदेशत्वादाभाच्छास्त्रीया, आभाच्छास्त्रीयेष्वाल्लोपादिषु कर्तव्येषु असिद्धेति न प्रवर्तते। तदप्रवृत्तौ चाऽऽल्लोपादीनि भवन्तीति वाक्यार्थः। पदान्य-

---

उ०—यत इत्यर्थः। अत एव क्षीरं धयन्ति तान्पश्येत्यर्थे क्षीरधः पश्येत्यादिसिद्धिः। **ततश्चेति**। अधिकारादाभीयस्यासिद्धत्वे सिद्धे आभाद्ग्रहणमाभीये कर्तव्य इत्यर्थरूपविषयलाभार्थमिति, अत्रग्रहणं समानाश्रयत्वार्थमिति भावः। **समानाश्रयस्येति**। समानाश्रयत्वं च तत्प्रयोगप्राप्तासिद्धत्वाश्रयशास्त्रीयनिमित्तसमुदायापेक्षयाऽन्यूनानतिरिक्ताश्रयकत्वम्। आश्रयणं स्थानित्वेनैव निमित्तत्वेनैवेति नाऽऽग्रहः। किंतु यथाकथंचित्। विकारकृतमतिरिक्तत्वं तु न। जहीत्यादेरनुदाहरणत्वापत्तेः। तत्र पपुष इत्यत्र न्यूनः। चाखायितेत्यादावधिकः। अतिरिक्तमपि पूर्वविध्युपात्ततावच्छेदकरूपेणाऽऽश्रितं चेत्तदपि समानाश्रयमेव। समानशब्दस्वारस्यात्। अत एव चिणो लुकि चिणो लुगसिद्ध इति संगच्छते। एवं च स्त्री इयतीत्यत्रेदमुसंप्रसारणस्थानिकस्योत्तरीयनिमित्तसमुदायापेक्षया स्त्रिया इति इयङि अधिकस्य स्त्रीशब्दस्यापेक्षणादङ्गसंज्ञासूत्रस्थविधिग्रहणस्य तत्प्रयोजनमाकरोक्तं संगच्छत इत्याहुः। **यद्यपि नाजानन्तर्य इति**। वस्तुत इयं सिद्धान्त्यसंमतेत्यसकृदावेदितम्। परस्परापेक्षयेत्यस्य तयोरित्यनेनान्वयः तयोरन्तरङ्गत्वबहिरङ्गत्वयोर्युगपत्प्राप्तौ लक्ष्य इति शेषः। तयोरित्यस्याऽऽवृत्त्या तयोरन्तरङ्गबहिरङ्गयोर्युगपल्लक्ष्ये प्राप्तौ परस्परापेक्षया तयोरन्तरङ्गत्वबहिरङ्गत्वावस्थानादित्यर्थः। **स्योन इति**। अत्र सिवेर्बाहुलकान्नप्रत्यये छ्वोरित्यूठि, इकारस्य लघूपधगुणो यण् च प्राप्नोति। **वाह ऊठित्यत्रेति**। एतदेव युक्तम्। अथवेति तु प्रौढ्या। **कर्तव्येष्वसिद्धेति**।

न्तरङ्गे बहिरङ्गं सति च बहिरङ्गेऽन्तरङ्गम् । न चात्रान्तरङ्गबहिरङ्गयोर्युगपत्समवस्थानमस्ति । नानभिनिर्वृत्ते बहिरङ्गेऽन्तरङ्गं प्राप्नोति । तत्र निमित्तमेव बहिरङ्गमन्तरङ्गस्य ।

## ह्रस्वयलोपाल्लोपाश्चायादेशे ल्यपि ॥ १३ ॥

ह्रस्वयलोपाल्लोपाश्चायादेशे ल्यपि सिद्धा वक्तव्याः । प्रशमय्य गतः प्रतमय्य गतः । प्रबेभिदय्य गतः प्रचेच्छिदय्य गतः । प्रस्तनय्य गतः प्रगदय्य गतः । ह्रस्वयलोपाल्लोपानामसिद्धत्वाल्ल्यपि लघुपूर्वात् [६. ४. ५६] इत्ययादेशो न प्राप्नोति* । अत्राप्येष परिहारः समानाश्रयवचनात्सिद्धमिति । कथम् । णावेते विधयो णेर्ल्यप्ययादेशः ।

## वुग्युटावुवङ्यणोः ॥ १४ ॥

वुग्युटावुवङ्यणोः सिद्धौ वक्तव्यौ । बभूवतुः बभूवुः । वुकोऽसिद्धत्वादुवङादेशः प्राप्नोति+ । उपदिदीये उपदिदीयाते । युटोऽसिद्धत्वाद्यणादेशः प्राप्नोति× । वुकस्तावन्न वक्तव्यम् । वुकं न वक्ष्यामि । एवं वक्ष्यामि भुवो लुङ्लि-

---

प्र०—स्मिन्नर्थे योज्यन्ते । **सत्यन्तरङ्ग इति** । बुद्ध्याऽपेक्षित इत्यर्थः । **तत्र निमित्तमेवेति** । परिभाषाया असिद्धत्वादप्रवृत्ताविति भावः । वसुसंप्रसारणं चैकं परिभाषाया आल्लोपादीनां चाऽऽश्रय इति समानाश्रयत्वाद्भवत्यसिद्धत्वं परिभाषायाः । **प्रशमय्येति** । ह्रस्वस्यासिद्धत्वाल्लघुपूर्वो मकारो न भवतीत्ययादेशो न प्राप्नोति । **प्रबेभिदय्येति** । भिदेर्यङन्ताण्णिच् । तत्र यलोपस्यासिद्धत्वाल्लघुपूर्वादुत्तरो णिज्न भवति यकारेण व्यवधानादित्ययादेशाप्रसङ्गः । **प्रस्तनय्येति** । अदन्ताधिकारे स्तनगदी देवशब्द इति पठ्येते । तत्राल्लोपस्यासिद्धत्वादकारेण व्यवधानादयादेशाप्राप्तिः । **बभूवतुरिति** । भू अतुस् वुक् तस्यासिद्धत्वादुवङ् प्रा-

---

उ०—तद्दृष्ट्या तयोरप्यसिद्धत्वमित्यपि बोध्यम् । एतदपि मघोन इति प्रतीके कैयटेन स्पष्टमुक्तम् । **इति वाक्यार्थ इति** । तात्पर्यार्थ इत्यर्थः । **बुद्ध्याऽपेक्षित इति** । परिभाषाप्रवृत्तयेऽन्तरङ्गबहिरङ्गयोः परिभाषायाश्च विद्यमानत्वेन बुद्धिसंनिधिरपेक्षितः । अत्र त्वसिद्धत्वात्परिभाषायाः परिभाषादृष्ट्या तयोरप्यसिद्धत्वान्न तथा बुद्धौ संनिधानमिति । न युगपत्समवधानमस्तीत्यनेनासिद्धत्वाद्विद्यमानत्वेन बुद्धौ संनिधानं नास्तीत्येव विवक्षितम् । नानभिनिर्वृत्त इत्यस्य तथा बुद्धिविषयत्वमप्राप्त इत्यर्थः । अन्तरङ्गं प्राप्नोतीत्यस्यान्तरङ्गत्वेन बुद्धिविषयत्वं प्राप्नोतीत्यर्थः । **अप्रवृत्ताविति** । परिभाषाया अप्रवृत्तौ सत्यां बहिरङ्गं संप्रसारणमन्तरङ्गलोपस्य निमित्तमित्यर्थ इति भावः । परे तु तत्र निमित्तमेवेति भाष्यस्य परिभाषाया अनित्यत्वादित्यर्थः । एवं चासिद्धवत्सूत्रप्रत्याख्यानेऽपि न दोष इत्याहुः । **प्रशमय्येति** । शमेर्णिचि उपधावृद्धिर्मितां ह्रस्वः क्त्वो ल्यप् । **भिदेरिति** । बेभिद्य इय इति स्थितेऽल्लोपयलोपयोरयादेश इष्यते । **अदन्तेति** । चुरादावित्यर्थः । ननु कृतेऽपि उवाङि वुकः

---

* ६. ४. ९२; ४९; ४८. + ६. ४. ८८; ७७. × ६. ४. ६३; ८२.

टोरूदुपधाया इति* । अत्रोवङादेशे कृते योपधा तस्या ऊत्त्वं भविष्यति । एवमपि कुतो नु खल्वेतदुवङादेशे कृते योपधा तस्या ऊत्त्वं भविष्यति न पुनः सांप्रतिकी योपधा तस्याः स्याद्भकारस्येति । नैष दोषः । ओरिति++ वर्तते तेनोवर्णस्य भविष्यति । भवेत्सिद्धं बभूवतुः बभूवुः । इदं तु न सिध्यति बभूव बभूविथेति । किं कारणम् । गुणवृद्ध्योः×× कृतयोरुवर्णाभावात् । नात्र गुणवृद्धी प्राप्नुतः । किं कारणम् । क्ङिति च [ १. १. ५. ] इति प्रतिषेधात् । कथं कित्त्वम् । इन्धिभवतिभ्यां च [ १. २. ६. ] इति । तद्वै कित्त्वं वयं प्रत्याचक्ष्महे वुका । इह तु कित्त्वेन वुक्प्रत्याख्यायते । किं पुनरत्र न्याय्यम् । वुग्वचनमेव न्याय्यम् । सत्यपि हि कित्त्वे स्यातामेवात्र गुणवृद्धी । किं कारणम् । इग्लक्षणयोर्गुणवृद्ध्योः स प्रतिषेधो न चैषेग्लक्षणा वृद्धिः । एवं तर्हि नार्थो वुका नापि कित्त्वेन । स्तामत्र गुणवृद्धी गुणवृद्ध्योः कृतयोरवावोश्च कृतयोर्योपधा तस्या ऊत्त्वं भविष्यति । कथम् । ओरित्यत्रा-

प्र०—प्नोति । ननु च नाप्राप्त उवङि वगारभ्यमाणस्तस्यापवादो भवति सत्यपि संभवे बाधनं भवतीत्येष न्यायः । नैतदस्ति । बाधकप्रवृत्त्यवस्थायां यद्विद्यते तद्बाधकेन निवर्तितं न प्रवर्तते । उवङ् तु निरवकाशत्वात्प्रवर्तमाने वुक्यसिद्धत्वादात्मानमदर्शयन्न शक्यो बाधितुमिति वकि कृते तस्यासिद्धत्वात्प्रवर्तते । **तेनोवर्णस्येति** । उवर्णस्य उपधाया ऊद्भवतीत्येवमाश्रयणादुवङि च कृत उवर्ण उपधा भवति नान्यथा । इन्धिभवतिभ्यां चेति कित्त्वं प्रत्याख्यातमिति मत्वाऽऽह—**भवेत्सिद्धमिति** । **तद्वै कित्त्वं वयमिति** । भुवो वुको नित्यत्वादिति न्यायात् । **इह तु कित्त्वेनेति** । क्ङिति चेति गुणवृद्धिनिषेधादुवङि च कृत उवर्णस्योत्त्वविधानात् । **स्यातामेवेति** । गुणग्रहणं प्रसङ्गोच्चारितं गुणस्येग्लक्षणत्वात्सिध्यति हि प्रतिषेधः । **न चैषेति** । अचो ञ्णितीत्यत्रेक इत्यनुपस्थानादिग्लक्षणत्वाभावः । **ओरित्यत्रावर्णमिति** ।

उ०—प्रवृत्तिसंभवाद् विरोधाभावेन कथं बाधकत्वमत आह—**सत्यपीति** । न चात्रोवङ्च्यप्युपधायां चेति दीर्घे वलि लोपे बभूवतुरित्यादिसिद्धिः । बहिरङ्गवुकोऽसिद्धत्वेन वलोपाप्राप्तेरिति भावः । **तद्बाधकेनेति** । यथा केनाण् । नन्विन्धिभवतिभ्यामिति कित्त्वाल्लिटो गुणवृद्ध्यभाव उवङि सिद्धमिष्टमत आह—**इन्धीति** । **नित्यत्वादिति** । नित्यत्वाद्वुकि गुणवृद्ध्योः प्राप्त्यभाव इति भावः । **प्रसङ्ग इति** । प्रतिषेधे गुणवृद्ध्याः सह निर्देशादिति भावः । अत एव भाष्ये वृद्धेरेवानिग्लक्षणत्वमुक्तम् । न च कित्त्वविधानसामर्थ्यादनिग्लक्षणत्वेऽपि निषेधः । थलि उत्तमे णलि चारितार्थ्यात् । वुका भवतिग्रहणप्रत्याख्यानं न्याय्यं लाघवादिति भाष्याशयः । न च द्विर्वचनेऽचीत्यस्यापि प्रवृत्त्या द्वित्वात्पूर्वं गुणवृद्ध्योरभावे भुवो वुको निर्विघ्नत्वान्नित्यत्वादिति हेतुरयुक्त इति वाच्यम् । तत्र द्वित्वे कर्तव्य इति वाक्यशेषेण वुकि तत्प्रवृत्तौ

* ६. ४. ८९. ++ ६. ४. ८३ ×× ७. ३. ८४; ७ २ ११५.

वर्णमपि प्रतिनिर्दिश्यते*। इहापि तर्हि प्राप्नोति। कीलालपः पश्य शुभंयः पश्येति। लोपोऽत्र बाधको भविष्यति+। इह तर्हि प्राप्नोति। कीलालपौ कीलालपा इति। एवं तर्हि व्योरिति× वर्तते तेनोवर्णं विशेषयिष्यामः। ओव्योरिति। इहेदानीमोरित्यनुवर्तते व्योरिति निवृत्तम्। युटश्चापि न वक्तव्यम्। युड्वचनसामर्थ्यान्न भविष्यति। अस्त्यन्यद्युड्वचने प्रयोजनम्। किम्। द्वयोर्यकारयोः श्रवणं यथा स्यात्। न व्यञ्जनपरस्यानेकस्यैकस्य वा यकारस्य श्रवणं प्रति विशेषोऽस्ति।

किं पुनः प्राग्भादसिद्धत्वमाहोस्वित्सह तेन÷। कुतः पुनरयं संदेहः। आङाऽयं निर्देशः क्रियत आङ् च पुनः संदेहं जनयति। तद्यथा। आ पाटलिपुत्राद्वृष्टो देव इति संदेहः किं प्राक्पाटलिपुत्रात्सह तेनेति। एवमिहापि संदेहः प्राग्भात्सह तेनेति। कश्चात्र विशेषः।

**प्राग्भादिति चेच्छुनामघोनाभूगुणेषूपसंख्यानम् ॥ १५ ॥**

प्राग्भादिति चेच्छुनामघोनाभूगुणेषूपसंख्यानं कर्तव्यम्। शुनः पश्य।

---

प्र०—अकारोकारयोराद्गुणे कृते ङसिङसोश्चेति पूर्वैकादेशेन निर्देशात्। **इहापीति**। ओः सुपीत्यत्रावर्णस्यापि निर्देशाद्यणप्रसङ्गः। **लोपोऽत्रेति**। परत्वादिति भावः। आतो धातोरिति लोपस्यावकाशः संयोगपूर्वाकारान्तो धातुरकारप्रश्लेषस्योत्तरत्रावकाशो बभूव बभूविथेति। कीलालप इत्यत्रोभयप्रसङ्गे परत्वादाकारलोपः। विप्रतिषेधे चासिद्धत्वं न भवतीति ज्ञापयिष्यति। **कीलालपाविति**। असर्वनामस्थान इत्यनुवर्तनाद्भसंज्ञाया अभावादाकारलोपप्रसङ्गात्। **एवं तर्हि व्योरिति**। यदेव य्वोरिति प्रकृतं तदेव वर्णक्रमव्यत्ययेन व्योरित्युक्तम्। तत्राकारोकारसमुदायनिर्देशेऽपि व्योरित्यनेन विशेषणादुकारस्यैव यण् भवति न त्ववर्णस्येति। **इहेति**। भुवो वग्लुङ्लिटोः, ऊदुपधाया गोह इत्यत्र। **न व्यञ्जनपरस्येति**। व्यञ्जनात्परस्येति सुप्सुपेति समासः। श्रुतिभेदपक्षेऽपि यणो मय इति द्विर्वचनविधानाद्धलो यमां यमि लोप इति पक्षे लोपविधानात्पक्षे यकारद्वयं भवत्येवेति नार्थो युटेति तद्विधानसामर्थ्याद्यण् न भवति। **शुन इति**। श्वन् शस् इति स्थिते संप्रसारणम्। वार्णादाङ्गस्य बली-

---

उ०—मानाभावेन परत्वात्तयोः प्राप्तौ तस्य सार्थक्यादित्याहुः। **पूर्वैकादेशेनेति**। समाहारद्वंद्वे नुमभाव इतरेतरद्वंद्वे वा एकवचनं सौत्रत्वादिति भावः। मध्यमपदलोपो वा समासोऽत एव न पूर्वनिपातदोषः। **संयोगपूर्वेति**। प्रा ग्ला इत्यादयः। ननूभयोरप्याभाच्छास्त्रीयत्वेनान्यतरस्यासिद्धत्वात्कथं विप्रतिषेधः स्यादत आह—**विप्रतिषेधे चेति**। उभयोरप्यसिद्धत्वेन समत्वाद्विप्रतिषेध इति तत्त्वम्। व्योरित्यस्य प्रकृतत्वाभावादाह—**यदेवेति**। **तद्विधानसामर्थ्यादिति**। चिन्त्यमिदम्। यकारत्रयश्रवणार्थमेतत्स्यादिति। अन्तरङ्गत्वात्पूर्वरूपे कृतेऽ-

---

* ६. ४. ८३. + ६. ४. १४०. × ६. ४. ७७. ÷ ६. ४. १२८: १२९: १७५.

शुना शुने । संप्रसारणे* कृतेऽल्लोपोऽनः [६. ४. १३४] इति प्राप्नोति । यस्य पुनः सह तेनासिद्धत्वमसिद्धत्वात्तस्य न संयोगाद्वमन्तात् [ १३७ ] इति प्रतिषेधो भविष्यति । यस्यापि प्राग्भादसिद्धत्वं तस्याप्येष न दोषः । कथम् । नास्त्यत्र विशेषोऽल्लोपेन वा निवृत्तौ सत्यां पूर्वत्वेन++ वा । अयमस्ति विशेषः । अल्लोपेन निवृत्तौ सत्यामुदात्तनिवृत्तिस्वरः×× प्रसज्येत । नात्रोदात्तनिवृत्तिस्वरः प्राप्नोति । किं कारणम् । न गोश्वन्साववर्ण [ ६. १. १८२. ] इति प्रतिषेधात् । नैष उदात्तनिवृत्तिस्वरस्य प्रतिषेधः । कस्य तर्हि । तृतीयादिस्वरस्य ÷÷ । यत्र तर्हि तृतीयादिस्वरो नास्ति । शुनः पश्येति । एवं तर्हि न वयं लक्षणस्य प्रतिषेधं शिष्मः । किं तर्हि । येन केनचिल्लक्षणेन प्राप्तस्य विभक्तिस्वरस्यायं प्रतिषेधः । यत्र तर्हि विभक्तिस्वरो नास्ति । बहुशुनीति** । यदि पुनरयमुदात्तनिवृत्तिस्वरस्यापि प्रतिषेधो

---

प्र०—यस्त्वात्पूर्वैकादेशं बाधित्वाऽल्लोपः प्राप्नोति । उपसंख्यानवादी विशेषं प्रतिपादयितुमाह—**अयमस्तीति** । अनुदात्तनिमित्तत्वादुदात्तलोपस्यैकादेशे तु सत्येकादेश उदात्तेनोदात्त इत्याद्युदात्तं पदं भवति । श्वशब्दाकारस्य प्रत्ययस्वरेणान्तोदात्तत्वात्प्रत्याख्यानवाद्याह—**नात्रेति** । उपसंख्यानवाद्याह—**नैष इति** । **तृतीयादिस्वरस्येति** । सावेकाच इति प्राप्तस्य । तत्र प्रतिषिद्धेऽपि तृतीयादिस्वरे लोपे सत्युदात्तनिवृत्तिस्वरप्रसङ्ग इति विशेषोऽस्ति न गोश्वन्नित्यस्य तु निषेधस्य फलं श्वभ्यां श्वभिरिति हलादौ विभक्तावस्ति । स एवाऽऽह—**यत्र तर्हीति** । चार्थे तर्हिशब्दः । न केवलं शुना शुन इत्यत्र तृतीयास्वरे प्रतिषिद्धेऽप्युदात्तनिवृत्तिप्रसङ्गोऽपि तु यत्र तृतीयाद्यभावः शुनः पश्येति तत्राप्युदात्तनिवृत्तिस्वरप्रसङ्ग इत्यर्थः । न ह्यत्रैतदपि शक्यते वक्तुं येन केनचिल्लक्षणेन प्राप्तस्य तृतीयादिस्वरस्य निषेध इति । प्रत्याख्यानवाद्याह—**एवं तर्हीति** । न सावेकाच इत्यस्यैव लक्षणस्यायं प्रतिषेधः किं तर्हि विभक्तेः प्राप्तस्योदात्तमात्रस्येत्यर्थः । **विभक्तिस्वरस्येति** । वचनाद्विभक्तिग्रहणानुवृत्तिरनेनाभ्युपगतेति । अत्रोपसंख्यानवाद्याह—**यत्र तर्हीति** । बहवः श्वानोऽस्यामिति बहुव्रीहिः । तत्राल्लोपवादिमतेनान उपधालोपिन इति ङीपि बहोर्नञ्वदुत्तरपदभूम्नीत्यन्तोदात्तत्वादुदात्तनिवृत्तिस्वरप्रसङ्गः । प्रत्याख्यानवाद्याह—**यदि पुनरिति** ।

---

उ०—ल्लोपाप्राप्तेराह—**वार्णादिति** । **प्रत्ययस्वरेणेति** । श्वन्नुक्षन्नित्यादिना कनिप्रत्ययान्तत्वादिति भावः । वकारस्थानिकसंप्रसारणस्यानुदात्तत्वादित्यपि बोध्यम् । यदि प्रतिषिद्धे तृतीयादिस्वर उदात्तनिवृत्तिस्वरः स्यात्प्रतिषेधोऽनर्थकः स्यादत आह—**न गोश्वन्निति** । यत्र तर्हीत्यादि वचनं ग्रन्थच्छायया प्रत्याख्यानवादिन इति प्रतीयते तन्निराकरणायाऽऽह—**स एवेति** । अन्यथा ग्रन्थासंगतिः स्यात् । **चार्थ इति** । अनेकार्थत्वान्निपातानामित्यर्थः । **किं तर्हि**

---

* ६. ४. १३३, ++ ६. १. १०८, ×× ६. १. १६१, ÷÷ ६. १. १६८, ** ६. २. १७१.

विज्ञायेत । नैवं शक्यम् । इहापि प्रसज्येत । कुमारीति । एवं तर्ह्या-चार्यप्रवृत्तिर्ज्ञापयति नोदात्तनिवृत्तिस्वरः शुन्यवतरतीति यदयं श्वन्शब्दं गौरादिषु पठति* । अन्तोदात्तार्थं यत्नं करोति । सिद्धं हि स्यान्ङीपैव । मघोनः पश्य । मघोना मघोने । संप्रसारणे कृते यस्येति लोपः प्राप्नोति+ । यस्य पुनः सह तेनासिद्धत्वमसिद्धत्वात्तस्य न भविष्यति । यस्यापि हि प्राग्भादसिद्धत्वं तस्याप्येष न दोषः । कथम् । वक्ष्यत्येतन्मघवन्शब्दोऽ-व्युत्पन्नं प्रातिपदिकमिति × । भूगुणः । भूयान् । भूभावे कृत ओर्गुणः प्राप्नोति ÷ । यस्य पुनः सह तेनासिद्धत्वमसिद्धत्वात्तस्य न भविष्यति । यस्यापि प्राग्भादसिद्धत्वं तस्याप्येष न दोषः । कथम् । दीर्घोच्चारणसाम-र्थ्यान्न भविष्यति । अस्त्यन्यद्दीर्घोच्चारणस्य प्रयोजनम् । किम् । भूमेति ।

---

प्र०—विभक्तिग्रहणं नानुवर्तत इति भावः। उपसंख्यानवाद्याह—**नैवं शक्यमिति**। प्रत्याख्यानवा-द्याह—**एवं तर्हीति** । न गोश्वन्नित्यनेनानिषिध्यमानोऽप्युदात्तनिवृत्तिस्वरः शुनि ज्ञापकान्ना-वतरतीत्यर्थः । एवं प्रत्याख्यानवादिना विशेषाभावः प्रतिपादितः । विद्यते तु विशेषः । अ-ल्लोपे सत्युपधालोपित्वान्ङीपा भाव्यम्। **बहुशुनीति**। तदभावे तु बहुश्वेति। गौरादिङीषोऽ-प्यनुपसर्जनाधिकारादत्राप्रसङ्गः। सह तेनासिद्धमित्येतच्चान्ते स्थापयिष्यते। तत्र सुपर्वादि-वद्बहुश्वेत्येव भाव्यम् । स्वरविशेषनिराकरणपरत्वात्तु ग्रन्थस्य नैतदत्र भाष्ये सुष्ठु निरूपि-तम् । डाबुभाभ्यामित्यत्र बहुश्वेत्येव भवितव्यमिति द्व्यवस्थापितम् । क्वचित्तु पाठः—नैष उदात्तनिवृत्तिस्वरस्य प्रतिषेधः कस्य तर्हि तृतीयादिस्वरस्य । एवं तर्हि येन केनचित्प्राप्तस्य तृतीयादिस्वरस्य । यत्र तर्हि तृतीयादिर्नास्ति शुनः पश्येति । अत्र पाठे तर्हिशब्दश्चार्थे न व्याख्यातव्यो भिन्नकर्तृत्वात् । **यस्य पुनरिति** । ननु च भूभावस्यासिद्धत्वाद्बहुशब्द एवा-यमिति स्यादेव गुणः। **नैष दोषः** । गुणे कर्तव्ये भूभावशास्त्रस्यासिद्धत्वात्पूर्वं गुणे कृते भूभावः।

---

उ०—**विभक्तेरिति** । ततश्चोदात्तनिवृत्तिस्वरस्यापि प्रतिषेधाद्विशेषाभाव इति भावः। भाष्ये **यदि पुनरयमुदात्तनिवृत्तीति** । अविभक्तिकस्थानिकस्यापीत्यर्थः । **नोदात्तनिवृत्तिस्वर इति** । अविभक्तिविषयेऽपीत्यर्थः। नन्वल्लोपाभावेऽपि गौरादित्वान्ङीषि बहुशुनीति भाव्यमेवेत्यत आह— **गौरादीति** । **स्वरविशेषनिराकरणेति** । नन्वल्लोपे वकारस्थानिकोकारस्य हल्स्थानिकत्वेनानु-दात्तत्वात्सर्वानुदात्तं पदम्। एकादेशे तु तस्योदात्तत्वाच्छुनेत्याद्युदात्तमिति स्वरविशेषोऽस्त्येवेति कथं तस्यापि निराकरणमिति चेन्न । उदात्तनिवृत्तिस्वरकृतविशेषनिराकरणपरत्वादित्यर्थे-नादोषात् । **व्यवस्थापितमिति** । वस्तुतस्तु तद्भावन्तस्य कीदृशं रूपमिति प्रस्ताव-प्रवृत्तमिति न तदत्र साधकत्वेनोपन्यासितुं युक्तमिति चिन्त्यम्। भाष्ये**ऽव्युत्पन्नमिति**। वनिबन्ते त्वनभिधानात्संप्रसारणाभाव इति भावः । **गुणे कर्तव्य इति** । विप्रतिषेधेऽसि-

---

* ४. १. ४१. + ६. ४. १३३; १४८. × ४. १. ७. ÷ ६. ४. १५८; १४९.

निपातनादेतत्सिद्धम् । किं निपातनम् । बहोर्नञ्वदुत्तरपदभूम्नि [६.२.१७५] इति । अथवा पुनरस्तु सह तेनेति ।

**आ भादिति चेद्वसुसंप्रसारणयलोपप्रस्थादीनां प्रतिषेधः ॥ १६ ॥**

आ भादिति चेद्वसुसंप्रसारणयलोपप्रस्थादीनां प्रतिषेधो वक्तव्यः । पपुषः पश्य तस्थुषः । निन्युषः चिच्युषः । लुलुवुषः पुपुवुष इति । वसुसंप्रसारणे कृते तस्यासिद्धत्वादचीत्याकारलोपादीनि * न सिध्यन्ति । नैष दोषः । उक्तमेतत्समानाश्रयवचनात्सिद्धमिति ++ । कथम् । वसावाकारलोपादीनि वस्वन्तस्य विभक्तौ संप्रसारणमिति । यलोपः । सौरी बलाका । योऽसावण्यकारो लुप्यते तस्यासिद्धत्वादीतीति यलोपो +× न प्राप्नोति । अत्राप्येष एव परिहारः समानाश्रयवचनात्सिद्धमिति । कथम् । अण्यकारलोपोऽणन्तस्येति यलोपः । प्रस्थादिषु । प्रेयान् स्थेयान् ÷ प्रस्थादीनामसिद्धत्वात्प्रकृत्यैकाच् [ ६. ४. १६३. ] इति प्रकृतिभावो न प्राप्नोति । नैष दोषः । यथैव प्रस्थादीनामसिद्धत्वात्प्रकृतिभावो न प्राप्नोत्येवं टिलोपोऽपि** न भविष्यति ।

प्र०—न च गुणभूभावयोश्चक्रकापत्तिः । चक्रक इष्टतो व्यवस्थाश्रयणात् । भूमेति । भत्वाभावादत्र गुणाभावः । **निपातनादिति** । ह्रस्वान्तेऽप्यादेशे क्रियमाणे भूमेत्यत्र निपातनाद्दीर्घो भविष्यतीत्यर्थः । **आ भादिति चेति** । प्राग्भादित्यस्य पक्षस्य प्रतिपक्षभावेनोपादानादभिविधावाकारो बोद्धव्यः । पपुष इत्यादीनां परिहृतानामपि पुनरुपादानमस्मिन्पक्षे दोषः प्रागुद्भावित इति प्रदर्शनार्थम् । **सौरीति** । सूर्यैणैकदिगित्यण् । यस्येति लोपस्ततो ङीप् । पुनर्यस्येति लोपः । तत्र द्वयोरल्लोपयोरसिद्धत्वाद्यकार उपधा न भवतीति यलोपाप्रसङ्गः । ननु च प्राग्भादसिद्धत्वे लोपद्वयस्य सिद्धत्वादुपधा यकारो न भवतीति लोपस्याप्रसङ्ग एव । स्थानिवद्भावोऽपि यलोपविधौ प्रतिषिद्धः । भूतपूर्वगत्योपधाश्रयणाददोषः । वचनसामर्थ्याद्वा पूर्वं यलोपः पश्चादकारलोप इति क्रम आश्रयिष्यते नित्यत्वेऽप्यकारलोपस्य । **टिलोपोऽपीति** । नन्वादेशलक्षणः प्रकृतिभावोऽसिद्धत्वान्न भवतीति वक्तुं युक्तम् । टिलोपः पुनरुत्सर्गलक्षणः प्राप्नोति । नैष दोषः । आदेशेन निरवकाशत्वात्प्रवृत्तेन स्थानिनो निवर्तितत्वादसतः कुतष्टि-

उ०—द्धत्वाभावस्य वक्ष्यमाणत्वात्परत्वाद्भूभावेनैव भाव्यमिति चिन्त्यमिदम् । तस्मात्सकृद्गतिन्यायेन समाधानमुचितम् । **पुनर्यस्येति लोप इति** । उपधाभूतयलोपापेक्षया नित्यत्वादिति भावः । **वचनसामर्थ्याद्वेति** । वस्तुत उपधाग्रहणमेव भाधिकारमभिव्याप्यायमधिकार इत्यर्थे मानमिति बोध्यम् । सूत्रप्रत्याख्याने तु वचनसामर्थ्यमेव गतिरिति बोध्यम् ।

* ६. ४. १३९; ६४; ८२; ७७. ++ ६. ४ २२+. × ४ ३. ११२; ६. ४. १४८. १४९.
** ६. ४. १५५.

## श्नान्नलोपः ॥ ६ । ४ । २३ ॥

अथ किमर्थं श्नमः सशकारस्य ग्रहणं क्रियते न नान्नलोप इत्येवोच्येत । नान्नलोप इतीयत्युच्यमाने नन्दिता नन्दक इत्यत्रापि प्रसज्येत । एवं तर्ह्येवं वक्ष्यामि । नान्नलोपोऽनिदिताम् । ततो हल उपधायाः क्ङिति । अनिदितामिति ** । नैवं शक्यम् । इह हि न स्यात् । हिनस्ति । तस्मान्नैवं शक्यम् । न चेदेवं नन्दिता नन्दक इति प्राप्नोति । एवं तर्हि क्ङितीति + वर्तते । एवमपि हिनस्तीत्यत्र न प्राप्नोति । नैषा परसप्तमी । का तर्हि । सत्सप्तमी । क्ङिति सति × । एवमपि नन्दमान इत्यत्रापि ÷

---

प्र०—लोपः । तत्र यद्यपि प्रादीनामसिद्धत्वात्प्राक् टिलोपः क्रियते तथाऽप्यादेशेषु कृतेषु तेषामसिद्धत्वान्न तल्लक्षणष्टिलोपो नाप्युत्सर्गलक्षणः । उत्सर्गेषु प्रागेव प्रवृत्तत्वात् । अनवकाशत्वाच्च प्रादीनां चक्रकदोषोऽपि नास्ति ।

**श्नान्नलोपः** । **किमर्थमिति** । यथाऽन्तरेण मकारनिर्देशं श्नादिति श्नमेव गृह्यतेऽन्यस्यासंभवात्तथा विनाऽपि शकारनिर्देशेन श्नमेव ग्राहिष्यत इति भावः । **नन्दितेति** । इदित्त्वमस्य किमर्थं स्यादिति चेत्—उपदेशावस्थायां नुमि सत्य प्रत्ययादित्यकारार्थम् । तथा ननन्दतुरित्यादौ कृतेऽपि नलोपे तस्यासिद्धत्वादित्वाभ्यासलोपाप्रवृत्त्यर्थं स्यात् । **क्ङिति सतीति** । श्नमेव ङिद्स्तीति हिनस्तीत्यादौ नलोपः सिद्धः । कथं पुनः संभवन्त्यां परसप्तम्यां सत्सप्तमी शक्या विज्ञातुम् । यथेष्टं वाक्यशेषाध्याहाराददोषः । क्ङिति सतीत्येव हि विज्ञायमाने पौर्वापर्याना-

---

उ०—ननु कृते टिलोपे तेषां चारितार्थ्यमित्यभिमानेन शङ्कते—**तत्र यद्यपीति** । **उत्सर्गेषु प्रागेवेति** । एतेन शास्त्रासिद्धत्वाश्रयणादसत इत्याद्ययुक्तमित्यपास्तम् । ननूभयोरपि परस्परमसिद्धत्वाच्चक्रकापत्तिरत आह—**अनवकाशत्वाच्चेति** । टिलोपस्यावश्यंप्राप्तावस्याऽऽरम्भात्तदपवादत्वेन प्रादीनामेव प्रवृत्त्या न चक्रकमिति भावः । परे तु प्रादीनामसिद्धत्वात्प्राक् टिलोप इत्ययुक्तम् । टिलोपस्याप्यसिद्धत्वात् । किंचापवादत्वादसिद्धा अपि प्रादय एवोचिताः । चक्रकापत्तिरपि चिन्त्या । टिलोपे प्रादिषु च कृतेषु कैयटोक्तरीत्या पुनष्टिलोपाप्राप्तेः । तस्माट्टिलोपापवादतया तं बाधित्वा प्रादिषु जातेषु तेषामसिद्धत्वान्न तदाश्रयष्टिलोपो नापि स्थानिलक्षणस्तस्य बाधितत्वादिति भाष्यार्थं इत्याहुः ।

**श्नान्नलोपः** । नन्वितरव्यावृत्त्यर्थं शकारः स्यादत आह—**यथाऽन्तरेणेति** । **अ प्रत्ययादिति** । तत्रानुवर्तमाने गुरोश्च हल इत्यनेन । ननु सत्सप्तम्यां कथमिष्टसिद्धिरत आह—**श्नमेवेति** । **कथं पुनरिति** । निर्दिष्टपरिभाषाया दुर्वारत्वादित्यर्थः । **यथेष्टमिति** । तस्मिन्निति परिभाषायां निर्दिष्ट इत्यस्य कारकविभक्त्यधिकरणसप्तम्य-

---

* ६. ४. २४. + ६. ४. १५. × १. २. ४. ÷ ३. ३. १२६.

माप्नोति । एवं तर्हि नशब्द एवात्र ङ्कित्त्वेन विशेष्यते ङ्कित्त्वेन्नशब्दो भवतीति । एवमपि यज्ञानाम् यत्नानामित्यत्र * माप्नोति । दीर्घत्वमत्र बाधकं भविष्यति+ । इदमिह संप्रधार्यम् । दीर्घत्वं क्रियतां नलोप इति किमत्र कर्तव्यम् । परत्वान्नलोपः । तस्मात्सशकारस्य ग्रहणं कर्तव्यम् । अथ क्रियमाणेऽपि सशकारग्रहण इह कस्मान्न भवति । विश्नानाम् प्रश्नानामिति××। लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेत्येवं न भविष्यति ।

---

प्र०-श्रयणान्नास्ति तस्मिन्नित्यस्याः परिभाषाया उपस्थानम् । यदा त्वौपश्लेषिकेऽधिकरणे सप्तमी तदा किं पूर्वस्य कार्यमथ परस्येत्यनियमप्रसङ्गे नियमाय परिभाषोपस्थानम् । **नन्दमान इति** । ताच्छील्यादिषु चानशि कृते शपि च चानशो व्यवहितस्यापि ङितो भावान्नलोपप्रसङ्गः । क्वचिन्नन्धमान इति पाठस्तत्र यगाश्रयो नलोपप्रसङ्गः । अर्थवद्ग्रहणपरिभाषा तु विकरणानामानर्थक्यान्नोपन्यस्ता । **नशब्द एवेति** । अर्थवशाद्विभक्तिविपरिणामो भवतीति सप्तमीपरित्यागेन पञ्चम्याश्रयणात् । प्रत्ययाप्रत्यययोः प्रत्यये संप्रत्यय इत्यत्र परिहारः संभवति । **यज्ञानामिति** । पूर्वत्रासिद्धमिति श्चुत्वस्यासिद्धत्वान्नशब्दादुत्तरो नकारः । **परत्वान्नलोप इति** । अग्नीनामित्यादौ नामीति दीर्घत्वं सावकाशम् । नलोपो हिनस्तीत्यादौ सावकाशः । यज्ञानामिमित्यादावुभयप्रसङ्गे परत्वान्नलोपप्रसङ्गः । यत्तु सुपि चेति दीर्घत्वं तत्सांनिपातलक्षणप-

---

उ०-न्तत्वेनाधिकरणसप्तम्यन्त एव तत्प्रवृत्तेरिति भावः । उपपदविभक्तेरिति न्यायेनाधिकरणसप्तम्येव तत्रोचिता च । स्पष्टं चेदं पञ्चमे कैयटे । अत एव कर्तृकर्मणोः कृतीति सूत्रे नैतत्परिभाषाप्रवृत्तिः । कृतीत्यस्य सत्सप्तमीत्वात् । कृति सति प्रत्यासत्त्या तत्प्रकृत्यर्थकर्तृकर्मणोः षष्ठीति तदर्थः । इको यणचीत्यादौ तूपश्लिष्टस्येत्यध्याहृत्याचि उपश्लिष्टस्येक इत्यन्वयेन न दोष इति संहितायामिति सूत्रे भाष्ये स्पष्टम् । एतेन सत्सप्तम्यामपि किं पूर्वा सत्ता उत परेति संदेहोऽस्त्येव । परिभाषाया अप्रवृत्तावनियमप्राप्तेश्चेति परास्तम् । **किं पूर्वस्येति** । किं पूर्वस्योपश्लिष्टस्येत्याद्यर्थः । ननु नन्दतेः परस्मैपदित्वाच्छानचोऽप्राप्तेराह—**चानशीति** । **अर्थवद्ग्रहणेति** । अन्यथा हिनस्तीत्यत्रापि विकरणं ङितमाश्रित्य नलोपो न स्यात् । **प्रत्ययेति** । एवं च कृद्ग्रहणानुवृत्तिरनावश्यकीति भावः । वस्तुतोऽङ्गस्येति सूत्रे तत्प्रत्याख्यानायैकदेशिनोपन्यस्ताऽप्येषा क्वापि भाष्यकृता लक्ष्यासिद्धये नोपन्यस्तेत्येषा नास्त्येवेत्यत्रत्यभाष्याशयः । अत एव तित्स्वरितमिति सूत्रे कैयटेनोक्तम्—प्रत्ययाप्रत्यययोरित्येषा न क्वापि भाष्य आश्रितेति । तस्य लक्ष्यसिद्धय इति शेषः । यज्ञानामित्यत्र नशब्दो न श्रूयतेऽत आह—**श्चुत्वस्येति** । **परत्वान्नलोपेति** । दीर्घे कृतेऽप्येकदेशविकृतन्यायेन नशब्दत्वान्नलोपप्राप्तिरस्त्येव । दीर्घत्वमत्रेति पूर्वपक्ष्युक्तिः । इदमिहेत्यादिपरत्वान्नलोप इत्यन्ता तु सिद्धान्त्येकदेश्युक्तिरित्यन्ये । ननु ततोऽपि परत्वात्सुपि चेति दीर्घः स्यादत आह—**यत्त्विति** । नामीत्यनेन

---

*३. ३. ९०. + ६. ४. ३. ×× ६. ४. १९.

## अनिदितां हल उपधायाः क्ङिति । ६ । ४ । २४ ।

**अनिदितां नलोपे लङ्गिकम्प्योरुपतापशरीरविकारयोरुपसंख्यानम् ॥१॥**

अनिदितां नलोपे लङ्गिकम्प्योरुपतापशरीरविकारयोरुपसंख्यानं कर्तव्यम् । विलगितः विकपितः । उपतापशरीरविकारयोरिति किमर्थम् । विलङ्गितः विकम्पितः ।

## बृंहेरच्यनिटि ॥ २ ॥

बृंहेरच्यनिट्युपसंख्यानं कर्तव्यम् । निबर्हयति निबर्हकः । अचीति किमर्थम् । निबृंह्यते । अनिटीति किमर्थम् । निबृंहिता निबृंहितुम् । तत्तर्ह्युपसंख्यानं कर्तव्यम् । न कर्तव्यम् । बृहिः प्रकृत्यन्तरम् । कथं ज्ञायते । अचीति लोप उच्यतेऽनजादावपि दृश्यते । निबृह्यते । अनिटीत्युच्यत इडादावपि दृश्यते । निबर्हितुम् । अजादावित्युच्यतेऽजादावपि न दृश्यते । निबृंहयति निबृंहकः ।

## रञ्जेर्णौ मृगरमणे ॥ ३ ॥

रञ्जेर्णौ मृगरमण उपसंख्यानं कर्तव्यम् । रजयति मृगान् । मृगरमण इति किमर्थम् । रञ्जयति वस्त्राणि ।

---

प्र०—रिभाषावशान्न भवति । **लक्षणप्रतिपदोक्तयोरिति** । लक्षणिकस्यानुमेयरूपत्वादितरत्र तु प्रत्यक्षत्वात् । यदा तु विकरणानामपि स्वार्थेनार्थवत्ताऽऽश्रीयते तदाऽर्थवद्ग्रहणपरिभाषया विश्नानां प्रश्नानामिति नलोपव्यावृत्तिसिद्धिः ।

**अनिदिताम् । विलगित इति** । गत्यर्थत्वात्कर्तरि क्तः। कृच्छ्रप्राप्तिरत्रोपतापो गृह्यते नतु रोगो यथा द्वंद्वोपतापगर्ह्यादिति। अन्यथा शरीरविकारग्रहणं केवलं कुर्यात्। **विकपित इति** । **गत्यर्थाकर्मकेति** गत्यर्थत्वात्कर्तरि क्तः । शरीरविकारोऽत्र व्याधिरुच्यते नतु स्थौल्यादि । **कम्पेरतद्विषयत्वात्** । **बृंहेरिति** । बृहि वृद्धावित्यस्य । **बृहिः प्रकृत्यन्तरमिति** । बृह बृहि वृद्धाविति पाठात् । **अजादावपि न दृश्यत इति**। ततश्च दोषायैवोपसंख्यानं स्यान्न धातुलोप इति गुणनिषेधनिवारणाय यत्नश्च कर्तव्यः स्यादित्यनारम्भणीयमेवोपसंख्यानम् । **रजयतीति** । नलोपे वृद्धौ च जनीजॄष्क्नसुरञ्जोऽमन्ताश्चेति मित्वाद्ध्रस्वः । **प्रत्यया-**

---

उ०—त्वारम्भसामर्थ्यात्परिभाषा बाध्यते । कतीनामित्यर्थं तु कतेर्नामीत्येव वदेत् । एवं च न तिस्रिति न कर्तव्यं भवतीति लाघवमिति भावः । वस्तुतः सुपि चेत्येतद्बाधित्वा नित्यत्वान्नामीत्येव दीर्घो दीर्घे कृतेऽप्युक्तरीत्या नलोपप्राप्तिश्चात्रेति बोध्यम् ।

**अनिदिताम् । यथा द्वंद्वेति** । व्यतिरेके दृष्टान्तः । विगलितविकपितयोर्यथाक्रमं कृच्छ्रप्राप्तव्याधितावर्थः । कृच्छ्रप्राप्तिर्मानसं दुःखम् । **गत्यर्थत्वादिति** । वस्तुतोऽकर्मकत्वात्कर्तरि क्तः । उपसंख्यानस्याकर्तव्यत्वे हेत्वन्तरमाह—**न धात्विति** । यत्नः परिगणनरूपः ।

घिनुणि चोपसंख्यानं कर्तव्यम् । रागी ।

**घिनुणि निपातनात्सिद्धम् ॥ ४ ॥**

किं निपातनम् । त्यजरजेति++ । अशक्यं धातुनिर्देशे निपातनं तन्त्रमाश्रयितुम् । इह हि दोषः स्यात् । दशनहः करणे* । दंष्ट्रा । नैतद्धातुनिपातनम् । किं तर्हि । प्रत्ययान्तस्यैतद्रूपं तस्मिंश्चास्य प्रत्यये लोपो भवति दंशसञ्जस्वञ्जां शपि [ ६. ४. २५ ] इति ।

रजकरजनरजःसूपसंख्यानं कर्तव्यम् । रजकः रजनम् रज इति ।

**रजकरजनरजःसु कित्त्वात्सिद्धम् ॥ ५ ॥**

कित एवैत औणादिकाः । तद्यथा । रुचकः भुवनम् शिर इति ।

**शास इदङ्हलोः ॥ ६ । ४ ३४ ॥**

**शास इत्त्व आशासः क्वौ ॥ १ ॥**

शास इत्त्व आशासः क्वावुपसंख्यानं कर्तव्यम् । आशीरिति । किं पुनरिदं नियमार्थमाहोस्विद्विध्यर्थम् । कथं च नियमार्थं स्यात्कथं वा विध्यर्थम् । यदि तावच्छासिमात्रस्य ग्रहणं ततो नियमार्थम् । अथ हि यस्माच्छासेराङ्विहि-

---

**प्र०–न्तस्येति** । शबन्तस्येत्यर्थः । यङ्लुङ्निवृत्त्यर्थश्च तत्र शब्निर्देशः । घिनुण् तु ताच्छील्ये विधीयते । रूढिशब्दप्रकाराश्च ताच्छीलिका इति यङ्लुगन्ताद्रञ्जेर्न भवति । **औणादिका इति** । रजक इत्यत्र । शिल्पिसंज्ञयोरिति क्वुन्प्रत्ययः । **रजकीति** । पुंयोगादाख्यायामिति ङीष् । अपुंयोगे तु ङीषा न भाव्यमिति भाष्यकाराभिप्रायः । रजनामित्यत्र रञ्जेः क्युन्निति क्युन्प्रत्ययः । स च बाहुलकात्कित् द्रष्टव्यः । तन रजनीति ङीप् भवति । रज इत्यत्र भूरञ्जिभ्यां किदित्यसुन्प्रत्ययः किद्भवति ।

**शास इद०** । **शासिमात्रस्येति** । शासु अनुशिष्टावित्यस्य आङः शासु इच्छायामित्यस्य चेत्यर्थः । **नियमार्थमिति** । क्वावेवाऽऽशास इत्त्वं यथा स्यादाशास्त इत्यादौ मा भूदित्यर्थः । **यस्माच्छासेरिति** । शासु अनुशिष्टावित्यस्मादाङ्विहितः सर्तिशास्त्यर्तिभ्यश्चेत्यत्र परस्मैपदा-

---

**उ०–मित्त्वाद्ध्रस्व इति** । अत्र मृगरमणमाखेट इत्येके । परे तु रजयांचकार विरजाः स मृगाविति भारविप्रयोगान्मृगरमणं यथाश्रुतमव । अत एव भगवता रञ्जयति वस्त्राणीति प्रत्युदाहृतमित्याहुः । ननु घिनुण्विधावपि रञ्जेश्चेति नलोपेन रजेति शपा निर्देश एव यङ्लुङ्निवृत्त्यर्थोऽस्त्वत आह—**घिनुण्त्विति** । वस्तुतः श्तिपा शपेति परिभाषा न भाष्यसंमतेतीदं चिन्त्यम् । तत्र शपा निर्देशो नकारश्रवणार्थ एवेति बोध्यम् । ननु शिल्पिनि ष्वुनभावे रजकीति ङीष् न स्यादत आह—**रजकीतीति** । क्रियासंबन्धमात्राविवक्षायां रजकेत्येव तदाह—**अपुंयोगे त्विति** । कथं तर्हि रजनीति ङीबत आह—**स चेति** ।

**शास इद०** । **इत्यस्य चेति** । मात्रशब्दः कार्त्स्न्ये इति भावः । आद्यः परस्मैपदी ।

---

++ ३. २. १४२. *३. २. १८२.

तस्तस्य* ग्रहणं ततो विध्यर्थम् । यद्यपि शासिमात्रस्य ग्रहणमेवमपि विध्यर्थमेव । कथम् । अङ्हलोरित्युच्यते न चात्र हलादिं पश्यामः । ननु च क्विबेव हलादिः । क्विपो लोपे+ कृते हलाद्यभावान्न प्राप्नोति । इदमिह संप्रधार्यम् । क्विब्लोपः क्रियतामङ्हलोरित्त्वमिति किमत्र कर्तव्यम् । परत्वादङ्हलोरित्त्वम् । नित्यः क्विब्लोपः । कृतेऽप्यङ्हलोरित्त्वे प्राप्नोत्यकृतेऽपि । नित्यत्वात्क्विब्लोपे कृते हलाद्यभावान्न प्राप्नोति । एवं तर्हि प्रत्ययलक्षणेन× भविष्यति। वर्णाश्रये नास्ति प्रत्ययलक्षणम् । यदि वा कानिचिद्वर्णाश्रयाण्यपि प्रत्ययलक्षणेन भवन्ति तथा चेदमपि भविष्यति । अथवैवं वक्ष्यामि। शास इदङ्हलोः। ततः क्वौ । क्वौ च शास इद्भवति । आर्यशीः मित्रशीः । तत आङः। आङ्पूर्वाच्च क्वौ शास इद्भवति । आशीरिति । इदमिदानीं किमर्थम् । नियमार्थम्। आङ्पूर्वाच्छासेः क्वावेव । क्व मा भूत् । आशास्यते आशास्यमान इति । तत्तर्हि वक्तव्यम् । न वक्तव्यम् । अविशेषेण शास इद्भवतीत्युक्त्वा ततोऽङीति

---

प्र०—धिकारात्तत्राऽऽङः संसर्गाद्विशिष्टस्य शासो ग्रहणम् । संसर्गस्य विशिष्टस्मृतिहेतुत्वात् । यथा सकिशोरा धेनुरानीयतां सवत्सा सकरभेति विशिष्टा धेनुः प्रतीयते । यद्येवं शासिमात्रग्रहणं कथमाशङ्कितम् । अथ हलोऽप्युपादानात्तस्य च शासिमात्रेण संबन्धसंभवादित्युच्यते । तन्न । साधारणासाधारणसंनिपातेऽप्यसाधारणसंबन्धिग्रहणं दृश्यते यथा वृद्धानां किशोराणां च मध्ये धेनवो बध्यन्तामित्युक्ते वडवा एव बध्यन्ते न तु गवादयः । एवं तर्ह्येकशेषाद्याश्रयणाच्छासिमात्रग्रहणपक्षसंभवः । **यद्यपीति** । आचार्यदेशीयस्येदं वचनं विध्यर्थे चाऽऽशास्त इत्यादावित्त्वमनिवारितं स्यात् । आर्यशीरित्यत्र च न प्राप्नोति । **यदि वेति** । यथैवेत्यर्थः । **तथा चेति** । तथैवेत्यर्थः । यत्र कार्यं वर्णरूपमेवोपादीयते तत्प्रत्ययलक्षणेन न भवति । यथा रायः कुलं रैकुलमित्यायादेशः । यत्तु वर्णविशिष्टप्रत्ययनिमित्तं तद्भवत्येव यथाऽतृणेडिति हलादौ पिति सार्वधातुके विधानात्प्रत्ययनिमित्तत्वादिमागमः । इत्त्वमपि हलादौ प्रत्यये ङ्किति विधीयमानं प्रत्ययनिमित्तत्वात्प्रत्ययलोपेऽपि भवति । **अथवेति** । वर्णाश्रयत्वात्प्रत्ययलक्षणेनाप्राप्तमित्त्वं क्वावित्यनेन विधीयते । **अविशेषेणेति** । प्रत्ययमात्रे ङ्कितीत्यर्थः । **अङ्यवाजादाविति** । तेन शास्ति

---

उ०—अन्त्य आत्मनेपदी । तस्यैवात्र ग्रहणमिति नियमः कुतोऽत आह—**संसर्गादिति**। धेनुशब्दो दोग्ध्रीपर्यायः । किशोरादयोऽश्वादिबालेषु रूढाः । तत्संबन्धाच्च धेनुशब्दो वडवादिरूपं विशेषं प्रत्याययति । आचार्यदेशीयवचनत्वे हेतुमाह—**विध्यर्थे चेति** । यदि वेत्यादि सिद्धान्तिवचस्तत्र यद्यन्तर्भावोऽयुक्तोऽत आह—**यथैवेत्यर्थ इति** । प्रत्ययलक्षणसूत्रमप्राधान्येनालाश्रयणेऽपि विध्यर्थमिति भावः । प्रत्ययलक्षणसूत्रस्य नियमार्थत्वेनाप्राधान्येनालाश्रयणेऽपि प्रत्ययलक्षणाभाव इत्यतः परिहारान्तरमाह—**भाष्येऽथवेति** । तदाह—**वर्णाश्रयत्वादिति** ।

---

* ३. १. ५६. + ६. १. ६७. × १. १. ६२.

वक्ष्यामि । तन्नियमार्थं भविष्यति । अङ्चेवाजादौ नान्यस्मिन्नजादाविति । इहापि तर्हि नियमादित्त्वं प्राप्नोति । आशास्यते आशास्यमान इति । यस्माच्छासेरङ्विहितस्तस्य ग्रहणं न चैतस्माच्छासेरङ्विहितः । कथमाशीरिति । निपातनात्सिद्धम् । किं निपातनम् । क्षियाशीःप्रैषेषु तिङाकाङ्क्षम् [ ८. २. १०४. ] इति ।

## अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति ॥ ६ । ४ । ३७ ॥

### अनुदात्तोपदेशेऽनुनासिकलोपो ल्यपि च ॥ १ ॥

अनुदात्तोपदेशेऽनुनासिकलोपो ल्यपि चेति वक्तव्यम्* । प्रमत्य प्रतत्य । ततो

### वाऽमः ॥ २ ॥

वाऽम इति वक्तव्यम् । प्रयत्य प्रयम्य । प्ररत्य प्ररम्य । प्रणत्य प्रणम्य ।

## गमः क्वौ ॥ ६ । ४ । ४० ॥

गमादीनामिति वक्तव्यम् । इहापि यथा स्यात् । परीतन्महाकण्ठिका । संयत् । सुमदिति ।

---

प्र०—शशासुरित्यादावित्त्वाभावः । हलादौ क्ङिति क्वौ च नियमाभावादित्त्वं भवत्येव । तुल्यजातीयापेक्षत्वान्नियमस्याजादिरेव व्यावर्त्यते । **इहापीति** । शासिमात्रग्रहणं मत्त्वा चोदयति । **यस्माच्छासेरिति** । वाक्यान्तरे श्रुतः संसर्गो विशेषावगतिहेतुर्भवति । अथ धेनवो मुच्यन्तां किशोरा बध्यन्तामिति वडवा एव प्रतीयन्ते । **निपातनादिति** । यथान्यासे तु पूर्वोक्तेन न्यायेन प्रत्ययलक्षणसद्भावादार्यशीरित्यत्रेत्त्वं भवति । आशीरित्यत्र तु निपातनादेव

**अनु०** । वा ल्यपीति सूत्रन्यासेऽविशेषेण विकल्पः प्राप्नोतीति वार्तिकारम्भः । तनामन्तानां गमियमिरमिनमीनां ल्यपि विकल्पोऽन्येषां त्वनुदात्तोपदेशवनतितनोत्यादीनां नित्यं लोपः ।

**गमः क्वौ** । **परीतदिति** । तनोतेः क्विपि नलोपे कृते तुकि नहिवृतिवृषीति

---

उ०—नन्वविशेषेण विधाने शास्तीत्यादावित्त्वं स्यादत आह—**प्रत्ययमात्रे क्ङितीति** । ननु योगविभागेन परिहारे वाक्यान्तरे संसर्गिणः श्रुतत्वादन्यत्र विशेषस्मृतिहेतुत्वं न स्यादत आह—**वाक्यान्तरेऽपीति** । **पूर्वोक्तेनेति** । प्रत्ययलक्षणसूत्रस्य विध्यर्थत्वमाश्रित्योक्तेनेत्यर्थः । **निपातनादेेति** । आङ्पूर्वस्य शासेः सूत्रे ग्रहणाभावादिति भावः ।

**अनुदात्तोपदेशवनति०** । वार्तिके स्थिते फलितं विषयविभागं दर्शयति—**तेनामन्तानामिति** । गमः क्वौ । ऊङ् चेति । चशब्दार्थमाह—**अनुनासिकलोप इति** । **नार्थो ङिद्ग्रहणेनेति** ।

---

* ६. ४. ३८.

ऊङ् च गमादीनामिति वक्तव्यम्। अग्रेगूः। भ्रूः।

**जनसनखनां सञ्झलोः॥ ६।४।४२॥**

अथ किमयं समुच्चयः। सनि च झलादौ चेति। आहोस्वित्सन्विशेषणं झल्ग्रहणम्। सनि झलादाविति। किं चातः। यदि समुच्चयः सन्यझलादावपि प्राप्नोति। सिसनिषति जिजनिषते चिखनिषति। अथ सन्विशेषणं झल्ग्रहणं जातः जातवानित्यत्र न प्राप्नोति। यथेच्छसि तथाऽस्तु। अस्तु तावत्समुच्चयः। ननु चोक्तं सन्यझलादावपि प्राप्नोतीति। नैष दोषः। प्रकृतं* झल्ग्रहणमनुवर्तते तेन सनं विशेषयिष्यामः। सनि झलादाविति। अथवा पुनरस्तु सन्विशेषणम्। कथं जातः जातवानिति। प्रकृतं* झलि क्ङितीत्यनुवर्तते। यद्येवं नार्थो झल्ग्रहणेन। योगविभागः करिष्यते। जनसनखनामनुनासिकस्याऽऽकारो भवति झलि क्ङिति। ततः सनि। सनि च जनसनखनामनुनासिकस्याऽऽकारो भवति झलीत्येव। तस्मान्नार्थो झल्ग्रहणेन।

**सनोतेरनुनासिकलोपादात्त्वं विप्रतिषेधेन॥ १॥**

सनोतेरनुनासिकलोपादात्त्वं भवति विप्रतिषेधेन*। सनोतेरनुनासिकलोप-

---

प्र०—पूर्वपदस्य दीर्घः। **संयदिति**। यमेः क्विप्। **ऊङ्चेति**। अनुनासिकलोपोऽकारस्योङ् च विनाऽपि ङित्त्वेनान्त्यस्य सिध्यत्यूकार इति नार्थो ङिद्ग्रहणेन। **अग्रेगूरिति**। ओः सुपीति यणादेशो धातुत्वाद्भवति, अग्रेग्वाविति। **अग्रेभ्रूरिति**। अचि श्नुधातुभ्रुवामित्यत्र भ्रूग्रहणं न कर्तव्यम्। धातुत्वादुवङः सिद्धत्वात्।

**जन०। अथ किमयमिति**। यदि द्वंद्वनिर्देशः, ततः समुच्चयः। अथ सौत्रो निर्देशस्ततो विशेष्यभाव इति पक्षद्वयसंभवः। **सिसनिषतीति**। सनीवन्तर्धेति पक्षे इडागमः। **ततः सनीति**। अक्ङिदर्थमेतत्। जन्तुरित्यादावात्त्वाप्रसङ्गार्था हि पूर्वत्र क्ङिद्ग्रहणानुवृत्तिः। **सनोतेरनुनासिकलोपस्येति**। सनोतेर्योऽनुनासिकलोपः

---

उ०—नेर्विश इत्यादिसाहचर्यादाचारक्विबन्तेऽनुदात्तङित इत्यस्याप्रवृत्तेरिति भावः। **धातुत्वादिति**। भ्रमेः क्विपि भ्रूरिति सिद्धेरिति भावः। परे त्वेतन्निष्पाद्यः शुद्धयौगिकः। शरीरावयवविशेषवाची त्वव्युत्पन्नं प्रातिपदिकं तस्योवङर्थं च सूत्रे तद्ग्रहणमावश्यकम्। अग्रेभ्रूरित्यस्याग्रे भ्रमतीत्यर्थ इत्याहुः।

**जनसनखनाम्०। अथ सौत्र इति**। एकवचनस्य स्थाने सौत्रं द्विवचनम्। विशेषणस्य च परनिपात इति भावः। ननु जनसनेत्यत्र क्ङिद्ग्रहणानुवृत्तिः किमर्था यतोऽक्ङिदर्थमेतत्स्यादत आह—**जन्तुरित्यादाविति**। जनेस्तुन्नौणादिकः। ननु सनोतेरनुनासिकलोपस्यान्ये तनोत्यादयोऽवकाशा इति विरुद्धमित्याशङ्क्याऽऽह—**सनोतेर्य इति**। सनोतेस्तर्हि तनोत्या-

---

* ६. ४. ३७.

स्यावकाशोऽन्ये तनोत्यादयः। आत्त्वस्यावकाशोऽन्ये जनादयः । सनोतेरनुनासिकस्योभयं प्राप्नोति आत्त्वं भवति विप्रतिषेधेन नैष युक्तो विप्रतिषेधः । न हि सनोतेरनुनासिकलोपस्यान्ये तनोत्यादयोऽवकाशः । सनोतेर्यस्तनोत्यादिषु पाठः सोऽनवकाशः । न खल्वप्यात्त्वस्यान्ये जनादयोऽवकाशः । सनोतेर्यदात्त्वे ग्रहणं तदनवकाशं तस्यानवकाशत्वादयुक्तो विप्रतिषेधः। एवं तर्हि तनोत्यादिषु पाठस्तावत्सावकाशः। कोऽवकाशः। अन्यानि तनोत्यादिकार्याणि । तनादिभ्यस्तथासोः [ २. ४. ७९ ] इति । आत्त्वेऽपि ग्रहणं सावकाशम् । कोऽवकाशः । सनि च ये विभाषा [ ६. ४. ४३ ] च । उभयोः सावकाशयोर्युक्तो विप्रतिषेधः । एवमप्ययुक्तो विप्रतिषेधः। पठिष्यति ह्याचार्यः पूर्वत्रासिद्धे नास्ति विप्रतिषेधोऽभावादुत्तरस्येति× । एकस्य हि नामाभावे विप्रतिषेधो न स्यात्किं पुनर्यत्रोभयं नास्ति+ । नैष दोषः । भवतीह विप्रतिषेधः । किं वक्तव्यमेतत् ।

प्र०—प्राप्नोति तनोत्यादित्वात्तस्यान्ये तनोत्यादयोऽवकाश इत्यर्थः । सनोतेस्तु तनोत्यादिषु पाठस्तनादिकृञ्भ्य उस्तनादिभ्यस्तथासोरित्येवमर्थः । **अन्ये जनादय** इति । समुदायस्य कार्यं विधीयमानमवयवानां प्रवर्तते तत्र कस्यचिदप्यवयवस्य कृतं समुदायस्य कृतं भवतीति भावः। जनादय-इति बहुवचननिर्देशः प्रयोगभेदादारोपितबहुत्वजनखनापेक्षः। **आत्त्वं भवती**ति। सातः सातवानित्यादौ। सन्ग्रहणं तु सनोत्यर्थमेव सिषासतीति । जनखनाभ्यां तु सनः सेट्त्वाज्झलादित्वाभावः। **भवतीह विप्रतिषेध इ**ति। विप्रतिषेधेन व्यवस्थायां क्रियमाणायामसिद्धत्वं न भवतीत्यर्थः । गोद् इत्यादावसति हल्ग्रहणे परत्वादीत्त्वं स्यादिति हल्ग्रहणं क्रियते । असति चेह विप्रतिषेधे द्वयोः परस्परस्मिन्नसिद्धत्वात्कृ-

उ०—दिषु पाठोऽनर्थकोऽत आह—**सनोतेस्त्वि**ति । नन्वत्र सनोतेर्ग्रहणमनवकाशमत आह—**समुदायस्येति** । ननु जनखनौ द्वावेवेति बहुवचनमयुक्तमत आह—**बहुवचने**ति । केचित्तु भ्वादिपठितसनमादाय बहुवचनस्योपपत्तिमाहुः । **सिषासती**ति । सनीवन्तर्धेति विकल्पितेट्त्वात्तदभाव उदाहरणम् । भाष्ये **सनि च ये विभाषा** चेति । आद्यचकारेण भ्वादिसनोऽपि ग्रहणमिति केचित् । **एकस्य हि नामे**ति । न चैकस्यासिद्धत्वे सिद्धेन सह तुल्यबलत्वाभाव इति युक्तो विप्रतिषेधाभावः । द्वयोरपि परस्परमसिद्धत्वे तु तुल्यबलत्वाक्षतेः कुतो न विप्रतिषेधः । परस्परदृष्ट्या परस्परमसिद्धत्वेन पर्यायप्रसङ्गे नियमार्थं शास्त्रप्रवृत्तेर्दुर्वारत्वाच्चेति वाच्यम् । कैमुतिकन्यायेनात्रापि विप्रतिषेधाभावं मन्यते । यद्वा कार्यकालपक्षे विप्रतिषेध इति परिभाषाया आभीयत्वेन तद्दृष्ट्योभयोरप्यसिद्धत्वाद्विप्रतिषेधानुपपत्तिः । द्वयोः शास्त्रयोः समानाश्रयत्वे तदाश्रयाश्रयकस्यापि समानाश्रयत्वमिति भावः । नन्वसिद्धवच्छास्त्रे जाग्रति कथं हल्ग्रहणस्य विप्रतिषेधलिङ्गत्वं स्यादित्याशङ्क्य हल्ग्रहणानुपपत्तेरसिद्धत्वं बाधित्वा विप्रतिषेधो ज्ञाप्यत इत्याह—**विप्रतिषेधेनेति** । **कृतेऽपीत्व आल्लोपेनेति** । ननु

× ८. २. १*. + ६. ४. २२.

न हि । कथमनुच्यमानं गंस्यते । आचार्यप्रवृत्तिर्ज्ञापयति भवतीह विप्रतिषेध इति यदयं घुमास्थागापाजहातिसां हलि [ ६. ४. ६६ ] इति हल्ग्रहणं करोति । कथं कृत्वा ज्ञापकम् । हल्ग्रहणस्यैतत्प्रयोजनं हलादावीत्त्वं यथा स्यादिह मा भूत् गोदः कम्बलद इति* । यदि चात्र विप्रतिषेधो न स्याद्धल्ग्रहणमनर्थकं स्यात् । अस्त्वत्रेत्त्वम् । ईत्त्वस्यासिद्धत्वाल्लोपो+ भविष्यति । पश्यति त्वाचार्यो भवतीह विप्रतिषेधस्ततो हल्ग्रहणं करोति । नैतदस्ति ज्ञापकम् । व्यवस्थार्थमेतत्स्यात् । हलादावीत्त्वं यथा स्यादजादौ मा भूदिति । किं च स्यात् । इयङादेशः प्रसज्यते× । ननु चासिद्धत्वादेवेयङादेशो न भविष्यति । न शक्यमीत्त्वमियङादेशेऽसिद्धं विज्ञातुम्। इह हि दोषः स्यात् धियौ धियः पियौ पिय इति । नैतदीत्त्वम् । किं तर्हि । ध्याप्योः संप्रसारणमेतत् । समानाश्रयं खल्वप्यसिद्धं भवति व्याश्रयं चैतत् । कथम् । क्वावीत्त्वं क्विबन्तस्य विभक्तावियङादेशः । व्यवस्थार्थमेव तर्हि हल्ग्रहणं कर्तव्यम् । कुतो ह्येतदीत्त्वस्यासिद्धत्वाल्लोपो न पुनर्लोपस्यासिद्धत्वादीत्त्वमिति । तत्र चक्रकमव्यवस्था प्रसज्येत । नास्ति चक्रकप्रसङ्गः । न ह्यव्यवस्थाकारिणा शास्त्रेण भवितव्यम् । शास्त्रतो नाम व्यवस्था । तत्रेत्त्वस्यासिद्धत्वाल्लोपो लोपेनावस्थानं

---

प्र०—तेऽपीत्व आल्लोपे गोदादेः सिद्धत्वादनर्थकं हल्ग्रहणं स्यात् । **नैतदस्तीति** । हल्ग्रहणस्य ज्ञापकत्वं विघटयति । असत्यपि विप्रतिषेधे गोद इत्यादि न सिध्यति । कृत ईत्त्व इयङादेशप्रसङ्गादिति । तन्निवारणार्थं हल्ग्रहणं न ज्ञापकमित्यर्थः । ज्ञापकवाद्याह—**ननु चासिद्धत्वादिति** । ज्ञापकभङ्गवाद्याह—**न शक्यमिति** । **धियाविति** । दधातेः पिबतेश्च क्विपि लुप्तेऽपि प्रत्यक्षलक्षणेनेत्त्वं भवति । तस्यासिद्धत्व आश्रीयमाण इयङ्न प्राप्नोतीतीयङ्व्यवस्थाश्रयितव्यमीत्त्वस्य सिद्धत्वमित्यर्थः। ज्ञापकवाद्याह—**नैतदीत्त्वमिति** । अभ्युपगम्यापीत्त्वमाह—**समानाश्रयमिति** । धियावित्यादावीत्त्वं व्याश्रयं गोद इत्यादौ तु समानाश्रयत्वादियङ्यसिद्धमेवेति ज्ञापकमेव हल्ग्रहणं स्थितम् । पुनर्ज्ञापकभङ्गवाद्याह—**व्यवस्थार्थमिति** । ज्ञापकवाद्याह—**नास्ति चक्रकप्रसङ्ग इति** । द्वयोरपि शास्त्रयोः प्रवृत्तौ सत्यां पुनः प्रवृत्तौ कारणाभावादित्यर्थः । **लोपेनावस्थानमिति** । अथ विपरीतक्रमः कस्मान्न भवति । पूर्वमाल्लोपस्तस्यासिद्धत्वादीत्त्वमिति । उच्यते ।

---

उ०—विप्रतिषेधशास्त्राप्रवृत्तौ शास्त्रक्रमेण प्रथमोपस्थितत्वादाल्लोपे तस्यासिद्धत्वादीत्त्वे लक्ष्ये लक्षणस्येति न्यायेन पुनराल्लोपाप्रवृत्तौ कथं हल्ग्रहणं विना सिद्धिरिति चेन्न । घुमास्थेत्येव प्रतिपदोक्तत्वात्प्रथमोपस्थितमित्याशयात् । **इयङादेशप्रसङ्गादिति** । ईकारस्य श्रूयमाणत्वेनाऽऽकारस्याऽऽतिदेशिकत्वेनेयङेव प्रथमोपस्थित इति भावः । भाष्ये **चक्रकमव्यवस्थेति** । चक्रकरूपाऽव्यवस्थेत्यर्थः । ननु पुनः प्रवृत्तौ लोपस्याऽऽश्रीयमाणायां तस्यासिद्धत्वात्पुनरपीत्त्वं

---

* १. २. ३. + ६. ४. ६४. × ६. ४. ७७.

भविष्यति । न खल्वपि तस्मिंस्तदेवासिद्धं भवति । व्यवस्थार्थमेव तर्हि हल्ग्रहणं कर्तव्यम् । हलादावीत्त्वं यथा स्यादजादौ मा भूदिति । कुतो ह्येतदीत्त्वस्यासिद्धत्वाल्लोपो लोपेनावस्थानं भविष्यति न पुनर्लोपस्यासिद्धत्वादीत्त्वमीत्त्वेन व्यवस्थानं स्यात् । तदेव खल्वपि तस्मिन्नसिद्धं भवति । कथम् । पठिष्यति ह्याचार्यश्चिणो लुकि तग्रहणानर्थक्यं संघातस्याप्रत्ययत्वात्तलोपस्य चासिद्धत्वादिति+ । चिणो लुकृचिणो लुक्येवासिद्धो भवति । एवं तर्हि यदि व्यवस्थार्थमेतत्स्यान्नैवायं हल्ग्रहणं कुर्वीत । अविशेषेणायमीत्त्वमुक्त्वा तस्याजादौ लोपमपवादं विदधीत× । इदमस्ति । आतो लोप इटि चेति । ततो घुमास्थागापाजहातिसाम् । लोपो भवतीटि चाजादौ क्ङितीति । किमर्थं पुनरिदम् । ईत्त्वं वक्ष्यति तद्बाधनार्थम् । तत ईत् । ईच्च भवति घ्वादीनाम् । तत एर्लिङि । वाऽन्यस्य संयो-

प्र०—अस्मिन्नपि क्रम ईत्त्वस्यासिद्धत्वात्पुनराल्लोपो भविष्यति । लक्ष्यसंस्कारार्थत्वाच्छास्त्रप्रवृत्तेः । **न खल्वपीति** । आल्लोपे कर्तव्य ईत्त्वस्यासिद्धत्वं न त्वीत्त्वे कर्तव्ये । आस्मिन्निदमसिद्धमिति भेदनिबन्धनत्वाद्विषयविषयिभावस्य । ततश्चाऽऽल्लोपो भविष्यति । नतु पुनः पुनरीत्त्वमिति ज्ञापकमेव हल्ग्रहणमित्यर्थः । पुनर्ज्ञापकभङ्गवाद्याह—**व्यवस्थार्थमिति** । नहि शास्त्रचक्षुरन्तरेण वचनमिदमिष्टमिदमनिष्टमिति मन्यते । **तदेवेति** । व्यक्तिपदार्थपक्षे प्रतिलक्ष्यं लक्षणभेदाद्विषयविषयिविभागोपपत्तावीत्त्वशास्त्रमीत्त्वशास्त्र एवासिद्धमिति पुनः पुनरीत्त्वप्रवर्तनादपि चक्रकप्रसङ्ग इत्यर्थः । ज्ञापकवाद्याह—**एवं तर्हीति** । **ईच्च भवतीति** । अत्र क्ङितीत्यपेक्ष्यते ।

उ०—स्यादत आह—**लक्ष्यसंस्कारार्थत्वादिति** । लोके प्रयुक्तस्य प्रयोगस्य तावताऽन्वाख्यानसिद्धेरिति । किंच पुनराल्लोपस्यासिद्धत्वेऽप्यनेन शास्त्रेण स्वकृतेकारस्यैव दर्शनान्न पुनरीत्त्वप्रवृत्तिः स्वस्मिंश्च स्वयं नासिद्धमित्यपि बोध्यम् । तदेवाऽऽह—भाष्ये **न खल्वपीत्यादि** । किंच घुमास्थेत्यस्य प्रतिपदोक्तत्वेन प्रथमोपस्थितत्वात्पूर्वमाल्लोपो दुर्लभ इत्यपि बोध्यम् । **आल्लोप इति** । पुनः पुनरीत्त्वप्रवृत्त्या यच्चक्रकं प्राप्नोति तदनेन परिह्रियत इत्यर्थः । ननु चक्रकेऽपीष्टतो व्यवस्थाया उक्तत्वाद्व्यवस्थार्थमेव तर्हीत्याद्यनुपपन्नमत आह—**नहि शास्त्रेति** । मन्दबुद्ध्यनुग्रहार्थं हल्ग्रहणस्य कर्तव्यत्वेन न ज्ञापकत्वमित्यर्थः । भाष्ये न खल्वपीत्यादिनोक्तस्य परिहारमाह—**तदेव खल्वपीति** । एवं च ईत्त्वेन व्यवस्थान इष्टरूपासिद्धिः । इष्टासिद्धौ च चक्रकमपि दुर्निवारमिति भावः । लक्ष्ये लक्षणस्येति न्यायं तु न पश्यति । **क्ङितीत्यपेक्ष्यत इति** । तेनाजादौ हलादौ च सामान्येन विहितस्येत्त्वस्याजादौ क्ङिति लोपोऽपवाद इत्यन्तरेणापि हल्ग्रहणं सिद्धमिति तज्ज्ञापकमेवेत्यर्थः । परे तु ज्ञापितेऽपि पूर्वोक्तन्यासेनैव सिद्धे हल्ग्रहणस्य चारितार्थ्याभावात्कथं ज्ञापकत्वमिति चिन्त्यमेतत् । तस्मादत्र ज्ञापकोपन्यासपरो ग्रन्थ आचार्यदेशीयस्य । भवतीह विप्रतिषेध इत्येव सिद्धा-

+ ६. ४. १०४. × ६. ४. ६४; ७०.

गादेः। न ल्यपि। मयतारदन्यतरस्याम्। ततो यति। यति चेद्भवति। सोऽयमेवं लघीयसा न्यासेन सिद्धे सति यद्बल्ग्रहणं करोति गरीयांसं यत्नमारभते तज्ज्ञापयत्याचार्यो भवतीह विप्रतिषेध इति।

**सनः क्तिचि लोपश्चास्यान्यतरस्याम्॥ ६। ४। ४५॥**

इहान्यतरस्यांग्रहणं शक्यमकर्तुम्। कथम्। सनः क्तिचि लोपश्च। आत्त्वं च विभाषेति*।

अपर आह। सर्व एवाय योगः शक्योऽवक्तुम्। कथम्। इह लोपोऽपि प्रकृत आत्त्वमपि प्रकृतं विभाषाग्रहणमपि प्रकृतम् +। तत्र केवलमभिसंबन्धमात्रं कर्तव्यम्। सनः क्तिचि लोपश्चाऽऽत्त्वं च विभाषेति।

**आर्धधातुके॥ ६। ४। ४६॥**

कानि पुनरार्धधातुकाधिकारस्य प्रयोजनानि।

अतो लोपो यलोपश्च णिलोपश्च प्रयोजनम्।
आल्लोप ईत्त्वमेत्वं च चिण्वद्भावश्च सीयुटि॥

अतो लोपः [ ६. ४. ४८ ] चिकीर्षिता चिकीर्षितुम्। आर्धधातुक इति

---

प्र०— **सनः**। इह रूपत्रयं साध्यं सातिः सतिः सन्तिरिति। तच्च सनः क्तिचि लोपश्चेत्येतावति सूत्रे ये विभाषेत्यतो विभाषाग्रहणानुवृत्तौ सिध्यतीति मत्वाऽऽह— **इहेति**। **सर्व एवायमिति**। सनः क्तिचीत्येव लोपस्य प्रकरणात्सिद्धत्वाल्लापश्चेत्यपि न वक्तव्यमित्यर्थः। बहूनां पदानां प्रत्याख्यानाच्च सर्व एवायं योग इत्युच्यते।

**आर्ध०**। अथ द्वितीयाध्यायविहिता आर्धधातुकनिमित्ता आदेशा इहैव कस्मान्नोक्ताः। एवं हि द्विरार्धधातुकग्रहणं न कर्तव्यं भवति। नैवं शक्यमाभाच्छास्त्रीये कार्ये तेषामसिद्धत्वप्रसङ्गात्। ततश्चास्त्यादेशस्य भुवो वुङ्न स्यादनादेशस्यैव तु स्यात्। तथा चख्यतुरित्यादौ ख्याञोऽसिद्धत्वाल्लापाप्रसङ्गः। **कानि पुनरिति**। कानिचि-

---

उ०—न्त्युक्तिः। द्वयोरसिद्धत्वेऽपि तुल्यबलत्वाद्धानिरित्याशयेन। उभयोः परस्परमसिद्धत्वारोपमात्रं नैतावता सर्वथा शास्त्रयोरभावः। विप्रतिषेधसूत्रे च यथोद्देशपक्ष एव। कार्यकालपक्षेऽपि तदुपस्थितिसामर्थ्यादसिद्धत्वबाधो वेति तत्त्वमित्याहुः।

**सनः क्तिचि**। अन्यतरस्यांग्रहणप्रत्याख्यान इष्टसिद्धिं दर्शयति—**इहेति**। ननु सर्वस्य योगस्य प्रत्याख्याने लोपादिविधिः कुतो लभ्यतेऽत आह— **सनः क्तिचीत्येवेति**। एवं तर्हि सर्वशब्दोऽनुपपन्न इत्यत आह— **बहूनामिति**।

**आर्धधातुके**। **असिद्धत्वप्रसङ्गादिति**। एतेनैते द्वितीयाध्याये कर्तुं शक्या इत्यपास्तम्। असिद्धत्वानापत्तेः। आङ्गत्वानापत्तेश्च। **कानिचिदिति**। एतच्चोत्तरत्र स्फुटी

---

* ६. ४. ४३ + ६. ४. ३७, ४१; ४३.

**किमर्थम् । चिकीर्षति । नैतदस्ति प्रयोजनम् । अस्त्वत्र सनोऽकारलोपः शपो*-कारस्य श्रवणं भविष्यति । शप एव तर्हि मा भूदिति । एतदपि नास्ति प्रयोजनम् । आचार्यप्रवृत्तिर्ज्ञापयति नानेन शबकारस्य लोपो भवतीति यदयमदिप्रभृतिभ्यः शपो लुकं शास्ति+ । नैतदस्ति ज्ञापकम् । कार्यार्थमेतत्स्यात् × । वित्तः मृष्ट इति । यत्तर्ह्याकारान्तेभ्यो लुकं शास्ति । याति वाति । इदं तर्हि**

---

प्र०—न्यथाऽपि सिध्यन्तीति प्रश्नः । **चिकीर्षतीति** । अकारोच्चारणं तु सनः प्रतीषिषतीत्यादौ द्विर्वचनार्थं स्यात् । **शप एव तर्हीति** । शब्विधानं तु प्रत्ययलक्षणेन गुणाद्यर्थं स्यात् । अतो दीर्घो यञीत्यस्य सर्वत्राकारलोपे कोऽवकाश इति चेत् । वचनादतो लोपं बाधित्वा पचाव इत्यादौ प्रवर्तेत । तत्र च कृतार्थमदुपदेशाल्लसार्वधातुकानुदात्तत्वमज्ञापकं सार्वधातुकेऽतोलोपाभावस्य । **कार्यार्थमेतत्स्यादिति** । प्रत्ययलक्षणप्रतिषेधार्थमित्यर्थः । **यत्तर्हीति** । यदि शपोऽतो लोपः स्याद्यावाप्रभृतय आकारान्ता भूवादिष्वेव पठ्येरन्न त्वदादिषु । लुग्लोपयोस्तत्र विशेषाभावात् । ननु शिंशपाचोद्यमिदं पाठस्यावश्यकर्तव्यत्वात् । नैष दोषः । विशेषकार्यार्थत्वाद्विशिष्टगणपाठस्य । ननु याती ब्राह्मणी यान्ती ब्राह्मणीत्यादौ शप्श्यनोर्नित्यमिति प्रत्ययलक्षणेन नित्यो नुम् मा भूदित्येवमर्थं लुग्विधानं स्यात् । नैतदस्ति । लुमता लुप्ते यदङ्गं तस्य कार्ये प्रत्ययलक्षणप्रतिषेधो न च नुमागमस्तस्याङ्गस्य कार्यमिति लुक्यपि क्रियमाणे प्रत्ययलक्षणप्रसङ्गः । सर्वत्र च शपोऽतो लोपे विज्ञायमाने शप्श्यनोर्नित्यमित्यत्र प्रत्ययलक्षणं भूतपूर्वविज्ञानं वाऽऽश्रयणीयमिति नास्त्येव लुग्लोपयोर्विशेष इति ज्ञापक एवाऽऽकारान्तानामन्येषां चागुण-

---

उ०—भविष्यति । ननु सनोऽकारोच्चारणसामर्थ्याल्लोपो न भविष्यतीत्यत आह—**अकारोच्चारणं त्विति** । **गुणाद्यर्थमिति** । भवत इत्यादौ गुणार्थं कायतीत्यादावशितीत्यात्त्वप्रतिषेधार्थं ष्ठीवतीत्यादौ दीघार्थं चेति बोध्यम् । **वचनादिति** । स्यप्रत्ययेऽकारोच्चारणसामर्थ्याल्लोपाभावे तत्र चरितार्थत्वाच्चिन्त्यमिदम् । लसार्वधातुकानुदात्तत्वमपि तत्रैव चरितार्थं बोध्यम् । **शिंशपाचोद्यमिति** । लङ्कायां नीता सीता शिंशपामूले स्थापितेति केनचिदुक्ते कश्चित्पृच्छति वृक्षान्तरेषु सत्सु किं शिंशपानुरोधेनेति तद्वदिदं चोद्यमित्यर्थः । **विशिष्ट(शेष)कार्यार्थत्वादिति** । तदभावे हि भ्वादिपाठ एवोचित इति भावः । **नित्यो नुम् मा भूदिति** । किंत्वाच्छीनद्योरिति विकल्प एव यथा स्यादित्यर्थं पाठः स्यादिति न ज्ञापक इति भावः । **तस्याङ्गस्येति** । तदङ्गं धातुः । इदं च शत्रन्तस्याङ्गस्य कार्यमिति भावः । ननु सर्वत्रातो लोपे शप्श्यनोरित्यस्य का गतिरत आह—**सर्वत्र चेति** । शप्श्यनोरादिति व्याख्याने प्रत्ययलक्षणाभावादाह—**भूतपूर्वेति** । भाष्ये आकारग्रहणमुपलक्षणमित्याह—**अन्येषां चेति** । **अदहनेति** । हन्ग्रहणस्य ज्ञापकत्वं चिन्त्यम् । तत्र ह्यनेन शपो लोपे तस्यासिद्धत्वादनुनासिकोपधालोपयोरप्राप्तेर्लुक आवश्यकत्वात् । असिद्धत्वमनित्यमिति वाऽऽशयः ।

---

* ३. १. ६८. + २. ४. ७२. × ७. ३. ८४; ८६; ७. २. ११४; (१. १. ६२); ६३.

प्रयोजनम् । वृक्षस्य प्लक्षस्य । अतो लोपः प्राप्नोति । यल्लोपोऽपि प्रयोजनम्* । बेभिदिता चेच्छिदिता । आर्धधातुक इति किमर्थम् । बेभिद्यते चेच्छिद्यते । णिलोपः+ । पाच्यते याज्यते । आर्धधातुक इति किमर्थम् । पाचयति याजयति । आल्लोपः× । ययतुः ययुः । ववतुः ववुः । आर्धधातुक इति किमर्थम् । यान्ति वान्ति । ईत्त्वम् ÷ । दीयते धीयते । आर्धधातुक इति किमर्थम् । अदाताम् अधाताम् । एत्वम् * । स्लेयात् म्लेयात् । आर्धधातुक इति किमर्थम् । स्लायात् । चिण्वद्भावश्च सीयुटि + । चिण्वद्भावे सीयुटि किमुदाहरणम् । कारिषीष्ट हारिषीष्ट । आर्धधातुक इति किमर्थम् । क्रियेत ह्रियेत । नैतदुदाहरणम् । यका व्यवहितत्वान्न भविष्यति । इदं तर्ह्युदाहरणम् । प्रस्नुवीत× । इदं चाप्युदाहरणम् । क्रियेत ह्रियेत । ननु चोक्तं यका व्यवहितत्वान्न

प्र०—वृद्धिभाजामदहनासादीनामदादिषु पाठः सार्वधातुकेऽतो लोपाभावस्य । कथं तर्हि याती कुले इत्यादौ प्रत्ययलक्षणेन नुम् न भवति । शपाऽकारस्य विशेषणात् । शपो योऽकारस्तदन्तादङ्गादुत्तरस्य शतुर्नुम् भवतीति । न च शपि लुप्ते शपोऽकारः संभवति । **वृक्षस्येति** । प्रागेव स्यादतो लोपो भूतपूर्वगत्या तु स्यादेशः । ननु परत्वात्स्यादेशो भविष्यति । तत्र कृते संनिपातपरिभाषयाऽतोलोपो न भविष्यति । उच्यते । कष्टायेति निर्देशेनानित्यत्वज्ञापनादनुपस्थानादस्याः परिभाषायाः स्यादेवातोलोपः । **पाचयतीति** । णिज्विधानं तु प्रत्ययलक्षणार्थं स्यादिडाद्यर्थं च पाचयितेति । **यान्तीति** । ननु श्नाभ्यस्तयोरेवाऽऽतः सार्वधातुके नान्यस्येत्येवं नियमान्न भविष्यति । विपरीतोऽपि नियमः स्यात्सार्वधातुक एव श्नाभ्यस्तयोरिति । ययतुरित्यादौ न स्यात् । श्नाग्रहणमुत्तरार्थं स्यात् । **अदातामिति** । लुङ् ताम् गातिस्थाघ्विति सिचो लुक् । **प्रस्नुवीतेति** । कर्मकर्तरीदमुदाहरणम् । तत्र यकः प्रतिषेधात् । कर्मणि तु प्रस्नूयेतेति भाव्यम् । ननु चिणोऽपि प्रतिषेधात्कथं चिण्वद्भावः । एवं तर्हि भावकर्मणोश्चिण्दर्शनादत्र चिण्वद्भावप्रसङ्ग इत्याशयः । असमाश्वस्योदाहरणान्तरमाह—**इदं चापीति** ।

उ०—**कथं तर्हीति** । लुकि लोपे च शङ्केयम् । **शपो योऽकार इति** । तथा च वर्णाश्रयत्वान्न प्रत्ययलक्षणमिति भावः । **प्रागेवेति** । इदं चिन्त्यं स्यादेशस्य परत्वात् । अतोलोपेन स्यादेशनिमित्तानन्तर्यविघातादस्ति विप्रतिषेधः । व्युत्पत्तिपक्षे सप्रत्यय उपदेशेऽकारान्त इति बोध्यम् । **भूतपूर्वेति** । सामर्थ्यादिति भावः । पाक इति च प्रत्युदाहरणं बोध्यम् । **प्रत्ययलक्षणार्थमिति** । तेनोपधावृद्धिसिद्धिः । **इडाद्यर्थमिति** । अन्यथैकाच इति प्रतिषेधः स्यात् । सति चेट्यनिटीति प्रतिषेधाण्णिलोपो नेति बोध्यम् । **ननु श्नाभ्यस्तयोरिति** । अजादौ क्ङिति सार्वधातुकेऽप्यनेनैव सिद्धेरिदं नियमार्थमिति भावः । नन्वत्र पक्षे श्नाग्रहणं व्यर्थं स्यादत आह—**उत्तरार्थमिति** । लुनीत इत्यादावीत्त्वार्थमिति भावः । ननु स्नौतेः परस्मैपदित्वान्नेदं कर्तरि रूपं नापि कर्मणि यक्प्रसङ्गादिति कथमिदमत आह—**कर्मकर्तरीति** ।

* ६. ४. ४९. + ६. ४. ५१. × ६. ४. ६४. ÷ ६. ४. ६६. * ६. ४. ६७; ६८. + ६. ४. ६२. × ३. १. ८९.

१ °मः किं न स्या° ।

भविष्यतीति। यक एव तर्हि मा भूदिति। किंच स्यात्। वृद्धिः। वृद्धौ कृतायां युक्प्रसज्येत *।

**भ्रस्जो रोपधयो रमन्यतरस्याम् ॥ ६ । ४ । ४७ ॥**

अयं रम्रेफस्य स्थाने कस्मान्न भवति। मिदचोऽन्त्यात्परः [१. १. ४७] इत्यनेनाचामन्त्यात्परः क्रियते। रेफस्य तर्हि श्रवणं कस्मान्न भवति। षष्ठ्युच्चारणसामर्थ्यात् +।

---

प्र०—येभ्यो धातुभ्यः कर्मकर्तरि चिण् प्रतिषिध्यते तेषां चिण्वद्भावस्यापि निषेधः। **वृद्धिरिति।** एतच्च ण्यल्लोपावित्याद्यनपेक्ष्योक्तम्। अत्र हि चिण्वद्भावादतोलोपोऽपि प्राप्तो वृद्धिश्च। यावादिभ्यो हि शपो लुक्विधानेन सार्वधातुकेऽतोलोपाभावो ज्ञापित इति स्वाश्रयोऽतोलोपो मा भूच्चिण्वद्भावाच्चिणि तस्य दर्शनात्स्यादेव। भाष्यकारेण तु प्राप्तिमात्रं वृद्धेराश्रित्योक्तम्। अथवा दोषोपलक्षणं वृद्धिरतोलोपेऽपि रूपासिद्धिप्रसङ्गात्। वृद्धौ कृतायामाद्गुणश्च प्राप्नोति युक्च। तत्र वार्णादाङ्गं बलीय इति युक्प्रसङ्गः। इट्प्रसङ्गस्तु विशेषाभावान्नोक्तः।

**भ्रस्जो०**। आदेशान्तराणां स्थानितुल्यदेशानां दर्शनात्पृच्छति—**अयं रमिति**। रेफग्रहणस्योपलक्षणार्थत्वादुपधाया अपीति बोद्धव्यम्। **रेफस्य तर्हीति**। स्थानान्तरे प्रवृत्तेन रमाऽनिवर्तितत्वात्। **षष्ठ्युच्चारणसामर्थ्यादिति**। रोपधयोरिति स्थानषष्ठ्या तयोरत्र विषयेऽप्रयोगः प्रतिपाद्यते। रोपधयोः प्रसङ्गे रम्प्रयुज्यते रोपधे न प्रयुज्येते इत्यर्थः। रम् प्रयुज्यमानो मित्वादचोऽन्त्यात्परो भवतीति वाक्यार्थः संपद्यते। यस्य तु देशान्तरे नास्ति विधानं स स्थानिदेश एव भवति। तत्प्रसङ्गे तस्य विधानाद्विशिष्टदेशश्च स्थानिनः

---

उ०—तत्र न दुहस्नुनमामिति यक्प्रतिषेधः। असमाश्वासे बीजमाह—**येभ्य इति**। वस्तुत इदं चिन्त्यम्। चिण्प्रतिषेधेऽपि चिण्वद्भावप्रतिषेधे मानाभावादित्याहुः। **अनपेक्ष्येति**। तदपेक्षायां तु वृद्धिं बाधित्वाऽकारलोपेन भाव्यम्। ननु यावादिभ्यो लुग्विधानेनातोलोपाभावः सार्वधातुकमात्रे ज्ञापित इति कथमेतत्प्राप्तिरत आह—**यावादिभ्य इति**। **स्वाश्रयः**। सार्वधातुकाश्रयः। ननु चिण्यतो लोपाविधानात्कथं चिण्वद्भावात्प्राप्तिरत आह—**चिणि तस्येति**। अदन्ताच्चिण्प्रयोगस्यानभिधानाच्चिणि तस्यादर्शनमित्यन्ये। ननु वृद्धावाद्गुणप्राप्तेः कुतो युक्प्रसङ्गोऽत आह—**वृद्धाविति**। चिण्वद्भावादिट्प्रसङ्ग इति कुतो नोक्तमत आह—**इट्प्रसङ्गस्त्विति**। सीयुडादेरिटि सलोपे सवर्णदीर्घे विशेषाभाव इति भावः।

**भ्रस्जो। उपधाया अपीति**। एवं च पर्यायेण तत्तत्स्थाने प्रसङ्ग इति भावः। प्रयुज्यत इत्यन्तेनैतत्सूत्रमात्रीयमवान्तरवाक्यार्थं दर्शयित्वा मिदच इति परिभाषैकवाक्यतया महावाक्यार्थं दर्शयति—**रमित्यादिना**। **मित्त्वादिति**। मित्त्वेन स्थानिदेशत्वं बाध्यत इति भावः। आदेशस्य स्थानिदेशत्वे हेतुमाह—**विशिष्टदेशश्चेति**। यद्देशे स्थानिनः प्रसङ्गस्तद्देश एवाऽऽ-

---

*७, ३, ३३, + १, १, ४९,

भारद्वाजीयाः पठन्ति । भ्रस्जो रोधयोर्लोप * आगमो रम्विधीयत इति ।

**भ्रस्जादेशात्संप्रसारणं विप्रतिषेधेन ॥ १ ॥**

भ्रस्जादेशात्संप्रसारणं + भवति विप्रतिषेधेन । भ्रस्जादेशस्यावकाशः । भर्ष्टा भ्रष्टा । संप्रसारणस्यावकाशः । भृज्जति । इहोभयं प्राप्नोति । भृष्टः भृष्टवानिति। संप्रसारणं भवति विप्रतिषेधेन। स तर्हि पूर्वविप्रतिषेधो वक्तव्यः। न वक्तव्यः । रसोर्ववचनात्सिद्धम् । रसोर्वा ऋ भवतीति वक्ष्यामि ।

**रसोर्ववचने सिचि वृद्धेर्भ्रस्जादेशः ॥ २ ॥**

रसोर्वा ऋवचने सिचि× वृद्धेर्भ्रस्जादेशो वक्तव्यः । वृद्धौ कृतायामिदमेव रूपं स्यात् ।अभ्राक्षीत् । इदं न स्यात् । अभार्क्षीदिति । सर्वथा वयं पूर्वविप्रतिषेधान्न मुच्यामहे । सूत्रं च भिद्यते । यथान्यासमेवास्तु । ननु चोक्तं भ्रस्जादेशात्संप्रसारणं विप्रतिषेधेनेति । इदमिह संप्रधार्यम् । भ्रस्जादेशः क्रियतां

प्र०—प्रसङ्ग इति तद्देशेनैवाऽऽदेशेन भाव्यम् । **भारद्वाजीया इति** । ते हि सनः क्किचि लोप इत्यतो लोपग्रहणमनुवर्त्य रोपधयोर्लोपं रमागमं चान्यतरस्यां विदधति । **भृज्जतीति** । आर्धधातुकाधिकारादत्र रमोऽप्रसङ्गः । **रसोरिति** । साच्कस्य रेफस्य सकारस्य च ऋशब्दो वाऽऽदेशस्तत्र कृतेऽक्ङिति गुणः प्रवर्तते । भर्ष्टेति । ऋकाराभावपक्षे तु भ्रष्टेति । क्ङिति तु ऋशब्दे भृष्टमिति भवति । तदभावपक्षेऽपि संप्रसारणे सति भृष्टमिति नार्थः पूर्वविप्रतिषेधेन । इतरोऽत्रापि पूर्वविप्रतिषेधो वक्तव्य इति तुल्यतां प्रतिपादयन्नाह—**रसोरिति**।भ्रस्जेः सिचि ऋभावं विकल्पितं बाधित्वा परत्वान्नित्यं हलन्तलक्षणा वृद्धिः प्राप्नोतीति ऋभावार्थः पूर्वविप्रतिषेधो वक्तव्य एव । तेन रूपद्वयं सिध्यति । अभ्राक्षीत् । अभार्क्षीदिति । ननु ऋभावो नित्यः कृतायामपि वृद्धावेकदेशविकृतस्यानन्यत्वात्प्रसङ्गात् । वृद्धिस्तु शब्दान्तरस्य प्रसङ्गादनित्या । अजाकृतेरेकत्वान्नास्ति वृद्धेः शब्दान्तरस्य प्राप्त्याऽनित्यत्वमिति द्वयो-

उ०—देशौचित्यादिति भावः। स्थानषष्ठीनिर्देशादन्यदेशत्वेऽपि तन्निवृत्तिर्ऋष्यन्तरसंवादेन दर्शयति—**भारद्वाजीया इति** । भाष्ये **भ्रष्टा भ्रष्टुमिति**। क्ङित्त्वाभावादत्र संप्रसारणाप्रसङ्ग इति भावः। **रसोरिति** । रस इति निर्देशेऽलोऽन्त्यस्य प्रसङ्गाद्रसोरिति द्विवचननिर्देशः । **साच्कस्येति** । रेफमात्रस्य ऋकारेऽकारे यणि भ्रष्टेत्येव स्यादिति तद्विधानानर्थक्यं स्यादिति भावः। **एकदेशविकृतस्येति** । राजकीयमित्यादाविव स्थानिवद्भावाप्राप्तावपि लोकसिद्धश्वपुच्छादिदृष्टान्तमूलकैकदेशविकृतन्यायेन रस्त्वमिति भावः । **शब्दान्तरस्येति** । कृते ऋकारस्याकृतेऽकारस्येति भावः । जातिपदार्थाश्रयेण परिहरति—**अजाकृतेरिति** । वस्तुत ऋभावस्यापि शब्दान्तरप्राप्त्याऽनित्यत्वम् । कृताकृतप्रसङ्गित्वमात्राश्रयणे तु द्वयोरपि नित्यत्वं बोध्यम् । तस्माद्वृद्धौ कृतायां पुनःप्रसङ्गविज्ञानाद्भावेऽपि लक्ष्ये लक्षणस्येति न्यायेन पुनर्वृद्ध्यप्राप्तावभार्क्षीदिति न सिध्येत् । इष्टरूपयोरभ्राक्षीदिति सिध्येदभार्क्षीदिति न सिध्येदिति भाष्यार्थ इति बोध्यम् ।

* ६. ४. ४७. + ६. १. १६. × ७. २. ३.

संप्रसारणमिति किमत्र कर्तव्यम् । परत्वाद्भ्रस्जादेशः । नित्यत्वात्संप्रसारणम् । कृतेऽपि भ्रस्जादेशे प्राप्नोत्यकृतेऽपि । भ्रस्जादेशोऽपि नित्यः । कृतेऽपि संप्रसारणे प्राप्नोत्यकृतेऽपि प्राप्नोति । कथम् । योऽसावृकारे रेफस्तस्य चोपधायाश्च कृतेऽपि प्राप्नोति । अनित्यो भ्रस्जादेशो न हि कृते संप्रसारणे प्राप्नोति । किं कारणम् । न हि वर्णैकदेशा वर्णग्रहणेन गृह्यन्ते । अथापि गृह्यन्त एवमप्यनित्यः । कथम् । उपदेश इति* वर्तते । तच्चावश्यमुपदेशग्रहणमनुवर्त्यं बरीभृज्ज्यत इत्येवमर्थम् ।

---

प्र०–नित्ययोः परत्वाद्वृद्धिप्रसङ्गः । अन्तरङ्ग ऋभाव इति चेत् । न सिच्यन्तरङ्गमस्तीति ज्ञापयिष्यते । रम्भावे तु क्रियमाणे परत्वाद्वृद्धौ कृतायां पुनःप्रसङ्गविज्ञानाद्रमि सति सिद्धमभार्क्षीदिति । योऽसावृकारे रेफ इति । ननु च ऋकारावयवस्य रेफस्य रम् क्रियमाणः कथमन्त्यादचः परः स्यात् । मा भूदन्त्यादचः परः । तत्र विषय आदेशो भविष्यति । मित्त्वं तु भर्ष्टेत्यादौ सावकाशम् । उपदेश इति वर्तत इति । भ्रस्जेरुपदेशे यो रेफस्तत्स्थाने रम् भवति । न च ऋकारावयव उपदेशे भ्रस्जे रेफो भवति । बरीभृज्यत इति । तन्मध्यपतितस्तद्ग्रहणेन गृह्यत इति रीको रेफो भ्रस्जेर्भवतीति रम्प्रसङ्गः । भ्रस्जेरुपदेशे तु नासौ रेफ इति रमभावः । अनन्त्यविकार इत्येतत्तु प्रयोजनाभावान्नाऽऽश्रितम् ।

---

उ०–अन्तरङ्ग इति । आर्धधातुकमात्राश्रयत्वात् । वृद्धिस्तु परस्मैपदमप्यपेक्षत इति बहिरङ्गेति भावः । न सिचीति । अयं निषेध उभयोरप्युस्थानिकत्व एव णिश्विग्रहणस्य सजातीयापेक्षज्ञापकत्वादिति तु नाऽऽश्रितम् । इको गुणवृद्धी इति सूत्रे भाष्य उक्तत्वाज्ज्ञापितमिति वक्तुं युक्तम् । अग्रे तु भाष्ये क्वापीदं न दृश्यत इति ध्येयम् । बहुस्थानिकत्वेनास्यापि बहिरङ्गत्वम् । अत एव न सिच्यन्तरङ्गमित्यस्याभावेऽपि न क्षतिरित्यन्ये । ननु रम्भावमतेऽप्ययं पूर्वविप्रतिषेध आवश्यकः । अन्यथा परत्वाद्वृद्धौ सकृद्गतिन्यायेन स न स्यादत आह— रम्भाव इति । तत्र रम्चाकाराद्युत्तर इति सिद्धमिति भावः । इदमुपलक्षणम् । बरीभृज्ज्यत इत्यत्र नित्यतया जद्वयश्रवणार्थमृभावात्संप्रसारणं पूर्वविप्रतिषेधेनेत्यस्याप्यावश्यकत्वात् । किंचापिल्लिटि ऋभावेऽसंयोगात्परत्वेन कित्त्वे गुणाभावे बभृजतुरिति स्यादिष्यते तु बभर्ज्जतुरिति तत्सिद्ध्यर्थं रमेव कार्यः । नच संनिपातपरिभाषयाऽत्र न दोषः । शब्दतोऽर्थतो वाऽस्याकित्संनिपातलक्षणत्वाभावात् । सर्वं चेदं सूत्रं चेति चेन संगृहीतं भाष्ये । ननु चेति । तदवयवरेफस्य पृथङ्निष्कर्षायोगादृकारस्यैव रमा निवृत्तिर्वाच्येत्यजभावादन्त्यादचः परो न स्यादिति प्रश्नः । तत्र विषये । संप्रसारणविषये । आदेशो भविष्यतीति । स्थानिसमानदेश आदेशो भविष्यतीत्यर्थः । तन्मध्यपातित इति । ननु द्विःप्रयोगे द्विर्वचने द्वयोः प्रत्येकं तत्त्वेऽपि न समुदायस्य तत्त्वमिति नैतन्न्यायावसरः । अत एव दयतेरिति सूत्रेऽस्तेर्द्वित्वे कृत उत्तरखण्डस्य भूभावे कृत इत्यादि वक्ष्यति भाष्यकृत् । अभ्यासस्य नैरर्थक्येन तद्-

---

* १. ४. ३.

## अतो लोपः ॥ ६ । ४ । ४८ ॥

**ण्यल्लोपावियङ्यण्गुणवृद्धिदीर्घत्वेभ्यः पूर्वविप्रतिषिद्धम् ॥ १ ॥**

ण्यल्लोपावियङ्यण्गुणवृद्धिदीर्घत्वेभ्यो भवतः पूर्वविप्रतिषेधेन । णिलोपस्यावकाशः । कार्यते हार्यते । इयङादेशस्यावकाशः* । श्रियौ श्रियः । इहोभयं प्राप्नोति । आटिटत् आशिशत् । ननु चात्र यणादेशेन+ भवितव्यम् । इदं तर्हि । अततक्षत् अररक्षत् । यणादेशस्यावकाशः× । निन्यतुः निन्युः । णिलोपस्य स एव । इहोभयं प्राप्नोति । आटिटत् आशिशत् । वृद्धेरवकाशः । सखायौ सखायः÷। णिलोपस्य स एव । इहोभयं प्राप्नोति । कारयतेः कारकः । हारयतेर्हारकः* । गुणस्यावकाशः+ । चेता स्तोता । णिलोपस्यावकाशः । आटिटत् आशिशत् । इहोभयं प्राप्नोति । कारणा हारणा । दीर्घत्वस्यावकाशः× । चीयते स्तूयते । णिलोपस्यावकाशः । कारणा हारणा । इहोभयं प्राप्नोति । कार्यते हार्यते । णिलोपो भवति विप्रतिषेधेन । स तर्हि पूर्वविप्रतिषेधो वक्तव्यः । न वक्तव्यः । सन्त्वत्रैते विधय एतेषु विधिषु कृतेषु स्थानिवद्भावाण्णिग्रहणेन ग्रहणाण्णिलोपो भविष्यति । नैवं शक्यम् ।

---

प्र०—अतो । **यणादेशेनेति** । एरनेकाच इत्यनेन । ततश्च यणा बाधनादियङः संप्रधारणगोचरत्वाभावः। **सखायाविति** । सख्युरसंबुद्धाविति शास्त्रातिदेशपक्षे वृद्धेरयमवकाशो नतु कार्यातिदेशपक्ष इत्यवसेयम् । **णिलोपस्यावकाशः। आटिटदिति**। यणो णिलोपेन बाधितत्वादिति भावः । **कारणेति** । ननु चात्रापीयङोऽपवाद एरनेकाच इति यण् प्राप्नोति । परत्वात्तस्य गुणेन बाधनाद्गुणस्यापि पूर्वविप्रतिषेधाण्णिलोपेनेत्यदोषः । एकैकेन सह णिलोपस्य विचारादियङादीनामन्यतमविषयोऽपि णिलोपस्यावकाश उपन्यस्यते । **सन्त्वत्रैते इति** । ननु कारणा कारक इत्यादौ गुणवृद्ध्योः कृतयोरन्तरङ्गत्वादयायोः कृतयोरन्त्यस्य

---

उ०—वयवत्वेऽपि न तत्र रमृशास्त्रप्रवृत्तिः ।उत्तरखण्डेन व्यवधानाच्चेति चेन्न ।अथापि कथंचिदित्यादिभाष्यस्यैकदेशयुक्तित्वेनादोषात् ।

**अतो लोपः । शास्त्रातिदेशेति** । तत्पक्षे हि सखायावित्यादावचो ञ्णितीत्येव वृद्धिः प्रवर्तते । तस्या एव च कारक इत्यादौ प्राप्तिः। कार्यातिदेशे तु कारक इत्यादौ प्राप्ताया अचो ञ्णितीति वृद्धेर्नायमवकाशः स्यादिति भावः । कार्यातिदेशेऽपि वृद्धिशासनकर्तृत्वं तस्यैवेति भाष्याल्लभ्यत इत्यन्ये। नन्वाटिटदित्यादौ यणः प्राप्तिः कथमयं णिलोपावकाशोऽत आह—**यण इति**।एवं गुणणिलोपयोः स्पर्धायामवकाश एव इति भावः। तद्वक्ष्यति—**एकैकेन सहेति**। **ननु चात्रापीति** । एवं च गुणस्यैव कथमिदं स्पर्धास्थानमिति भावः। समाधत्ते—**परत्वादिति** ।**अन्तरङ्गत्वादिति**। वर्णमात्राश्रयत्वादिति भावः। अत्र सत्स्वत्रैते इत्यादि, अन्त्यलोपः प्रसज्येतेत्यन्तं

---

* ६. ४. ५१. + ६. ४. ७७. × ६ ४. ८२. ÷ ७. १. ९२; ७. २. ११५. * ३. १. १३३ + ७. ३. ८४ × ७ ४. २५.

इयङादेशे हि दोषः स्यात् । अन्त्यस्य लोपः प्रसज्येत* । अल्लोपस्येयङ्च्यणोश्च नास्ति संप्रधारणा । वृद्धेरवकाशः । प्रियमाचष्टे प्रापयति+। अल्लोपस्यावकाशः । चिकीर्षिता चिकीर्षितुम् । इहोभयं प्राप्नोति । चिकीर्षकः जिहीर्षकः× । गुणस्याल्लोपस्य च नास्ति संप्रधारणा । दीर्घत्वस्यावकाशः । अपि काकः श्येनायते÷। अल्लोपस्य स एव । इहोभयं प्राप्नोति । चिकीर्ष्यते जिहीर्ष्यते । अल्लोपो भवति विप्रतिषेधेन । स तर्हि पूर्वविप्रतिषेधो वक्तव्यः । न वक्तव्यः । इष्टवाची परशब्दः* । विप्रतिषेधे परं यदिष्टं तद्भवतीति ।

**यस्य हलः ॥ ६ । ४ । ४९ ॥**

किमिदं यलोपे वर्णग्रहणमाहोस्वित्संघातग्रहणम् । कश्चात्र विशेषः ।

**यलोपे वर्णग्रहणं चेद्धात्वन्तस्य प्रतिषेधः ॥ १ ॥**

यलोपे वर्णग्रहणं चेद्धात्वन्तस्य प्रतिषेधो वक्तव्यः । शुच्यिता शुच्यितुम् । अस्तु तर्हि संघातग्रहणम् । यदि संघातग्रहणमन्त्यस्य लोपः प्राप्नोति+। सिद्धोऽन्त्यस्य पूर्वेणैव× तत्राऽऽरम्भसामर्थ्यात्सर्वस्य भविष्यति । एवमपि तेनातिप्रसक्तमिति कृत्वा नियमो विज्ञायेत । यस्य हल एव नान्यतः । क्व मा भूत् । लोलूयिता पोपूयिता । कैमर्थक्यान्नियमो भवति । विधेयं नास्तीति कृत्वा ।

प्र०—णिलोपः प्राप्नोति । वार्णादाङ्गं बलीय इत्ययायौ बाधित्वा णिलोपो भविष्यतीत्यदोषः । **प्रापयतीति** । प्रियस्य प्रादेशे वृद्धौ च पुगागमः । अनार्धधातुकत्वाण्णेर्धातोरविधानादतो लोपस्यात्राप्रसङ्गः ।

**यस्य** । **किमिदमिति** । यद्यागन्तुनाऽकारेण निर्देशस्ततो वर्णमात्रग्रहणमन्यथा तु संघातग्रहणमिति पक्षद्वयसंभवः । **अन्त्यस्येति** । अलोऽन्त्यस्येति वचनात् । **कैमर्थक्यादिति** । कोऽर्थो यस्य तत्किमर्थकं तस्य भावः कैमर्थक्यम् । प्रश्नवि-

उ०—भाष्यमेकदेश्युक्तिः । वृद्ध्यादिस्थानीकारवृत्तिणित्वस्य भोभगो इति सूत्रे वक्ष्यमाणभाष्यरीत्याऽल्विधित्वेन स्थानिवद्भावेन णित्वालाभात् । किंच णेरनिटीत्यस्य ण्यन्ताङ्गस्य निर्दिश्यमानो योऽन्त्यस्तस्य लोप इत्यर्थ इत्येकाच इति सूत्रभाष्याल्लभ्यते । एवं चेयङि अन्त्यस्य निर्दिश्यमानधर्मावच्छिन्नत्वाभावात्समुदायस्य चान्त्याल्रूपत्वाभावेन लोपाप्राप्त्याऽस्यैकदेश्युक्तित्वमेवोचितमिति दिक् । णिलोपपूर्वविप्रतिषेधे चानिटीति ज्ञापकम् । परत्वाद्गुणादीनां बाधकत्व इडादावपि गुणेन बाधे सिद्धे तद्वैयर्थ्यं स्पष्टमेवेति बोध्यम् । नन्वत्राप्यतोलोपप्राप्तेः कथमयं वृद्धेरवकाशोऽत आह—**अनार्धधातुकत्वादिति** । तत्र हेतुः—धातोरविधानम् ।

**यस्य हलः** । **अलोऽन्त्यस्येति** । हलन्ताङ्गस्य निमित्तं यो यशब्दस्तस्य लोप इत्यर्थ इति भावः । नन्वारम्भसामर्थ्यादित्युक्तम् । आरम्भस्य नियमार्थत्वेन चारितार्थ्यादित्याशङ्क्ते—

१. १. ५२. * ६. ४. १५५+; १९७; ७. २. ११५; ७. ३. ३६. × ३. १. १३३; (७. २. ११५). ÷ ३. १. ११, ७. ४. २५. * १. ४. २. + १. १. ५२. × ६. ४. ४८.

इह चास्ति विधेयम्। किम्। अन्त्यस्य लोपः प्राप्तः स सर्वस्य विधेयः। तत्रापूर्वो विधिरस्तु नियमोऽस्त्वित्यपूर्व एव विधिर्भविष्यति न नियमः। एवमप्यन्त्यस्य प्राप्नोति। किं कारणम्। न हि लोपः सर्वापहारी। ननु च संघातग्रहणसामर्थ्यात्सर्वस्य भविष्यति।

**संघातग्रहणं चेत्क्यस्य विभाषायां दोषः ॥ २ ॥**

**संघातग्रहणं चेत्क्यस्य विभाषायां*** दोषो भवति। समिधिता समिध्यिता। यदा लोपस्तदा सर्वस्य लोपः। यदाऽलोपस्तदा सर्वस्यालोपः प्राप्नोति।

---

प्र०–षययोः संबन्धोऽत्र भावप्रत्ययवाच्यः। **अपूर्व एव विधिरिति**। नियमे हि श्रुतार्थत्यागेनाश्रुताया अन्यानिवृत्तेः सामर्थ्यात्परिकल्पनम्। उक्तानुवादंदोषश्च प्राप्नोति। **एवमप्यन्त्यस्येति**। अलोन्त्यपरिभाषोपस्थानादपूर्वस्य विधेरसंभवाद्विधिनियमसंभवे च विधिरेव ज्यायानित्यस्य न्यायस्यायमविषय इत्यर्थः। **संघातग्रहणसामर्थ्यादिति**। किं यस्य हल इत्यस्य विधिरूपत्वं बाध्यतामुतालोऽन्त्यस्येति परिभाषेति। पारार्थ्यादप्रधानस्य परिभाषायास्त्यागो युक्तो नतु प्रधानस्य विधिरूपत्वस्य बाधनम्। **समिधितेति**। समिधमिच्छति आत्मन इति क्यच् ततस्तृच् इट्। इह वर्णग्रहणे क्यस्य विभाषेत्यत्र क्येन यकारो विशेष्यते। क्यस्य यो यकारो हलः परस्तस्य विभाषा लोपो भवत्यकारस्य त्वतो लोप इति नित्यो लोप इति यथेष्टं रूपद्वयं सिध्यति। संघातग्रहणे तु यस्य हल इत्यनेन येन नाप्राप्तिन्यायेनातो लोपो बाध्यः। यलोपोऽपि क्यस्य विभाषेति विकल्पेन बाध्यस्ततश्च पक्षे संघातस्यैव श्रवणं प्राप्नोति। नित्ययलोपवदल्लोपस्यापि विकल्पेन बाधनात्। एतच्च न धातुलोप

---

उ०–भाष्ये **एवमपीति**। **संबन्धोऽत्रेति**। किमर्थकशब्देन जिज्ञासाविषयप्रयोजनकमुच्यते। तदुत्तरभावप्रत्ययेन जिज्ञासाप्रयोजनयोः संबन्धो विषयविषयिभावरूप उच्यते। प्रयोजनज्ञाने हि न तज्जिज्ञासा। तदज्ञानं च तदभावात्। सत्त्वे हि तज्ज्ञायेतैवेति स निष्प्रयोजनत्वरूपतया फलति। नियमाद्विधेर्बलवत्त्वे युक्तिमाह–**नियमे हीति**। सामर्थ्यात्परिकल्पनमित्यनेन तस्याशाब्दत्वं सूचयति। **अलोऽन्त्यपरिभाषेति**। एवं च परिभाषाबाधस्य विधिवादिनोऽप्यावश्यकत्वेनास्य विधेर्न नियमाल्लघुत्वमिति भावः। **विधिरूपत्वस्येति**। विधिरूपबाधनमिति पाठे विधेर्यद्रूपं विधित्वं तस्य बाधनमित्यर्थः। इदमुपलक्षणम्। नियमवादिना प्रधानस्यातो लोप इत्यस्य हलोऽनुत्तरयविषये बाधः कल्प्य इत्यपि बोध्यम्। **अकारस्य त्विति**। अत्र पक्षे विषयभेदादल्लोपयलोपयोर्बाध्यबाधकत्वाभाव इति भावः। **अतो लोपो बाध्य इति**। एकविषयत्वादिति भावः। **अल्लोपस्यापि विकल्पेनेति**। एवं च तदभावेऽप्यल्लोपाभाव इति भावः। इदं च द्वितीयतृतीयचतुर्थेत्यादिसूत्रस्थभाष्यविरोधाच्चिन्त्यम्। तत्र हि वैकल्पिकापवादाभावे उत्सर्गस्य प्रवृत्तिरङ्गी-

---

* ६. ४. ५०.

## आदेः परवचनात्सिद्धम् ॥ ३ ॥

हल इति पञ्चमी । तस्मादित्युत्तरस्याऽऽदेः परस्य [ १. १. ६७; ५४] इति यकारस्यैव भविष्यति । अथवा पुनरस्तु वर्णग्रहणम् । ननु चोक्तं यलोपे वर्णग्रहणं चेद्धात्वन्तस्य प्रतिषेध इति । नैष दोषः । अङ्गादिति हि वर्तते । न वा अङ्गादिति पञ्चम्यस्ति । एवं तर्ह्यङ्गस्येति* संबन्धषष्ठी विज्ञास्यते । अङ्गस्य यो यकारः । किंचाङ्गस्य यकारः । निमित्तम् । यस्मिन्नङ्गमित्येतद्भवति । कस्मिंश्चैतद्भवति । प्रत्यये ।

## णेरनिटि ॥ ६ । ४ । ५१ ॥

प्र०—इत्यस्य प्रत्याख्यानाय यस्येति योगविभागो व्याख्यातस्तमनाश्रित्योक्तम् । तदाश्रयेऽल्लोपस्य सिद्धत्वात् । क्यस्येति कण्ड्वादियकोऽपि ग्रहणं केचिदिच्छन्ति कितो यशब्दस्य ग्रहणे तात्पर्यात् । ककारस्यानुबन्धस्याऽऽदित्वमविवक्षितमिति वदन्तः । एतदपरे नेच्छन्ति । आदिभूतककारानुबन्धनिर्देशे सत्यादित्वाविवक्षायां प्रमाणाभावात् । लक्ष्यस्य च तथा शिष्टैरप्रदर्शनात् । **आदेरिति** । ततश्च क्यस्य विभाषेति यकारस्यैव लोपो विकल्पेनाकारस्य तु नित्यमिति सिद्धमिष्टम् । **अङ्गादिति वर्तत इति** । अङ्गस्येति निमित्तनिमित्तिभावसंबन्धाश्रयणे पञ्चम्यर्थलाभात् फलाभेदात्पञ्चमीनिर्देशः कृतः । इतरो यथोक्तमभिप्रायमप्रतिपद्याऽऽह—**न वै अङ्गादिति । संबन्धषष्ठीति**। अनेकसंबन्धसंभवेऽप्यन्तरङ्गत्वान्निमित्तनिमित्तिभावलक्षण एव संबन्धः परिगृह्यते । **प्रत्यय इति** । प्रत्ययहेतुकत्वादङ्गव्यपदेशस्य । ननु च समुदायः प्रत्ययोऽङ्गस्य निमित्तं नतु यकारमात्रम् । अकारे लुप्ते यकारमात्रस्य प्रत्ययत्वाददोषः ।

**णेर०** । **निष्ठायामेव सेटीति** । सेट्येव निष्ठायामिति नियमो न भवति । अनिटो निष्ठाया अभावात् । **अयादेशो भवतीति** । लोपापवाद इत्यर्थः ।

उ०—कृता । भाष्यकृता तु वारतवपरिहारान्तरसद्भावादिदं नोक्तमिति तत्त्वम् । **तदाश्रये इति** । विशेषविहितयलोपेनाल्लोपस्य बाधो मा भूदित्यर्थत्वाद्योगविभागस्येति भावः । हल इति पञ्चमीति भाष्ये । अङ्गनिमित्तस्य हल उत्तरस्य यस्य लोप इत्यर्थ इत्यल्लोपापवादत्वमेव नास्येति भावः । नन्वङ्गादित्यस्याभावेनाङ्गादिति वर्तत इत्यनुपपन्नमत आह—**अङ्गस्येतीति । अनेकसंबन्धेति** । अवयवावयविभावादिरूपेत्यर्थः । **अन्तरङ्गत्वादिति** । अङ्गसंज्ञासूत्रे प्रतीतत्वेन शास्त्रीयत्वेन प्रथमप्रतीतत्वादित्यर्थः । ननु प्रत्ययोऽङ्गं नोत्पादयतीति कथं तस्य हेतुत्वमत आह—**प्रत्ययहेतुकत्वादिति । प्रत्ययत्वाददोष इति** । यद्यपि परत्वाद्यलोपेऽकारलोप इति कथं तस्य प्रत्ययत्वं तथाऽपि यदि पूर्वमलोपः स्यात्तस्यापि प्रत्ययत्वं स्यादिति तार्किकप्रत्ययत्वाददोष इत्यर्थः ।

**णेरनिटि । अनिटो निष्ठाया अभावादिति** । ण्यन्तात्पराया इति शेषः । एतच्चोत्तरसूत्रे स्फुटी भविष्यति ।

* ६. ४. १.

अथानिटीति किमर्थम् । कारयिता कारयितुम् । अनिटीति शक्यमवक्तुम् । कस्मान्न भवति । कारयिता कारयितुम् । निष्ठायां सेटि [६. ४. ५२] इत्येतन्नियमार्थं भविष्यति । निष्ठायामेव सेटि णेर्लोपो भवति नान्यत्र । क्व मा भूत् । कारयिता कारयितुम् । अथवोपरिष्टाद्योगविभागः करिष्यते* । इदमस्ति । निष्ठायां सेटि [५२] जनिता मन्त्रे [५३] शमिता यज्ञे [५४] । ततः अय् । अयादेशो भवति णेः सेटि । तत आमन्ताल्वाय्येत्न्विष्णुषु । अय्भवतीत्येव ।

## निष्ठायां सेटि ॥ ६ । ४ । ५२ ॥

अथ सेड्ग्रहणं किमर्थम् । निष्ठायां सेड्ग्रहणमनिटि प्रतिषेधार्थम् । निष्ठायां सेड्ग्रहणं क्रियतेऽनिटि प्रतिषेधो यथा स्यादिति । संज्ञपितः पशुरिति ।

**निष्ठायां सेड्ग्रहणमानिटि प्रतिषेधार्थमिति चेत्तत्सिद्धमनिडभावात् ॥१॥**

निष्ठायां सेड्ग्रहणमनिटि प्रतिषेधार्थमिति चेदन्तरेणापि सेड्ग्रहणं तत्सिद्धम् । कथम् । अनिडभावात् । ननु च यस्य विभाषा [ ७. २. १५ ] इति ज्ञपेरिट्प्रतिषेधः+ ।

---

प्र०—**निष्ठायाम्** । **संज्ञपित इति** । सनीवन्तर्धेति सनि विकल्पविधानाद्यस्य विभाषेतीट्प्रतिषेधः । सेड्ग्रहणसामर्थ्याच्च पूर्वेणापि न भवति । वा दान्तशान्तेत्यत्र ज्ञपेर्निपातनमाश्रियते ज्ञप्तो

---

उ०— **निष्ठायां सेटि** । संज्ञपिते मारणतोषणनिशामनेषु ज्ञा इति मारणार्थे मित्त्वाण्णिचि पुकि मितो ह्रस्वत्वम् । अत्रार्थे संपूर्वकस्यैव प्रयोग इति पुरुषकार उक्तम् । नन्वनेन णिलोपाभावेऽपि पूर्वेण स्यादत आह—**सेड्ग्रहणेति** । नन्वेवं वा दान्तशान्तेतीट्प्रतिषेधप्रकरणे ज्ञप्त इति निपातनं किमर्थमत आह—**वा दान्तेति** । ×**ज्ञापेरिति** । मित्संनिधौ पाठे कर्तव्येऽग्रे पाठेन तत्रामित एव ग्रहणम् । छन्न इत्यपि निपातनममित एव । ज्ञापने मित्त्वाभावेन तत्रेट्प्रतिषेधणिलुकोर्विकल्पेन निपातनाज्ज्ञप्तो ज्ञापित इति रूपद्वयासिद्धिः । अत एव तज्ज्ञा-

---

× ज्ञापेरिति । यद्यपि संप्रतितनेषु संस्करणे सहायत्वेनोपात्तेषु त्रिचतुरेषु हस्तलिखितेषु सभाष्यकैयटपुस्तकेषु निष्ठायां सेटीति सूत्रे कैयटे 'ज्ञपेः' इत्येव पाठ उपलभ्यते तथाऽपि विवरणे नागोजीभट्टैः 'ज्ञापेरिति' इति प्रतीकस्य धृतत्वादग्रे च 'ज्ञपेः' इति क्वचित्पाठो दृश्यत इति तैरेवोक्तत्वाच्च तेषां पुरतो यानि कैयटपुस्तकान्यासंस्तत्र 'ज्ञापेः' इत्येव पाठ आसीदिति सिध्यति । स एव युक्तः । ज्ञपेरिति क्वचिद्दृश्यमानः पाठश्चिन्त्य इति तैरेवोक्तत्वात् । अतोऽस्माभिरपि विवरणानुरोधेन स एव पाठ आदृत इति बोध्यम् ।

---

*६. ४. ५५. + ७. २. ४९.

---

१ क. ख. ग. घ. ज्ञपे°।

**एकाचो हि प्रतिषेधः ॥ २ ॥**

एकाचो हि स प्रतिषेधो* ज्ञपिश्चानेकाच्।

**इड्भावार्थं तु तन्निमित्तत्वाल्लोपस्य ॥ ३ ॥**

इड्भावार्थं तर्हि सेड्ग्रहणं क्रियते। कथं पुनः सेटीत्यनेनेट् शक्यो भावयितुम्। तन्निमित्तत्वाल्लोपस्य। नान्राकृत इटि णिलोपेन भवितव्यम्। किं कारणम्। सेटीत्युच्यते।

**अवचने हि णिलोप इट्प्रतिषेधप्रसङ्गः ॥ ४ ॥**

अक्रियमाणे हि सेड्ग्रहणे णिलोपे कृत एकाच इतीट्प्रतिषेधः प्रसज्येत। कारितम् हारितम्।

एवं तर्हि नार्थः सेड्ग्रहणेन नापि सूत्रेण। कथम्। सप्तमे+ योगवि-

प्र०-ज्ञापित इति। **एकाचो हीति**। यस्य विभाषेत्यत्रैकाच इत्यधिकारात्। **इड्भावार्थं त्विति**। इटि कृते णिलोपो यथा स्यादकृते मा भूदिति कालावधारणार्थं सेट्ग्रहणमित्यर्थः। आक्रियमाणे हि सेट्ग्रहणे कारित इति स्थिते णिलोपश्च प्राप्नोति इट्च। नित्यत्वाण्णिलोपः प्राप्नोति। तत्र कृते एकाच इतीट्प्रतिषेधः प्राप्नोत्येकदेशविकृतस्यानन्यत्वात्स एव करोतिर्भवतीति। यस्य च लक्षणान्तरेण निमित्तं विहन्यते न तदनित्यमित्येतच्च कार्यगतभावाभावापेक्षायां नाऽऽश्रीयत इत्यानित्य एवेडागमः। इटि तु णिलोपे क्रियमाणे न प्रवर्तत इट्प्रतिषेधो निर्वृत्तस्य प्रतिषेद्धुमशक्यत्वात्। एतच्च प्रयोजनं पूर्वस्मादपि विधौ स्थानिवद्भाव इत्यनाश्रित्योक्तम्। **सप्तमे योगविभाग**

उ०-पयत्याचार्य इत्यादि संगच्छत इति नारायणः। अन्ये तु वा दान्तेति सूत्रे तु ज्ञप मिच्चेत्यस्य निपातनं प्रतिपदोक्तत्वात्। अत एव कैयटे ज्ञपेर्निपातनमाश्रीयते। ज्ञप्तो ज्ञपित इति क्वचित्पाठो दृश्यत इत्याहुस्तच्चिन्त्यम्। तेनैव सिद्धावत्रत्योदाहरणपरभाष्यविरोधापत्तेः। नन्वनेन णिलोपो विधीयत इति कथमिटोऽभावः स्यादत आह—**इटि कृत इति**। ननु परत्वादेवेटि कृते णिलोपः सिद्ध इति किं सेड्ग्रहणेनात आह—**अक्रियमाणे हीति**। ननु य एकाच्धातुः कृ इति सोऽयं न भवतीति कथमिट्प्रतिषेधोऽत आह—**एकदेशेति**। **कार्यगतेति**। कृताकृतप्रसङ्गमात्रेण नित्यत्वम्। तद्वैपरीत्येनैवानित्यत्वं चाऽऽश्रीयत इति भावः। अत्रापि सेड्ग्रहणमेव मानम्। ननु पूर्वमिट्यपि णिलोपे कृते प्रतिषेधेन निवृत्तिस्तस्य कथं नेत्यत आह—**इटि त्विति**। इटि परतो णिलोपे क्रियमाणे इत्यर्थः। **अनाश्रित्योक्तमिति**। तदाश्रयणे हि णिलोपस्य स्थानिवत्त्वेनैकाचः परत्वाभावादिण्निषेधाप्राप्तेः पूर्वं णिलोपेऽपि दोषाभावात्। कालावधारणार्थं सेड्ग्रहणं व्यर्थं सत्तदनित्यत्वं ज्ञापयतीति भावः। **एकाच इति**। एकाच इति विहितविशेषणं चाऽऽश्रित्येदमित्यपि बोध्यम्। वस्तुत एवं तर्हि

* ७. २. १०; १५. + ७. २. २६.

१ क. ख. ग. घ. ज्ञपि°।

भागः करिष्यते । इदमस्ति । निष्ठायां नेड्भवति* । ततो णेः । ण्यन्तस्य निष्ठायां नेड्भवति । कारितम् हारितम् । ततो वृत्तम् । वृत्तमिति च निपात्यते । किं निपात्यते । णेर्निष्ठायां लोपो निपात्यते । किं प्रयोजनम् । नियमार्थम् । अत्रैव णेर्निष्ठायां लोपो भवति नान्यत्र । क्व मा भूत् । कारितम् हारितम् । इहापि तर्हि प्राप्नोति । वर्तितमन्नम् । वर्तिता भिक्षेति । ततः अध्ययने । अध्ययने चेद्वृतिर्वर्तत इति ।

**वृधिरमिशृधीनामुपसंख्यानं सार्वधातुकत्वात् ॥ ५ ॥**

वृधिरमिशृधीनामुपसंख्यानं कर्तव्यम् । किं कारणम् । सार्वधातुकत्वात् । वर्धन्तु त्वा सुष्टुतयो गिरो मे । वर्धयन्त्वित्येवं प्राप्ते बृहस्पतिष्ट्वा सुम्ने रम्णातु । रमयत्वित्येवं प्राप्ते । अग्ने शर्ध महते सौभगाय । शर्धयेति प्राप्ते । तत्तर्हि वक्तव्यम् । न वक्तव्यम् । वृधिरमिशृधीनामार्धधातुकत्वात्सिद्धम् । कथमार्धधातुकत्वम् । अन्येऽपि हि धातुप्रत्यया उभयथा छन्दसि दृश्यन्ते ।

**अयामन्ताल्वाय्येत्न्विष्णुषु ॥ ६ । ४ । ५५ ॥**

किं पुनरयं क्तनुराहोस्विदित्नुः । कश्चात्र विशेषः ।

---

प्र०—**इति** । णेरध्ययने वृत्तमिति योगं विभज्य योगत्रयं क्रियते । क्रमविपर्ययश्चाऽऽश्रीयते । णेरित्येको योगः । तत्र निष्ठायां नेडिति वर्तते । ततो वृत्तमिति द्वितीयो योगो णिलोपनियमार्थो गुणप्रतिषेधार्थश्चानेकप्रयोजनत्वान्निपातनानाम् । अथवा वृत्तमित्येकशेषाश्रयणादेकस्य नियमार्थत्वमपरस्य गुणनिषेधार्थत्वं भविष्यति । ततोऽध्ययन इति तृतीयो योगो वृत्तशब्दस्यार्थविशेषानियमार्थः । **रम्णात्विति** । व्यत्ययेन श्नाप्रत्ययः ।

अया० । **किं पुनरिति** । यद्यपि क्त्नावयामन्ताल्वाय्येत्न्विष्णुष्विति निर्देशानुपपत्तिः । तथाऽपि युक्तायुक्तत्वापेक्षो विचारः । कः प्रत्यय आश्रयितुं युक्तः को न युक्त इति ।

---

उ०—**नार्थः** सेड्ग्रहणेनेति भाष्यस्य तत्र सूत्रे विहितविशेषणादिति शेषः । तदुत्तरं भाष्यं त्वेकदेश्युक्तिरिति बोध्यम् । **क्रमविपर्ययश्चेति** । वृत्तमित्येतदन्ते श्रुतमपि मध्ये संबन्धनीयमित्यर्थः । ननु णिलोपनियमेन कृतार्थो योगः कथं गुणप्रतिषेधं कुर्यादत आह—**अनेकेति** । ननु गुणाभावे विधेये संभवति कथं नियमार्थतेत्यस्वरसादाह—**अथवेति** । **अर्थविशेषेति** । वृतेरप्यध्ययन एव नान्यत्रेति ।

**अयामन्ता०** । नन्विह निर्देशेनैवासंदेहात्प्रश्नानुपपत्तिरित्याह—**यद्यपीति** । **कः प्रत्यय इति** । उणादिषु व्याकरणान्तरे किं क्त्नुः प्रत्ययोऽथेत्नुरिति विचार्यत इत्यर्थः । नन्वे-

---

* ७. २. ६; १४.

**क्त्नाविटि णेर्गुणवचनम् ॥ १ ॥**

क्त्नौ सतीटि णेर्गुणो वक्तव्यः*। गदयित्नुः स्तनयित्नुः। अस्तु तर्हीत्नुः।

**इत्नौ प्रत्ययान्तरकरणम् ॥ २ ॥**

यदि तर्हीत्नुः प्रत्ययान्तरं कर्तव्यम्।

**अयादेशे चोपसंख्यानम् ॥ ३ ॥**

अयादेशे चोपसंख्यानं कर्तव्यम्। उभयं क्रियते न्यास एव।

---

प्र०–अथवा किं कृतेडागमः क्त्नुरिह निर्दिष्टोऽथ प्रत्यय एवेत्नुरिति विचारः। **क्त्वाविटीति**। स्तनिहृषीत्यत्र यदि क्त्नुर्विधीयते तदा तस्येटि कृतेऽनिटीति वचनाण्णिलोपो नास्ति। किन्त्वात्तु गुणप्रतिषेधे प्राप्ते गुणो विधेयः। **इत्नाविति**। स्तनिहृषीत्यत्रेत्नुर्विधेयः। कृहनिभ्यां क्त्नुर्विधेयः। यदा तु स्तनादिभ्यः क्त्नुर्विधीयते स एवोत्तरत्रानुवर्तते तदा प्रत्ययान्तरं न विधेयम्। स्वरेऽपि भेदो नास्त्युभयथाऽन्तोदात्तत्वात्। **अयादेश चेति**। णिलोपस्य प्रसङ्गादुपसंख्यानशब्देनात्र सूत्रे पाठ उच्यते न त्वपूर्वं वचनम्। भाष्यकारो गुरुलाघवमनादृत्य यथान्यासं समर्थयितुमाह–**उभयमिति**। यद्यत्र त्नुग्रहणमयादेशार्थं क्रियते स्तन्यादिभ्यश्च क्त्नुर्विधीयते तदा स्यादेव लाघवम्।

---

उ०– तत्सूत्रमुपादाय विचारे क्रियमाणेऽत्रैव संदेहो युक्त इत्यत आह–**अथवेति**। **किन्त्वात्त्विति**। तच्च कृत्नुरित्यादौ गुणप्रतिषेधायाऽऽवश्यकमिति भावः। **गुणो विधेय इति**। अत्र सूत्र इत्नु इति न पठनीयामिति भावः। **उभयथाऽन्तोदात्तत्वादिति**। क्त्नौ प्रत्ययस्वरेणेत्नुाचि चित्स्वरेणेति भावः। परे त्विदं सूत्रमयादेशानुवादकं लाघवात्तदनुवादाच्च णिलोपबाधनमन्यथाऽनुवादत्वासंभवात्। अत्र सूत्रे निमित्तत्वेनाऽऽश्रयणाण्ण्यन्तेभ्यो यथाप्रयोगमन्तादिप्रत्ययकल्पनं ढकि लोप इत्यत्र ढक्कल्पनवत्। तदाह–**क्त्नाविटीति**। सूत्रस्यानुवादत्वनिर्वाहाय सूत्रकृतोऽपि तस्याऽऽवश्यकत्वमिति तदेवास्तु। अत्र सूत्रे च [इत्नु]-ग्रहणं न कार्यमिति भावः। व्याकरणान्तरे च तथैव कृतम्। णेरेव स्थानेऽयादेशे तु तदंशेऽनुवादत्वभङ्ग इत्याशयः। **प्रत्ययान्तरम्**—व्याकरणान्तरपठितात्प्रत्ययादन्यत्। **अयादेशे चेति**। तदनुवादके शास्त्र इत्यर्थः। णिलोपाभावायेति भावः। अत्र सूत्रे निमित्तत्वेनाऽऽश्रयणेनापूर्वस्य तस्य कल्पनादस्योपसंख्यानत्वव्यवहारो भाष्ये। अन्यथा सूत्रे पाठस्य निर्विवादत्वेन सूत्रे कः प्रत्ययो निर्दिष्ट इति संदेहे प्रत्ययान्तरकरणमेव दोषो नतु सूत्रेऽकरणमपि दोष इति कैयटोक्तव्याख्यायां न भाष्यसामञ्जस्यम्। क्त्नोस्तु व्याकणान्तरपठितस्यानुमतिमात्रं नापूर्वमुपसंख्यानमिति भावः। **उभयं क्रियत इति**। अत्र पाठस्तेन प्रत्ययान्तरं च बोध्यत इत्यर्थः। कृञः सर्वधात्वर्थवानुदकत्वात्। एतेन यद्यत्रेत्यादि कैयटोक्तमपास्तम्। तेनैषां पङ्कजादिवद्योगरूढत्वं सूचितम्। अन्तोदात्तादयश्चैते सूत्रे पठ्यन्त इति न स्वरभेद इत्याहुः।

---

* १. १. ५.

**ल्यपि लघुपूर्वस्य ॥ ६ । ४ । ५६ ॥**

**ल्यपि लघुपूर्वस्येति चेद्व्यञ्जनान्तेषूपसंख्यानम् ॥ १ ॥**

ल्यपि लघुपूर्वस्येति चेद्व्यञ्जनान्तेषूपसंख्यानं कर्तव्यम् । प्रशमय्य गतः । प्रतमय्य गतः ।

**अल्लोपे च गुरुपूर्वात्प्रतिषेधः ॥ २ ॥**

अल्लोपे÷ च गुरुपूर्वात्प्रतिषेधो वक्तव्यः । प्रचिकीर्ष्य गतः ।

**ल्यपि लघुपूर्वादिति वचनात्सिद्धम् ॥ ३ ॥**

ल्यपि लघुपूर्वादिति वक्तव्यम् । एवमपि ह्रस्वयलोपाल्लोपानामसिद्धत्वाल्ल्यपि

---

**प्र०— ल्यपि०** । केचिदाचार्येण लघुपूर्वस्येति षष्ठ्यन्तमध्यापिताः । अन्ये तु लघुपूर्वादिति पञ्चम्यन्तम् । तत्र षष्ठीमाश्रित्याऽऽह—**ल्यपीति** । **प्रशमय्येति** । शमेर्णिचि वृद्धौ मितां ह्रस्व इति ह्रस्वः । तत्र णेः पूर्वं व्यञ्जनं न लध्वित्ययादेशो न प्राप्नोति । न चात्र व्यवहितेऽपि पूर्वशब्दो वर्तत इति शक्यमाश्रयितुम् । चकासृदरिद्रादीनामपि ण्यन्तानामयादेशप्रसङ्गात् । प्रचकास्य गत इति । न चाव्यवहिते संभवति व्यवहितं पूर्वमाश्रयितुं युक्तम् । ततश्च प्रगणय्य प्रस्तनय्येत्यादावेव स्यादत्र ह्यल्लोपस्यासिद्धत्वाल्लघुपूर्वो णिर्भवति । अथापि व्याश्रयत्वादल्लोपस्यासिद्धत्वं न स्यात् । एवमपि भूतपूर्वगत्या लघुपूर्वताश्रयोऽयादेशः स्यात् । **अल्लोपे चेति** । अल्लोपे कृते यो गुरुपूर्वस्तस्मात्परस्य णेर्भूतपूर्वां लघुपूर्वतामाश्रित्यायादेशः प्राप्नोति । **लघुपूर्वादिति वचनादिति** । लघुपूर्वादिति पञ्चम्यन्तं पठितव्यमित्यर्थः । लघुः पूर्वो यस्मादिति लघुपूर्वस्तस्मात्परस्य णेरयादेशः । **एवमपीति** । क्व तर्हि स्यात् ।

---

**उ०— ल्यपि लघु०** । अग्रिमवार्तिकानुसारात्सूत्रे पञ्चम्यन्तपाठनिर्णयेनाऽऽद्यवार्तिके षष्ठ्यन्तानुवादो न युक्तोऽत आह—**केचिदिति** । लघुः पूर्वो यस्मात्तस्य णेर्ल्यप्ययादेश इत्यत्र पक्षेऽर्थः । **मितां ह्रस्व इति** । अमन्तत्वान्मित्त्वम् । **न चात्र व्यवहित इति** । उत्तरांशविकलायास्तस्मादिति परिभाषाया दुर्वारत्वादिति भावः । यद्वक्ष्यति न चाव्यवहित इति । दूषणान्तरमाह—**चकास्विति** । भाष्ये दोषान्तरमाह—**अल्लोपे चेति** । पञ्चम्यन्तपाठे यथा व्यञ्जनान्तेषु न दोषस्तथा सूत्रार्थप्रदर्शनव्याजेनाऽऽह—**लघुः पूर्वो यस्मादिति** । अत्रोभयत्राप्यव्यवहित एव गृह्यत इति प्रतिचिकीर्ष्य गत इत्यादावपि न दोषः । न च वर्णग्रहणे जातिग्रहणाद्दोष एवात्रेति वाच्यम् । जातिग्रहणेनानेकग्रहणेऽपि वर्णद्वयस्यैव ग्रहणेनादोषात् । अत एव सनि मीमेत्युत्तरं दम्भ ईच्च आप्ज्ञप्यृधामिति दम्भेरपीस्ईत्त्वाभ्यां संयोगादिलोपनलोपाभ्यां सिद्धे दम्भ इच्चेति इत्त्वविधानं चरितार्थम् । इस्भावे हि सनूभेति वर्णत्रयसत्त्वेन कित्त्वानापत्तेरित्याहुः । न चैवं निपात एकेति सूत्रस्था इ उ अपेहीति भाष्यविरोधः । तत्र अ इ उ इति त्रयाणां सत्त्वादिति वाच्यम् । तत्रापि तद्घटक-

---

÷ ६. ४. ४८.

लघुपूर्वादित्ययादेशो न प्राप्नोति+ । प्रशमय्य गतः प्रतमय्य गतः । प्रबेभिदय्य गतः प्रचेच्छिदय्य गतः । प्रगदय्य गतः प्रस्तनय्य गतः ।

**ह्रस्वादिषु चोक्तम् ॥ ४ ॥**

किमुक्तम् । समानाश्रयवचनात्सिद्धमिति÷ । कथम् । णावेते विधयो णेर्ल्यप्ययादेशः ।

**विभाषाऽऽपः ॥ ६ । ४ । ५७ ॥**

इङादेशस्य प्रतिषेधो वक्तव्यः । अध्याप्य* गतः ।

**आपः सानुबन्धकनिर्देशादिङि सिद्धम् ॥ १ ॥**

आपः सानुबन्धकस्य निर्देशः करिष्यते । आप्लृ इति । तेनेङादेशस्य न भविष्यति । स तर्हि सानुबन्धकनिर्देशः कर्तव्यः । न कर्तव्यः । लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेत्येवं न भविष्यति ।

इति श्रीभगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये षष्ठस्याध्यायस्य चतुर्थे पादे द्वितीयमाह्निकम् ॥ २ ॥

---

प्र०–मृदमाचष्ट इति णिच्प्रकृत्यैकाजिति प्रकृतिभावाट्टिलोपप्रतिषेधः प्रमृदय्य गत इत्यादौ स्यात् ।

**विभाषा०** । **अध्याप्येति** । क्रीङ्जीनां णावित्यात्त्वमर्तिह्रीत्यादिना पुगागमः । **सानुबन्धकनिर्देशादिति** । आपुलिति पठितव्यमित्यर्थः । आप्लृशब्दात्पञ्चम्येकवचने ऋकारलृकारयोः सवर्णविधिरिति ऋत उदित्युत्त्वमुरण्रपर इत्यत्र प्रत्याहारग्रहणाल्लपरत्वम् । भाष्यकारस्त्वसंदेहार्थमविभक्तिकत्वमाश्रित्याऽऽह––आप्लृ इति । **लक्षणप्रतिपदोक्तयोरिति** । लाक्षणिकस्यानुमेयरूपत्वाद्विलम्बितप्रतीतिगोचरत्वात् । प्रतिपदोक्तस्य तु प्रत्यक्षत्वादविलम्बितप्रतीतिविषयत्वादाकृतौ च पदार्थ इयं परिभाषा न व्यक्तौ तत्र हि सर्वस्यां व्यक्तौ लक्षणेन प्रवर्तितव्यम् ।

इत्युपाध्यायजैयटपुत्रकैयटकृते भाष्यप्रदीपे षष्ठस्याध्यायस्य चतुर्थे पादे द्वितीयमाह्निकम् ॥

---

उ०–द्वयोरेवाऽऽपाद्यत्वात् । **क्व तर्हि स्यादिति** । विषयान्तराभावाद्वचनसामर्थ्येन ह्रस्वादीनामसिद्धत्वं बाध्यत इति प्रश्नः ।

**विभाषाऽऽपः** । **असंदेहार्थमिति** । आपुलिति किमाङ्पूर्वस्य पुल महत्त्वे इत्यस्याविभक्तिको निर्देश उताऽऽप्लृधातोरिति संदेहनिवृत्त्यर्थमित्यर्थः । **आकृतौ चेति** । इदमयुक्तमित्यसकृदावेदितम् ॥

इति श्रीशिवभट्टसुतसतीगर्भजनागोजीभट्टकृते भाष्यप्रदीपोद्द्योते षष्ठस्याध्यायस्य चतुर्थे पादे द्वितीयमाह्निकम् ॥

---

+ ६. ४. ९२; ४९; ४८. ÷ ६. ४. २२. * ६. १. ४८; ७. ३. ३६.

स्यसिच्सीयुट्तासिषु भावकर्मणोरुपदेशेऽज्झनग्रहदृशां वा चिण्वदिट् च ॥ ६ । ४ । ६२ ॥

भावकर्मणोरिति कथमिदं विज्ञायते । भावकर्मणोर्ये स्यादय इति । आहो-°स्विद्भावकर्मवाचिनि परतो ये स्यादय इति । किंचातः । यदि विज्ञायते भावकर्मणोर्ये स्यादय इति सीयुड्विशेषितः स्यसिच्तासयोऽविशेषिताः । अथ विज्ञायते भावकर्मवाचिनि परतो ये स्यादय इति स्यसिच्तासयो विशेषिताः सीयुडविशेषितः । उभयथा चिण्वद्भावोऽविशेषितः । यथेच्छसि तथाऽस्तु । अस्तु तावद्भावकर्मणोर्ये स्यादय इति । ननु चोक्तं सीयुड्विशेषितः स्यसिच्तासयोऽविशेषिता इति । स्यसिच्तासयश्च विशेषिताः । कथम् । भावकर्म-

प्र०—स्यसिच्०। कथमिति । किं भावकर्मणोरित्यभिधेयनिर्देशो भावकर्मणोर्ये वर्तन्ते स्यादय इति, अथ भावकर्माभिधायी प्रत्ययो भावकर्मभ्यामभिधीयते भावकर्मवाचिनि प्रत्यये परतो ये स्यादय इति । तत्राऽऽद्ये पक्षे भावकर्मशब्दस्य मुख्यार्थवृत्तित्वम् । द्वितीये गौणार्थता । युगपत्तु गौणमुख्यार्थवृत्तित्वासंभव इति मत्वा प्रश्नः । यदि विज्ञायत इति । यदि प्रसिद्ध्यनुरोधेन मुख्यार्थपरिग्रहः । सीयुड्विशेषित इति । आर्धधातुक इति वर्तते । न च सीयुट आगममात्रस्याऽऽर्धधातुकसंज्ञाऽस्तीति सामर्थ्यात्सीयुडाद्यार्धधातुकं गृह्यते । तस्य च संभवति भावकर्माभिधायित्वमित्यर्थः । स्यसिच्तासय इति । भावकर्तृकर्मणां लादेशार्थत्वेन शास्त्रे व्यवस्थापितत्वाद्विकरणानामतदर्थत्वात् । अथेति । अथ भूयसामनुग्रहाय यदि गौणार्थत्वसंश्रयणमिति भावः । सीयुडविशेषित इति । तत्र सीयुटः प्रत्ययैकदेशत्वात्समुदायावयवयोः पौर्वापर्याभावाद्गागमे ह्युपजाते सागमकस्य प्रत्ययादयः संज्ञा अर्थाभिसंबन्धश्च न तदवयवस्येति सीयुटो भावकर्मवाचिप्रत्ययपरत्वासंभवः सत्यप्यवयवयोः पौर्वापर्ये । अतोऽनन्तरं क्वचित्पाठः । उभयथाऽपि चिण्वद्भावोऽविशेषत इति । तत्र न दोषान्तरोपन्यासः । किं तर्हि पक्षद्वये दोषोपसंहारः । अन्यतरपक्षपरिग्रहे सर्वविषयाव्यापना-

उ०—स्यसिच्सीयुट्०। नन्वर्थद्वयपरिग्रहमाश्रित्य तृतीयपक्षोऽपि किं नोद्भावितोऽत आह—युगपत्त्विति । ननु सीयुट आगमत्वाद्भावकर्मवृत्तित्वासंभव इति कथं सीयुटो विशेषितत्वमत आह—आर्धधातुक इति । शास्त्रे । सार्वधातुके यगितिसूत्रस्थभाष्ये । स्यादीनां साधारणत्वेन तद्द्योतकत्वमपि नेति भावः । ननु मुख्ये संभवति गौणग्रहणमन्याय्यमत आह—भूयसामिति । अविशेषित इति । भावकर्मणोरित्यनेन विशेषणेनेति भावः । भाष्ये चिण्वद्भावोऽविशेषित इति। चिण्वद्भावविषयः सर्वोऽविशेषित इत्यर्थः।

१ ख, °ष्ये । न° ।

**णोर्यग्भवतीत्यत्र× स्यादयोऽप्यनुवर्तिष्यन्ते । अथवा पुनरस्तु भावकर्मवाचिनि परतो ये स्यादय इति । ननु चोक्तं स्यसिच्तासयो विशेषिताः सीयुडविशेषित इति । सीयुट् च विशेषितः । कथम् । भावकर्मवाचिनि परतः सीयुड् नास्तीति कृत्वा भावकर्मवाचिनि सीयुटि कार्यं विज्ञास्यते ।**

**अथेट् चेत्युच्यते कस्यायमिड् भवति । अङ्गस्येति+ वर्तते । यद्येवमादित इट् प्राप्नोत्यडाड्वत्÷ । तद्यथाडाटौ टित्त्वादादितो भवतस्तद्वत् । एवं तर्हि स्यादीनामेव भविष्यति । एवमपि षष्ठ्यभावान्न प्राप्नोति । ननु च भावकर्म-**

---

प्र०—द्विशेषितश्चिण्वद्भाव इत्यर्थः । **स्यादयोऽपीति** । स्याद्यनुवृत्तेरिदमेव प्रयोजनम् । भावकर्मणी स्यादीनामप्यभिधेये यथा स्यातामिति । यथा च द्वंद्वपदानि प्रत्येकं समुदायार्थवाचीनि तथा स्यादयो लादेशाश्च भावकर्मणी अभिदधतीति न कश्चि-द्दोषः । **भावकर्मवाचिनि सीयुटीति** । तन्त्रन्यायाश्रयणादेकं भावकर्मग्रहणं भिन्नेन रूपेण यथासंभवं स्यादिभिः संबध्यते । अथवा विषयसप्तम्येषाऽऽश्रीयते । भावकर्मविषयेषु स्यादिषु चिण्वत्कार्यं भवतीति नास्ति दोषस्यावकाशः ।

**कस्यायमिति** । स्यादीनामागमसंबन्धे षष्ठ्यनिर्देशात्प्रश्नः । स एवाऽऽह— **अङ्गस्येति वर्तत इति** । प्रकरणस्य नियोजकत्वं चेदाश्रीयते तदाऽनिष्टप्रसङ्ग इत्यर्थः । अथवाऽङ्गस्येति वर्तत इति सिद्धान्तवादिवचनम् । अङ्गस्य निमित्तं यत्तस्येडागम इत्यर्थः । इतरस्त्वङ्गमेवानेनाऽऽगमित्वेनोक्तमिति मत्वाऽऽह—**यद्येवमिति । षष्ठ्यभावादिति** । इच्छामात्रेण स्यादीनामागमित्वमलभ्यमित्यर्थः । **ननु च भावकर्म-**

---

उ०—ननु भावकर्मणोर्यगित्यत्र स्यादीनामनुवृत्तावपि कथमत्रेष्टसिद्धिरत आह—**स्याद्यनुवृत्ते-रिति** । ये स्यादयो विहितास्ते भावकर्मणोर्भवन्तीति वाक्यभेदेन संबन्ध इति भावः । ननु लादे-शैरेव तयोरर्थयोरुक्तत्वात्पुनरतेषां तदभिधायकत्वं व्यर्थमित्यत आह—**यथा चेति** । अन्यथा स्यादीनामानर्थक्यात्प्रयोग[1] एव न स्यादिति भावः । **समुदायार्थेति** । परस्प-रसमभिव्याहारात्साहित्यरूपार्थवाचीनीति भावः । अभिदधतीति । द्योतयन्तीत्यर्थः । नन्वे-कस्य शब्दस्य सामानाधिकरण्यं वैयधिकरण्यं च युगपन्न संभवतीत्यत आह—**तन्त्रन्या-येति** । अत्र पक्षे स्यसिच्सीयुट्तासिष्विति द्वंद्वानुपपत्तेराह—**अथवेति** । **भावकर्म-विषयेष्विति** । भावकर्मविषयकज्ञानजनकज्ञानविषयेष्वित्यर्थः । ननु स्यादीनां श्रुतत्वादि-ष्टत्वाच्च तेषामेवेट् सिध्यति । किं प्रश्नेनेत्यत आह—**स्यादीनामिति** । **स एवेति** । न तु सिध्दान्ती । श्रुतानां षष्ठ्यन्तत्वाभावेनाऽऽगमित्वे प्रमाणाभावात् । श्रुतेर्विनियोजकत्वा-भावे प्रकरणस्य विनियोजकत्वमाश्रीयत इत्यर्थः । एवं व्याख्याने ग्रन्थच्छायाभङ्गं मत्वा प्रकारान्तरेण व्याचष्टे— **अथवेति** । **इच्छामात्रेणेति** । श्रुत्यादिभिः प्रमाणैरेव शेषत्व-

---

× ३ १ ६७. + ६. ४. १. ÷ १. १. ४६; ६. ४. ७१; ७२

---

१ क. °वः । न° ।

णोरित्येषा षष्ठी। नैषा षष्ठी। किं तर्हि। अर्थनिर्देश एषा सप्तमी। भावे चार्थे कर्मणि चेति। एवं तर्हि भावकर्मणोरित्येषा सप्तमी स्यादिष्विति सप्तम्याः षष्ठीं प्रकल्पयिष्यति तस्मिन्निति निर्दिष्टे पूर्वस्य [ १. १. ६६ ] इति। एवमपि न सिध्यति। किं कारणम्। न ह्यर्थेन पौर्वापर्यमस्ति। अर्थेऽसंभवात्तद्वाचिनि शब्दे कार्यं विज्ञास्यते। एवमपि सीयुटो न प्राप्नोति। एवं तर्हि सप्तमे× योगविभागः करिष्यते। आर्धधातुकस्येट्। यावानिड्नाम स सर्व आर्धधातुकस्येड् भवति। ततो वलादेः। वलादेरार्धधातुकस्येड् भवतीति। यद्येवं स्यसि-

---

प्र०—णोरित्येषा षष्ठीति। षष्ठीनिमित्तत्वात्षष्ठीत्युच्यते। यथा नडवलोदकं पादरोगः। इह भावकर्मवाचिनि परतो ये स्यादय इति शब्देन शब्दस्य पौर्वापर्यसंभवात्तस्मिन्निति निर्दिष्टे पूर्वस्येति परिभाषोपतिष्ठत इत्यस्ति भावकर्मणोरित्यस्य षष्ठीप्रक्लृप्तौ निमित्तभावः। इतरस्तु भावकर्मणोरित्यभिधेयसप्तमीं मत्वाऽऽह—नैषा षष्ठीति। इतरः स्वाभिप्रायं प्रकाशयितुमाह—एवं तर्हीति। भावकर्मवाची प्रत्यय उपचाराद्भावकर्मशब्दवाच्यः परत्वेन सप्तम्या प्रतिपादित इति सप्तमी स्यसिच्सीयुट्तासिष्विति सप्तम्याः कार्यातिदेशे चरितार्थायाः षष्ठीं प्रकल्पयति। चोदको यथोक्तमभिप्रायमप्रतिपद्याऽऽह—न सिध्यतीति। तत्र निःशब्दस्य प्रयोजनं शब्दे सप्तमीनिर्दिष्टे परिभाषोपस्थानं यथा स्यादर्थे मा भूत्। शब्दश्च शब्दाद्बहिर्भूतोऽर्थस्त्वन्तर्भूतो निःशब्दो बहिर्भाववाची। पूर्वोक्तेनाभिप्रायेणाऽऽह—अर्थेऽसंभवादिति। एवमपीति। नहि सीयुटो भावकर्मवाचिना प्रत्ययेन पौर्वापर्यमस्ति। सीयुटस्तदवयवत्वात्। आर्धधातुकस्येडिति। परिभाषेयं क्रियते। यत्रेड् विधीयते तत्राऽऽर्धधातुकस्येत्युपतिष्ठते। तेन स्यादीनामेवासत्यामपि षष्ठीप्रक्लृप्ताविड् भविष्यति। रुदादिभ्यः सार्वधातुक इत्यत्र विरोधादार्धधातुकस्येति नोपतिष्ठते। यद्येवमिति। स्यादीनामागमविधावुपयोगात्पुनः श्रुत्यभावादविशेषितश्चिण्वद्भावः। आर्धधातुकग्रहणे ह्युपतिष्ठमाने तेन स्यादीनां विशेषणादागमसंबन्धयोग्यषष्ठ्युपादानादयमर्थः स्यात्। अज्झनग्रहदृशां वा चिण्वद्भवति यत्र क्वचित्। यत्र तु

---

उ०—लाभो न तु केवलेच्छयेत्यर्थः। कथं पुनर्भावकर्मणोरित्यस्य षष्ठीनिमित्तत्वमत आह—इहेति। ननु सप्तमीनिर्देशसामर्थ्यात्षष्ठीप्रक्लृप्तिर्न स्यादत आह—कार्यातिदेश इति। स्यादिषु परतोऽज्झनादीनां चिण्वत्कार्यं भवतीति पूर्ववाक्ये चरितार्था सप्तमीति भावः। अर्थे मा भूदिति। जनपदे लुबित्यादौ यथा। असत्यामपीति। आर्धातुकस्येत्युपस्थाने प्रत्यासत्त्याऽऽर्धधातुकपदेन स्यादीनामेव ग्रहणात्स्यादय इटा संबध्यन्ते। सीयुड्विषये च सीयुडादि गृह्यत इति भावः। अविशेषितश्चिण्वद्भाव इति। तद्विषयो

---

× ७. २. ३५.

स्सीयुट्तासिष्विड् भवति चिण्वद्भावोऽविशेषितो भवति । तत्र को दोषः । स्य-सिच्सीयुट्तासिष्विड् भवत्यज्झनग्रहदृशां वा चिण्वदिति क्वचिदेव चिण्वद्भावः स्यात् । एवं तर्हि स्यादीनेवापेक्षिष्यामहे । स्यसिच्सीयुट्तासिष्विड् भवति । अज्झनग्रहदृशां वा चिण्वत्स्यादिष्विति ।

अथ के पुनरिमिमिटं प्रयोजयन्ति । येऽनुदात्ताः+ । अथ य उदात्तास्तेषां कथम् । सिद्धं तेनैव परत्वात्*। उदात्तेभ्योऽपि वा अनेनैवेडेषितव्यः। किं प्रयोजनम् । कारयतेः कारिष्यते । हारयतेर्हारिष्यते । इटोऽसिद्धत्वाण्णेरनिटि

---

प्र०–स्यादयः सन्ति तेषामिडिति । यथा कर्तुः क्यङ् सलोपश्चेत्यत्रेति भावः । **स्यादीनेवेति** । तेषामेव श्रुतत्वात्तत्परित्यागेनाश्रुतकल्पनाया अयुक्तत्वात्प्रत्ययापेक्षत्वादङ्गस्येति सप्तमीनिर्देशसामर्थ्याद्वा चिण्वद्भावे पूर्वमुपयुक्तानां स्यादीनामार्धधातुकोपस्थानसामर्थ्यात्पश्चादिटा संबन्धः ।

**के पुनरिति** । सर्वेभ्य इष्यते न च प्राप्नोतीति मत्वा प्रश्नः । स एव पराभिप्रायमाशङ्कते । **येऽनुदात्ता अथ ये उदात्तास्तेषां कथं सिद्धं तेनैव परत्वादिति** । किमेवं भवान्मन्यत इत्यर्थः । ततः सिद्धान्तवाद्याह–**उदात्तेभ्योऽपीति** । अथवा शिष्याचार्यदेशीययोः के पुनरित्यादिके प्रश्नप्रतिवचने परत्वादित्यन्ते । आचार्य आह–उदात्तेभ्योऽपीति । उदात्तग्रहणं चोपलक्षणम् । ऋद्धनोः स्य इत्यनुदात्तेभ्योऽपीड्विधानात् । तुल्यत्वान्न्यायस्य तेभ्योऽप्यनेनैवेड्विधिः । **इटोऽसिद्धत्वादिति** । ततश्चानिटीति प्रतिषेधाभावात्सिध्यति णिलोपः । अपि चेट्संनियोगेन विधीयमानश्चिण्वद्भावोऽपि भवति । अन्यथैतदभावे चिण्वद्भावो न स्यात् । संनियोगशिष्टानामन्यतराभावे द्वितीयाभावात् । अन्वाचये तु विज्ञायमाने स्याच्चिण्व-

---

उ०–हनादिरित्यर्थः । नन्विट्संनियोगेन विधीयमानश्चिण्वद्भावरतत्रैव भवेन्न यत्रक्वचिदित्यत्राऽऽह–**यथा कर्तुरिति** । अन्वाचयशिष्टश्चिण्वद्भाव इत्यर्थः । **प्रत्ययापेक्षत्वादङ्गस्येति** । अङ्गसंज्ञाया इत्यर्थः। अजादीनामङ्गानां चिण्वद्भावविधानात्प्रत्ययाकाङ्क्षायां प्रत्ययानां संनिहितानामेव योग्यत्वात्संबन्ध इति भावः । एवमागमविधावुपयुक्तानां स्यादीनां पश्चाच्चिण्वद्भावेनान्वय इत्युक्तम् । वस्तुतः पूर्वं चिण्वद्भाव उपयुक्तानां पश्चादिटा संबन्धो युक्ततर इति स एव भाष्यार्थ इत्याह–**सप्तमीनिर्देशसामर्थ्याद्वेति** । अयमत्र भाष्यार्थः–पूर्वं चिण्वद्भाव उपयुक्तानेव स्यादीन्। अत्रेड्विधिवाक्ये। आर्धधातुकपदेनापेक्षिष्यामह इति । **स एवेति** । न तु सिद्धान्तवादी हेयत्वादस्य पक्षस्येति भावः । **तुल्यत्वान्न्यायस्येति** । यथोदात्तेभ्यो नित्यत्वादयमेवेड् भवति तथा ऋद्धनोः स्य इत्यादिविषयेऽप्यनेनेट्। तस्यापि वलादिलक्षणत्वादिति भावः । फलान्तरं दर्शयति–**अपि चेदिति** । **अन्वाचये**

---

+ ७. २. १०. * ७. २. ३५.

[ ६. ४. ५१ ] इति णिलोपो यथा स्यात् । कथं पुनरिच्छताऽपि भवतोदात्ते-भ्योऽनेनैवेड्लभ्यो न पुनरनेनास्तु तेन वेति तेनैव स्याद्विप्रतिषेधेन । ननु च नित्योऽयम् । कृतेऽपि तस्मिन्प्राप्नोत्यकृतेऽपि प्राप्नोति । न त्वस्मिन्कृतेऽपि स प्राप्नोति । किं कारणम् । अवलादित्वात् । तस्मादनेनैव भविष्यतीट् ।

कानि पुनरस्य योगस्य प्रयोजनानि ।

वृद्धिश्चिण्वद्युक् च हन्तेश्च घत्वं दीर्घश्चोक्तो यो मितां वा चिणीति ।

वृद्धिः× प्रयोजनम् । चेष्यते चायिष्यते । युक् च* प्रयोजनम् । ग्लास्यते ग्लायिष्यते । हन्तेश्च घत्वं+। प्रयोजनम् । हनिष्यते घानिष्यते । दीर्घश्चोक्तो यो मितां वा चिणीति× । स च प्रयोजनम् । शमिष्यते शामिष्यते । तमिष्यते तामिष्यते ।

इट् चासिद्धस्तेन मे लुप्यते णिर्नित्यश्चायं वलिनिमित्तो विघाती ।

इटोऽसिद्धत्वाण्णेरानिटि [ ६. ४. ५१ ] इति णिलोपो यथा स्यात् । कथं पुनरयं नित्यः । कृताकृतप्रसङ्गित्वात् । कृतेऽपि तस्मिन्निटि साप्तमिक आर्धधातुकस्येड्वलादेः [ ७. २. ३५. ] इति पुनरयं भवति । अस्मिंस्तु विहिते

प्र०—द्भावः । यथा कर्तुः क्यङ् सलोपाभावेऽपि । **नित्योऽयमिति** । वलादित्वानपेक्षणात् । आकृतिपक्षे च शब्दान्तरत्वाभावात् । शब्दान्तरप्राप्त्याऽपि नास्त्यानित्यत्वम् । भावकर्मार्थापेक्षणादस्य बहिरङ्गत्वमिति चेत्तस्यापि वलादित्वापेक्षत्वान्नास्त्यन्तरङ्गत्वमित्यदोषः ।

**कानि पुनरिति** । किं प्रकरणाद्व्यवस्थाश्रयणादाङ्गान्येव कार्याणि प्रयोजनान्यथाविशेषेणेति प्रश्नः । इतर आङ्गान्येवोदाहरति—**वृद्धिरिति** । **विघातीति** । अस्मिन्निटि सति वलादिलक्षणस्येटो वलादित्वाभावादप्रवृत्तिलक्षणो विघातस्ततस्तस्यानित्यत्वमित्यर्थः । अथवा वलनिमित्त इडविघाती अस्येटोऽप्रतिबन्धक इत्यर्थः ।

उ०—**त्विति** । असति तात्पर्यग्राहक एकचकारप्रयोगे समुच्चयस्यैव प्रतीतेः स युक्त इति भावः । ननु वलादिलक्षण इटि सतीडादेः प्राप्नोत्यसति तद्रहितस्येति शब्दान्तरप्राप्त्याऽयमनित्योऽत आह—**आकृतिपक्षे चेति** । व्यक्तिपक्षे हि स न्याय इति भावः । वस्तुतस्तोऽत्र लक्ष्यानुसारात्कृताकृतप्रसङ्गित्वमात्रेणानित्यत्वाङ्गीकार इति बोध्यम् । **तस्यापि वलादित्वेति** । अर्थकृतबहिरङ्गत्वस्यानाश्रयणाच्चेत्यपि बोध्यम् । **इतर इति** । प्रकरणाद्व्यवस्थामाश्रित्येत्यर्थः । चिण्वदित्यस्य चिण्वद्भावप्रयोजनमित्यर्थः । विघातीत्यस्यानित्य इत्यर्थं दर्शयति—**अस्मिन्निटीति** । **अथवेति** । अकारप्रश्लेषः कार्य इति भावः । एवं चाऽऽद्ये वलनिमित्त इत्यस्यानित्य इति शेषः । तस्य हेतुर्विघातीति । अस्यायमिति शेषः । **कर्तरि**

* ७. २. ११५. + ७. ३. ३२. × ७. ३. ५४. ÷ १. ४. ९३.

वलादित्वस्य निमित्तस्य विहतत्वात्साप्तमिको न भवति ।

अथोपदेशग्रहणं किमर्थम् ।

**चिण्वद्भाव उपदेशवचनमृकारगुणबलीयस्त्वात् ॥ १ ॥**

चिण्वद्भाव उपदेशवचनं क्रियत ऋकारगुणस्य बलीयस्त्वात् । कारिष्यते । परत्वाद्गुणे* कृते रपरत्वे चानजन्तत्वाच्चिण्वद्भावो न प्राप्नोति । उपदेशग्रहणाद्भविष्यति ।

**वधिभावात्सीयुटि चिण्वद्भावो विप्रतिषेधेन ॥ २ ॥**

वधिभावात्सीयुटि चिण्वद्भावो भवति विप्रतिषेधेन । वधिभावस्यावकाशः ÷ । वध्यात् वध्यास्ताम् वध्यासुः । चिण्वद्भावस्यावकाशः । घानिष्यते अघानिष्यत । इहोभयं प्राप्नोति । घानिषीष्ट घानिषीयास्ताम् घानिषीरन् । चिण्वद्भावो

---

प्र०— **ऋकारगुणस्येति** । अन्येषां तु गुणोऽजन्तत्वं न विहन्तीति नित्यत्वाच्चिण्वद्भावः । सिध्यति चायिष्यते लाविष्यत इति भावः । **परत्वादिति** । द्वयोरप्यनित्यत्वात् ।

**वधिभावादिति** । ननु चाऽऽर्धधातुक इति विषयसप्तम्याश्रयणादन्तरङ्गो वधिभावः । नैतदस्ति । लुङीति विशेषनिर्देशात् परसप्तमी । तद्विशेषणत्वादार्धधातुक इत्यपि परसप्तमी । यत्र तु विशेषनिर्देशाभावोऽस्तेर्भूरित्यादौ तत्रैव विषयसप्तमीविज्ञानं भव्यादिसिद्ध्यर्थम् । एकाच उपदेशेऽनुदात्तादित्यत्र तु वक्ष्यति भाष्यकारः ।

---

उ०—णिनिस्तद्वक्ष्यति क्वचिद्भाष्येऽयं तस्य निमित्तं विहन्तीति । अन्ये तु यतो वलानिमित्तोऽस्याविघाती । एवं न विहन्तीत्यतोऽयं नित्य इत्यर्थः। तद्वक्ष्यति स त्वस्य निमित्तं न विहन्तीति । अन्यतरपक्षेऽन्यदार्थं बोध्यम् । अन्ये त्वत्रायं वार्तिकार्थः । वृद्धिः—अन्त्यवृद्धिरुपधावृद्धिश्च । **इडिति** । इट् च प्रयोजनं दृश्यादौ, चासिद्ध इत्यत्रोपस्थितत्वादिडेव गृह्यत इत्याहुः । ऋकारेति विशेषणकृत्यमाह—**अन्येषामिति** । ऋकारान्तगुणस्तु प्रसङ्गावस्थायामेव रपरत्वादजन्तत्वस्य विघातक इति भावः। न चोपदेशग्रहणे कृतेऽप्युपदेशे योऽच् तदन्तस्येत्यर्थे चायिष्यत इत्यादावप्यनुपपत्तिः । उपदेशे योऽच् तदन्तत्वाभावात् । एवं कारिष्यत इत्यादावपि दोषः । उपदेशे यदजन्तमित्यर्थस्तु ण्यन्तेऽनापत्त्या कर्तुमशक्यः । न च ण्यन्ते लोपप्रवृत्तावल्विधौ स्थानिवत्त्वाभावादुपदेशे योऽच् तदन्तत्वमपि दुरुपपादम् । णिलोपात्परत्वेनाऽऽर्धधातुकस्येतीट्प्राप्त्या तं नित्यत्वेन बाधित्वा चिण्वदिट एव प्रवृत्तेरदोषात् । विप्रतिषेध आभीयासिद्धत्वाभावेन णिलोपात्परत्वादस्यैव प्रवृत्तेश्चेति वाच्यम् । अतो लोप इत्यत्रेवाऽऽर्धधातुकोपदेशे यदजन्तमित्यर्थेनादोषात् । तत्रेवात्राप्यावृत्त्या सीयुटादिविशेषणत्वं चेत्यदोषात् । **द्वयोरपीति** । चिण्वत्त्वे कृते वृद्ध्या बाधाद्गुणोऽनित्यः । **भव्यादिसिद्ध्यर्थमिति** । भव्यं प्रवेयमाख्येयमित्यादौ । अन्यथाऽस्त्यादीनामनेजन्तत्वादचो यदनापत्तिरिति

---

** ७. ३. ८४. XX ३. ४. ४२.

भवति विप्रतिषेधेन। अथेदानीं चिण्वद्भावे कृते पुनःप्रसङ्गविज्ञानाद्वधिभावः कस्मान्न न भवति। सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेवेति।

**हनिणिङादेशप्रतिषेधश्च ॥ ३ ॥**

हनिणिङादेशानां× च प्रतिषेधो वक्तव्यः। हनिष्यते घानिष्यते। एष्यते आयिष्यते। अध्येष्यते अध्यायिष्यते। लुङीति हनिणिङादेशाः प्राप्नुवन्ति।

**अङ्गस्येति तु प्रकरणादाङ्गशास्त्रातिदेशात्सिद्धम् ॥ ४ ॥**

आङ्गं यत्कार्यं तत्प्रतिनिर्दिश्यते न च हनिणिङादेशा आङ्गा भवन्तीति।

**आतो लोप इटि च ॥ ६। ४। ६४ ॥**

अथेड्ग्रहणं किमर्थम्।

प्र०—वधिषीष्टेत्यत्र निपातनस्वरं प्रत्ययस्वरो बाधिष्यते। आर्धधातुकीयाः सामान्येन भवन्तीत्येवं ब्रुवता लुङीति विषयसप्तम्येवाभ्युपगता। ततश्चान्तरङ्गत्वाद्वधिभावः प्राप्नोति। प्रतिपदविधेर्बलीयस्त्वाच्चिण्वद्भावो भवति।

**हनिणिङादेशप्रतिषेधश्चेति।** लुङ्पर आर्धधातुके विधीयमाना हनिणिङादेशाश्चिण्निमित्ता भवन्तीति चिण्वद्भावात्प्राप्नुवन्ति। इह यस्य चिण्साक्षान्निमित्तं निर्दिष्टं तदप्यतिदिश्यते। यथा युगागमः। यस्यापि प्रकारान्तरेण निमित्तं चिण् तदपि यथा वृद्धिरिति हनिणिङादेशप्रसङ्गः। **अङ्गस्येति तु प्रकरणादिति।** अङ्गस्येति तु प्रकृत्य यत्कार्यं विहितं तदतिदिश्यते। तस्यैव प्राकरणिकत्वात्। न च हनिणिङादेशा अङ्गस्येति प्रकृत्य विहिता इति तेषामप्रसङ्गः।

**इड्ग्रहणं किमर्थमिति।** इहाचि क्ङित्यार्धधातुक इति त्रयाणां प्रकृतत्वा-

उ०—भावः। **प्रतिपदविधेरिति।** चिन्त्यमिदम्। निरवकाशत्वे सत्येव तस्य बलवत्त्वात्। अत्र हन्तेरित्यंशः स्यादिविषये चरितार्थः। सीयुडंशोऽप्यज्ग्रहादिविषये चरितार्थः। किंच वधादेशोऽपि प्रतिपदविहित इति तस्मात्स्यसिच्सीयुट्तासिष्वित्यपि विषयसप्तमीति भाष्याशयः। तद्विषये हनादीनां चिण्वत्कार्यं कृतेषु तेषु तेषामिडिति सूत्रार्थः। वधिभावादित्युक्तेरन्यादेशविषयधातूनां चिण्वत्त्वविषयेऽनभिधानमिति दिक्। भाष्ये—**सकृद्गताविति।** न चैवं चिण्वद्भावाभावेऽपि वधादेशानापत्तिरित्येकाच इति सूत्रस्थावधिषीष्टेति भाष्यप्रयोगानुपपत्तिः। प्रवर्तमानेनैव बाधकेन बाध्यबाधो नतु स्वथमप्रवर्तमानेनापीति दिक्। ननु यच्चिण्याहत्य विहितं युगादि तदेव चिण्वद्भावाद्भवति। न च हनिणिङादेशास्तथा विहिता इति कथं तेषां प्रसङ्गोऽत आह—**इहेति। यस्यापीति।** चिणि दृष्टस्य सर्वस्यातिदेशादिति भावः। **अङ्गस्येति।** नतु वस्तुतोऽङ्गस्य विहितानामतिदेश इति भावः।

इह बहूनां पक्षाणां संभवात्तेषामेकैकस्य परिग्रहे प्रयोजनभेद इड्ग्रहणस्य भवतीति प्रयोजनप्रश्नद्वारेण कतमः पक्षोऽत्र गृह्यत इति प्रश्नपर्यवसानं दर्शयितुमाह—**इहाचीति।**

× २. ४. ४३; ४५; ५०.

## इड्ग्रहणमक्ङिदर्थम् ॥ १ ॥

**इड्ग्रहणं क्रियतेऽक्ङिति लोपो यथा स्यात् । पपिथ तस्थितेति ।**

---

**प्र०-द्विशेषणविशेष्यभावे** कामचारात्तेषामन्यतमेनानुभूतविशेषणेनाननुभूतविशेषणेन वेटः समुच्चयसंभवादनेकपक्षसंभवः । तत्र यदि तावद्विशेषणसंबन्धात्प्रागेवाचेट् समुच्चीयतेऽङ्गाधिकाराक्षिप्तप्रत्ययविशेषणाच्चाजादौ प्रत्यय इति विज्ञायते । तत्रेड्ग्रहणमनजाद्यर्थं विज्ञायते । अजादिरिटोऽजादिना प्रत्ययेन समुच्चयाभावात् । तदा क्ङिदार्धधातुके अजादेरेव विशेषणे व्यवतिष्ठेते नेटः । हलादिरिटः क्ङित्त्वासंभावादार्धधातुकत्वव्यभिचाराभावाच्च । ततश्च दासीयेत्यादावाल्लोपप्रसङ्गः । अथाजादेः प्रत्ययस्य क्ङिदार्धधातुकाभ्यां विशेषणाभ्यां प्राक् संबन्धः पश्चादिटा समुच्चयस्तदाऽयमर्थः—अजादौ क्ङित्यार्धधातुक इटि चाऽऽकारलोप इति । तदेड्ग्रहणमनजाद्यर्थमक्ङिदर्थमनार्धधातुकार्थं च भवतीति । दासीय पपिथ व्यत्यर इति सर्वत्रेटच्यातो लोपः प्राप्नोति । अथ क्ङिताऽननुभूतविशेषणेनेट् समुच्चीयते तदाऽच्यार्धधातुक इति विशेषणद्वयमविशेषाद्द्वावपि क्ङिदिटावुपनिपततीत्यक्ङिदर्थमेवेड्ग्रहणं विज्ञायते । तेन पपिथेत्यादावाल्लोपो भवति । दासीय व्यत्यर इत्यनजादौ सार्वधातुके च न भवति । अनुभूतविशेषणद्वयसंबन्धेन त्विटः समुच्चये पूर्ववत्सर्वत्रेटच्याल्लोपप्रसङ्गः । अथ त्वार्धधातुकेनाननुभूतविशेषणेनेटः समुच्चय आर्धधातुक चाटि चेति तदा सार्वधातुकार्थमिड्ग्रहणं विज्ञायत इति व्यत्यर इत्यादावाल्लोपप्रसङ्गः । तदाऽचि क्ङितीति विशेषणद्वयमार्धधातुकस्यैव स्यान्न त्विटः । सार्वधातुकस्येटो ङित्त्वाजादित्वाव्यभिचारात् । अनुभूतविशेषणनाऽऽर्धधातुकेनेटः समुच्चये सर्वत्रेटच्याल्लोपप्रसङ्गः । तदेवमनेकपक्षसंभवात्प्रश्नः । इतरः क्ङिताऽननुभूतविशेषणेनेटः समुच्चयं पश्चाद्द्वयोरपि विशेषणद्वयसबन्धमाश्रित्याऽऽह—**इड्ग्रहणमक्ङिदर्थमिति** ।

---

**उ०-अन्यतमेन** । अचा । क्ङिता । आर्धधातुकेन वा । तत्राननुभूतशेषणेन केनचिदिटः समुच्चय इतरद्द्वयं यथासंभवं विशेषणत्वेन योज्यमित्याह—**तत्र यदीति** । **अजादिरिट इति** । भेदाधिष्ठानत्वात्समुच्चयस्येति भावः । अजादिरिटोऽजादिप्रत्ययान्तर्भावादिति तात्पर्यम् । इट्शब्देन चाऽऽगमस्य प्रत्ययस्य सामान्येन ग्रहणमिति बोध्यम् । **दासीयेति** । दाधातोराशीर्लिङ्ङ्यात्मनेपदोत्तमपुरुषे सीयुटि च हलादिरिट् संभवति । तस्य क्ङित्त्वं नास्त्येव । आर्धधातुकत्वं चाव्यभिचारीति भावः । अथानुभूतविशेषणनाजादिप्रत्ययेनेट्समुच्चय इतीमं पक्षं दर्शयति—**अथाजादेरिति** । **व्यत्यर इति** । रा दाने लङि 'कर्तरि कर्मव्यतिहारे' इत्यात्मनेपदोत्तमपुरुषैकवचनमिट् । अदादित्वाच्छपो लुक् । तत्र मध्यम इष्टो लोपः । आद्यन्तयोस्त्वनिष्टः प्राप्नोतीति दोषः । तदा सार्वधातुकार्थमित्येतदुपपादयति—**तदाऽचीति** । एषु तृतीयपक्षो लक्ष्यानुरोधात्सिद्धान्तितो भाष्ये तदाह—**इतरः क्ङितेति** । दाञः केवलादाङ्पूर्वाद्देत्युपपाद-

**सार्वधातुके चाऽऽदीत्यार्धधातुकाधिकारादुपसंख्यानम् ॥ २ ॥**

सार्वधातुके चाऽऽदीत्यार्धधातुकाधिकारादुपसंख्यानं कर्तव्यम् । इषमूर्जमहमित आदि× । ननु च क्ङितीति*वर्तमाने यथैवेड्ग्रहणमक्ङिदर्थमेवमार्धधातुक÷-इत्यपि वर्तमान इड्ग्रहणं सार्वधातुकार्थं भविष्यति । न सिध्यति । किं कारणम् । न हि क्ङिताऽज्विशेष्यते । अचि भवति कतरस्मिन् क्ङितीति । किं तर्हि । अचा क्ङिद्विशेष्यते । क्ङिति भवति कतरस्मिन्नचीति । किं पुनः कारणमचा क्ङिद्विशेष्यते । यथेडप्यज्ग्रहणेन विशेष्येत । अस्ति चेदानीं क्वचिदिडनजादिर्यदर्थो विधिः स्यात् । अस्तीत्याह । दासीय धासीय÷। तत्तर्ह्युपसंख्यानं कर्तव्यम् । न कर्तव्यम् । आर्धधातुकत्वात्सिद्धम् । कथमार्धधातुकत्वम् । उभयथा छन्दसीति वचनात्** । अन्येऽपि धातुप्रत्यया उभयथा छन्दसि दृश्यन्ते ।

**घुमास्थागापाजहातिसां हलि ॥ ६ । ४ । ६६ ॥**

**ईत्त्वे वकारप्रतिषेधो घृतं घृतपावान इति दर्शनात् ॥ १ ॥**

ईत्त्वे वकारे प्रतिषेधो वक्तव्यः । किं प्रयोजनम् । घृतं घृतपावान इति दर्शनात् । इह मा भूत् । घृतं घृतपावानः पिबत वसां वसपावानः पिबतेति । यदि तर्हि वकारे प्रतिषेध उच्यते कथं धीवरी पीवरीति ।

---

**प्र०**— आदीति । दाञः केवलादाङ्पूर्वाद्वा छन्दसि लुङ्लङ्लिट इति लुङ्लङोरन्यतरः । केचिदत्र पदकारा आ अदीत्यवगृह्णन्ति । केचिच्चैकपद्यं मन्यन्ते । तेषामाडागम इति पक्षः । तत्र लुङि च्लेर्मन्त्रे घसेति लुक् । लङि तु च्छान्दसत्वाच्छपो लुक् । श्लौ[1] वा सति द्विर्वचनप्रकरणे छन्दसि वेति वक्तव्यमिति द्विर्वचनाभावः । सिद्धान्ते त्वार्धधातुकत्वाच्छबभावः । **दासीयेति** । इटः सीयुटि तस्य तद्भक्तत्वादजादित्वाभावः ।

**ईत्त्व इति** । वकारस्य निमित्तभावेन प्रतिषेधो वकारप्रतिषेधः । वकारादावित्यर्थः । **घृतपावान इति** । आतो मनिनिति क्वनिप् । **वसपावान इति** । ङ्यापोः संज्ञाछन्दसोर्बहुलमिति वसाशब्दस्य ह्रस्वः ।

---

**उ०**—यति—**आ अदीति**। आदीत्युत्तमपुरुषैकवचन इटि रूपम् । तत्रावग्रहवादिनामादानमत्रार्थः । अन्येषां दानमर्थः । लुङ्लङोरन्यतर इत्येतद्विशदयति—**तत्र लुङीति** ।

वकारस्य साक्षात्प्रतिषेधेन संबन्धायोगादाह—**वकारस्येति** । **ह्रस्व इति** । यद्यपि पदमञ्जार्यां क्वचित्पुस्तकेषु सांप्रतं पठ्यमानमाध्यंदिनशाखायां च दीर्घः पठ्यते तथाऽपि क्वचिच्छाखायां ह्रस्वपाठोऽन्वेषणीयः । ननु क्वनिप्यनिष्टरूपनिवृत्तये प्रतिषेध आवश्यकोऽत

---

× ३ ४ ७८. * ६. ४. ६३. ÷ ६. ४. ४६. × ३. ४. १०२; १०६. ** ३. ४. ११७.

---

१ ङ. श्लौ तु स° ।

**धीवरी पीवरीति चोक्तम् ॥ २ ॥**

किमुक्तम् । नैतदीत्त्वम् । किं तर्हि ध्याप्योरेतत्संप्रसारणमिति+ । स तर्हि प्रतिषेधो वक्तव्यः । न वक्तव्यः । वनिबेष भविष्यति न क्वनिबिति ।

**न माङ्योगे ॥ ६ । ४ । ७४ ॥**

**कस्यायं प्रतिषेधः । आटः* प्राप्नोति । अटोऽपीष्यते । तत्रडटो ग्रहणं कर्तव्यम् । न कर्तव्यम् । प्रकृतमनुवर्तते । क्व प्रकृतम् । लुङ्लङ्लृङ्क्ष्वडुदात्तः [६.४.७१] इति। यदि तर्हि तदनुवर्तत आडजादीनाम् [७२] अट् चेत्यडपि**

---

प्र०— **धीवरी पीवरीति चोक्तमिति** । जनसनखनां सञ्झलोरित्यत्राक्तेम् । **वनिबेष इति** । क्वनिप् तु च्छन्दसि दृष्टानुविधानान्न भविष्यति । भाषायामप्यन्येभ्योऽपि दृश्यन्त इति दृशिग्रहणात्प्रयोगानुसरणार्थात्प्रयोगाभावात्पादिभ्यो नास्ति क्विनिबिति भाष्यकारस्याभिप्रायः । तत्र वार्तिकारम्भो ज्यायानित्याहुः । स्थः क चेति क्विपि संस्था इत्यत्रेत्त्वस्यादर्शनात् । भाष्यकारमतेन त्वीत्त्वं प्राप्नोति प्रत्ययलक्षणेन । यथाऽतृणेडित्यत्रेमागमः ।

**कस्यायमिति** । यदि द्वयोरडाटोरिहानुवृत्त्या प्रतिषेधस्ततोऽजादीनामडपि प्राप्नोति अथाऽऽनन्तर्यादाटः प्रतिषेधस्तथा सति माङ्योगेऽनिष्यमाणोऽप्यट् प्राप्नोतीति मत्वा प्रश्नः। स एवाऽऽनन्तर्यमाश्रित्याऽऽह–**आटः प्राप्नोतीति** । इतरः समुदायापेक्षायां दोषाभावेऽपि स्वरितत्वादधिकारेऽपि दोषप्रतिविधानसंभवादाह–**न कर्तव्यमिति । अडपि प्राप्नोतीति** ।

---

उ०–आह–**क्वनिप् त्विति । भाष्यकारमतेन त्विति** । प्रत्ययलक्षणसूत्रस्य विध्यर्थत्वे हलादौ क्ङितीति वर्णस्याप्राधान्येनाऽऽश्रयणादिति भावः । अत्रेदं चिन्त्यम् । प्रत्यलक्षणसूत्रं नियमार्थमिति भाष्यमतेऽप्राप्तेः। वस्तुतस्तु क्विप्यपीत्त्वं भवत्येव । सूत्रे हलीत्यस्यानजादिपरत्वात् । अत एव ध्यायतेः संप्रसारणमिति वार्तिके धीर्ध्यायतेर्दधातेर्वेति भाष्यं संगच्छते । संस्था इत्यत्राम्बाम्बेतिसूत्रस्थसव्येष्ठा इत्यत्र च विजेव चेन क्विबिति तत्सूत्रभाष्ये क्विप्पदेन साहश्याद्विजेवोच्यत इति चिन्त्योऽयं कैयट इति । एवं च ध्याप्योः संप्रसारणमित्येकदेश्युक्तिरिति बोध्यम् । धियावित्यादावीत्त्वस्येयङ्यसिद्धत्वं तु न व्याश्रयत्वादिति जनसनेति सूत्रे भाष्य उक्तम् ।

**यदि द्वयोरपीति** । समुदायापेक्षायामनन्तरस्येति परिभाषानुपस्थानादिति भावः । **अडपीति** । मध्येऽपि संबन्धादिति भावः । **स एवेति**। ननु सिद्धान्तवादी। तत्रडटो ग्रहणं कर्तव्यमित्यन्तं चोदकवचनमिति भावः । व्यवहितत्वादनुवृत्त्ययोगेनाड्ग्रहणं कर्तव्यमेवेति तात्पर्यम्। प्रकृत्यानुवृत्त्या सिद्धमिति वदतः सिद्धान्तिन आशयमाह–**इतर इति** । द्विविधा ह्यनुवृत्तिः। लौकिकी शास्त्रीया च। तत्राऽऽद्ये परिहारः–**समुदायेति**। अन्त्य आह–

---

+ ६. ४. ४२. * ६. ४. ७२.

प्राप्नोति । अस्तु । अटि कृते पुनराड् भविष्यति । इहापि तर्ह्यटि कृते पुनराट् प्राप्नोति। अकार्षीत् अहार्षीत्। अड्वचनान्न भविष्यति । इहापि तर्ह्यड्वचनान्न स्यात्। ऐहिष्ट ऐक्षिष्ट। आड्वचनाद्भविष्यति। इहापि तर्ह्याड्वचनात्प्राप्नोति। अकार्षीत् अहार्षीत्। अकृतेऽटि योऽजादिरित्येवमेतद्विज्ञास्यते। किं वक्तव्यमेतत् । न

प्र०—अडाटोर्युगपदेकागम्यपेक्षायामादित्वं न संभवतीति पर्यायप्रसङ्गो यथा लेटोऽडाटोः। ततः पक्षेऽटि सति ऐक्षिष्टेत्यादि न सिध्यति । एक्षिष्टेत्याद्यनिष्टं प्राप्नोति । इतरस्तु विकल्पेनाप्यडाटोः प्रवृत्तौ द्रव्ये पदार्थे कृतेऽप्यटि शब्दान्तरत्वान्निमित्तसद्भावाच्चाऽऽटा भाव्यमिति मत्वाऽऽह—**अस्त्विति** । इतरो यद्येकस्मिन्नागमे कृते परस्य प्रवृत्तिस्ततो हलादीनामप्यटि कृत आट्प्रसङ्ग इति मत्वाऽऽह—**इहापीति** । ननु चाऽऽटि कर्तव्येऽटोऽसिद्धत्वादजादित्वाभावः । यद्यपि शास्त्रापेक्षयाऽसिद्धत्वं तथाऽपि प्रयोगरूपमाश्रित्य चोद्यते यथोक्तं—मार्थादीदाद्यर्थानामिति । परिहारान्तरसद्भावाद्वाऽसिद्धत्वं नोक्तम् । **अड्वचनादिति** । यदि हलादीनामप्यटि कृत आट् स्यात्तदा लुङ्लङ्लृङ्क्ष्वाडागममेव विदध्यात् । **इहापि तर्हीति ।** यद्यटि कृते आण्न भवति ततोऽत्रापि न स्यात् । **आड्वचनादिति** । यद्याण्न स्यात्तद्विधानमनर्थकं स्यादित्यर्थः । ननु विकल्पितत्वाद्डाटोरभावे आट्कर्तव्य इत्यटि सति न प्राप्नोति । नैष दोषः। उत्तरार्थेन नान्तरीयकोपस्थानेन प्रवृत्तेनाप्यटा बाधितुमाटोऽशक्यत्वात्। अथवा संदिग्धप्रवृत्तिरडागमोऽसंदिग्धप्रवृत्तिनाऽऽटा बाध्यत इत्येष वाक्यार्थः । यथाऽन्यत्रोक्तमन्यवचनाच्चकाराकरणात्प्रकृतस्यापवादो यथोत्सर्गेण प्रसक्तस्येति । इतरस्त्वगृहीताभिप्रायो विशेषाभावं मत्वाऽऽह—**इहापि तर्हीति** । **अकृतेऽटीति** । अजादिग्रहणसामर्थ्या-

उ०—**खरितत्वादिति** । एकागम्यपेक्षयाऽऽदित्वमिति पाठः । एकागम्यपेक्षायामादित्वमिति पाठ एकागमिनोऽपेक्षायां संबन्धे तदपेक्षमादित्वं न संभवतीति कथंचिद्व्याख्येयम् । **द्रव्ये पदार्थ इति** । तत्र हि प्रतिलक्ष्यं लक्षणभेदाच्छब्दान्तरत्वे सत्याटा भवितव्यमित्यर्थः । **यथोक्तमिति** । अदसो मादित्यत्र । तत्र हीत्वादीनामसिद्धत्वात्प्रगृह्यत्वाभावेनायादिप्रसङ्गेनोदितोऽयं परिहारः । मार्थः स्थानी मशब्देनोक्तः । ईदूदेदर्थश्चेदूदेच्छब्देन । न चास्यां कल्पनायामसिद्धत्वं भवति । शास्त्रीये ह्यसिद्धत्वमिति तद्भावः । प्रकृतेऽप्यजादीनामित्यस्याजादिप्रयोगरूपाणामित्यर्थे प्रयोगरूपं न शास्त्रीयमिति तात्पर्यम् । ननु मा भूत्तत्रासिद्धत्वम्। इह त्वजादेरङ्गस्येति शास्त्रीयमेव रूपं गृह्यत इत्यसिद्धत्वं भवत्येवेत्यत आह—**परिहारान्तरेति** । सामर्थ्यं विशदयति—**ननु विकल्पितेति** । सामर्थ्यात्पर्याये विकल्पः फलतीत्याशयेनोक्तम्—**उत्तरार्थेनेति** । एवं चाटो दुर्बलत्वेन बाधकत्वायोग इति भावः । ननु यद्यडिह दुर्बलस्तदा बलवताऽऽटा तस्य बाधापत्तावट्प्रवृत्तिर्दुर्लभेत्यत आह—**अथवेति** । उत्तरार्थत्वादेव संदिग्धप्रवृत्तिकत्वं तस्य । एवं चाटोऽप्रवृत्तिरेवेति भाष्याशय इति भावः ।

१ छ. विषदय

हि। कथमनुच्यमानं गंस्यते। अज्वचनसामर्थ्यात्। यदि कृतेऽटि योऽजादिस्तत्र स्यादज्ग्रहणमनर्थकं स्यात्। अथवोपदेश इति* वर्तते। अथवाऽऽर्धधातुक इति+ वर्तते। अथवा लुङ्लङ्लृङ्क्ष्वडिति द्विलकारको निर्देशः। लुङादिषु लकारादिषु योऽजादिरिति। सर्वथा ऐज्यत औप्यतेत्येतन्न सिध्यति×। एवं तर्हि।

**अजादीनामटा सिद्धम्।**

अजादीनामटैव सिद्धं नार्थ आटा। एवं तर्हि वृद्ध्यर्थमाड्वक्तव्यः÷।

**वृद्ध्यर्थमिति चेदटः।**

अटो वृद्धिं वक्ष्यामि। यदि तर्ह्यटो वृद्धिरुच्यते

**अस्वपो हसतीत्यत्र।**

**वृद्धिः प्राप्नोति रोरुत्त्वे कृते*।**

**धातौ वृद्धिमटः स्मरेत्॥ १॥**

धातावटो वृद्धिं वक्ष्यामि। तत्तर्हि धातुग्रहणं कर्तव्यम्। न कर्तव्यम्। योगविभागः करिष्यते+। अटोऽचि वृद्धिर्भवति। तत उपसर्गादृति वृद्धिर्भवति। ततो धातौ। धात्वित्युभयोः शेषः। इह तर्हि आटीत्× आशीदित्यतो गुणे [६. १. ९७] इति पररूपत्वं प्राप्नोति।

**पररूपं गुणे नाटः।**

पररूपं गुणेऽटो नेति वक्ष्यामि। तत्तर्हि वक्तव्यम्।

---

प्र०—त्कृते ह्यटि सर्वस्याजादित्वादडाटोश्च भेदेन विधानसामर्थ्याद्विषयविभागावसायो हलादीनामेवाडजादीनां तु कृतेऽकृते वाऽटचाडिति। **अथवेति**। उपदेशे यान्यजादीनि तेषामाड् भवति। नच करोतिरुपदेशेऽजादिरित्याडभावः। **अथवाऽऽर्धधातुक इति वर्तत इति**। तेनाऽऽर्धधातुकसंज्ञकलकारोत्पत्तिकाले योऽजादिस्तस्याऽऽड् भवति। **सर्वथेति**। करोत्यादिवद्यजादीनामटि सत्याडभावादित्यर्थः। असिद्धवदत्राऽऽभादित्यत्रासिद्धत्वप्रत्याख्यानाय सर्व एवामी प्रकारा उक्ता इह तु स्थित एवासिद्धत्व एषामुपन्यासः। **अस्वप इति**। स्वपेर्लङ् सिप् अड्गार्ग्यगालवयोरित्यट्। शब्लुक्। सकारस्य रुत्वं हशि चेत्युत्त्वम्। तत्राऽऽद्गुणं बाधित्वा वृद्धिः प्राप्नोति। **आटीदिति**। नेटीति वृद्धौ प्रतिषिद्धायां परत्वाद्वृद्धिं बाधित्वा पररूपं प्राप्नोति। **पररूपं गुणे नाट इति**। अट उत्तरे गुणे पररूपं नेति वक्तव्य-

---

उ०—**न च करोतिरिति**। उपलक्षणमेतत्। **करोत्यादिवदिति**। हलादीनामडेवेति व्यवस्थापनात्। **स्थित एवेति**। प्रतिपत्तिलाघवार्थमारब्धेऽपि सूत्र इत्यर्थः। आटीदित्युपलक्षणम्। आटदित्यादिलङोऽपि। नातिवक्तव्यमित्यस्य गौरवावहमेतद्वक्तव्यं यत ओमाङोरुसि यत्प्रतिषेध-

---

* ६. ४. ६२. ÷ ६. ४. ×६. + ६. १. १७. × ६. १. ९०. ÷ ७. ३. ९९; ८. २. ६६; ६. १. ११४; (८७). * ६. १. ९१. + ७ २. ४.

ओमाङोरुसि तत्समम् ।

**यद्यप्येतदुच्यतेऽथवैतर्ह्युस्योमाङ्क्ष्वाटः पररूपप्रतिषेधश्चोदितः* स न वक्तव्यो भवति । छन्दोऽर्थं तर्ह्याङ् वक्तव्यः । आरैगु कृष्णा । त्रित एनमायुनक् । सुरुचो वेन आवः ।**

छन्दोऽर्थं बहुलं दीर्घम् ।

**बहुलं छन्दसि दीर्घत्वं दृश्यते । तद्यथा—पूरुषः नारक इति । एवं तर्हि आयन् आसन् इणस्त्योर्यण्लोपयोः+ कृतयोरनजादित्वाद्वृद्धिर्न प्राप्नोति ।**

इणस्त्योरन्तरङ्गतः ॥ २ ॥

**अन्तरङ्गत्वाद्वृद्धिर्भविष्यति । तस्मान्नार्थ आङ्ग्रहणेन ।**

अजादीनामटा सिद्धं वृद्ध्यर्थमिति चेदटः ।
**अस्वपो हसतीत्यत्र धातौ वृद्धिमटः स्मरेत् ॥ १ ॥**
**पररूपं गुणे नाट ओमाङोरुसि तत्समम् ।**
छन्दोऽर्थं बहुलं दीर्घमिणस्त्योरन्तरङ्गतः ॥ २ ॥

प्र०—मित्यर्थः । **ओमाङोरुसि तत्सममिति** । औकारीयदौढीयदौस्रीयादित्यत्र वृद्धिं बाधित्वा परत्वादोमाङोश्च उस्यपदान्तादिति पररूपं प्राप्नोति । तस्य प्रतिषेधो वक्तव्य इत्युक्तम् । यदा तु पररूपविधौ नाट इत्युच्यते तदोस्योमाङ्क्ष्वाटः पररूपप्रतिषेधो न वक्तव्य इति तुल्यमेतद्भवति नतु गौरवप्रसङ्गः । **अन्तरङ्गत्वादिति** । यण्लोपौ हि बहिरङ्गौ । **वृद्धौ** कृतायामिणो यण् एरिति योगविभागाश्रयणाद्यणोऽभावः । रूपाश्रयत्वादन्तादिवद्भावोऽपि नास्ति । ताद्रूप्यानतिदेशात् । श्नसोरल्लोप इति तपरकरणाल्लोपाभावः । एतच्च वार्णादाङ्गं बलीय इत्यनाश्रित्योक्तम् । तदाश्रये हि वृद्धिं बाधित्वा यण्लोपौ स्याताम् । अटा सिद्ध आड्वचनमेव ज्ञापकमन्ये वर्णयन्ति । भवत्येषा परिभाषा वार्णादाङ्गं बलीय इति । तस्यां हि सत्यां यण्लोपयोर्वृद्धिं बाधित्वा प्रवृत्तयोरायन्नासन्निति न स्यादित्याड् विधीयते ।

उ०—वचनं तेन तुल्यमेतद्वचनमिति योजनां दर्शयन्व्याचष्टे—**औकारीयदिति** । अटश्चेति पुनर्विधानार्थेन चेन तस्यैवास्यापि सिद्धिरिति भावः । **नतु गौरवप्रसङ्ग इति** । आडजादीनामित्यस्याकरणात् । अटश्चेत्यत्र मात्राहानेर्लाघवमप्यस्ति । **बहिरङ्गाविति** । प्रत्ययाश्रयत्वात् । **यणोऽभाव इति** । ततश्चाऽऽयादेशे रूपं सिद्धमिति भावः। **ताद्रूप्येति** । अन्तादिवर्णमात्रवृत्तिधर्मस्यानतिदेशादित्यर्थः । **अनाश्रित्येति** । लक्ष्यानुसारादनाश्रयणम् । अयुगपत्प्राप्तेर्वा । इङस्त्वध्यैयातामित्यादेर्लोकेऽनभिधानम् । पक्षयोः फलभेदापत्तेरित्याहुः । निरूपितं चेदं, इङ्धातौ शब्देन्दुशेखरे । **अन्य इति** । अत्रारुचिबीजं तु भाष्यविरोधः ।

*६. १. ९७. + ६. ४. ८१; १११.

१ क. 'ये द्रू'।

## अचि श्नुधातुभ्रुवां य्वोरियङुवङौ ॥ ६ । ४ । ७७ ॥

## इयङादिप्रकरणे तन्वादीनां छन्दसि बहुलम् ॥ १ ॥

इयङादिप्रकरणे तन्वादीनां छन्दसि बहुलमुपसंख्यानं कर्तव्यम्। तन्वं पुषेम। तनुवं पुषेम । विष्वं पश्य । विषुवं पश्य। स्वर्गं लोकम्। सुवर्गं लोकम्। त्र्यम्बकं यजमाहे। त्रियम्बकं यजामहे।

## एरनेकाचोऽसंयोगपूर्वस्य ॥ ६ । ४ । ८२ ॥

अथेह कस्मान्न भवति। ब्राह्मणस्य नियौ। ब्राह्मणस्य नियः । अङ्गाधिकारात् । अङ्गस्येत्यनुवर्तते*। एवमपि परमनियौ परमनिय इत्यत्र प्राप्नोति। गतिकारकपूर्वस्येष्यते।

## यणादेशः स्वरपदपूर्वोपधस्य च ॥ १ ॥

यणादेशः स्वरपूर्वोपधस्य पदपूर्वोपधस्य चेति वक्तव्यम् । स्वरपूर्वोपधस्य। निन्यतुः निन्युः। पदपूर्वोपधस्य। उन्न्यौ उन्न्यः। उद्ध्यौ उद्ध्यः। उभयकृतम्। ग्रामण्यौ ग्रामण्यः। सेनान्यौ सेनान्यः।

---

प्र०—अचि०। **तन्वमिति**। वा छन्दसीत्यधिकारादमि पूर्वत्वाभावाद्यणादेशः। **तनुवमिति**। अधातुत्वादप्राप्त उवङ् विधीयते। **विष्वमिति**। विसूत इति सत्सूद्विषेति क्विप्। अत्र नित्यमोः सुपीति यणि प्राप्ते पक्ष उवङ् विधीयते। **सुवर्गमिति**। अधातुत्वादनङ्गत्वाच्चाप्राप्त उवङ् विधीयते।

**ब्राह्मणस्य नियाविति**। अन्येभ्योऽपि दृश्यत इति ताच्छील्यादिषु नियो निरुपपदात्क्विप्। ततः कर्मणा संबन्धः। सत्यपि वा पूर्वं कर्मणा संबन्धे परत्वात्सोपपदे सत्सूद्विषेति क्विपं बाधित्वा ताच्छीलिकः क्विब् भवति। **गतिकारकपूर्वस्येति**। परमशब्दोऽत्र न गतिर्नच कारकं किं तर्ह्युत्तरपदार्थस्य समानाधिकरणं विशेषणम्। **उद्ध्याविति**। भावे कर्तरि वाऽत्र क्विप्। ईकारः संयोगपूर्वः।

उ०— ननूवङभावपक्षे पूर्वरूपं स्यादत आह—**वा छन्दसीति**। पूर्वसवर्णदीर्घोऽप्यत एव न। तत्र बह्वृचानां यणादेशेन पाठः। यजुर्वेदिनामुवङ्विशिष्ट इति बोध्यम्। **विसूत इति**। क्विपि गतिकारकोपपदानामिति सुबुत्पत्तेः पूर्वं समासेऽपदादित्वादादेशप्रत्यययोरिति षत्वं विष्वं विषुवमित्यत्रेति बोध्यम्।

ननु सत्सूद्विषेति सोपपदे क्विप्युपपदसमासे ब्राह्मणनियावित्येव स्यादत आह—**अन्येभ्योऽपीति**। **परत्वादिति**। ताच्छील्याद्यविवक्षायां सोपपदस्यावकाशः। निरुपपदस्य धात्वन्तरमवकाश इति भावः। गतिकारकपूर्वस्यैवेति नियमः। सपूर्वपदस्य चेद्गतिकारकपूर्वस्यैवेष्यते। नतु गतिकारकपूर्वभिन्नस्येष्यत इत्यर्थः। तेन निन्यतुरित्यादि सिध्यति। एतेन यणविध्येकवाक्यतापन्नत्वान्नायं नियम इत्यपास्तम्। एवकारस्यानन्वयापत्तेश्च। इयं भाष्यकृत इष्टिः। इदानीं वार्तिकं व्याचष्टे—**स्वरपदेत्यादि**। **भाव इति**। संपदादित्वात्कर्तरि

---

* ६. ४. १.

**असंयोगपूर्वे ह्यनिष्टप्रसङ्गः ॥ २ ॥**

असंयोगपूर्वस्येति ह्युच्यमानेऽनिष्टं प्रसज्येत । उद्ध्यौ उद्ध्यः । उन्न्यौ उन्न्यः । असंयोगपूर्वस्येति प्रतिषेधः प्रसज्येत ।

तत्तर्हि वक्तव्यम् । न वक्तव्यम् । धातोरिति* वर्तते । तत्र धातुना संयोगं विशेषयिष्यामः । धातोर्यः संयोगस्तत्पूर्वस्य नेति । उपसर्जनं वै संयोगो न चोपसर्जनस्य विशेषणमस्ति । धातोरित्यनुवर्तनसामर्थ्यादुपसर्जनस्यापि विशेषणं भविष्यति । अस्त्यन्यद्धातोरित्यनुवर्तनस्य प्रयोजनम् । किम् । इवर्णं विशेषयिष्यामः । नैतदस्ति प्रयोजनम् । यद्ध्यधातोरिवर्णं भवितव्यमेव तस्य यणादेशेनेको यणचि [ ६. १. ७७ ] इत्येव ।

**वर्षाभ्वश्च ॥ ६ । ४ । ८४ ॥**

---

**प्र०—धातोरिति** । अविद्यमानधात्ववयवसंयोगपूर्वस्य यणित्यर्थः । **उपसर्जमिति** । अन्यपदार्थं प्रति । **न चोपसर्जनस्येति** । संबन्धिशब्दादन्यदुपसर्जनं पदान्तरप्राच्येनार्थेन संबन्धं नोपैतीत्यर्थः । **अस्त्यन्यदिति** । गुणप्रधानसंनिधौ प्रधानस्य सत्यर्थित्वे विशेषणसंबन्धेन भाव्यमनर्थित्वे प्रधानस्य गुणो विशेषणेन संबध्यते । **यद्ध्यधातोरिति** । **यथा कुमार्याविति** । ननु मणी पाणी इत्यादावधातोः पूर्वसवर्णबाधनार्थो यण मा भूदिति धातुनेवर्णस्य विशेषणे प्रयोजनमस्ति । एवं तर्हीयङ्बाधनार्थत्वाद्यणादेशस्याधातोरियङोऽप्रसङ्गादधातुनिवृत्त्यर्था धातुग्रहणानुवृत्तिर्न भवति ।

---

**उ०—**क्विबित्यनेन । पश्चाद्विशेषणसमासः। पदपूर्वेत्यत्र पदशब्देन धात्ववयवत्वानधिकरणस्य ग्रहो बोध्यते । तेनोन्नीशब्दादाचारक्विबन्तात्कर्तरि क्विपि न यण् । अत एव प्रत्याख्यानेन न विरोधः । तस्यानभिधानमित्यन्ये । एतद्वचनारम्भेऽपि परमनियावित्यादावतिप्रसङ्गवारणाय भाष्यकारेष्टिरावश्यकी । तेन स्वरपूर्वग्रहणं प्रत्याख्यातप्रायमेव । पदपूर्वग्रहणमपि प्रत्याख्यातुमाह—**तत्तर्हीत्यादि** । **संबन्धिशब्दादिति** । गमकस्योपलक्षणम् । **गुणप्रधानेति** । इवर्णं प्रति प्राधान्येनान्वयसंभवे संयोगविशेषणत्वमन्याय्यमिति वक्तुं युक्तम् । भाष्यस्यापीवर्णं धातुं प्रति विशेष्यत इत्यर्थः । **पूर्वसवर्णदीर्घबाधनार्थ इति** । स तु ई ऊ इत्यादौ चरितार्थः । **इयङ्बाधनार्थत्वादिति**। उत्सर्गसमानदेशा अपवादा इति न्यायादिति भावः। न चायं न्यायः श्नमकज्बहुषु व्यभिचरितः । तेषु मित्त्वेन प्राक्टेरिति पदेन पुरस्तादित्यनेन च तद्बाधेऽप्यन्यत्राप्रवृत्तौ मानाभावात् । वस्तुतस्तु तदभावे कस्यापि नाप्राप्त्यसंभवाद्बाध्यसामान्याचिन्तायां तदपवादत्वमपि संभाव्येत । तस्मादनुवृत्तिसामर्थ्यादिति भाष्यस्य निपातानामनेकार्थत्वादावृत्तिसामर्थ्यादित्यर्थः । उक्तार्थमजानानस्य शङ्का—**अस्त्यन्यदिति** । आचार्यदेशीयस्योत्तरम्—**यद्ध्यधातोरिति** ।

---

* ६. ४. ७७.

**वर्षाभ्वपुनर्भ्वश्च ॥ १ ॥**

वर्षाभू इत्यत्र पुनर्भ्वश्चेति वक्तव्यम् । पुनर्भ्वौ पुनर्भ्वः ।

अत्यल्पमिदमुच्यते । वर्षादृन्कारपुनःपूर्वस्य भुव इति वक्तव्यम् । वर्षाभ्वौ वर्षाभ्वः । दृन्भ्वौ दृन्भ्वः । कारभ्वौ कारभ्वः । पुनर्भ्वौ पुनर्भ्वः ।

**हुश्नुवोः सार्वधातुके ॥ ६ । ४ । ८७ ॥**

**हुश्नुग्रहणानर्थक्यमन्यस्याभावात् ॥ १ ॥**

हुश्नुग्रहणमनर्थकम् । किं कारणम् । अन्यस्याभावात् । न ह्यन्यत्सार्वधातुकेऽस्ति यस्य यणादेशः स्यात् । ननु चायमस्ति । याति वातीति । क्ङितीत्यनुवर्तते* । इह तर्हि । यातः वात इति । अचीति वर्तते×। इह तर्हि । यान्ति वान्तीति । य्वोरिति वर्तते÷। एवमपि धियन्ति पियन्तीत्यत्र प्राप्नोति । ओरिति वर्तते* । एवमपि सुवन्ति रुवन्तीत्यत्र प्राप्नोति । अनेकाच इति वर्तते+ । एवमप्यसुवन् अरुवन्नित्यत्र प्राप्नोति । एतदप्यटोऽसिद्धत्वादेकाज्भवति । एवमपि प्रोर्णुवन्तीत्यत्र प्राप्नोति । असंयोगपूर्वस्येति* वर्तते । यङ्लुगर्थं तर्हि

प्र०— **वर्षा०** । वर्षासु भवति वर्षा वा भवते प्राप्नोतीति वर्षाभूरोषधिविशेषः । दृन्भूशब्दोऽन्दूदृन्भू इति निपातितः । अत्र तु भूशब्दस्याऽऽनर्थक्यान्न भूसुधियोरित्यत्र ग्रहणाभावाद्यणादेशः सिद्धः ।

**हुश्नु०**। अधिकारानुवृत्तिसामर्थ्यादतिप्रसङ्गाभावं मत्वाऽऽह—**हुश्नुग्रहणानर्थक्यमिति**। भाषा-

उ०— **वर्षा वा भवत इति**। वर्षा इति द्वितीयाबहुवचनान्तम् । **ओषधिविशेष इति** । भेके तु ह्रस्वान्तः। अत एव शिली गण्डूपदी भेकी वर्षाभ्वी कमठी डुलिरिति स्त्रियामुकारान्तलक्षणङीषन्तं पठन्तीति नारायणः । उतो गुणवचनादेव ङीषो विधानेनात्र ङ्यर्थं बह्वादित्वकल्पनारूपोपायान्तरस्यैवाऽऽवश्यकत्वाद्भेकेऽपि दीर्घान्त इत्यन्ये । **आनर्थक्यादिति** । दृभी ग्रन्थ इत्यतः कूप्रत्ययो निपात्यते नुमागमश्चेति भावः । **न भू इत्यादि** । एवं च दृन्पूर्वस्येति निष्फलमिति भावः । **यणादेश इति** । ओः सुपीत्यनेन । इदं चिन्त्यम् । धातुत्वाभावादुवङोऽप्राप्ताविको यणचीत्येव यणासिद्धेरिति । किंच दृन्निति नान्त उपपदे भुवः क्विपि निष्पन्नदृन्भूशब्दार्थं वार्तिके दृन्भूग्रहणस्याऽऽवश्यकत्वाच्चिन्त्यमिदम् । वार्तिके पूर्वग्रहणं परिभाषालब्धार्थानुवाद इति बोध्यम् ।

**हुश्नु०**। भाष्ये—**असुवन्नित्यादि** । एषैव सिद्धान्त्युक्तिः । आसिद्धत्वानित्यत्वज्ञापकमिदम् । श्नसोरिति तपरत्ववादिति तदाशयः । इत उत्तरमेकदेशिनोरुक्तिः । अत एवान्त इत्येतात्सिद्धं

* ६. ४. ६३. + ६. ४. ७७. × ६. ४. ८३. + ६. ४ ८२.

हुश्नुग्रहणं कर्तव्यम्। यङ्लुगन्तमनेकाजसंयोगपूर्वमुवर्णान्तमस्ति तदर्थमिदम्। नदं योयुवतीनाम्। वृषभं रोरुवतीनाम्।

**यङ्लुगर्थमिति चेदार्धधातुकत्वात्सिद्धम्॥ २॥**

यङ्लुगर्थमिति चेत्तन्न। किं कारणम्। आर्धधातुकत्वात्सिद्धम्। कथमार्धधातुकत्वम्। उभयथा छन्दसीति वचनात्*। अन्येऽपि धातुप्रत्ययाश्छन्दस्युभयथा दृश्यन्त इति। एवं तर्हि सिद्धे सति यद्धुश्नुग्रहणं करोति तज्ज्ञापयत्याचार्यो यङ्लुग्भाषायां भवतीति। किमेतस्य ज्ञापने प्रयोजनम्। बेभिदीति चेच्छिदीत्येतत्सिद्धं भवति भाषायामपि।

**ऊदुपधाया गोहः॥ ६। ४। ८९॥**

अथ किमर्थं गुहेर्विकृतस्य ग्रहणं क्रियते न पुनर्गुह इत्येवोच्येत।

**गोहिग्रहणं विषयार्थम्॥ १॥**

गोहिग्रहणं क्रियते विषयार्थम्। विषयः प्रतिनिर्दिश्यते। यत्रास्यैतद्रूपं तत्र यथा स्यात्। इह मा भूत्। निजुगुहतुः निजुगुहुरिति।

**अयादेशप्रतिषेधार्थं च॥ २॥**

अयादेशप्रतिषेधार्थं च विकृतग्रहणं क्रियते।

---

प्र०—**यामपीति**। ततो यङ्लुग्निवृत्त्यर्थं हुश्नुग्रहणमर्थवत्।

ऊदु०। **किमर्थमिति**। लघुं विहाय निर्देशं कस्माद्गौरवमाश्रितमिति प्रश्नः। **गोहिग्रहणमिति**। कृतगुणस्योत्त्वं यथा स्यादकृतस्य मा भूदित्येवमर्थमित्यर्थः। **अयादेशप्रतिषेधार्थं चेति**। गुणे कृते तस्य स्थान ऊत्त्वे कृते सत्यूत्त्वस्यासिद्धत्वे गुरुपूर्वादुत्तरो णिर्भवति नतु लघुपूर्वादिति ल्यप्ययादेशो न भवति। गुह इति तु निर्देशे क्रियमाणे नित्यत्वाद्बाधित्वा गुणमुकारस्थान ऊकारः प्राप्नोति। तस्य चा-

---

उ०—भवतीत्युक्तिः। अन्यथा ज्ञापितेऽपि हुश्नुवोरित्यस्य चारितार्थ्यायोवर्णान्तेभ्योऽप्यस्य भाषायामावश्यकतयेत्यादि सिद्धं भवतीति वदेत्। एवं चैतत्प्रयोगद्वयातिरिक्तं यङ्लुगन्तं भाषायामसाध्वेव। अत एव क्ङिति चेति सूत्रे रोरवीतीत्यस्य छान्दसत्वमुक्तं भाष्यकृतेति ध्येयम्। किंच किमेतस्य ज्ञापने प्रयोजनमिति प्रश्नस्य लोक उवर्णान्तयङ्लुगन्तप्रयोगादर्शनमेव बीजम्। तत्र तत्प्रयोगादर्शनेनास्योत्तरस्यैकदेशयुक्तित्वमावश्यकम्। यङोऽचि चेति सूत्रे चलभ्यवाक्यभेदलभ्यस्यानैमित्तिकयङ्लुको बहुलग्रहणानुवृत्त्या यथाप्रयोगं लोकेऽपि लाभेन ज्ञापनानुपयोगाच्चेति बोध्यम्।

ऊदु०। विषयं दर्शयति—**कृतगुणस्येति**। **अकृतगुणस्येति**। क्ङिद्विषय इत्यर्थः। **नित्य-**

---

* ३. ४. ११७.

**ह्रस्वादेशे ह्ययादेशप्रसङ्ग ऊत्त्वस्यासिद्धत्वात् ॥ ३ ॥**

ह्रस्वादेशे हि सत्ययादेशः प्रसज्येत । प्रगृह्य गतः । किं कारणम् । ऊत्त्वस्यासिद्धत्वात् । असिद्धमूत्त्वं तस्यासिद्धत्वाल्ल्यपि लघुपूर्वात् [ ६. ४. ५६ ] इत्ययादेशः प्रसज्येत ।

विषयार्थेन तावन्नार्थो गोहिग्रहणेन । प्रश्लिष्टनिर्देशात्सिद्धम् । प्रश्लिष्टनिर्देशोऽयम् । उ ऊत् ऊदिति । तत्र ह्रस्वस्यावकाशः । निजुगुहतुः निजुगुहुः । गुणस्यावकाशः । निगोढा निगोढुम् । इहोभयं प्राप्नोति । निगूहयति निगूहकः । परत्वाद्गुणे×कृत आन्तर्यतो दीर्घस्य दीर्घो भवति । अयादेशप्रतिषेधार्थेनापि नार्थः । समानाश्रयवचनात्सिद्धम् । समानाश्रयमसिद्धं भवति व्याश्रयं चैतत् । कथम् । णावूत्त्वं णेर्ल्यप्ययादेशः ।

**दोषो णौ ॥ ६ । ४ । ९० ॥**

अथ किमर्थं दुषेर्विकृतस्य ग्रहणं क्रियते न पुनर्दुष इत्येवोच्येत ।

**दोषिग्रहणं च ॥ १ ॥**

किम् । अयादेशप्रतिषेधार्थं विकृतग्रहणं क्रियते । ह्रस्वादेशे ह्ययादेशप्र-

---

प्र०—सिद्धत्वाल्लघुपूर्वादुत्तरे णिर्भवतीत्ययादेशः स्यात् । **उ ऊत् ऊदिति** । ह्रस्वदीर्घावादेशौ सूत्रे निर्दिश्येते । स्थानेन्तरतमपरिभाषावशाद्ध्रस्वस्य ह्रस्वो दीर्घस्य दीर्घः । **निजुगुहतुरिति** । अत्र कित्त्वाद्गुणप्रतिषेधादुकारस्याऽऽदेश उकारः । **निगोढेति** । अचीत्यधिकारादुकारस्यात्राप्रसङ्गः । **निगूहयतीति** । उकारस्य गुणश्च प्राप्नोत्युकारश्च । तत्र परत्वाद्गुणे कृत एकदेशविकृतस्यानन्यत्वादूकार आदेश इति नार्थो विकृतनिर्देशेन । दोषो णावित्यत्र तु लक्ष्यदर्शनवशादूकारोऽपेक्ष्यते न तु ह्रस्व इति तत्रापि न दोषः ।

---

उ०—**त्वादिति** । गुणस्त्वनित्यः । ऊत्त्वे लघूपधत्वाभावादप्राप्तेः । **ह्रस्वदीर्घाविति** । आदेशोऽपि ह्रस्व एवास्तु । भाव्यमानस्योकारस्य सवर्णग्राहकत्वाद्दीर्घस्य दीर्घसिद्धिरिति चेदुपायान्तरत्वाददोष इत्याहुः । **परत्वाद्गुण इति** । न च ह्रस्वे सावकाशेऽपि दीर्घोऽनवकाशः । ह्रस्वापेक्षयैव विप्रतिषेधविचारात् । दीर्घस्तु गुणात्प्राक्प्राप्नोत्येव न । तदन्तरतमस्थानिनोऽभावात् । उभयनिर्देशसामर्थ्येन स्वस्वसदृशस्थान्याक्षेपात् । गुणश्च प्राप्नोत्युकारश्चेत्येव पाठः । नन्वेवं दोषो णावित्रापि तत्सूत्रवक्ष्यमाणरीत्या दुष इति निर्देशे तेन पर्यायेणोभौ स्यातामत आह—**दोषो णाविति** । विकृतनिर्देशे तु तत्सामर्थ्यादेव गुणे कृत आदेशः । स चाऽऽन्तरतम्याद्दीर्घ एवेति भावः ।

**दोषो०।** अत्र विकृतनिर्देशस्य विषयार्थत्वं न फलम् । णावित्युक्तेः । अतो भाष्येऽ**यादेशप्रतिषेधार्थमिति** ।

सङ्ग ऊत्त्वस्यासिद्धत्वात् । ह्रस्वादेशे हि सत्ययादेशः प्रसज्येत । प्रगृह्य गतः । किं कारणम् । ऊत्त्वस्यासिद्धत्वात् । असिद्धमूत्त्वं [illegible] पूर्वादित्ययादेशः प्रसज्येत । अत्रापि समानाश्रयवचनात्सिद्धम् ।

### चिण्णमुलोर्दीर्घोऽन्यतरस्याम् ॥ ६ । ४ । ९३ ॥

चिण्णमुलोर्णिज्व्यवेतानां यङ्लोपे चोपसंख्यानं कर्तव्यम् । शमयन्तं प्रयोजितवान् अशमि अशामि शमं शमम् शामं शामम् । शंशमयतेः अशंशमि अशंशामि शंशमं शंशमम् शंशामं शंशामम् । किं पुनः कारणं न सिध्यति । चिण्णमुल्परे णौ मितामङ्गानां दीर्घो भवतीत्युच्यते यश्चात्र चिण्णमुल्परो न तस्मिन्मिदङ्गं यस्मिंश्च मिदङ्गं नासौ चिण्णमुल्पर इति । लोपे + कृते चिण्णमुल्परो भवति । स्थानिवद्भावान्न चिण्णमुल्परः । ननु च प्रतिषिध्यतेऽत्र स्थानिवद्भावो दीर्घविधिं प्रति न स्थानिवदिति × । एवमप्यसिद्धत्वान्न प्राप्नोति । एवं तर्हि—

---

प्र०—चिण्ण० । **णिज्व्यवेतानामिति** । चिण्णमुल्परे णौ मितामङ्गानां वा दीर्घ उच्यते । तत्र यदा ण्यन्ताद्यङन्ताद्वा णिज्विधीयते तदा पूर्वेण णिचा यङकारेण च व्यवधानाद्दीर्घो न प्राप्नोतीति वचनम् । **प्रयोजितवानिति** । यद्यपि चिण्विषयं कर्म प्रदर्शनीयं तथाऽपि णिजुत्पत्तये हेतुव्यापारप्रदर्शनार्थं कर्तुरुपादानं न त्वत्र कर्ता विवक्षितः । **शंशमयतेरिति** । शमेर्यङि नुगतोऽनुनासिकान्तस्येति नुकि कृते शंशम्यशब्दाण्णिच्यल्लोपयलोपौ । **लोपे कृत इति** । यद्यपि परस्यापि णिचो लोपस्तथाऽपि प्रत्ययलक्षणेन भूतपूर्वगत्या वा चिण्णमुल्परो णिः । **दीर्घविधिं प्रति नेति** । एतदेव हि दीर्घग्रहणस्य प्रयोजनं स्थानिवत्त्वप्रतिषेधो यथा स्यात् । यदि तु प्रकृतो ह्रस्वो विकल्प्येत तदा णौ णिलोपस्य स्थानिवत्त्वाद्विकल्पो ह्रस्वस्य न स्यात् । यङकारलोपस्य स्थानिवद्भावान्नित्यं ह्रस्वः श्रूयेत । हेड वेष्टन इत्यस्य च ह्रस्वाभावपक्षेऽहेडीति स्यात् । दीर्घे तु ह्रस्वस्य कृतेऽहिडीति सिध्यति ।

---

उ०—चिण्ण० । **भूतपूर्वगत्या वेति** प्रौढ्या । भाष्ये—**दीर्घविधिं प्रतीति** । यद्यपि तत्र त्रैपादिकदीर्घस्यैव साहचर्याद्ग्रहणम् । अत एव पूर्वत्रासिद्धीय इत्यवष्टभ्य वरेयलोपस्वरवर्जं द्विर्वचनादीनि न कर्तव्यानीति तत्प्रत्याख्यातं भाष्ये न पदान्तसूत्रे । तथाऽपि लक्ष्यानुरोधात्साहचर्यानित्यत्वाच्च न पदान्तसूत्रस्थं वरेयलोपस्वरवर्जमित्युपलक्षणमिति भावः । ण्यन्ताण्णौ ण्याकृतिनिर्देशात्सिद्धमिति तु चिन्त्यम् । जातेः पौर्वापर्याभावेन चिण्णमुल्पर इति विषेषणासंगत्याऽत्र जातिग्रहणस्य वक्तुमशक्यत्वात् । स्पष्टं चेदमार्धधातुक इति सूत्रे द्वितीयाध्याये कैयटे भाष्ये च । दीर्घग्रहणस्य फलान्तरमपि दर्शयति—**हेड वेष्टन इति** । घटादिरयम् । केचित्तु कालसूत्र-

---

+ ६. ४. ५१; ४८; ४९. × १. १. ५८.

**चिण्णमुलोर्णिज्व्यवेतानां यङ्लोपे चान्तरङ्गलक्षणत्वात्सिद्धम्॥१॥**

किमिदमन्तरङ्गलक्षणत्वादिति। यावद्ब्रूयात्समानाश्रयवचनात्सिद्धमित्येव। व्याश्रयं चैतत्। कथम्। णेर्णौ लोपो णौ चिण्णमुल्परे मितामङ्गानां दीर्घत्वमुच्यते। तस्मान्नार्थ उपसंख्यानेनेति।

**छादेर्घेऽद्व्युपसर्गस्य ॥ ६ । ४ । ९६ ॥**

अद्विप्रभृत्युपसर्गस्येति वक्तव्यम्। इहापि यथा स्यात्। समुपाभिच्छाद इति। तर्हि वक्तव्यम्। न वक्तव्यम्। यत्र त्रिप्रभृतयः सन्ति द्वावपि तत्र स्तस्तत्राद्व्युपसर्गस्येत्येव सिद्धम्। न वा एष लोके संप्रत्ययः। न हि द्विपुत्र आनीयतामित्युक्ते त्रिपुत्र आनीयते। तस्मादद्विप्रभत्युपसर्गस्येति वक्तव्यम्।

**घसिभसोर्हलि ॥ ६ । ४ । १०० ॥**

---

प्र०—**अन्तरङ्गलक्षणत्वादिति।** णियङोर्लोपो णिमात्रापेक्षत्वादत्रान्तरङ्गः। दीर्घस्तु चिण्णमुल्परण्यपेक्षत्वाद्बहिरङ्ग इति समानाश्रयत्वाभावादसिद्धत्वाभाव इत्यर्थः।

छादेः। **अद्विप्रभृत्युपसर्गस्येति वक्तव्यमिति।** इह संख्यान्तरोपजन आश्रयाविनाशेऽपि पूर्वसंख्याविनाशान्नद्वाचिशब्दाप्रवृत्तिः। **यत्र त्रिप्रभृतय इति।** वस्तुसद्भावमाश्रित्य परिहारः। अद्व्युपसर्गस्येति च प्रसज्यप्रतिषेधो वाक्यभेदेनाऽऽश्रीयते। पर्युदासाश्रयणे ह्यनुपसर्गस्य ह्रस्वो न स्यात्। **न वै एष इति।** संख्याशब्दानामेष स्वभावो यत्संख्यान्तरस्य गौणस्य मुख्यस्य वा विषये न प्रवर्तते। तथा चोक्तम्—'एकाजनेकाज्ग्रहणेषु चाऽऽवृत्तिसंख्यानात्सिद्धम्' इति। नैधेय इति च पूर्वविधिग्रहणस्य[1] प्रत्युदाहरणमुपन्यस्तं[2] स्थानिवद्भावे त्र्यच्कत्वाद् द्व्यच्कत्वाभावात्तदाश्रयो[3] ढक् न स्यादिति।

---

उ०—स्थस्य कर्मेर्णिङ्सूत्रस्थस्य प्रकृतसूत्रस्थस्य च भाष्यस्य प्रामाण्याद्धेड वेष्टन इत्यस्य घटादौ पाठोऽसांप्रदायिक इत्याहुः।

छादेः। प्रसज्यप्रतिषेधे वाक्यभेदासमर्थसमासापत्तावपि लक्ष्यानुरोधात्स आश्रीयत इत्याह—**पर्युदासाश्रयण इति।** द्व्याद्युपसर्गसदृशस्य सोपसर्गस्यैव ग्रहणापत्तिरिति भावः। मुख्यस्योत्तरसंख्यान्तरस्य विषये पूर्वसंख्याया अप्रवृत्तौ भाष्ये दृष्टान्त उक्तः। गौणविषये दर्शयति—**तथा चोक्तमिति।** अइउण्सूत्रे। तत्र ह्यकारादीनामेकत्वपक्षे घटेन तरति घटिक इत्यत्र द्व्यच्लक्षणठनोऽप्राप्तिमाशङ्क्यायं परिहार उक्तः। **स्थानिवद्भावे इति।** निपूर्वाद्धाञः किप्रत्यय आतो लोपे तस्य स्थानिवत्त्वेनाच्त्वं स्यादिति भावः। **तदाश्रय इति।** द्व्यच्त्वाश्रय इत्यर्थः।

---

१ ख. 'वे सति त्र्य'। २ ख. त्यस्तं यद् द्व्य'। ३ क. द्व्यच्त्वाभा'।

**हल्ग्रहणमनर्थकमन्यत्रापि दर्शनात् ॥ १ ॥**

हल्ग्रहणमनर्थकम् । किं कारणम् । अन्यत्रापि दर्शनात् । अन्यत्रापि लोपो दृश्यते । अग्निस्तृणानि बप्सति । शरावे बप्सति चरुः ।

**हुझल्भ्यो हेर्धिः ॥ ६ । ४ । १०१ ।**

इटः प्रतिषेधो वक्तव्यः । रुदिहि स्वपिहि + । झल इति धित्वं प्राप्नोति ।

**हेर्धित्वे हलधिकारादिटोऽप्रतिषेधः ॥ १ ॥**

हेर्धित्वे हलधिकारादिटोऽप्रतिषेधः । अनर्थकः प्रतिषेधोऽप्रतिषेधः । धित्वं कस्मान्न भवति । हलधिकारात् । प्रकृतं हल्ग्रहणमनुवर्तते । क्व प्रकृतम् । घसिभसोर्हलि [६.४.१०० ] इति । तद्वै सप्तमीनिर्दिष्टं षष्ठीनिर्दिष्टेन चेहार्थः । तद्वै तत्र प्रत्याख्यायते तत्र प्रत्याख्यातं सद्यया विभक्त्या निर्दिश्यमानमर्थवत्तया निर्दिष्टमिहानुवर्तिष्यते । अथवा हुझल्भ्य इत्येषा पञ्चमी हलीति सप्तम्याः षष्ठीं

---

**प्र०—घसि०** । अचीत्यधिकाराद्धलि न प्राप्नोतीति हल्ग्रहणं क्रियते तदुपादाने चाचि न प्राप्नोतीति चकारोऽच्संबन्धार्थः क्रियते । तत्राज्ग्रहणस्येहानधिकारादेव सर्वत्र लोपः सिध्यतीति हलि चेति न वक्तव्यम् । **अन्यत्रापीति** वचनाद्वार्तिककारश्चकारं न पपाठेति लक्ष्यते । **बप्सतीति** । एकवचने प्राप्ते व्यत्ययेन झिः । श्लौ द्विर्वचनम् । अदभ्यस्तादित्यदादेशः । उपधालोपः । खरि चेति चर्त्वम् । अत्र चान्तरङ्गत्वादुपधालोपात्पूर्वं द्विर्वचनं क्रियते । यदि तु झावेव पूर्वं लोपः स्यात्ततो द्विर्वचनं न स्यात् ।

**हुझ०** । **रुदिहीति** । शब्दान्तरप्राप्त्या द्वयोरप्यनित्यत्वात्परत्वादिटि पुनःप्रसङ्गविज्ञानाद्द्वित्वप्रसङ्गः । **अथवेति** । यद्यपि सप्तम्यचरितार्था तथाऽपि हुझल्भ्य इत्य-

---

**उ०—घसि०** । हल्ग्रहणप्रत्याख्यातृवार्तिकाशयमाह—**तत्रेति** । **अनाधिकारादेवेति** । व्याख्यानादेवाधिकारनिवृत्तिः सिद्धेति भावः । **अन्यत्रापीति वचनादिति** । सूत्रोक्तविषयादन्यत्रापीति तदर्थः । स च चकाराकरण एवोपपद्यत इत्यर्थः । **एकवचन इति** । अग्नेरेकस्य कर्तृत्वादिति भावः । **अन्तरङ्गत्वादिति** । यद्यप्युपधालोपः परो नित्यश्च तथाऽपि ह्रस्वमात्रापेक्षत्वाद्द्वित्वमन्तरङ्गम् । क्ङित्प्रत्ययापेक्षत्वाद्बहिरङ्गो लोप इत्यर्थः । **द्विर्वचनं न स्यादिति** । अनच्कत्वात् । लोपस्य द्वित्वनिमित्ताज्निमित्तत्वाभावेन स्थानिवत्त्वाभावाच्च । द्वित्वे कृते परत्वान्नित्यत्वाच्चाऽऽदेश उपधालोपानापत्तिरिति भावः ।

**हुझ०** । भाष्ये—**तद्वै तत्र प्रत्याख्यायत इति** । पूर्ववाक्ये हलीत्यस्यानुपयोगेन सप्तम्यर्थे सप्तम्यां प्रमाणाभावेन षष्ठ्यर्थे इयं सप्तमीति भावः । अथवेति पक्षेऽप्ययमेवार्थः । प्रकारान्तरेणोच्यत इत्याह—**यद्यपीति** । ननु द्वयोरप्यचरितार्थयोः पञ्चम्येव कल्पिका

---

+ ७. २. ७६.

प्रकल्पयिष्यति तस्मादित्युत्तरस्य [ १. १. ६७ ] इति । अथवा निर्दिश्यमानस्यादेशा भवन्तीत्येवं न भविष्यति। यस्तर्हि निर्दिश्यते तस्य कस्मान्न भवति इटा व्यवहितत्वात्। यद्येवं छिन्द्धकीभिन्द्धकीत्यत्र धित्वं न प्राप्नोति । धित्वे कृतेऽकज्भविष्यति+ । इदमिह संप्रधार्यम् । धित्वं क्रियतामकजिति किमत्र कर्तव्यम् । परत्वाद्धित्वम् । नित्योऽकच् । कृतेऽपि धित्वे प्राप्नोत्यकृतेऽपि। अकजप्यनित्यः। अन्यस्य कृते धित्वे प्राप्नोत्यन्यस्याकृते शब्दान्तरस्य च प्राप्नुवन्विधिरनित्यो भवति । उभयोरनित्ययोः परत्वाद्धित्वं धित्वे कृतेऽकज्भविष्यति। अथवा हकारस्यैवाशक्तिजेनेकारेण ग्रहणमिति ।

प्र०–नया पञ्चम्याऽचरितार्थया हेरित्येतदनुगुणा षष्ठी प्रकल्प्यते । ननु षष्ठीप्रक्लप्तौ तदादिविधेरभावः । अस्मिन्विधिस्तदादावल्ग्रहण इति ह्युच्यते । नैष दोषः । हल्ग्रहणानुवृत्तिसामर्थ्याद्धलन्तत्वासंभवाच्च तदादिविधिर्विज्ञास्यते । **अथवेति** । यत्षष्ठ्या निर्दिश्यते तस्यैवाऽऽदेशः । सागमकस्त्वागमानामव्यभिचाराच्छब्दान्तरे श्रूयमाणे प्रतीयते न तूच्चार्यत इति तस्याऽऽदेशाभावः । **यस्तर्हीति** । आगमं विहाय हिशब्दस्याऽऽदेशो भवत्वित्यर्थः । **इटेति** । तस्मादित्युत्तरस्येति वचनादनन्तरस्यैव षष्ठ्या कार्येण च भाव्यम् । तत्र यो निर्दिष्टो नासावनन्तरो यश्चानन्तरः सागमको नासौ निर्दिष्ट इति धित्वाभावः । **यद्येवमिति** । यदि निर्दिश्यमानस्याऽऽदेशस्तदाऽकच्चि कृते शब्दान्तरत्वाद्धित्वाभावः । **धित्वे कृतेऽकजिति** । पुनःप्रसङ्गविज्ञानाश्रयणात् । न ह्यन्यथाऽज्ञाताद्यर्थावगतिर्भवति । अथवाऽज्ञाताद्यर्थापेक्षत्वाद्बहिरङ्गोऽकजिति पूर्वं धित्वं पश्चादकच् । **अथवेति** । इकारेणाऽऽगन्तुना हेरिति निर्देशः । हकारमात्रं

उ०–कुत इत्यत आह–**हेरित्येतदनुगुणेति**। हेरित्यस्य विशेषणाकाङ्क्षायां तेनैव हल्ग्रहणस्य संबन्धो युक्त इत्यर्थः । द्वयोरचरितार्थयोः परत्वात्तस्मादित्युत्तरस्येत्यस्यैव प्रवृत्तिरिति वक्तुं युक्तम् । **हल्ग्रहणेति** । हल्ग्रहणानुवृत्तेः फलान्तराभावाद्धेरित्यनेन संबन्धे तदन्तविध्यसंभवात्तदादिविधिसिद्धिरित्यर्थः । वस्तुतः स्वरूपसत्सप्तम्येव तन्निमित्तम् । अत एव तस्मान्नुडचीत्यादौ तदादिविधिः षष्ठीं प्रकल्पयिष्यतीत्यस्य षष्ठ्यर्थे सप्तमीं कल्पयिष्यतीत्यर्थ इत्याहुः । ननु सागमोऽपि निर्दिश्यत एवेटस्तदवयवत्वादत आह––**सागमकस्त्विति** । शब्दान्तरे श्रूयमाणे सति यदागमा इति परिभाषया प्रतीयत इत्यर्थः । **अनन्तरस्यैव षष्ठ्येति** । पञ्चमीनिर्देशेऽनन्तरस्यैव षष्ठी प्रकल्प्येति सूत्रार्थ इति भावः । पञ्चमीनिर्देशेऽनन्तरस्य कार्यं भवतीति सूत्रार्थमाश्रित्याऽऽह––**कार्येण चेति** । षष्ठ्या कार्येण भाव्यमिति पाठे षष्ठीबोधितकार्येणेत्यर्थः । पुनःप्रसङ्गविज्ञानाश्रयणे हेतुमाह––**नहीति** । **अथवेति** । इदं चिन्त्यम् । अर्थापेक्षबहिरङ्गत्वस्यात्र शास्त्रेऽनाश्रयणादित्यसकृदावेदितम् । हकारमात्रस्य

+ ५. ३. ७१.

१ ख. °रसंभवः २ क. °गमकोऽपि ।

**चिणो लुक् ॥ ६ । ४ । १०४ ॥**

चिणो लुकि तग्रहणं कर्तव्यम् । किं प्रयोजनम् । इह मा भूत् । अकारितराम् अहारितरामिति ।

**चिणो लुकि तग्रहणानर्थक्यं संघातस्याप्रत्ययत्वात् ॥१॥**

चिणो लुकि तग्रहणमनर्थकम् । किं कारणम् । संघातस्याप्रत्ययत्वात् । संघातस्य लुक्कस्मान्न भवति । अप्रत्ययत्वात् । प्रत्ययस्य लुक्श्लुलुपो भवन्तीत्युच्यते+ । न च संघातः प्रत्ययः । तलोपे तर्हि कृते परस्य प्राप्नोति ।

**तलोपस्य चासिद्धत्वात् ॥ २ ॥**

असिद्धस्तलोपस्तस्यासिद्धत्वान्न भविष्यति ।

**कार्यकृतत्वाद्वा ॥ ३ ॥**

अथवा कृतश्चिणो लुगिति कृत्वा पुनर्न भविष्यति लुक् । तद्यथा । वसन्ते

---

**प्र०**—तु स्थानित्वेन निर्दिश्यते । एवं धिरिति धकारमात्रमादेशः । इकारस्तूच्चारणार्थः । व्यञ्जनस्य स्वररहितस्योच्चारयितुमशक्यत्वात् । ततश्च रुन्द्धीत्यत्र हकारस्येटा व्यवधानाद्धकाराभावः । स हि समुदायभक्तत्वात्तमेव न व्यवदध्यात् । अवयवं तु व्यवदधात्येव । तथा भिन्धकीत्यत्र सत्यपि पूर्वमकचि हकारस्य धकारे कृते रूपं सिध्यति ।

**चिणो०। तग्रहणमिति।** इदमस्मिन्नसिद्धमिति भेदनिबन्धनत्वाद्विषयविषयिभावस्य चिणो लुगित्यस्य लक्षणस्य भेदाभावादकारितरामित्यत्र लोपस्यासिद्धत्वाभावात्तरपोऽपि लुक्प्राप्नोति । एवं च सति प्रत्ययत्रयात्मकस्य समुदायस्य लुक्प्रसङ्गः। इतरस्तु युगपत्प्रत्ययत्रयस्य लुक्प्रसङ्गोऽनेनोक्त इति मत्वाऽऽह—**चिणो लुकीति** । इतरः स्वाभिप्रायं प्रकाशयति—**तलोप इति** । **तलोपस्यासिद्धत्वादिति** । प्रतिलक्ष्यं लक्षणभेदादस्ति विषयविषयिभावः । अभेदपक्षमाश्रित्याऽऽह—**कार्यकृतत्वाद्वेति** । एकस्मिन्विषये सकृत्प्रवृत्त्या लक्षणस्य चरितार्थत्वात्पुनःप्रवृत्त्यभावः । **तद्यथेति** । यथैकस्मिन्वसन्तेऽग्न्याधानं कृत्वा वसन्तान्तरे ब्राह्मणोऽग्न्याधानं न कुरुते शास्त्रार्थस्यानुष्ठितत्वात् । तथैकस्य प्रत्ययस्य लुकि कृते प्रत्ययान्तरस्य तरबादेर्लुक् न प्रवर्तते । **युक्तं यत्तस्यैवेति** । इहाभिन्नरूपमपि फलभेदाद्भिन्नमुच्यते । अग्न्या-

---

**उ०**—स्थाने धीति विशिष्टादेशे रूपं न सिध्येदत आह—**एवं धिरितीति** । अशक्तिजेनेत्येतद्व्याचष्टे—**व्यञ्जनस्येति** । यद्यपि विभक्त्यकारेण स्थानिन उच्चारयितुं शक्यत्वं तथाऽप्यादेशसाधारण्येनेदमेवोक्तम् । यद्वा तत्प्रक्रियावाक्याभिप्रायमिदम् ।

**चिणो०। समुदायस्य लुक्प्रसङ्ग इति** । लक्ष्यभेदाद्वारं वारं प्रवृत्त्येति भावः । **अभेदपक्षम्** । निमित्तभूतानुपूर्व्यैक्येन लक्षणाभेदपक्षमिति भावः । अत्राऽऽधानाग्निष्टोमयोर्वैधर्म्ये हेतुं न विद्म इति शङ्कां परिहरति—**इहाभिन्नरूपमिति** । ज्योतिष्टोमादीत्यर्थः ।

---

+ १. १. ६१.

ब्राह्मणोऽग्नीनादधीतेति सकृदाधाय कृतः शास्त्रार्थ इति कृत्वा पुनःप्रवृत्तिर्न भवति । विषम उपन्यासः । युक्तं यत्तस्यैव पुनःप्रवृत्तिर्न स्याद्यत्तु तदाश्रयं प्राप्नोति न तच्छक्यं बाधितुम् । तद्यथा । वसन्ते ब्राह्मणोऽग्निष्टोमादिभिः क्रतुभिर्यजेतेत्यग्न्याधाननिमित्तं वसन्ते वसन्त इज्यते । तस्मात्पूर्वोक्तावेव परिहारौ ।

अथवा क्ङितीति वर्तते । क्व प्रकृतम् । गमहनजनखनघसां लोपः क्ङित्यनङि [ ६. ४. ९८ ] इति । तद्वै सप्तमीनिर्दिष्टं षष्ठीनिर्दिष्टेन चेहार्थः । चिण इत्येषा पञ्चमी क्ङितीति सप्तम्याः षष्ठीं प्रकल्पयिष्यति तस्मादित्युत्तरस्य [ १. १. ६७ ] इति ।

## उतश्च प्रत्ययादसंयोगपूर्वात् ॥ ६ । ४ । १०६ ॥

कथमिदं विज्ञायते । उकारात्प्रत्ययादिति । आहोस्विदुकारान्तात्प्रत्ययादिति । किंचातः । यदि विज्ञायत उकारात्प्रत्ययादिति सिद्धं तनु कुरु, चिनु सुन्विति न सिध्यति । अथ विज्ञायत उकारान्तात्प्रत्ययादिति सिद्धं चिनु सुनु, तनु कुर्विति न सिध्यति । तथाऽसंयोगपूर्वग्रहणेनैव पर्युदासः स्यात् तक्ष्णुहि अक्ष्णुहि, आप्नुहि शक्नुहीत्यत्र न स्यात् । यथेच्छसि तथाऽस्तु । अस्तु तावदुकारात्प्रत्य-

---

प्र०—धानं तु कर्मान्तरेषु कर्तुर्योग्यतोत्पादनार्थमिति फलभेदाभावात्पुनर्न क्रियते । काम्यानां तु कर्मणां फलभेदात्पुनरनुष्ठानं भवति । तथेहापि तस्य लुकि कृते तरबादेर्लुक्प्रसङ्गः । अग्न्याधानं निमित्तमस्येति बहुव्रीहिः । क्रियाविशेषणं चैतत् । अनाहिताग्नेरनधिकाराद-ग्न्याधानं निमित्तं यागस्योच्यते ।

उतः० । **कथमिदमिति** । उतश्च प्रत्ययादित्यनयोर्विशेषणविशेष्यभावे कामचाराद्यदोकारः प्रत्ययेन विशेष्यते तदा तदन्तविधेरभावादुकारात्प्रत्ययादिति पक्षोऽवतिष्ठते । उकारस्य विशेष्यत्वात्तेन नास्ति तदन्तता । न संभवति चोकारः प्रत्ययान्तः । यदा पुनर्विशेष्यत उकारेण प्रत्ययोऽतस्तदन्तताऽऽश्रीयते प्रत्ययस्य तस्मात्पक्षद्वयोद्भवः । पक्षद्वयेऽपि दोषदर्शनात्प्रश्नः । **तथेति** । तदन्तपक्षेऽयं दोषः । आद्ये तु पक्ष उकारस्याप्रत्ययत्वाल्लुक्प्रसङ्ग एवात्र नास्तीति दोषाभावः । ननूकारात्प्रत्ययादिति विज्ञायमान उकारस्य प्रत्ययस्य संयोगपूर्वत्वासंभवादसंयोगपूर्वग्रहणं किमर्थं स्यात् । उच्यते । अङ्गविशेषणं स्यात् ।

---

उ०—**कर्मान्तरेषु** । अग्निहोत्रादिषु । कर्तुरित्युपलक्षणम् । अग्नेश्चेत्यपि बोध्यम् । इहापि रूपान्तरप्राप्त्या फलभेद इत्याह—**तथेति** । अत्र यद्वक्तव्यं तत्संप्रसारणाच्चेति सूत्र उक्तम् । भाष्ये **पूर्वोक्तावेवेति** । तग्रहणमसिद्धत्वं वा ।

उतः० । प्रत्ययस्य विशेषणत्वेऽप्यसंभवात्तेन तदन्तविधिर्नेत्याह—**न संभवति चेति** । द्वितीयं पक्षं दर्शयति—**यदा पुनरिति** । **अङ्गविशेषणं स्यादिति** । असंयोगपूर्वादङ्ग-

---

१ छ. 'र्स्तं त्यत्र दो' ।

यादिति। कथं चिनु सुन्विति । तदन्तविधिना* भविष्यति । अथवा पुनरस्तूकारान्तात्प्रत्ययादिति । कथं तनु कुर्विति । व्यपदेशिवद्भावेन भविष्यति । यदप्युच्यते तथाऽसंयोगपूर्वग्रहणेनेहैव पर्युदासः स्यात् तक्ष्णुहि अक्ष्णुहि, आप्नुहि शक्नुहीत्यत्र न स्यादिति नास्माभिरसंयोगपूर्वग्रहणेनोकारान्तं विशेष्यते । किं तर्हि । उकारः । उकारो योऽसंयोगपूर्वस्तदन्तात्प्रत्ययादिति ।

**उतश्च प्रत्ययाच्छन्दोवावचनम् ॥ १ ॥**

उतश्च प्रत्ययादित्यत्र च्छन्दसि वेति वक्तव्यम् । अव स्थिरा तनुहि यातुजूनाम् । धिनुहि यज्ञं धिनुहि यज्ञपतिम् । तेन मा भागिनं कृणुहि ।

**उत्तरार्थं च ॥ २ ॥**

केचित्तावदाहुश्छन्दोग्रहणं कर्तव्यमिति । अपर आहुर्वावचनं कर्तव्यमिति । लोपश्चास्यान्यतरस्यां म्वोः [ १०७] इत्यत्रान्यतरस्यांग्रहणं न कर्तव्यं भवति ।

प्र०—तथा च क्षिणु इत्यत्र न स्यादित्ययमपि दोषो वक्तव्यः । **तदन्तविधिनेति** । ननूकारस्य विशेष्यत्वात्कथं तदन्तविधिः । विशेषणत्वात्तु तदन्तविधौ वक्ष्यमाणात्पक्षादस्य भेदो न प्राप्नोति । एवं तर्हि तन्त्रेण सूत्रद्वयमभ्युपगम्यैतदुच्यते । तत्रैकस्मिन्सूत्रे प्रत्ययेनोकारो विशेष्यते । द्वितीये तूकारेण प्रत्यय इति दोषाभावः । **व्यपदेशिवद्भावेनेति** । आद्यन्तवदेकस्मिन्नित्यनेनेत्यर्थः । **किं तर्ह्युकारो विशेष्यत इति** । ननूकारस्य संज्ञात्वात्संज्ञिपरतन्त्रत्वादप्रधानस्य कथं विशेषणेन संबन्धः । नैष दोषः । यावदस्य विशेषणत्वं न विवृतं तावत्संज्ञात्वं नास्तीत्यप्राधान्याभावः । तत्रासंयोगपूर्व उकारः प्रत्ययस्य विशेषणमिति विशेषणेन संबन्धमनुभूय संज्ञात्वमुकारो लभते । **छन्दोग्रहणमिति** । नित्यं करोतेरित्यत्र वाक्यभेदेन छन्दसि वेति संबध्यते ।

उ०—दुत्तरो य उकाररूपः प्रत्ययस्तस्मादित्यर्थः । **क्षिण्विति** । **अङ्गविशेषणत्वेऽप्यसंभवात्तेन न तत्** । क्षेण्वित्युचितः पाठः । संज्ञापूर्वको विधिरनित्य इत्यस्य भाष्येऽदर्शनात् । **अयमपि दोष इति** । आद्ये पक्षे भाष्यानुक्तोऽप्ययं दोषो द्रष्टव्य इत्यर्थः । **न प्राप्नोतीति** । कर्मकर्तरि प्रयोगः । **तत्रैकस्मिन्सूत्र इति** । असंयोगपूर्वग्रहणं तु योग्यत्वाद्द्वितीयवाक्य एव संबध्यत इत्यर्थः । **आद्यन्तवदेकेति** । एवं व्याख्याने बीजं चिन्त्यम् । **संज्ञिपरतन्त्रत्वादिति** । संज्ञिनि तदन्ते विशेषणत्वादित्यर्थस्तदाह—**अप्रधानस्येति** । **यावदस्येति** । अस्यार्थतत्त्वं येन विधिरित्यत्र निरूपितम् । **असंयोगपूर्व उकार इति** । असंयोगपूर्वत्वविशिष्ट इत्यर्थः । उत्तरार्थं छन्दोग्रहणमित्यत्र यदुत्तरं तद्व्याचष्टे—**नित्यं करोतेरिति** । तत्र च्छन्दोग्रहणमेव कार्यम् । तच्च वाक्यभेदेन च्छन्दसि विकल्पविधानार्थं नित्यस्य पूर्वेणैव सिध्दत्वादिति भावः ।

* १. १. ७२.

१ अङ्गेत्यादि तादित्यन्तं क. ख. पुस्तकयोर्नास्ति ।

**अत उत्सार्वधातुके ॥ ६ । ४ । ११० ॥**

सार्वधातुक इति किमर्थम् । इह मा भूत् । संचस्करतुः संचस्करुः । स्यान्तस्य प्रतिषेधो वक्तव्यः । करिष्यति करिष्यतः ।

**कृञ उत्त्व उकारान्तनिर्देशात्स्यान्तस्याप्रतिषेधः ॥ १ ॥**

कृञ उत्त्व उकारान्तनिर्देशात्स्यान्तस्याप्रतिषेधः । अनर्थकः प्रतिषेधोऽप्रतिषेधः । उत्त्वं कस्मान्न भवति । उकारान्तनिर्देशात् । अशक्यः करोतावुकारान्तनिर्देशः सूत्र आश्रयितुम् । इह संपरिभ्यां भूषणसमवाययोः करोतावितीहैव स्यात् संस्करोति संस्कर्ता संस्कर्तुमित्यत्र न स्यात्* । न ब्रूमोऽस्मादुकारान्तनिर्देशाद्योऽयं करोतेरिति । किं तर्हि । उकारप्रकरणादुकारान्तमङ्गमभिसंबध्यते । उत इति+ वर्तते । यद्येवं नार्थः सार्वधातुकग्रहणेन । कस्मान्न भवति संचस्करतुः संचस्करुरिति । उत इति वर्तते । उत्तरार्थं तर्हि सार्वधातुकग्रहणं कर्तव्यम् । श्नसोरल्लोपः [ १११ ] इति । श्नम्सार्वधातुक एव । अस्तेरप्यार्धधातुके भूभावेन भवितव्यम्× । उत्तरार्थमेव तर्हि । श्नाभ्यस्तयोरातः [ ११२ ] इति । श्ना सार्वधातुक एव । अभ्यस्तमप्याकारान्तमार्धधातुके नास्ति÷ । ननु चेदमस्ति अप्सु यायावरः* प्रवपेत पिण्डानिति ।

---

प्र०-अतः० । **सार्वधातुक इति किमर्थमिति** । सत्यपि सार्वधातुकग्रहणे स्यान्तनिवृत्त्यर्थोऽवश्यं कर्तव्यो यत्न इति तेनैव यत्नेनाऽऽर्धधातुके न भविष्यतीति भावः । **स्यान्तस्येति** । इह सार्वधातुके विकरणे कृते तेन व्यवधानात्सार्वधातुके परतः करोतेरित्यस्यार्थस्यासंभवात्सार्वधातुके परतो यदङ्गं तदवयवस्य करोतेरित्याश्रयणीयम् । एवं च स्यान्तस्यापि प्राप्नोति । स्यग्रहणमुपलक्षणं तास्यन्तस्यापि प्रसङ्गात् । **कृञ उत्व इति** । उत इत्यनुवर्तनादिति भावः । इतरस्तु करोतेरित्युकारनिर्देशाश्रयेणानेनोक्तमिति मत्वाऽऽह—**अशक्य इति** । **उत इति वर्तत इति** । तेनोकारान्तस्याङ्गस्यावयवस्य करोतेरुत उत्सार्वधातुके क्ङिति भवतीति सूत्रार्थः संपद्यते । **अभ्यस्तमपीति** । यत्र नेष्यते लोप इति भावः । यत्र त्वस्ति तत्र भवत्येव लोपः । ययतुर्ययुरिति । **यायावर इति** । ननु चातो लोपस्य स्थानिवद्भावात्प्राप्त

---

उ०-अतः० । **कर्तव्यो यत्न इति** । उत इत्यनुवृत्तिरूपः । **विकरणे कृत इति** । अन्तरङ्गत्वादिति भावः । **असंभवादिति** । करोतेरिति धातुनिर्देश इत्यर्थः । तत्राऽऽश्रयितुमिति । करोतिनिर्देश इत्यर्थः । नन्वभ्यस्तमाकारान्तं विद्यत एव ययतुरित्यादावत आह—**यत्र नेष्यत इति** । यत्र दोषः स्यादित्यर्थः । **तत्र भवत्येवेति** । आतो लोप इटि चेत्यनेनेति भावः । **ननु चाऽऽतो लोपस्येति** । यातेर्यङन्तात् 'यश्च यङः' इति वराचि परनिमित्ताल्लोपस्य स्थानि-

---

* ६. १. १३७; १३८. + ६. ४. १०६. × २. ४ ५२. ÷ ६. ४. ६४. * ३. २. १७६; ६ ४. ४८; ६. १. ६६.

---

१ ग. 'त्यस्यास°' । २ ख. '°येणोक्त' ।

नैतदाकान्तम् । यकारान्तमेतत् । उत्तरार्थमेव तर्हि । ई हल्यघोः [ ११३ ] इति । तत्रापि श्नाभ्यस्तयोरित्येव । अतोऽप्युत्तरार्थमेव तर्हि । इद्दरिद्रस्य [ ११४ ] इति । वक्ष्यत्येतद्दरिद्रातेरार्धधातुके लोपः सिद्धश्च प्रत्ययविधाविति+ । अतोऽप्युत्तरार्थम् । भियोऽन्यतरस्याम् [ ११५ ] । अभ्यस्तस्येत्येव । अतोऽप्युत्तरार्थमेव । जहातेश्च [ ११६ ] । अभ्यस्तस्येत्येव । अतोऽप्युत्तरार्थम् । आ च हौ [ ११७ ] । हावित्युच्यते । अभ्यस्तस्येत्येव। अतोऽप्युत्तरार्थम् । लोपो यि [ ११८ ]। अभ्यस्तस्येत्येव । अतोऽप्युत्तरार्थम्। घ्वसोरेद्धावभ्यासलोपश्च [ ११९ ] इति । हावित्युच्यते ।

तदेव तर्हि प्रयोजनं श्नसोरल्लोप इति । ननु चोक्तं श्नम्सार्वधातुक एवास्तेरप्यार्धधातुके भूभावेन भवितव्यमिति ।

अनुप्रयोगे तु भुवाऽस्त्यबाधनं स्मरन्ति कर्तुर्वचनान्मनीषिणः ।

अनुप्रयोगे तु भुवाऽस्तेरबाधनमिष्यते । ईहामास ईहामासतुः ईहामासुरिति । किंच स्याद्यद्यत्र लोपः स्यात् ।

लोपे द्विर्वचनासिद्धिः ।

---

प्र०—आकारलोपे वरेऽजादेशस्य स्थानिवत्त्वं निषिध्यते । यदि चात्र श्नाभ्यस्तयोरात इत्यालोपः स्यात्स्थानिवत्प्रतिषेधोऽनर्थकः स्यात् । ई हल्यघोरितीत्वमत्र प्राप्नोतीति चेद्वक्ष्यत्येव तत्प्राप्तिमिति वक्ष्यमाणाद्भेदाभावः । एवं तर्हि भाष्यकार आल्लोपप्राप्तिमभ्युपेत्य परिहारान्तरमाह—**नैतदाकारान्तमिति** । या य इति स्थिते सन्यङन्तस्य प्रथमस्यैकाचो द्विर्वचनमिति याय् इत्यस्य द्विर्वचनं ततो यायाय् इत्यभ्यस्तमाकारान्तं न भवति । ननु यायाय्शब्दस्याभ्यस्तसंज्ञायां यलोपे कृते भवत्येवावशिष्टस्याभ्यस्तसंज्ञा । एवं तर्ह्युपदेशग्रहणानुवृत्त्योपदेशे यदाकारान्तमभ्यस्तं तस्याऽऽल्लोपो नतु कृते यलोप इति मत्वा परिहारः । **अभ्यस्तस्येत्येवेति** । ननु च

---

उ०—वत्त्वादातो लोप इत्यालोपे प्राप्ते वरेऽजादेशस्य स्थानिवत्त्वं निषिध्यत इत्यर्थः । एवं तर्हि **एवमिति** । सत्यामप्याल्लोपाप्राप्ताविति शेषः । **अभ्युपेत्येति** । यद्यपि स्थानिवत्त्वनिषेधसामर्थ्यादाल्लोपाप्राप्तिरेव तथाऽपि तत्प्राप्तिमभ्युपगम्य न्यायव्युत्पादनाय परिहारान्तरमुच्यत इत्यर्थः । वस्तुतस्त्वीहल्यघोरित्येतत्प्राप्तिसाधारणं समाधानम् । अत एव सांप्रतपुस्तकेषु ईहल्यघोरित्युत्तरं ‘ तत्रापि श्नाभ्यस्तयोरित्येव ’ इत्येवोपलभ्यते नतु ‘ ननु चेदमस्ति ’ अप्सु यायावर इत्यादिग्रन्थ इत्याहुः । **यलोप इति**। लोपो व्योरित्यनेन । **उपदेशग्रहणानुवृत्त्येति** । स्यसिच्सीयुट्तासीत्यतः । वस्तुतोऽल्लोपासिद्धत्वेनापि यायावरः परिहर्तुं शक्यः । अत्रेदं चिन्त्यम् । जहाति ददातीत्यादावीत्त्वाल्लोपयोर्वारणाय क्ङितीत्येतत्संबन्धावश्यकत्वेनैकदे-

---

+ ६. ४. ११४.

लोपे कृतेऽनच्कत्वाद्द्विर्वचनं न स्यात् । स्थानिवद्भावाद्भविष्यति ।

स्थानिवदिति चेत्कृते भवेद्द्वित्वे ।

कृते द्वित्वे लोपः प्राप्नोति । अस्तु तर्हि परस्य लोपः । अभ्यासस्य योऽकारस्तस्य दीर्घत्वं भविष्यति* ।

नैवं सिध्यति कस्मात्प्रत्यङ्गत्वाद्धवेद्धि पररूपम् ।

नैवं सिध्यति । कस्मात् । प्रत्यङ्गत्वात्पररूपं प्राप्नोति+ ।

तस्मिंश्च कृते लोपः ।

पररूपे च कृते लोपः प्राप्नोति ।

दीर्घत्वं बाधकं भवेत्तत्र ।

अत आदेः [ ७. ४. ७० ] इति दीर्घत्वं बाधकं भविष्यति ।

---

प्र०–बिभीवानित्यत्र प्राप्नोति । एवं तर्हि छान्दसः क्वसुरिति भाष्यकारस्य दर्शनं छन्दसि च दृष्टमनुविधीयते । **कृते द्वित्वे लोपः प्राप्नोतीति** । ननु च नियतकालत्वात्स्थानिवद्भावस्य कृते द्विर्वचने लक्षणप्रवृत्तिमन्तरेण स्वत एवाऽऽदेशरूपमवतिष्ठत इति लोपस्य कथं प्राप्तिरुच्यते । पुनः प्रवृत्तिर्लक्षणस्येति स्थानिवद्भावप्रकरणे प्रतिपादितम् । **अस्तु तर्हीति** । अनन्त्यविकारेऽन्त्यसदेशस्येति वचनात् । अथवा क्ङित्यनन्तरस्याकारस्य लोपः । तत्र येन नाव्यवधानमित्येकवर्णव्यवहितस्य लोपः । **दीर्घत्वमिति** । अत आदेरित्यनेन । **प्रत्यङ्गत्वादिति** । वर्णाश्रयत्वात्पररूपमन्तरङ्गं तत्र कृतेऽल्लोपे च सतुः सुरिति प्राप्नोति । **दीर्घत्वमिति** । येन नाप्राप्तिन्यायेन

---

उ०–इयुक्तिरियम् । ननु चेदमस्तीत्यादिः । **ननु बिभीवानिति** । भियोऽन्यतरस्यामित्यत्रासति सार्वधातुकग्रहणे क्वसावन्त्यस्येत्त्वविकल्पः स्यादित्यर्थः । **छान्दस इति** । बिभीवानित्यत्रेत्यर्थः । **दृष्टमिति** । ततश्चायमत्र विधिर्न भवतीत्यर्थः । भाष्ये–अतोऽप्युत्तरार्थम् । आ च हौ हावित्युच्यतेऽभ्यस्तस्येत्येवेति च विनाऽपि समुच्चयदर्शनादित्येव वोच्यत इत्यर्थः । **नियतकालत्वादिति** । द्विर्वचन एव कर्तव्य इत्यवधारणान्नियतकालत्वं स्थानिवत्त्वस्योक्तम् । तत्र कृते द्वित्व आदेशरूपमेव चक्रतुरित्यादौ भवतीति पुनर्लोपाप्राप्तिरित्यर्थः । रूपातिदेश आह—**पुनः प्रवृत्तिरिति** । अत एव निन्यतुरित्यादौ पूर्वं प्रवृत्तोऽपीयङ् द्विर्वचनकालेऽपहृत इति पुनःप्रवृत्तौ प्राप्तायामनेकाच्त्वाद्यणा बाध्यत इत्यर्थः । परस्यैव लोप इति नियमः कथमत आह—**अनन्त्येति** । **अथवेति** । आद्यस्योत्तरेणाव्यवधानादिति भावः । अनर्थकत्वाच्चेत्यपि बोध्यम् । प्रत्यङ्गत्वादित्यस्यान्तरङ्गत्वादित्यर्थ इत्याह—**वर्णाश्रयत्वादिति** । वार्णादाङ्गमित्यनाश्रित्येदम् । अतोऽन्तरङ्गस्य कथं बहिरङ्गं बाधकमत आह–**येन नेति** ।

---

*७ ४. ७०. +६, १. ९७.

इदं तर्हि प्रयोजनं सार्वधातुके भूतपूर्वमात्रेऽपि यथा स्यात् । कुर्विति* ।

**श्नसोरल्लोपः ॥ ६ । ४ । १११ ॥**

अथात्र तपरकरणं किमर्थम् । इह मा भूत् । आस्ताम् आसन् । नैतदस्ति प्रयोजनम् । आटो+ऽसिद्धत्वान्न भविष्यति ।

**इद्दरिद्रस्य ॥ ६ । ४ । ११४ ॥**

**दरिद्रातेरार्धधातुके लोपः ॥ १ ॥**

दरिद्रातेरार्धधातुके लोपो वक्तव्यः ।

**सिद्धश्च प्रत्ययविधौ ॥ २ ॥**

स च सिद्धः प्रत्ययविधौ । किं प्रयोजनम् । दरिद्रातीति दरिद्रः×। आकारान्तलक्षणः÷ प्रत्ययविधिर्मा भूदिति ।

न दरिद्रायके लोपो दरिद्राणे च नेष्यते ।

---

**प्र०**—पररूपं बाधित्वा दीर्घत्वं भविष्यतीत्यर्थः । **कुर्विति** । अत्र न लुमताऽङ्गस्येति प्रत्ययलक्षणप्रतिषेधादुत्त्वं न स्यादिति भूतपूर्वगत्यर्थात्सार्वधातुकग्रहणाद्भवति ।

**श्नसो०** । **आस्तामिति** । लङ् ताम् । अल्लोपे च कृते तस्यासिद्धत्वादाट् । **नैतदस्तीति** । अत्र प्रत्याख्यातं तपरकरणं परस्तात्तु ज्ञापकत्वमस्य वक्ष्यते । इनसोरत्वे तकारेण ज्ञाप्यते त्वेत्वशासनमिति ।

**इद्द०** । **सिद्धश्चेति** । आर्धधातुक इति विषयसप्तमीत्यर्थः । **आकारान्तलक्षण इति** । यद्यार्धधातुक इति परसप्तमी स्यात्तदा दरिद्रातीति दरिद्र इत्यत्र श्याद्व्यधेति णे कृते द्वयोरानित्ययोः परत्वाद्युक्स्यात् । लोपस्य शब्दान्तरप्राप्त्याऽनित्यत्वं युकस्तु लोपे कृतेऽप्राप्त्याऽनित्यत्वम् । अथाऽऽकृतिपक्षे नित्यत्वादाल्लोपस्तथाऽप्यदरिद्र इत्यत्राच्कावशक्तावित्यन्तोदात्तत्वं न स्यात् । ईषद्दरिद्रमित्यातो

---

**उ०**—ननु प्रत्ययलक्षणेन हेः परत्वसंभवे भूतपूर्वगत्याश्रयणमयुक्तमित्यत आह—**अत्र नेति** । न च सार्वधातुक इत्यस्याभाव उकारान्ताङ्गावयवकरोतेरत उदित्यर्थेन तृज्वत्सूत्रे युवोरनाकावित्यादौ च वक्ष्यमाणभाष्यरीत्याऽङ्गसंज्ञायाः प्रत्ययलक्षणेनाङ्गीकारेण कुर्वित्यत्र **सिद्धमुत्त्वं सिद्धो लोपो** हिलुक आभीयासिद्धत्वाच्चेति वाच्यम् । इदं तर्हीत्यादिकुर्वित्यन्तभाष्यस्यैकदेश्युक्तित्वात्सार्वधातुकग्रहणं तु स्पष्टार्थमेवेति दिक् ।

**श्नसो०** । **तस्यासिद्धत्वादिति** । न चैवं लक्ष्ये लक्षणस्येति न्यायेन पुनर्लोपाप्रवृत्त्या तपरत्वाभावेऽपि न दोषः । लक्ष्यभेदात् ।

**इद्द०** । सौत्रो निर्देशः । **द्वयोः**। लोपयुकोः । **शब्दान्तरेति** । **अकृते** युक्याकारस्य कृते यकारस्येत्यर्थः । **अथाऽऽकृतीति** । अत्र पक्षे व्यक्तिभेदाविवक्षणाच्छब्दान्तरप्राप्त्या नानित्यत्वम् । **अच्कावशक्ताविति** । नञ उत्तरस्याजन्तस्य कान्तस्य

---

* ६. ४. १०६; ( १. १ ६३ ). + ६. ४. ७२. × ३. १. १३४. ÷ ३. १. १४१; ७.३. ३३.

---

१ क. 'थाप्याक'।

दिदरिद्रासतीत्येके दिदरिद्रिषतीति वा ।

**वाऽद्यतन्याम् ॥ ३ ॥**

अद्यतन्यां वेति वक्तव्यम् । अदरिद्रीत् अदरिद्रासीत् ।

**अत एकहल्मध्येऽनादेशादेर्लिटि ॥ ६ । ४ । १२० ॥**

**णकारषकारादेशादेरेत्त्ववचनं लिटि ॥ १ ॥**

णकारषकारादेशादेरेत्त्वं लिटि वक्तव्यम् । नेमतुः नेमुः । सेहे सेहाते सेहिरे* । किं पुनः कारणं न सिध्यति । अनादेशादेरिति प्रतिषेधः प्राप्नोति । तत्तर्हि वक्तव्यम् । न वक्तव्यम् । लिटाऽत्राऽऽदेशादिं विशेषयिष्यामः । लिटि य आदेशादिस्तदादेर्नेति । अस्त्यन्यल्लिड्ग्रहणस्य प्रयोजनम् । किम् । इह मा भूत् । पक्ता पक्तुम् । नैतदस्ति प्रयोजनम् । क्ङितीति+ वर्तते । एवमपि पक्वः पक्ववानित्यत्र प्राप्नोति । अभ्यासलोपसंनियोगेनैत्त्वमुच्यते न चात्राभ्यासलोपं पश्यामः । एवमपि पापच्यतेऽत्र प्राप्नोति । दीर्घत्वमत्र बाधकं भविष्यति× ।

---

प्र०–युजिति युच् प्रसज्येत । **दिदरिद्रासतीति** । तनिपतिदरिद्राणामुपसंख्यानमिति व्यवस्थितविभाषाविज्ञानाल्लोपपक्ष इडागमः । लोपाभावपक्षे त्विडभावः । **अदरिद्रासीदिति** । यमरमेत्यत्र एकाच इत्यधिकारादेकाचः सगिटावित्येकीयमतमित्यनेकाचोऽपि भवतः । चिणि अदरिद्रि अदरिद्रायीति भवति ।

अतः० । **लिटि य आदेशादिरिति** । नत्वसत्वयोरनैमित्तिकत्वाल्लिण्निमित्तकत्वाभावः । **अभ्यासलोपसंनियोगेनेति** । अभ्यासलोपश्चेति चशब्दः समुच्चये, नत्वन्वाचये । **दीर्घत्वमत्रेति** । अभ्यासविकारेषु बाधका न बाधन्त इत्येतत्तु यत्र सर्वेषां प्रवृत्तिस्तत्राऽऽश्रीयते । यद्यपि कृते दीर्घत्व एत्वाभ्यासलोपप्रसङ्गस्तथाऽप्येत्वाभ्यासलोपयोः कृतयो-

---

उ०–चोत्तरपदस्थाशक्तौ गम्यमानायामन्त उदात्त इति तदर्थः । **युच् प्रसज्येतेति** । खलिष्यत इति भावः । ननु लोपपक्ष इट् तदभावे नेति कुतोऽत आह—**तनिपतीति** । वस्तुतस्त्विट्पक्ष आतो लोप इटि चेत्यालोपः । इडभावेऽनेन प्राप्तलोपस्य तु स निषेध इति व्यवस्थितविभाषात्वाङ्गीकारो वृथैवेति बोध्यम् । अद्यतनीशब्देन पूर्वाचार्यप्रसिद्ध्या लुङुच्यते ।

अतः० । **भाष्ये लिटि य इति** । सौत्रत्वाच्च वृत्तिरिति भावः । **समुच्चीयत इति** । तस्य प्रसिद्धतरत्वादिति भावः । अन्वाचयस्तु गमके सत्येवेति तात्पर्यम् । भाष्ये **दीर्घत्वमत्र बाधकमिति** । परत्वादिति भावः । **इत्येतत्त्विति** । सर्वेषां प्रवृत्त्या यत्रोत्सर्गापवादयोरविरोधस्तत्रायं न्यायो यथा नर्नर्तीत्यादावुरदत्वे रुगादयः क्रियन्ते । इह तु विरोधादयं न्यायो नेति भावः । तमेव विरोधं दर्शयति—**यद्यपीति** । इदं

---

* ६. १. ६५; ६४. + ६. ४. ९८. × ७. ४. ८३.

नाप्राप्तेऽभ्यासविकार एत्त्वमारभ्यते तद्यथाऽन्यानभ्यासविकारान्बाधत एवं दीर्घत्वमपि बाधेत । सत्यमेवमेतत् । अभ्यासविकारेष्वपि तु ज्येष्ठमध्यमकनीयांसः प्रकारा भवन्ति । तत्र ह्रस्वहलादिशेषावुत्सर्गौ* तयोर्दीर्घत्वमपवाद एत्त्वं च । अपवादविप्रतिषेधाद्दीर्घत्वं भविष्यति । इह तर्हि बभणतुः बभणुरित्यभ्यासादेशस्यासिद्धत्वादेत्त्वं प्राप्नोति+ ।

**फलिभजिग्रहणं तु ज्ञापकमभ्यासादेशसिद्धत्वस्य ॥ २ ॥**

यदयं फलिभज्योर्ग्रहणं करोति× तज्ज्ञापयत्याचार्यः सिद्धोऽभ्यासादेश एत्त्व इति । यद्येवं

**प्रथमतृतीयादीनामादेशादित्वादेत्त्वाभावः ॥ ३ ॥**

प्रथमतृतीयादीनामपि÷ तर्ह्यादेशादित्वादेत्त्वं न प्राप्नोति । पेचतुः पेचुः । देभतुः देभुः ।

**न वा शसिदद्योः प्रतिषेधो ज्ञापको रूपाभेद एत्त्वविज्ञानस्य ॥ ४ ॥**

न वैष दोषः । किं कारणम् । शसिदद्योः प्रतिषेधो ज्ञापको रूपाभेद एत्त्वविज्ञानस्य । यदयं शसिदद्योः प्रतिषेधं शास्ति* तज्ज्ञापयत्याचार्यो रूपाभेदेन य आदेशादयो न तेषां प्रतिषेधो भवतीति ।

---

प्र०—दीर्घत्वाप्रसङ्ग इति विरुद्धत्वाद्[1]बाधकत्वाभावः[2] । **नाप्राप्त इति** । क्वचिद्ध्रस्वः क्वचिद्धलादिः शेषश्च प्राप्नोति । **ज्येष्ठमध्यमकनीयांस इति** । मध्यमापेक्षयोत्सर्गस्य प्रकर्षसद्भावात्कनीयानुत्सर्गोऽल्पतर इत्यर्थः । मध्यमो यः कस्यचिद्बाधकः । कस्यचिद्बाध्यः । ज्येष्ठो यो बाधकस्यापि बाधकः । **असिद्धत्वादिति** । पूर्वत्रासिद्धमिति लक्षणेनाचकणतुरित्यादावेव तु स्यात् । **पेचतुरिति** । प्रकृतिचरः प्रकृतिचरः प्रकृतिजशां

---

उ०—चिन्त्यम् । नुकि कृतेऽजन्ताभ्यासाभावेन दीर्घाप्राप्त्या दीर्घोऽकित इति धर्मिग्राहकमानविरोधान्मानादीनां दीर्घे कृत इत्त्वाप्राप्त्या मीमांसत इति तदुदाहरणपरगुणो यङ्लुकोर्मान्बधेत्यादिसूत्रस्थभाष्यविरोधाच्च । तस्माज्ज्ञापकसिद्धस्यासार्वत्रिकत्वेनानित्यत्वात्तस्यात्रानाश्रयणमिति भगवतो भाष्यकारस्याभिप्रायः । **क्वचिद्ध्रस्व इति** । अभ्यासविकारेष्वेतौ द्वावुत्सर्गौ । तयोरन्येऽपवादा इति । ननु विनाऽवधिं ज्येष्ठत्वादिकं न संभवतीत्यत आह—**मध्यमापेक्षयेति** । प्रकर्षो दुर्बलत्वरूपबाध्यत्वमात्रकृतः । ज्येष्ठत्वमपि तत एवेत्याह—**ज्येष्ठो य इति** । तत्र दीर्घावकाशो बाभाम्यते । एत्त्वस्य पेचतुः । पापच्यत इत्यत्रोभयप्राप्तौ दीर्घत्वेनायं विधिर्बाध्यते । नन्वनादेशादेरिति व्यर्थं स्यादत

---

* ७. ४. ५९; ६०. + ८. ४. ५४; ८. २. १. × ६. ४. १२२. ÷ ८. ४. ५४. * ६. ४. १२६.

---

१ क. °त्वादत्र बा° । २ क. °त्वाभावाभा° ।

**दम्भ एत्त्वम् ।**

दम्भ एत्त्वं वक्तव्यम् । देभतु देभुः । किं पुनः कारणं न सिध्यति ।

**नलोपस्यासिद्धत्वात् ॥ ५ ॥**

असिद्धो नलोपस्तस्यासिद्धत्वादेत्त्वं न प्राप्नोति* ।

**नशिमन्योरलिट्येत्त्वम् ।**

नशिमन्योरलिट्येत्त्वं वक्तव्यम् ।

**छन्दस्यमिपचोरपि ।**

छन्दस्यमिपचोरपीति वक्तव्यम् । किं प्रयोजनम् ।

अनेशं मेनकेत्येतद्व्येमानं लिङि पेचिरन् ॥ १ ॥
यज् आयेजे वप् आवेपे दम्भ एत्त्वमलक्षणम् ।
असिद्धत्वान्नलोपस्य दम्भ एत्त्वं न सिध्यति ।
श्नसोरत्त्वे तकारेण+ ज्ञाप्यते त्वेत्त्वशासनम् ॥ २ ॥

अनित्योऽयं× विधिरिति ।

---

**प्र०**–प्रकृतिजश इत्यादेशादित्वम् । वचनं तु रेणतुर्येमतुरित्यादौ सावकाशम् । अभ्यासे चर्चेति जश्चरोः प्राप्तयोः स्थानेऽन्तरतम इति परिभाषाया व्यापारप्रदर्शनमिदं प्रकृतिचरां प्रकृतिचरः प्रकृतिजशां प्रकृतिजश इति । **अनेशमिति** । लुङ् मिपोऽम्भावः पुषादित्वादङादेशः । छन्दसीति पूर्वेणापि संबन्धाद्भाषायामेत्त्वाभावः । एवं तु मेनकेत्यपि भाषायां न प्राप्नोति । यदि त्विष्यते पृषोदरादित्वाद्भविष्यति । मनेराशिषि चेति वुन्प्रत्ययः । न यासयोरित्यत्राऽऽशिषि चोपसंख्यानमितीत्त्वाभावः । **व्येमानमिति** । विपूर्वादमतेस्ताच्छील्यादिषु चानश् । छान्दसः शपो लुक् । **पेचिरन्निति** । पचेरन्निति प्राप्ते छान्दसे एत्वहूस्वत्वे क्रियेते । **आयेजे इति** । लङ्इट्शप् । छन्दस्यपि दृश्यत इत्याट् । **दम्भ एत्वमलक्षणमिति** । लक्षणेन न प्राप्नोति । नलोपस्यासिद्धत्वादित्यर्थः । **श्नसोरत्त्व इति** । असिद्धत्वस्यानित्यत्वज्ञापनाय तकारः कृतः । नित्ये ह्यसिद्धत्व आसन्नित्यादावाटोऽसिद्धत्वाल्लोपो न भविष्यतीति किं तन्निवृत्त्यर्थेन तकारेण तेनासिद्धत्वस्याभावाद्दम्भ एत्वं सिध्यतीत्यर्थः ।

---

**उ०**–आह–**चकणतुरिति** । अत्र कुहोश्चुरिति चुत्वं तच्च नासिद्धम् । **रेणतुरिति** । अत्र जश्त्वचर्त्वे न । झलोऽभावात् । ननु प्रकृतिचरामिति न सूत्रवार्तिकयोः पठ्यते तत्किमिदमत आह–**अभ्यास इति** । **एवं त्विति** । छन्दसीत्यस्य संबन्ध इत्यर्थः । 'चेष्टा व्यनेशन्निखिलास्तदाऽस्य' इति श्रीहर्षस्य तु प्रमादः । **चानशिति** । नतु शानच् । धातोः परस्मैपदित्वात् । **लुक्** । बहुलं छन्दसीत्यनेन । अत एव मुगभावः । **लङिति** । केचित्तु यजेराङ्पूर्वस्येदम् । अत एव मनुरायेजे इत्यत्रावग्रहं कुर्वन्तीत्याहुः ।

---

* ६.४ २४; २२. + ६. ४. १११. × ६. ४. २२.

## थलि च सेटि ॥ ६ । ४ । १२१ ॥

थल्ग्रहणं किमर्थम् ।

**थल्ग्रहणमक्ङिदर्थम् ॥ १ ॥**

थल्ग्रहणं क्रियतेऽक्ङिदर्थम् । अक्ङित्येत्त्वं यथा स्यात् । पेचिथ शेकिथ । नैतदस्ति प्रयोजनम् । सेड्ग्रहणमेवात्राक्ङिदर्थं भविष्यति । इदं तर्हि प्रयोजनं समुच्चयो यथा विज्ञायेत । थलि च सेटि क्ङिति च सेटीति । किं प्रयोजनम् । पेचिव पेचिम । तत्र पचादिभ्य इड्वचनमिति वक्ष्यति+ तन्न वक्तव्यं भवति ।

इह कस्मान्न भवति । लुलविथ । गुणस्य प्रतिषेधात्+ । इहापि तर्हि न

प्र०— थलि० । **थल्ग्रहणमिति** । क्ङिति सेट्यत्त्वस्य सिद्धत्वात्सेड्ग्रहणमेवाक्ङिदर्थं भविष्यति थलेव च सेडक्ङिदिति प्रश्नः । **क्ङिति च सेटीति** । यथा पेचिव पेचिमेति । इदं च न नियमार्थं सेट्येव क्ङिति [ इति ] नियमे हि पेचतुरित्यादौ न स्यात् । किं तर्ह्येत्त्वस्य कालावधारणं क्रियते । यथा निष्ठायां सेटीत्यत्र । तेन पेचिवेत्यादाविटि कृत एत्त्वाभ्यासलोपौ भवतः । अन्यथैकाच इतीट्प्रतिषेधः प्रसज्येत । यदोपदेशग्रहणमनुदात्तविशेषणं नैकाज्विशेषणं तदा श्रूयमाणादेकाच इट्प्रतिषेधेन भाव्यमिति कृसृभृ इति सूत्रं विध्यर्थं भवति । ननु नियमार्थम् । तत्र पचेरेत्त्वाभ्यासलोपयोः कृतयोरेकाच्त्वादिट्प्रतिषेधप्रसङ्गे पचादिभ्य इड्वचनमिति वक्ष्यते । क्ङिति च सेटीति तु कालावधारणार्थे सति पूर्वमिट् ततं एत्त्वाभ्यासलोपावित्यानुपूर्व्या सिद्धं भवतीति नार्थो वचनेन । **लुलविथेति** । अत्रादेशे कृत एकहल्मध्यगतोऽकार इत्येत्त्वप्रसङ्गः । समुदायग्रहणे च लक्षणप्रतिपदोक्तपरिभाषोपतिष्ठते न वर्णमात्रग्रहणे । न चायमकारो गुणशब्दाभिनिर्वृत्त इति न शसदेति प्रतिषे-

उ०—थलि० । ननु क्रादिसूत्रस्य नियमार्थत्वेन पेचतुरित्यादाविटः सिद्धत्वात्किमनेन वचनेनेत्यत आह-**यदोपदेशग्रहणमिति** । नाप्येकाच इति विहितविशेषणमित्यपि बोध्यम् । अनेनास्य ग्रन्थस्यैकदेशयुक्तिता सूचिता । एवं च थल्ग्रहणं स्पष्टार्थमिति तत्त्वम् । **विध्यर्थमिति** । निषेधविध्यर्थमित्यर्थः । **आनुपूर्व्येति** । पूर्वं द्वित्व इट् तत एत्त्वादीति क्रमेणेत्यर्थः । **नार्थो वचनेनेति** । पचादिभ्य इड्वचनमित्यनेनेति भावः । नन्वस्याकारस्य लाक्षणिकत्वान्नायं दोषोऽत आह—**समुदायेति** । नन्वेवं सत्योत्, कृन्मेजन्त इत्यादिसूत्रस्थभाष्यस्वग्रन्थविरोधोऽत आह—**न वर्णमात्रेति** । तत्रौदन्तो निपात एजन्तः कृदित्यर्थान्न वर्णमात्रग्रहणमिति भावः । तस्या अनित्यत्वादिति तत्त्वम् । ननु न शसददेत्यादिना प्रतिषेधो भविष्यतीत्यत आह—**न चायमिति** । तत्र गुणशब्दः स्वरूपपरः । गुण इत्येवं योऽकार इति ।

* ७. २. ६३. + ६. ४. १२६.

प्राप्नोति । पेचिथ शेकिथ । गुणस्य योऽकार इत्येवमेतद्विज्ञास्यते । एवमपि शशरिथ । अत्र प्राप्नोति । गुणस्यैषोऽकारः । कथम् । वृद्धिर्भवति गुणो भवतीति रेफशिरा गुणवृद्धिसंज्ञकोऽभिनिर्वर्तते । अथवाऽऽचार्यप्रवृत्तिर्ज्ञापयति नैवंजातीयकानामेत्त्वं भवतीति यदयं तॄफलभजत्रपश्च [ ६, ४, १२२ ] इति तॄग्रहणं करोति ।

## राधो हिंसायाम् ॥ ६ । ४ । १२३ ॥

## राधादिषु स्थानिनिर्देशः ॥ १ ॥

राधादिषु स्थानिनिर्देशः कर्तव्यः । न कर्तव्यः । एकहल्मध्य इति* वर्तते । यद्येवं त्रेसतुः त्रेसुः रशब्दस्यैत्त्वं प्राप्नोति । अस्तु । अलोऽन्त्यस्य+ विधयो भवन्तीत्यकारस्य भविष्यति । अनर्थकेऽलोऽन्त्यविधिर्नेत्येवं न प्राप्नोति । नैतस्याः परिभाषायाः सन्ति प्रयोजनानि । अथवाऽत इति× वर्तते । एवमपि राधेर्न प्राप्नोति । आकारग्रहणमपि प्रकृतमनुवर्तते । क्व प्रकृतम् । श्नाभ्यस्तयोरातः [ ६. ४. ११२ ] इति । अथवा श्नसोरल्लोपः [ १११ ] इत्यत्र तपरकरणं प्रत्याख्यायते तत्प्रकृतमिहानुवर्तिष्यते । यदि तदनुवर्ततेऽत एकहल्मध्येऽनादेशादेर्लिटि [ १२० ] अस्य चेत्यवर्णमात्रस्यैत्त्वं प्राप्नोति । बबाधे ।

---

प्र०—धोऽपि नास्तीति प्रश्नः । गुणस्य योऽकार इति वैयधिकरण्येन संबन्ध आश्रीयते । लुलविथेत्यादावोकारस्यावादेशविधानाद्गुणस्याकार इति प्रतिषेधः प्रवर्तते । पेचिथेत्यादौ तु गुण एवाकारो न तु गुणस्येति प्रतिषेधाभावः । **एवमपीति** । गुण एवात्राप्यकारो नतु गुणस्येति प्रतिषेधाप्रसङ्गः । **गुणस्येति** । अवयव इत्यर्थः । ऋः स्थानेऽण् प्रसज्यमान एव रपरो भवति पूर्वभक्तश्च रेफ इत्ययं गुणः ।

राधो० । **राधादिषु स्थानिनिर्देश इति** । अलोऽन्त्यस्येति वचनादेत्वमन्त्यस्य प्राप्नोतीत्युपधाया इति वक्तव्यमित्यर्थः । **अथवाऽत इति** । ततो भ्रमादीनामेवै-

---

उ०—अन्यथा विधिप्रतिषेधयोरेकविषयत्वाद्विकल्पः स्यादिति भावः । **वैयधिकरण्येनेति** । गुणशब्दभावितसंबन्ध्यकार इत्यर्थः । अकारस्य गुणसंबन्धित्वं गुणस्थानिकावयवत्वेन बोध्यम् । व्याख्यानेन च साक्षात्परम्परया वा गुणशब्दभावितसंबन्ध्यकारग्रहणमिति भावः । **अयं गुण इति** । यदागमन्यायेन विशिष्ट एव गुणादिसंज्ञक इति भावः । एतच्चोरणित्यत्रोपपादितम् । एतेन पेचिथेत्यादौ व्यपदेशिवद्भावेन गुणावयवत्वसत्त्वान्निषेधापत्तिरिति निरस्तम् । गुणशब्दभावितसंबन्धीत्यर्थकरणात् ।

**भ्रमादीनामेवैत्त्वमकारस्येति** । एवो भिन्नक्रमः । अकारस्यैवैत्त्वं नान्त्यस्येत्यर्थः ।

---

* ६. ४. १२०. + १ १. ५२. × ६. ४. १२०.

अकारेण तपरेणावर्णं विशेषयिष्यामः। अस्यात इति । इहेदानीमस्येत्यनुवर्ततेऽत इति निवृत्तम् ।

**अर्वणस्त्रसावनञः ॥ ६ । ४ । १२७ ॥**

**मघवा बहुलम् ॥ ६ । ४ । १२८ ॥**

अर्वणस्तृ मघोनश्च न शिष्यं छान्दसं हि तत् ।

अर्वणस्तृ मघो॰ श्च न शिष्यम् । किं कारणम् । छान्दसं हि तत्। दृष्टानुविधिश्छन्दसि भवति ।

मतुब्वन्योर्विधानाच्च ।

मतुब्वनी खल्वपि च्छन्दसि विधीयेते* ।

छन्दस्युभयदर्शनात् ।

---

प्र०—त्वमकारस्य भवति। **अकारेणेति**। समुच्चयेऽत इत्यनर्थकं स्यादिति विशेषणविशेष्यभावाश्रयः।

**अर्वणस्तृ०** । **मघवा बहुलम्** । **छान्दसमिति** । छन्दसीवनिपाविति वनिबस्ति मतुप् चेति प्रत्ययद्वयेन रूपद्वयस्य सिद्धत्वान्नार्थः सूत्रद्वयेन । तत्रैतत्स्यात्सर्वत्र रूपद्वयप्रसङ्गोऽत आह—**दृष्टानुविधिरिति** । भाषाशब्दा अपि नियतविषयाः किं पुनश्छान्दसाः । तत्र ऋ इत्यस्य विचि गुणे कृतेऽरिति रूपं तस्मान्मतुप्यर्वन्तावित्यादि भवति । वनिप्यर्वण इत्यादि भवति । मघशब्दादपि प्रत्ययद्वये यथाविषयं रूपद्वयं सिद्धम् । एवं चार्वच्छब्दस्य मघवच्छब्दस्य च भाषायां नास्ति प्रयोग इत्युक्तं भवति ।

---

उ०— **अवर्णस्त्र०**। ननु च्छान्दसत्वेन प्रत्याख्यानमयुक्तम् । छान्दसेऽपि साधुत्वान्वाख्यानस्य कर्तव्यत्वादत आह—**छन्दसीति** । वार्तिके मतुब्वन्योर्विधानाच्चेति चो हेताविति तात्पर्यम् । **सर्वत्रेति** । सावपीत्यर्थः । यद्यपि भाषायामपि दृष्टमेवानुविधीयते तथाऽपि कैमुतिकन्यायप्रदर्शनायेदमुक्तमित्याह—**भाषाशब्दा अपीति** । यथा वचेरन्तिपरस्य प्रयोगाभाव इति भावः । मघोन इत्यादौ यस्येति लोपाभावस्तु च्छान्दसत्वाद्बोध्यः । श्वयुवमघोनामिति निर्देशाद्वा । **विचीति** । अन्येभ्योऽपि दृश्यत इति विच् । **मघशब्दादपीति** । मघशब्दो धननाम । **अतिप्रसङ्गमाहऽऽह—यथाविषयमिति** । **भाषायां नास्ति प्रयोग इति** । असिद्धवत्सूत्रेऽप्युक्तस्याव्युत्पन्नप्रातिपदिकरूपस्यापि भाषायां नास्ति प्रयोगः । नियतविषयत्वाच्छब्दानामित्यपि बोध्यम् । भाषायामपि क्वचिद्दृश्यमानप्रयोगास्त्वसाधव एव । सूत्रारम्भेऽप्यर्वन्शब्द इमान्यर्वण इत्यादौ दृश्यमानत्रभावस्य च्छान्दसत्वेनैव साधनमावश्यकमिति

---

*५, २, १०९,

उभयं खल्वपि च्छन्दांसि दृश्यते। इमान्यवर्णः पदानि। अनर्वाणं वृषभं मन्द्रजिह्वम्।
इति श्रीभगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये षष्ठस्याध्यायस्य चतुर्थे पादे तृतीयमाह्निकम् ॥ ३ ॥

---

**पादः पत् ॥ ६ । ४ । १३० ॥**

**पाद उपधाह्रस्वत्वम् ॥ १ ॥**

पाद उपधाह्रस्वत्वं वक्तव्यम्। द्विपदः पश्य।

**आदेशे हि सर्वादेशप्रसङ्गः ॥ २ ॥**

आदेशे हि सति सर्वादेशः प्रसज्येत। सर्वस्य द्विपाच्छब्दस्य त्रिपाच्छब्दस्य च पच्छब्द आदेशः प्रसज्येत येन विधिस्तदन्तस्य [ १. १. ७२ ] इति*। तर्हि वक्तव्यम्।

**न वा निर्दिश्यमानस्याऽऽदेशत्वात् ॥ ३ ॥**

न वा वक्तव्यम्। किं कारणम्। निर्दिश्यमानस्याऽऽदेशा भवन्तीत्येषा परिभाषा कर्तव्या। कः पुनरत्र विशेष एषा वा परिभाषा क्रियेतोपधाह्रस्वत्वं वोच्येत। अवश्यमेषा परिभाषा कर्तव्या। बहून्येतस्याः परिभाषायाः प्रयोजनानि। कानि।

---

प्र०— इत्युपाध्यायजैयटपुत्रकैयटकृते भाष्यप्रदीपे षष्ठस्याध्यायस्य चतुर्थे पादे तृतीयमाह्निकम् ॥

**पादः।** **आदेशे हीति।** पादन्तस्याङ्गस्य पदादेशो विधीयमानोऽनेकाल्त्वात्सर्वादेशः प्राप्नोति। **न वेति।** यद्यपि पाच्छब्देन तदन्तः समुदायः प्रत्याय्यते तथाऽपि यो निर्दिश्यते यतः षष्ठी श्रूयते तस्यैव षष्ठी स्थानेयोगेति वचनादादेशो नतु प्रतीयमानस्य। यद्यप्युच्चार्यमाणस्योऽऽदशेन संबन्धाभावस्तथाऽप्यनुकार्यानुकरणयोर्भेदस्याविवक्षितत्वादेव-मुक्तम्। तत्र यथाऽलोऽन्त्यस्येति वचनाद्रुहः प इत्युक्तेरुहिहकारस्य पकारो भवत्येवं पाच्छ-

---

उ०— वरं तदकरणमित्याह—**भाष्य उभयं खल्वपीति।** अनर्वाणं वृषभमिति तु दृष्टान्तार्थम्। मघवन्शब्दे सूत्रकृतोऽपि विकल्पस्येष्टत्वेनार्वञ्छब्दविषयकमेवोदाहरणदानमिति बोध्यम्। इति श्रीशिवभट्टसुतसतीगर्भजनागोजीभट्टकृते भाष्यप्रदीपोद्द्योते षष्ठस्याध्यायस्य चतुर्थे पादे तृतीयमाह्निकम् ॥

**पादः पत्।** भाष्ये **येन विधिरिति।** तया परिभाषया समुदायस्य स्थानिवत्त्वादिति भावः। **षष्ठी स्थान इति।** इदं हि सूत्रं निर्दिश्यमानस्याऽऽदेशा इत्यर्थकतया तत्रैव सूत्रे भाष्ये स्थापितम्। **यद्यप्युच्चार्यमाणस्येति।** किंतु तत्प्रत्यायितस्यानुकार्यस्येत्यर्थः।

---

* १. १. ५५.

---

१ ख. 'स्यानुकरणस्याऽऽदे'। २ क 'स्तेह'।

**प्रयोजनं सुप्तिङादेशे ॥ ४ ॥**

सुप् । कुमार्याम् किशोर्याम् । खट्वायाम् मालायाम् । तस्याम् यस्याम् । आड्याट्स्याट्सु कृतेषु साड्याट्स्याट्कस्याऽऽम्प्राप्नोति* । निर्दिश्यमानस्याऽऽदेशा भवन्तीति न दोषो भवति । इदमिह संप्रधार्यम् । आड्याट्स्याटः क्रियन्तामामिति किमत्र कर्तव्यम् । परत्वादाम् । नित्या आड्याट्स्याटः । कृतेऽप्यामि प्राप्नुवन्त्यकृतेऽपि । अनित्या आड्याट्स्याटः । अन्यस्य कृत आमि प्राप्नुवन्त्यस्याकृते शब्दान्तरस्य च प्राप्नुवन्तोऽनित्या भवन्ति । उभयोरनित्ययोः परत्वादाम् । इदं तर्हि । तस्यै यस्यै । स्याटि कृते सस्याट्कस्य स्मैभावः प्राप्नोति+ । निर्दिश्यमानस्याऽऽदेशा भवन्तीति न दोषो भवति । यस्तर्हि निर्दिश्यते तस्य कस्मान्न भवति । स्याटा व्यवहितत्वात् । सुप् । तिङ् । अरुदिताम् अरुदितम् अरुदितेति । इटि कृते सेट्कस्य ताम्तम्तामादेशाः प्राप्नुवन्ति× । निर्दिश्यमानस्याऽऽदेशा भवन्तीति न दोषो भवति । इदमिह संप्रधार्यम् । इट् क्रियतां ताम्तम्ताम इति किमत्र कर्तव्यम् । परत्वादिडागमः । अन्तरङ्गास्ताम्त-

---

प्र०—ब्दप्रत्यायिततदन्तसमुदायस्य पाच्छब्दस्य पदादेशः । न **दोषो भवतीति** । तत्रैवं वक्तव्यम् । यो निर्दिश्यते तस्याऽऽगमैर्व्यवधानादाम् न प्राप्नोति । अत एव परत्वाश्रयेणाव्यवधानं कर्तुमाह—**इदमिहेति** । आडादीनामवकाशः खट्वायाः कुमार्याः सर्वस्यामिति । आमोऽवकाशः कृतेष्वाडादिषु वचनाद्व्यवधानेऽपि प्रवर्तनात् । यदि तु प्राप्तेष्वाडादिष्वादेश आरभ्यत इत्युच्यते ततोऽपवादत्वादामा तेषां बाधः प्राप्नोतीत्यागमानामादेशस्य चात्र समावेश एष्टव्यः । **सेट्कस्येति** । प्राग्लादेशेभ्यो धात्वधिकार इत्यस्मिन्पक्षेऽवध्यनुपादानाद्व्यवधानात्तामादीनामप्रसङ्ग इति नोच्यते । **अन्तरङ्गा इति** । प्राग्लादेशेभ्यो धात्वधिकारात्तामादयोऽन्तरङ्गाः ।

---

उ०—**भेदस्याविवक्षितत्वादिति** । सादृश्यमूलिका च तदविवक्षेति । **समुदायस्य पाच्छब्दस्येति** । तदवयवस्य पाच्छब्दस्येत्यर्थः । क्वचित्तथैव पाठः । **तत्रैवमिति** । निर्दिश्यमानपरिभाषया दोषाभावे कथितेऽयमपरो दोषः प्राप्नोतीत्यर्थः । अत्रैवमिति क्वचित्पाठः । प्रतिवाद्यन्तरेणैवं वक्तव्यम् । अतः परिभाषया दोषनिरासोऽसिद्धोऽतः प्रकारान्तरेण परिहारः कथ्यत इत्याह—**अत एवेति** । कृतेष्विति युक्तेर्न्यायविद्धत्वमाह—**यदि त्विति** । **एष्टव्य इति** । **इष्टिरूपेण** पठितव्य इत्यर्थः । अत एव क्रियायामित्यादिनिर्देशाः संगच्छन्ते । निर्दिश्यमानत्वाभावाद्विशिष्टस्य न व्यवधानात्केवलस्य नेत्येवमामो निरवकाशत्वाद्वचनसामर्थ्येन पूर्वं प्रवृत्तिस्ततः स्याडादय इति न दोषो भवतीत्यन्तभाष्यस्याऽऽशयः । इदमिहेत्यादिनैकदेशिना परत्वादामित्युक्ते परेण तस्या इत्यादौ परिभाषाप्रयोजने प्रदर्शित उभयसाधारण्येनाऽऽह—**यस्तर्हीति** परे । ननु निर्दिश्यमानपरिभाषाङ्गीकारेऽपि निर्दिश्यमानतसादीनामिटा व्यवधानान्न प्राप्नुवन्तीत्यत आह—**प्राग्लादेशेभ्य इति** । तमभिव्याप्य धातोरित्यधिकारेऽपि विहितपञ्चम्या-

---

* ७. ३. ११२; ११३; ११४; ११६. + ७. १. १४. × ७. २ ७६; ३. ४. १०१.

---

१ क 'दायस्य प' । २ ख. अत्रै' ।

न्तामः । इदं तर्हि । क्रियास्ताम् क्रियास्तम् क्रियास्त । यासुटि* कृते सयासुट्-कस्य तान्तन्तामः प्राप्नुवन्ति । निर्दिश्यमानस्याऽऽदेशा भवन्तीति न दोषो भवति ।

**ल्यब्भावे च ॥ ५ ॥**

ल्यब्भावे च प्रयोजनम् । प्रकृत्य प्रहृत्य । क्त्वान्तस्य ल्यप्प्राप्नोति+ । निर्दिश्यमानस्याऽऽदेशा भवन्तीति न दोषो भवति ।

**त्रिचतुर्युष्मदस्मत्त्यदादिविकारेषु च ॥ ६ ॥**

त्रिचतुर्युष्मदस्मत्त्यदादिविकारेषु च प्रयोजनम् । अतितिस्रः अतिचतस्रः । त्रिचतुरन्तस्य तिसृचतसृभावः प्राप्नोति× । निर्दिश्यमानस्याऽऽदेशा भवन्तीति न दोषो भवति । युष्मद् अस्मद् । अतियूयम् अतिवयम् । युष्मदस्मदन्तस्य यूयवयौ प्राप्नुतः+ । निर्दिश्यमानस्याऽऽदेशा भवन्तीति न दोषो भवति । त्यदादिविकारः । अतिस्यः उत्तमस्यः । अत्यसौ उत्तमासौ । त्यदाद्यन्तस्य त्यदादिविकाराः प्राप्नुवन्ति× । किमन्तस्य कादेशः प्राप्नोति÷ । अतिकः परमकः । निर्दिश्यमानस्याऽऽदेशा भवन्तीति न दोषो भवति ।

---

प्र०–**क्रियास्तामिति** । परत्वादन्तरङ्गत्वाद्वा यासुटि कृते तामादयः । **क्त्वान्तस्येति** । प्रत्ययग्रहणपरिभाषया धातुप्रत्ययसमुदायस्य ल्यपः प्रसङ्गः । कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणमित्येषा तु परिभाषाऽनञ्पूर्व इति वचनान्नोपतिष्ठते । सामान्यशब्दस्यापि ल्यपः प्रकरणाद्यपेक्षस्य विशेषावसायहेतुत्वं स्यात् । **अतिस्य इति** । शोभनःस्य इत्युत्तरपदार्थप्रधानस्तत्पुरुषो द्रष्टव्यः । उपसर्जने तु त्यदाद्यत्वाभावः । अत्र पदाङ्गाधिकार इति वचनात्तदन्तस्य समुदायस्यातिशब्दतकारस्यापि तदोः सः साविति सत्वप्रसङ्गः । अत्वं त्वलोऽन्त्यस्येति वचनादन्त्यस्यैव भवतीति तत्र विशेषाभावः । **परमक इति** । अनेकाल्त्वात्सर्वादेशः कः प्राप्नोति । ननु न सत्वविधौ त्यदादीनामिति

---

उ०–श्रयणान्न दोषः । निर्दिष्टपरिभाषानपेक्षणाच्च । तामादीनामन्तरङ्गत्वमित्यपि बोध्यम् । **अन्तरङ्गत्वाद्वेति** । आद्युदात्तश्चेति भाष्यरीत्यां लावस्थायां यासुडिति तत्त्वमिति भावः । धातोर्विहिततसादीनामित्यर्थात्तेन व्यवधानादप्रसङ्ग इति न शङ्क्यम् । क्त्वान्तस्य ल्यप्प्राप्तिमुपपादयति–**प्रत्ययग्रहणेति** । ननु कृद्ग्रहणपरिभाषया सोपसर्गस्य समुदायस्य ल्यप्प्राप्तिर्वक्तुमुचितेत्यत आह–**कृद्ग्रहणेति** । गत्याद्यसमभिव्याहारे केवलस्य ग्रहणं तत्समभिव्याहारे तु तद्विशिष्टस्य ग्रहणमिति परिभाषार्थ इति भावः । **वचनादिति** । तत्प्रवृत्तौ हि नञ्पूर्वे प्राप्त्यभावात्तदनर्थकमिति तस्या अत्राप्रवृत्तिं ज्ञापयतीत्यर्थः । अत एव तत्सूत्रे भाष्ये वक्ष्यति प्रत्ययग्रहणे यावद्ग्रहणं तावद्भवितुमर्हतीति । अत्रेदं ज्ञापकं चिन्त्यम् । गतिकारकसमभिव्याहारे तद्विशिष्टस्य ग्रहणात्तदसमभिव्याहारे नञ्पूर्वे प्राप्त्या तस्य चारितार्थ्यादित्यन्ये । नन्वेवं सर्वत्र यशब्दमात्रश्रवणेऽर्थविशेषावसायो न स्यादत आह–**सामान्यशब्दस्यापीति** । **सत्वविधाविति** । तकारदकारावेव स्थानिनौ तद्विशेषणं च त्यदादीनामिति त्यदाद्यन्ते

---

* ३. ४. १०३; १०४. + ७. १. ३७. × ७. २. ९९. ÷ ७. २. ९३. × ७. २. १०६. ÷ ७. २. १०३.

## उदः पूर्वत्वे ॥ ७ ॥

उदः पूर्वत्वे प्रयोजनम् । उदस्थाताम् । अटि कृते साट्कस्य पूर्वसवर्णः प्राप्नोत्युदः स्थास्तम्भोरिति* । निर्दिश्यमानस्याऽऽदेशा भवन्तीति न दोषो भवति । यस्तर्हि निर्दिश्यते तस्य कस्मान्न भवति । अटा व्यवहितत्वात् ।

सा तर्ह्येषा परिभाषा कर्तव्या । न कर्तव्या । उक्तं षष्ठी स्थानेयोगा [ १. १. ४९ ] इत्येतस्य योगस्य वचने प्रयोजनं षष्ठ्यन्तं स्थानेन यथा युज्येत यतः षष्ठ्युच्चारितेति+ ।

## वाह ऊठ् ॥ ६ । ४ । १३२ ॥

ऊडादिः कस्मान्न भवति । आदिष्टिद्भवतीत्यादिः प्राप्नोति× । संप्रसारणमित्यनेन यणः स्थानं ह्रियते÷ । यद्येवं

---

प्र०—स्थानषष्ठी का तर्हि तदोरित्येषेति कथं सत्वमतिशब्दतकारस्य परिह्रियते । एवं तर्हि त्यदादीनां गणसंनिविष्टानां यौ निर्दिश्येते तकारदकारौ तयोः सत्वाविधानाद्दतिप्रसङ्गाभावः ।

वाह० । ऊडादिरिति । यद्यपि च्छ्वोः शूडित्यत्रास्य ठित्वं प्रतिपादितं तथाऽपि यथाश्रुतं गृहीत्वा प्रश्नः । संप्रसारणमित्यनेनेति । वाक्यस्य भाविवर्णस्य वा संप्रसारणसंज्ञायां विज्ञायमानायां यणः स्थान ऊड्भवति । अथ यण आदिरूठ् कस्मान्न भवति। संप्रसारणप्रदेशान्तरेषु यण इति स्थानषष्ठ्याश्रयणादिहापि स्थानषष्ठ्येव युक्ता । यथोक्तं सप्तदशाऽऽदेशाः स्थानेयोगत्वं प्रयोजयन्तीति । ठिद्ग्रहणं तु वृद्ध्यर्थम् । यद्येवमिति । प्रष्ठवाह् अस् इति स्थिते वकारस्य संप्रसारणे पूर्वकादेशे च कृते गुण ओकारो ण्विप्रत्ययाश्रयः । ततो वृद्धिरेचीति वृद्धौ कृतायां प्रष्ठौह इत्यादि सिध्यति । अनकारान्ते चोपपदे छन्दसि ण्विर्न

---

उ०—स्थितयोरपि तदोः सत्वप्रसङ्गः परिभाषया न निवारितः । स्थानषष्ठीनिर्दिष्टविषयैव हि सा परिभाषेति शङ्कार्थः । एवं तर्हीति । परिभाषोपस्थानसामर्थ्यान्निर्दिश्यमानत्यदाद्यवयवतदोरेव सत्वमित्यर्थान्न दोष इति भावः । निर्दिश्यमानस्येत्यस्य निर्दिश्यमानं निर्दिश्यमानावयं च षष्ठ्यन्तं स्थानेन युज्यतं इत्यर्थ इति तात्पर्यम् ।

वाह ऊट् । यथाश्रुतमिति । यथाश्रुताष्टाध्यायीपाठेन टित्त्वेऽपि दोषो नावतरतीति प्रदर्शनायेति भावः । संप्रसारणमित्यनेन यणः स्थानं ह्रियत इति भाष्ये पाठः । ह्रियते प्राप्यते । यणः स्थाने क्रियत इति पाठस्तु सुगम एव । अथ यण आदिरिति । एवं च संप्रसारणग्रहणानुवृत्तिष्टित्त्वं चोभयमपि सप्रयोजनं भवतीति भावः । यथोक्तमिति । तिप्तस्झि इत्यत्र तिबादयः सप्तदश लस्येत्यस्य स्थानषष्ठीत्वं प्रतिपादयन्तीति । एक इट् तस्यावयवषष्ठीत्वमापादयितुं नालम् । त्यजेदेकं कुलस्यार्थ इति न्यायादेवमिहापीत्यर्थः । किमर्थं तर्हि ठित्त्वमत आह—ठिद्ग्रहणं त्विति । एत्येधत्यूठ्स्विति विशेषणार्थमित्यर्थः । ण्विप्रत्ययेति । वहश्चेति ण्विः । छन्दसि ण्विरिति । वस्तुतस्तु विभाषा पूर्वाह्णेतिसूत्रस्थभाष्यप्रामाण्याच्छ-

---

* ६. ४. ७१; ८. ४. ६१ + १. १. ४९. × १. १ ४६. ÷ १. ४. १३१; १. १. ४५.

**वाह ऊड्वचनानर्थक्यं संप्रसारणेन कृतत्वात् ॥ १ ॥**

वाह ऊड्वचनमनर्थकम् । किं कारणम् । संप्रसारणेन कृतत्वात् । संप्रसारणेनैव सिद्धम् । का रूपसिद्धिः प्रष्ठौहः पश्य ।

**गुणः प्रत्ययलक्षणत्वात् ॥ २ ॥**

प्रत्ययलक्षणेन गुणो* भविष्यति ।

**एज्ग्रहणाद्वृद्धिः ॥ ३ ॥**

एज्ग्रहणाद्वृद्धिर्भविष्यति+ ।

एवं तर्हि सिद्धे सति यद्वाह ऊठं शास्ति तज्ज्ञापयत्याचार्यो भवत्येषा परिभाषाऽसिद्धं बहिरङ्गलक्षणमन्तरङ्गलक्षण इति । किमेतस्य ज्ञापने प्रयोजनम् । पचावेदम् । पचामेदम् । असिद्धत्वाद्बहिरङ्गलक्षणस्याऽऽद्गुणस्यान्तरङ्गलक्षणमैत्वं न भवतीति× ।

**श्वयुवमघोनामतद्धिते ॥ ६ । ४ । १३३ ॥**

**श्वादीनां प्रसारणे नकारान्तग्रहणमनकारान्तप्रतिषेधार्थम् ॥ १ ॥**

श्वादीनां संप्रसारणे नकारान्तग्रहणं कर्तव्यम् । किं प्रयोजनम् । अनकारान्तप्रतिषेधार्थम् । अनकारान्तस्य मा भूत् । मघवता मघवते । तथा प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणं भवतीति यथेह भवति यूनः पश्येत्येवं युव-

---

प्र०—दृश्यत इति शाल्यूह इत्यादिसिद्ध्यर्थमप्यूठ्विधानं नोपपद्यते । सत्यपि वा प्रयोगे वत्यर्थे वर्तमानस्योहतेः क्विपि शाल्यूह इत्यादि भविष्याति । उपसर्गेऽप्युपपदे वहेर्ण्विश्छन्दसि नास्ति यतो वृद्धेर्बाधकं पररूपं प्रसज्येतेत्यूठ्विधानं सार्थकं स्यात् । **एवं तर्हीति** । संप्रसारणं यजादिप्रत्ययनिमित्तभसंज्ञाश्रयत्वाद्बाहिरङ्गमन्तरङ्गे ण्व्याश्रये गुणे कर्तव्येऽसिद्धमिति गुणो न स्यात्तदभावे रूपं न सिध्येदित्यूठ्विधानमसिद्धपरिभाषां ज्ञापयति । ननु नैतज्ज्ञापकसाध्यम् । लोकतः सिद्धत्वात् । प्रत्यङ्गवर्ती हि लोकः । नैतदस्ति । यत्र युगपदन्तरङ्गबहिरङ्गयोः प्राप्तिस्तत्र लौकिकन्यायाश्रयणाद्भवत्वन्तरङ्गम् । इह तु बहिरङ्गनिमित्तमन्तरङ्गमिति लौकिकन्यायानवतारः ।

**श्वयुव०** । **श्वादीनामिति** । मघवा बहुलमिति त्रादेशे कृत एकदेशविकृतस्यानन्यत्वा-

---

उ०—न्दसीत्यत्र न संबध्यते । तस्मादनभिधानात्तद्विषये ण्विर्नेति वक्तुं युक्तम् । **प्रत्यङ्गवर्तीति** । तथा चाचः परस्मिन्नित्यत्र भाष्य उक्तम् । पुरुषोऽयं प्रातरुत्थाय प्रथमं शरीरकार्याणि करोति ततः सुहृदां ततः संबन्धिनामिति । **इह त्विति** । यथा पचावेदमित्यत्रोभयोरेकप्रत्ययनिमित्ताङ्गकार्यत्वाभावादङ्गवृत्तपरिभाषाया नात्र विषयः । तस्या अभावाच्च ।

**श्वयुव०** । भाष्ये नकारान्तग्रहणं कर्तव्यमुक्तं वेति वार्तिकम् । तत्रोक्तं वेत्यंशमवता-

---

* ७, ३. ८६. + ६, १. ८८, × ६. १, ८७; ३. ४. ९३,

तीः पश्येत्यत्रापि स्यादिति । यत्तावदुच्यते नकारान्तग्रहणं कर्तव्यमिति न कर्तव्यम् ।

उक्तं वा ॥ २ ॥

किमुक्तम् । अर्वणस्तृ मघोनश्च न शिष्यं छान्दसं हि तदिति* । यदप्युच्यते तथा प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणं भवतीति यथेह भवति यूनः पश्येत्येवं युवतीः पश्येत्यत्रापि स्यादिति लिङ्गविशिष्टग्रहणे चोक्तम् । किमुक्तम् । न वा विभक्तौ लिङ्गविशिष्टाग्रहणादिति+ । अथवोपरिष्टाद्योगविभागः करिष्यते× । श्वयुवमघोनामतद्धिते । ततोऽल्लोपः । अकारस्य च लोपो भवति । ततोऽनः । अन इत्युभयोः शेषः ।

षपूर्वहन्धृतराज्ञामणि ॥ ६ । ४ । १३५ ॥

अथ किमिदं षपूर्वादीनां पुनर्वचनमल्लोपार्थमाहोस्विन्नियमार्थम् । कथं चाल्लोपार्थं स्यात्कथं वा नियमार्थम् । यद्यविशेषेणाल्लोपटिलोपयोः स प्रकृतिभाव-

प्र०—न्मघवतेत्यादौ संप्रसारणप्रसङ्गः । **अर्वणस्त्रिति** । मघवच्छब्दो मतुबन्त इत्यर्थः । **न वा विभक्ताविति** । यद्यपि विभक्तिमाश्रित्य संप्रसारणं न विधीयते तथाऽपि विभक्तौ विधीयत इति लिङ्गविशिष्टपरिभाषानुपस्थानम् । **अन इत्युभयोः शेष इति** । समुदायापेक्षणात् । न च त्रादेशे कृतेऽन्नन्तत्वमस्ति । एकदेशविकृतस्यानन्यत्वेनाप्यन्नन्तत्वं नास्ति । सामान्यातिदेशे विशेषानतिदेशात् । युवतिशब्दोऽप्यन्नन्तो न भवतीति तस्यापि संप्रसारणाभावः ।

**षपूर्व०** । **अथेति** । किमिदं विध्यर्थमथ नियमार्थमिति प्रश्नः । **यद्यविशेषेणेति** । प्रकृत्यैकाजित्यादिः प्रकृतिभावः प्राकरणिकविध्यपेक्षो न तु वृद्धिगुणापेक्षः । तत्र प्राकरणि-

उ०—स्यति—**यत्तावदिति** । प्रातिपदिकग्रहणे इत्यादिना नग्रहणस्य फलान्तरमुक्तम् । **छान्दसमिति** । अत एव वनिबन्ते संप्रसारणे यस्येति लोपाभावः । तत एव तान्ते संप्रसारणाभावोऽपीत्यर्थः । युक्त्यन्तरमप्याह—**मतुबन्त इति** । ततश्च शब्दान्तरत्वात्संप्रसारणाभाव इत्यर्थः । **तथाऽपि विभक्ताविति** । भस्य विधानाद्भत्वं च विभक्तौ परत इति यथाकथंचिद्विभक्तौ विधानेऽपि परिभाषानिषेधाङ्गीकारादित्यर्थः । नन्वनन्तरस्येति न्यायादनन्तरस्यैव शेषो न्याय्योऽत आह—**समुदायेति** । लक्ष्यानुरोधादिति भावः । **सामान्यातिदेश इति** । अन्नन्तत्वं हि मघवञ्छब्दस्य विशेषधर्मः, मघवतेत्यादावभावादिति भावः । यस्य स आदेशस्तत्त्वेन तद्ग्रहणं न्याय्यम् । आदेशश्चायं नस्य मघवञ्छब्दस्य वा न त्वनः । छिन्नपुच्छदृष्टान्तमूलको लौकिकन्यायोऽप्यत्र नास्ति । अर्धविकारेण प्रत्यभिज्ञानाभावादिति तात्पर्यम् । आभीयासिद्धत्वं त्वेतत्सूत्रविषये न । अनित्यत्वात् । अन्यथा मघवत इत्यसिद्धिरिति बोध्यम् ।

**षपूर्व०** । **ननु वृद्धीत्यादि** । तेन सांराविणं सांकौटिनमित्यादौ गुणवृद्ध्योः, इन्नन्तस्य

*६. ४. १२७. + ७. १. १. × ६. ४. १३४.

स्वतोऽल्लोपार्थम्* । अथ वणि टिलोपस्यैव प्रकृतिभावस्ततो नियमार्थम् । अत उत्तरं पठति ।

**षपूर्वादीनां पुनर्वचनमल्लोपार्थम् ॥ १ ॥**

षपूर्वादीनां पुनर्वचनं क्रियतेऽल्लोपार्थम् । अविशेषेणाल्लोपटिलोपयोः प्रकृतिभावः ।

**अवधारणे ह्यन्यत्र प्रकृतिभाव उपधालोपप्रसङ्गः ॥ २ ॥**

अवधारणे हि सत्यन्यत्र प्रकृतिभाव उपधालोपः प्रसज्येत । कथम् । यदि तावदेवं नियमः स्यात्षपूर्वादीनामेवाणीति भवेदिह नियमान्न स्यात् । सामनः वैमन इति ताक्षण्य इति प्राप्नोति । अथाप्येवं नियमः स्यात्षपूर्वादीनामण्येवेत्येवमपि भवेदिह नियमान्न स्यात् । ताक्षण्य इति सामनः वैमन इति तु प्राप्नोति । अथाप्युभयतो नियमः स्यात्षपूर्वादीनामेवाण्यण्येव षपूर्वादीनामित्येवमपि सामन्यः वैमन्य इति प्राप्नोति । तस्मात्सुष्ठूच्यते षपूर्वादीनां पुनर्वचनमल्लोपार्थमवधारणे ह्यन्यत्र प्रकृतिभाव उपधालोपप्रसङ्ग इति ।

**आतो धातोः ॥ ६ । ४ । १४० ॥**

**आतोऽनापः ॥ १ ॥**

आतोऽनाप इति वक्तव्यम् । इहापि यथा स्यात् । समासेऽनञ्पूर्वे क्त्वो ल्यप्

---

प्र०—कानि कार्याणि भेदेनापेक्ष्येरन्नभेदेन वेति पक्षद्वयोपपत्तिः । **अविशेषेणेति** । अल्लोपटिलोपसमुदायमपेक्ष्य प्रकृतिभावो विधीयते । **ताक्षण्य इति** । तक्ष्णोऽपत्यमिति सेनान्तलक्षणेति ण्यः । ये चाभावकर्मणोरिति प्रकृतिभावाट्टिलोपाभावः । अस्मान्नियमादल्लोपाभावः । **सामन इति** । साऽस्य देवतेत्यण् । अत्रान्निति प्रकृतिभावाट्टिलोपाभावेऽल्लोपप्रसङ्गः । **अथापीति** । तन्त्रस्याऽऽवृत्तेर्वाऽऽश्रयणात् । **सामन्य इति** । तत्र साधुरिति यत् ।

**आतो०** । **समास इति** । ननु सौत्रोऽयं निर्देश इति किं तदर्थेन योगविभागेन । एवं तर्हि यदा वैयाकरणा अनुकरणशब्दैर्व्यवहरन्ति तदर्थो योगविभागः । ते हि साधुभिर्व्यवहरमाणा

---

उ०—विधीयमानप्रकृतिभावेन न निवृत्तिः । एतत्प्रकरणस्थत्वाभावादिति भावः । **भेदेनेत्यादि** । भेदेनापेक्षायामनन्तरस्येति न्यायाट्टिलोपस्यैव प्रकृतिभाव इति पक्षः । तत्राऽऽद्ये नियमार्थम् । द्वितीये विध्यर्थम् । **अल्लोपटिलोपेति** । अत एव नैकाजिति नासूत्रीति भावः । ततश्चाल्लोपस्यापि प्रकृतिभावादप्राप्तवचनेन विधिरिति तात्पर्यम् । भाष्ये—**अन्यत्र प्रकृतिभाव इति** । एतदतिरिक्ते प्रकृतिभावविषय इत्यर्थः । **सेनान्तेति** । कारिलक्षणो ण्य इत्यर्थः । कथं पुनरेकेन वाक्येन नियमद्वयलाभोऽत आह—**तन्त्रेति** । अत्र प्रयोक्तुरतन्त्रेण प्रयोगः । बोद्धुरावृत्त्या बोधो, व्याख्यातृभ्यार्थ इति बोध्यम् ।

**आतो धातोः** । **वैयाकरणा इति** । सूत्रकारादिभ्योऽन्य इत्यर्थः । **साधुभिरिति** ।

---

* ६, ४, १३४; १४४; १६७,

[ ७. १. ३७ ] इति । अनाप इति किमर्थम् । खट्वायाम् मालायाम् । यद्यनाप इत्युच्यते कथं क्त्वायाम् । निपातनादेतत्सिद्धम् । किं निपातनम् । क्त्वायां वा प्रतिषेध इति* । यद्येवं नार्थोऽनाप इत्यनेन । कथं समासेऽनञ्पूर्वे क्त्वो ल्यबिति । निपातनादेतत्सिद्धम् । कथं हलः श्नः शानज्झौ [ ३. १. ८३. ] इति । एतदपि निपातनात्सिद्धम् । अथवा योगविभागः करिष्यते । आतः । आकारलोपो भवति । ततो धातोः । धातोश्चाऽऽकारस्य लोपो भवतीति ।

**मन्त्रेष्वाङ्यादेरात्मनः ॥ ६ । ४ । १४१ ॥**

**मन्त्रेष्वात्मनः प्रत्ययमात्रप्रसङ्गः ॥ १ ॥**

मन्त्रेष्वात्मनः प्रत्ययमात्रे लोपः प्रसङ्क्तव्यः । इहापि यथा स्यात् । त्मन्या समञ्जन् । त्मनोरन्तरस्थ इति । यदि प्रत्ययमात्रे लोप उच्यते कथमात्मन एव निर्मिमीष्वेति । तस्मान्नार्थः प्रत्ययमात्रे लोपेन । कथं त्मन्या समञ्जन् । त्मनोरन्तरस्थ इति । छान्दसत्वात्सिद्धम् । छान्दसमेतत् । दृष्टानुविधिश्छन्दसि भवति ।

प्र०—अभ्युदयभाजो भवन्ति । **क्त्वायामिति** । निपातनाल्लोपाभावः । याडागमश्च । सामान्यापेक्षं च निपातनं न सप्तम्यपेक्षामिति कृत्वा क्त्वाया इत्यपि भवति । ततो **धातोरिति** । इदं नित्यार्थं सत्पूर्वेण विकल्पं ज्ञापयति । सा च व्यवस्थितविभाषेति । आबन्तस्याऽऽल्लोपाभावोऽन्यस्य यथा प्रयोगं विकल्पः । केचित्स्त्रीलिङ्गपुंलिङ्गाश्रयं क्त्वायाः क्त्व इत्यादि रूपद्वयं व्याचक्षते ।

**मन्त्रे०** । आङिति पूर्वाचार्यप्रक्रियया तृतीयैकवचनग्रहणादव्याप्तिं मत्वाऽऽह—**मन्त्रेष्विति** । **त्मन्येति** । सप्तम्येकवचनस्य स्थाने याशब्द आदेशः । **छान्दसत्वादिति** । यथा

उ०—शास्त्रानुगमेनैव हि साधुत्वमिति भावः । अत्रानाप इति वार्तिककारोक्तेस्तस्य च क्त्वो ल्यबिति सौत्रप्रयोग एव च भगवतोदाहरणदानात् + तदनुकरण एव च कैयटेनोदाहरणदानादाकारान्तधातुप्रकृतिकातिरिक्ताकारान्तप्रातिपदिकाभाव इति लभ्यते । धातुग्रहणव्यावर्त्यं त्वाबन्ता एवेति बोध्यम् । **याडागमश्चेति** । सोऽपि याडाप इति वचनान्न प्राप्नोतीति भावः । नन्वात इत्यनेनैव सिद्धे धातोरिति व्यर्थमत आह—**नित्यार्थं सदिति** । इदं पूर्वस्य क्वाचित्कत्वं ज्ञापयतीति वक्तुं युक्तम् । **यथाप्रयोगमिति** । आबन्तप्रकृतिकाचारक्विबन्तप्रकृतिककर्तृक्विबन्ता न सन्त्येव । अनभिधानादिति भावः । **विकल्प इति** । क्त्वाश्चाविषयमेतत् । **स्त्रीलिङ्गेति** । क्त्वायां श्रुताविति स्त्रीलिङ्गस्य विशेष्यत्वेऽजादित्वाट्टाबिति भावः ।

**मन्त्रेष्वाङ्यादेः** । ननु च्छान्दसत्वेऽपि लक्षणाभावे कथं साधुत्वमत आह—**यथेति** । उद्रस्येत्यादिवदस्यापि साधुत्वमिति भावः ।

* ६. २. २.

\+ आकारान्तधातुप्रकृतिकादतिरिक्तं यदाकारान्तप्रातिपदिकं तदभाव इत्यर्थः ।

**आदिग्रहणानर्थक्यं चाऽऽकारप्रकरणात् ॥ २ ॥**

आदिग्रहणं चानर्थकम् । किं कारणम् । आकारप्रकरणात् । आत इति* वर्तते ।

**ति विंशतेर्डिति ॥ ६ । ४ । १४२ ॥**

तिग्रहणं किमर्थं न विंशतेर्डिति लोप इत्येवोच्येत । नैवं शक्यम् । विंशतेर्डिति लोप इतीयत्युच्यमानेऽन्त्यस्य प्रसज्येत+ । सिद्धोऽन्त्यस्य यस्येति× लोपेनैव तत्राऽऽरम्भसामर्थ्यात्तिशब्दस्य भविष्यति । कुतो नु खल्वेतदनन्त्यार्थ आरम्भे तिशब्दस्य भविष्यति न पुनरङ्गस्येति । तस्मात्तिग्रहणं कर्तव्यम् । अथ क्रियमाणेऽपि तिग्रहणेऽन्त्यस्य कस्मान्न भवति । निर्दिश्यमानस्याऽऽदेशा भवन्तीत्येवं न भविष्यति ।

**टेः ॥ ६ । ४ । १४३ ॥**

अभस्योपसंख्यानं कर्तव्यम् । इहापि यथा स्यात् । उपसरजः मन्दुरज इति÷ । तत्तर्हि वक्तव्यम् । न वक्तव्यम् । कथमुपसरजः मन्दुरज इति ।

**डित्यभस्याप्यनुबन्धकरणसामर्थ्यात् ॥ १ ॥**

अभस्याप्यनुबन्धकरणसामर्थ्याद्भविष्यति ।

---

प्र०—शिवा रुद्रस्येतिं प्राप्ते शिवा उद्रस्येति रेफलोपः । एवमिहाऽऽकारलोपः । एवं च ब्रुवता सूत्रमेव प्रत्याख्यातम् । सति त्वारम्भे नार्थ आदिग्रहणेन । आतो धातोरित्यत आत इत्यनुवर्तनात् ।

**ति विं०** । **कुतो नु खल्विति** । वचनसामर्थ्यादलोऽन्त्यपरिभाषाया अनुपस्थानात्समुदायस्यैव षष्ठीनिर्देशाल्लोपः प्रसज्येत न त्वसंशब्दितस्य तिशब्दस्य । तिग्रहणे तु सति तेर्लोपो भवति । **निर्दिश्यमानस्याऽऽदेशा भवन्तीति** । नानेन परिभाषाया व्यापारः कथ्यते । नहि निर्दिश्यमानपरिभाषा अलोऽन्त्यस्याऽऽदेः परस्येत्येतयोर्बाधिका । एतयोर्निर्विषयत्वप्रसङ्गात् । तस्मात्तिग्रहणसामर्थ्यादलोऽन्त्यस्येत्यस्यानुपस्थाने सर्वस्य तेर्लोपो भवतीत्ययमस्य भाष्यस्यार्थः ।

**टेः** । **डित्यभस्यापीति** । चटू इति वचनादित्संज्ञा तावड्डकारस्य प्रवर्तते ।

---

उ०—**ति विंशतेः** । **न त्वसंशब्दितस्येति** । शब्देन साक्षादनिर्दिष्टस्येत्यर्थः । भाष्ये—**निर्दिश्यमानस्येति** । द्वयोर्दशतोर्विन् आदेशः शतिश्च प्रत्यय इति पक्षेऽनर्थकत्वादलोऽन्त्यस्येत्यस्याप्राप्तावनया परिभाषया सर्वस्येत्यर्थः । अव्युत्पन्नप्रातिपदिकपक्षेऽप्यनर्थकत्वमेव । व्युत्पन्नत्वपक्षेऽपि शुद्धरूढत्वादनर्थकत्वमेवेत्यन्ये ।

**टेः** । ननु श्रवणार्थो डकारः स्यादत आह—**चुटू इतीति** । इत्संज्ञाशास्त्रबाधे मानाभावेनानुपजातविरोधन्यायेन पूर्वमित्त्वं प्रवर्तत इति भावः । अत्रैवार्थे लिङ्गमप्याह—**दीर्घकाशेति** । **बाध्यत इति** । लिङ्गेन प्रकरणबाधस्यौचित्यादिति भावः । अत्रापि पूर्वोक्तं लिङ्गं बोध्यम् ।

---

* ६. ४. १४०. + १. १. ५२. × ६. ४. १४८ ÷ ३. २. ६७.

**नस्ताद्धिते ॥ ६ । ४ । १४४ ॥**

**नकारान्तस्य टिलोपे सब्रह्मचारिपीठसर्पिकलापिकुथुमितैतिलिजाजलिलाङ्गलिशिलालिशिखण्डिसूकरसद्मसुपर्वणामुपसंख्यानम् ॥१॥**

नकारान्तस्य टिलोपे सब्रह्मचारिन् पीठसर्पिन् कलापिन् कुथुमिन् तैतिलिन् जाजलिन् लाङ्गलिन् शिलालिन् शिखण्डिन् सूकरसद्मन् सुपर्वन्नित्येतेषामुपसंख्यानं कर्तव्यम्× । सब्रह्मचारिन् साब्रह्मचाराः सब्रह्मचारिन् । पीठसर्पिन् पैठसर्पाः पीठसर्पिन् । कलापिन् कालापाः कलापिन् । कुथुमिन् कौथुमाः कुथुमिन् । तैतिलिन् तैतिलाः तैतिलिन् । जाजलिन् जाजलाः जाजलिन् लाङ्गलिन् लाङ्गलाः लाङ्गलिन् । शिलालिन् शैलालाः शिलालिन् । शिखण्डिन् शैखण्डाः शिखण्डिन् । सूकरसद्मन् सौकरसद्माः सूकरसद्मन् । सुपर्वन् सौपर्वाः सुपर्वन् ।

**चर्मणः कोशे ॥ २ ॥**

चर्मणः कोश उपसंख्यानं कर्तव्यम् । चार्मः कोशः ।

**अश्मनो विकारे ॥ ३ ॥**

अश्मनो विकार उपसंख्यानं कर्तव्यम् । अश्मनो विकार आश्मः ।

**शुनः संकोचे ॥ ४ ॥**

---

प्र०—दीर्घकाशतुषभ्राष्ट्रवटं जे इति निर्देशात् । ततश्चानुबन्धकरणसामर्थ्याद्भस्येति प्रकरणमिह बाध्यते ।

**नस्त० । नकारान्तस्येति** । इनण्यनपत्ये, अन्निति च प्रकृतिभावे प्राप्ते वचनम् । सब्रह्मचारिण इमे इति तस्येदमित्यण् । पीठेन सर्पतीति पीठसर्पी । पूर्ववदण् । कलापिना प्रोक्तमधीयते कालापाः । कलापिनोऽणित्यण् । ततोऽध्येतृवेदित्रोरणः प्रोक्ताल्लुगिति लुक् । कुथुमिना प्रोक्तमधीयते । तेन प्रोक्तमित्यण् पूर्ववत् । द्वितीयस्याणो लुक् । तैतिलिजाजलिलाङ्गलिप्रोक्तमध्ययनं साहचर्यात्तैतिल्यादिशब्दैरुच्यते । तेभ्यस्तदधीते तद्वेदेत्यण्प्रत्ययः । तेन प्रोक्तमित्यत्र तु शैषिकेऽर्थे वृद्धाच्छ इति च्छः प्रसज्येत । केचित्तु तितिलिशब्दमत्राधीयते । **चार्म**

---

उ०— **नस्तद्धिते । ततोऽध्येत्रिति** । छन्दोब्राह्मणानीति तद्विषयता । ननु प्रोक्ताणा सिद्धे किमुपचाराश्रयणेनेत्यत आह—**तेन प्रोक्तमित्यत्र त्विति** । तस्मिन्नशैषिकेऽर्थे वेत्यर्थः । अत्र तैतिलित्वेनैवाध्ययनबोध इति बोध्यम् । **चार्म इति** । कोशोऽत्र शस्त्रादिस्थापनार्थश्चर्ममयो भाषायां म्यान इति प्रसिद्धः । ननु तस्येदमित्यत्र स्वे ग्रामेत्यादिपरिगणनाच्छ्वत्र-

---

× ६. ४. १६४; १६७.

शौवः संकोचः ।

**अव्ययानां च ॥ ५ ॥**

अव्ययानां चोपसंख्यानं कर्तव्यम् । किं प्रयोजनम् ।

**सायंप्रातिकाद्यर्थम् ॥ ६ ॥**

सायंप्रातिकः पौनःपुनिकः ।

शाश्वतिके प्रतिषेधो वक्तव्यः । न वक्तव्यः । निपातनादेतत्सिद्धम् । किं निपातनम् । येषां च विरोधः शाश्वतिक [२. ४. ९] इति । एवं तर्हि शाश्वते प्रतिषेधो वक्तव्यः । शाश्वतम् ।

**यस्येति च ॥ ६ । ४ । १४८ ॥**

इवर्णान्तस्येति किमुदाहरणम् । हे दाक्षि दाक्ष्या दाक्षेयः । हे दाक्षीति । यदि लोपो न स्यात्परस्य ह्रस्वत्वे कृते सवर्णदीर्घत्वं प्रसज्येत । दाक्ष्येति ।

---

प्र०-इति । तस्य विकार इत्यण् । शौव इति । तस्येदमित्यण् । स्वे ग्रामजनपदमनुष्येभ्य इत्येतत्तु प्रत्याख्यातम् । अत्र परत्वाद्वृद्धौ प्राप्तायां द्वारादीनां चेति तत्प्रतिषेध ऐजागमे च कृते टिलोपः क्रियते । संकोचादन्यत्र शौवन इति । विकारावयवयोस्तु प्राण्यञि प्रकृतिभावाभावाच्छौव इत्येव भवति । सायंप्रातिक इति । सायंप्रातःशब्दाद्द्वंद्वात्कालाट्ठञिति ठञ्प्रत्ययः । यथाकथंचित्कालशब्दादपि ठञ् भवतीति कालसमुदायवाचिनोऽपि ठञ् भवति । पौनःपुनिक इति । पूर्ववट्ठञ् । आदिशब्दः प्रकारे । टिलोपदर्शनेन च सादृश्यमाश्रीयत इत्यारातीयः शाश्वतिक इत्यत्र च टिलोपाभावः । निपातनादिति । अत एव निपातनात्तान्तादिति कादेशाभावः । शाश्वतमिति । भाष्यकारवचनप्रामाण्यादण्प्रत्ययः ।

यस्येति च । सवर्णदीर्घत्वे लोपे वा नास्ति विशेष इति मत्वा पृच्छति-इवर्णान्तेति । हे दाक्षीति । दाक्षिशब्दादितो मनुष्यजातेरिति ङीषि कृते तस्य

---

उ०-शब्दात्संकोचेऽण् दुर्लभोऽत आह-स्वे ग्रामेत्यादि । स्वेऽर्थ एव ग्रामादिवाचकेभ्य एव चेति द्विविधो नियमस्तदर्थ इति भावः । नन्वत्र टिलोपे वृद्धिविषयाभावेन तन्निषेधसंनियोगशिष्ट ऐज् न स्यादत आह-अत्र परत्वादिति । संकोचादन्यत्र सर्वत्र शौवन इत्येवेति न बोद्धव्यमित्याह--विकारेत्यादि । इदं तु वचनमपि प्रकृतिभावे प्राप्ते संकोचे टिलोपविध्यर्थमिति भावः । ननु कालसमुदायवाचकस्य कथं कालवाचकत्वमत आह---यथाकथंचिदिति । सायंप्रातिकादिगणपाठाभावादादिशब्दार्थमाह--आदिशब्द इति । ठञा बाधादण् दुर्लभोऽत आह---भाष्यकारेति । तत्प्रामाण्यात्संधिवेलादिगणे शश्वतो वेति पाठानुमानमिति भावः ।

यस्येति च । ह्रस्वे कृत इति । दाक्षि ई सु इति स्थिते शब्दपरविप्रतिषेधेन दीर्घा-

यदि लोपो न स्यात्परस्य यणादेशे कृते पूर्वस्य श्रवणं प्रसज्येत। दाक्षेय इति। यदि लोपो न स्यात्परस्य लोपे कृते पूर्वस्य श्रवणं प्रसज्येत। नैतानि सन्ति प्रयोजनानि सवर्णदीर्घत्वेनाप्येतानि सिद्धानि। इदं तर्हि। अतिसखेरागच्छति। अतिसखेः स्वम्। यदि लोपो न स्यादुपसर्जनह्रस्वत्वे कृतेऽसखीति प्रतिषेधः प्रसज्येत×।

---

प्र०—संबुद्धौ ह्रस्वे कृते सवर्णदीर्घत्वे सति सवर्णदीर्घस्य श्रवणप्रसङ्गः। ननु चान्तरङ्गत्वात्सवर्णदीर्घत्वे कृते ह्रस्वो भविष्यति। एवं तर्हि वार्णादाङ्गं बलीय इति ह्रस्वत्वं मन्यते। दाक्षि ई आ इति स्थिते शब्दपरविप्रतिषेधात्परस्य यणादेशे कृते पूर्वस्य श्रवणप्रसङ्गः। सवर्णदीर्घस्यापूर्वविधित्वात्तत्र कर्तव्ये परयणादेशस्य नास्ति स्थानिवत्त्वम्। यणादेशेऽपि कर्तव्ये वर ई इतीकारप्रश्लेषादीविधिं प्रति स्थानिवत्त्वप्रतिषेधः। दाक्षि ई इति स्थिते स्त्रीभ्यो ढगिति ढकि कृते परस्य लोपे कृते पूर्वस्य श्रवणप्रसङ्गः। परलोपस्य स्थानिवद्भावात्तद्धितनिमित्तस्य लोपस्याप्रसङ्गात्। नैतानीति। यत्राऽऽङ्गवार्णयोर्युगपत्प्रसङ्गस्तत्र वार्णादाङ्गं बलीयो भवतीति भावः। यण्ढकौ त्वाङ्गावेव न भवतः। इदं तर्हीति। सखिशब्दात्सख्यशिश्वीति भाषायामिति ङीषि कृते सखीमतिक्रान्त इति प्रादिसमासे कृते लिङ्गविशिष्टपरिभाषाया अनित्यत्वादसति टचि गोस्त्रियोरिति ह्रस्वः। तत्रासतीकारलोप एकादेशस्य पूर्वं प्रत्यन्तवद्भावाद्घिसंज्ञाप्रतिषेधः स्यात्। प्रसज्यप्रतिषेधे चायं दोषो नतु पर्युदासे तदन्तस्य सखिशब्दादन्यत्वात्संज्ञायाः सिद्धत्वात्।

---

उ०—त्पूर्वं ह्रस्वत्वं ततो दीर्घ इत्याशय इति भावः। ननु चान्तरङ्गेति। अग्रे भाष्य एवास्य वक्ष्यमाणत्वात्तदज्ञानेनैवास्य ग्रन्थस्य प्रवृत्तेः शङ्केयं निर्दला। ननु यणादेशस्य स्थानिवत्त्वात्सवर्णदीर्घे कथं पूर्वस्य श्रवणप्रसङ्गोऽत आह—अपूर्वविधित्वादिति। किंतु पूर्वपराश्रय इति भावः। ननु पूर्वस्य यणि कार्ये स्थानिवत्त्वप्रवृत्त्या रूपं सिद्धमत आह—यणादेशेऽपीति। वर ई इति। इदमप्यत्रत्यपूर्वपक्षभाष्याशयवर्णनमात्रम्। नत्वयं सिद्धान्तः। फलाभावात्। पट्व्या अपत्यं पाट्वेय इत्याद्यसिद्ध्यापत्तेश्च। पट्व्या मृद्व्येत्यस्य मूर्धाभिषिक्तोदाहरणपराचः परस्मिन्निति सूत्रस्थभाष्यविरोधापत्तेश्चेति निरूपितमन्यत्र। यत्राऽऽङ्गेति। अन्तरङ्गं बलीय इत्येतदपवादस्येति भावः। यद्यपि हे दाक्षीत्यत्र पदस्य विभज्यान्वाख्यानेऽस्ति युगपत्प्रसङ्गस्तथाऽपि क्रमेणान्वाख्यान इदं सिध्यतीति तात्पर्यम्। यण्ढकौ त्विति। अत्र ढग्ग्रहणं प्रत्ययमात्रोपलक्षणमित्याहुः। ननु लिङ्गविशिष्टपरिभाषया राजाहःसखिभ्यष्टच् दुर्वारोऽत आह—लिङ्गविशिष्टेति। पूर्वान्तवद्भावेन प्राप्तस्य समासान्तविधेरनित्यत्वादभाव इति बोध्यम्। पूर्वं प्रतीति। प्रतिषेधे पूर्वस्याऽऽश्रयणादन्तवद्भावप्राप्तेरिति भावः। प्रसज्येति। वस्तुतः पर्युदासेऽपि दोषः। वर्णसंज्ञापक्षे लक्षणाया आवश्यकत्वेन

---

× ४, १, ६२; २. २. १८; १. २, ४८; १, ४. ७,

**यस्येत्यादौ श्यां प्रतिषेधः ॥ १ ॥**

यस्येत्यादौ श्यां प्रतिषेधो वक्तव्यः । काण्डे कुड्ये । सौर्ये× नाम हिमवतः शृङ्गे । स तर्हि प्रतिषेधो वक्तव्यः । न वक्तव्यः । इह श्यामित्यपि प्रकृतं नेत्यपि* तत्राभिसंबन्धमात्रं कर्तव्यम् । यस्येत्यादौ लोपो भवति श्यां न ।

**इयङुवङ्भ्यां लोपो विप्रतिषेधेन ॥ २ ॥**

इयङुवङ्भ्यां लोपो भवति विप्रतिषेधेन । इयङुवङोरवकाशः+ । श्रियौ श्रियः । भ्रुवौ भ्रुवः । लोपस्यावकाशः । कामण्डलेयः माद्रवाहेयः÷ । इहोभयं प्राप्नोति । वात्सप्रेयः लैखाभ्रेयः× । लोपो भवति विप्रतिषेधेन ।

**गुणवृद्धी च ॥ ३ ॥**

गुणवृद्धी चेयङुवङ्भ्यां भवतो विप्रतिषेधेन । गुणवृद्ध्योरवकाशः । चेता×× गौः** । इयङुवङोः स एव । इहोभयं प्राप्नोति । चयनम् चायकः ।

---

प्र०—ङीषि तु लोपे कृते ह्रस्वत्वे लाक्षणिकत्वात्सखिरूपस्य घिसंज्ञायाः प्रतिषेधाभावः । **काण्डे इति** । यचि भमिति भत्वाल्लोपः प्राप्नोति । **सौर्ये इति** । सूर्येण एकदिगित्यण् । तत्र यस्येति चेत्यकारलोपः प्राप्नोति । सूर्यतिष्येति यलोपश्च । यथा तु वक्ष्यते सूर्यमत्स्ययोर्ङ्यामिति तथाऽत्र यलोपस्याप्रसङ्गः । **इह श्यामिति** । विभाषा ङिश्योरित्यतः शीग्रहणं न संयोगाद्वमन्तेत्यतो नेति चानुवर्तते । तेन वाक्यभेदेन श्यां कार्यं निषिध्यते । **कामण्डलेय इति** । चतुष्पाद्भ्यो ढञिति ढञ् । एवं वात्सप्रेय इति । **लैखाभ्रेय इति** । शुभ्रादिभ्यश्चेति ढक् । **इयङुवङादेश**

---

उ०—सख्यंश एव लक्षणाङ्गीकारे सख्यवयवभिन्नेवर्णस्येत्यर्थात् । तदन्तसंज्ञापक्षेऽप्यनुभूतविशेषणेवर्णेनैव तदन्तविधिस्वीकारेण सख्यवयवभिन्नेवर्णान्तस्येत्यर्थात् । अतिदेशे चातिदिश्यमानधर्मविरुद्धस्वाश्रयकार्याभावस्य लोकव्युत्पत्तिसिद्धतया न स्वाश्रयसख्यवयवभिन्नत्वमादाय दोषः। पर्युदासे प्रतिषेधस्यापि गम्यमानतया पूर्वान्तवत्त्वेन सखिशब्दत्वे समुदाय आगत इवर्णे सख्यवयवत्वमार्थसमाजग्रस्तमेव । किंच तत्र प्रसज्यप्रतिषेधेऽपि न दोषः । अतिसखीति समुदायनिष्ठघिसंज्ञायास्तेन वारयितुमशक्यत्वाच्च । संज्ञाविधौ तदन्तग्रहणे मानाभावादिति दिक् । न च लोपेऽपि लिङ्गविशिष्टपरिभाषया दोषः । तस्या आनित्यताया उक्तत्वात् । कार्यकालपक्षे विभक्तौ लिङ्गविशिष्टाग्रहणाच्च । स्यत्यात्सूत्रस्थभाष्यं तु तत्सूत्र एव योजितम् । एवं च सखायमतिक्रान्तोऽतिसखेत्यादौ घित्वं न भवत्येवेति भाष्यस्वरसः । **भत्वादिति** । अनपुंसकस्येति सर्वनामस्थानत्वप्रतिषेधादित्यर्थः । **अकारलोप इति** । अणकारलोप इत्यर्थः । **यलोपश्चेति** । एवं चोभयोरपि निषेधो वक्तव्य इत्यर्थः । तत्र यलोपप्रतिषेधवचनं न कार्यमित्याह—**यथा त्विति** । भाष्ये लोपावकाशः कामण्डलेय इति । अयं ढे लोप इत्यस्यावकाशः । यस्येति लोपस्यावकाशस्त्वातिसखेरित्युक्त एवेति बोध्यम् । **वात्सप्रेय**

---

× ४. ३. ११२; ६. ४. १४८; १४९. * ६. ४. १३६; १३७. + ६. ४. ७७. ÷ ४. १. १३५; ६. ४. १४७. × ४. १. १२३. ×× ७. ३. ८४. ** ७. १. ९०; ७. २. ११५.

लवनम् लावकः । गुणवृद्धी भवतो विप्रतिषेधेन ।

**न वेयङुवङादेशस्यान्यविषये वचनात् ॥ ४ ॥**

न वाऽर्थो विप्रतिषेधेन । किं कारणम् । इयङुवङादेशस्यान्यविषये वचनात् । इयङुवङादेशोऽन्यविषय आरभ्यते । किंविषये । यणादेशविषये । स यथैव यणादेशं बाधत एवं गुणवृद्धी अपि बाधेत ।

**तस्मात्तत्र गुणवृद्धिविषये प्रतिषेधः ॥ ५ ॥**

तस्मात्तत्र गुणवृद्धिविषये प्रतिषेधो वक्तव्यः । न वक्तव्यः । मध्येऽपवादाः पूर्वान्विधीन्बाधन्त इत्येवमियङुवङादेशो यणादेशं++ बाधिष्यते गुणवृद्धी न बाधिष्यते ।

**सूर्यतिष्यागस्त्यमत्स्यानां य उपधायाः ॥ ६ । ४ । १४९ ॥**

**सूर्यादीनामणन्तेऽप्रसिद्धिरङ्गान्यत्वात् ॥१॥**

सूर्यादीनामणन्तेऽप्रसिद्धिः । सौरी×× बलाका । किं कारणम् । अङ्गान्यत्वात् । अणन्तमेतदङ्गमन्यद्भवति । लोपे** कृते नाङ्गान्यत्वम् । स्थानिवद्भावादङ्गान्यत्वं भवति ।

**सिद्धं तु स्थानिवत्प्रतिषेधात् ॥ २ ॥**

सिद्धमेतम् । कथम् । स्थानिवत्प्रतिषेधात् । प्रतिषिध्यतेऽत्र स्थानिवद्भावो यलोपविधिं प्रति न स्थानिवद्भवतीति+ । एवमपि न सिध्यति । किं कारणम् । शब्दान्यत्वात् । अन्यो हि सूर्यशब्दोऽन्यः सौर्यशब्दः । नैष दोषः । एकदे-

---

**प्र०—इति** । आदेशनमादेशो विधानम् । इयङुवङोरादेश इति षष्ठीसमासः । यथेयङुवङौ सर्वत्रान्यपूर्वकौ नैवं गुणवृद्धी इति विप्रतिषेधानुपपत्तिरित्यर्थः ।

**सूर्य०** । **सौरीति** । तेनैकदिगित्यण् । तदन्तान्ङीप् । ईकारे परतोऽत्र सूर्यशब्दोऽङ्गं न भवति किं तर्ह्यणन्तमिति यकारलोपाप्रसङ्गः । पुंयोगविवक्षायां तु देवतायां चाब्विधानादन्यत्र ङीषि कृते सूर्यशब्दोऽङ्गमीकारे भवतीति तत्रैव लोपः स्यात् सूरीति । **अङ्गान्यत्वादिति** । राजदन्तादित्वात्परनिपातः । **यलोपविधिमिति** ।

---

**उ०—इति**। वत्सं प्रीणातीति वत्सप्रीः। लैखाभ्रेये 'ढे लोपोऽकद्र्वाः' इत्युलोपः। नन्वियङुवङादेशाविति वाच्य एकवचननिर्देशोऽयुक्तोऽत आह—**आदेशनमिति** । **नैवं गुणेत्यादि** । चेता गौरित्यादौ सावकाशत्वादिति भावः।

**सूर्यतिष्यागस्त्य०** । **अङ्गं न भवतीति** । सूर्यादीनामङ्गानां भसंज्ञकानामीत्युपधालोप इति सूत्रार्थादिति भावः । नन्वेवं सूर्यांशे निरवकाशो लोपोऽत आह—**पुंयोगेति** । अन्यत्र कुन्त्यादौ । भाष्ये **स्थानिवद्भावादङ्गान्यत्वमिति** । अल्लोपस्याचः परस्मिन्निति

---

++ ६. १. ७७, ×× ४. ३. ११२, ** ६. ४. १४८, + १. १. ५८,

शविकृतमनन्यवद्भवतीति भविष्यति ।

उपधाग्रहणानर्थक्यं च ॥ ३ ॥

स्थानिवद्भावे चेदानीं प्रतिषिद्ध उपधाग्रहणमनर्थकम् । किं कारणम् । अन्त्य एव हि सूर्यादीनां यकारः* । किं यातमेतद्भवति । सुष्ठु च यातं साधु च यातं यदि प्राग्भादसिद्धत्वम् । अथ हि सह तेनासिद्धत्वमसिद्धत्वाल्लोपस्य नान्त्यो यकारो भवति । यद्यपि सह तेनासिद्धत्वमेवमपि न दोषः । नैवं विज्ञायते सूर्यादीनामङ्गानां यकारलोप इति। कथं तर्हि । अङ्गस्य यलोपो भवति स चेत्सूर्यादीनां यकार इति । एवमपि सूर्यचरी अत्र प्राप्नोति । तस्मादुपधाग्रहणं कर्तव्यम् ।

विषयपरिगणनं च ॥ ४ ॥

विषयपरिगणनं च कर्तव्यम् ।

सूर्यमत्स्ययोर्ङ्याम् ॥ ५ ॥

सूर्यमत्स्ययोर्ङ्यामिति वक्तव्यम् । सौरी मत्सी ।

---

प्र०–उपधाविधिं प्रति नेति तु प्रतिषेधः प्रत्ययविधावेव । स्थानिवत्त्वनिषेधे चावशिष्टस्याङ्गसंज्ञायामेकदेशविकृतस्यानन्यत्वाद्यलोपः सिध्यति । **अन्त्य एवेति** । अकारद्वयलोपे सति यकारस्यान्त्यत्वात् । तत्र यान्तानां सूर्यादीनां लोपो भवतीत्युच्यमानेऽलोऽन्त्यस्येति यकारस्यैव भविष्यति। यग्रहणं तु न प्रत्याख्यायते । तदन्तरेण यान्तत्वाभावादुत्तरार्थत्वाच्च यग्रहणस्य । **यातमिति** । गतं ज्ञातं सिद्धमित्यर्थः । **साधु च यातमिति** । अनेन सिद्धे दार्ढ्यं प्रतिपाद्यते । **यदि प्रागिति** । अकारद्वयलोपस्य सिद्धत्वादन्त्यो यकारो भवति । **अथेति** । ईत्यकारलोपस्य समानाश्रयस्यासिद्धत्वाद्यान्तत्वाभावः । ततश्चोपधाग्रहणं कर्तव्यम् । **यद्यपीति** । न चोपधाग्रहणं क्रियते नापि सूर्यादीन्यङ्गत्वेन विशेष्यन्त इत्यर्थः । ईति तद्धिते च यदङ्गमनाश्रितरूपाविशेषं तस्य यकारस्य लोपः स चेद्यकारः सूर्याद्यवयवो भवतीति सूत्रार्थः । **सूर्यचरीति** । सूर्यस्य स्त्री सूरी । सा भूतपूर्वेति चरट्प्रत्ययः । तसिलादिष्विति पुंवद्भावः । **सूर्यमत्स्ययोरिति** । मत्स्यस्य ङ्यां सूर्यागस्त्ययोश्छे

---

उ०–स्थानिवत्त्वादङ्गभेद इत्यर्थः । **प्रत्ययविधावेवेति** । अतोऽत्र स नोक्त इति भावः । **तत्र यान्तानामिति** । य इत्यनेन सूर्यादयो विशेष्यन्ते । य इति च बहुवचनस्थाने सौत्रमेकवचनमिति भावः । **तदन्तरेणेति** । विशेषणाभावे यान्तानां सूर्यादीनामित्यर्थासंभवादिति भावः । ननु तदभावेऽपि सूर्यादीनां तद्धिते लोप इत्येव यान्ते प्राप्तिः पर्यवस्यतीत्यरुचेराह– **उत्तरार्थत्वाच्चेति** । हलस्तद्धितस्याऽऽपत्यस्य चेत्यादौ । नन्वकारद्वयलोपे यान्तत्वमस्त्येवेत्यत आह— **ईत्यकारलोपस्येति** । अणि यो यस्येति लोपस्तस्य व्याश्रयत्वादसिद्धत्वा-

---

* १. १. ५२.

**सूर्यागस्त्ययोश्छे च ॥ ६ ॥**

सूर्यागस्त्ययोश्छे च ङ्यां चेति वक्तव्यम् । सौरी सौरीयः । आगस्ती आगस्तीयः ।

**तिष्यपुष्ययोर्नक्षत्राणि ॥७॥**

तिष्यपुष्ययोर्नक्षत्राणि* लोपो वक्तव्यः। तैषम् पौषः ।

**अन्तिकस्य तसि कादिलोप आद्युदात्तत्वं च ॥ ८ ॥**

अन्तिकस्य तसि+ कादिलोपो वक्तव्य आद्युदात्तत्वं च वक्तव्यम् । अन्तितो न दूरात् ।

**तमे तादेश्च ॥ ९ ॥**

तमे तादेश्च कादेश्च लोपो वक्तव्यः । अग्ने त्वं नो अन्तमः । अन्तितमोऽवरोहति ।

तसीत्येष न वक्तव्यो दृष्टो दाशतयेऽपि हि ।
षौ लोपोऽन्तिषदित्यत्र

अन्तिषत् ।

---

प्र०—चेत्येव सिद्धेऽर्थप्रदर्शनपरत्वाल्लाघवेऽनादरः कृतः । सौरीय इति । सौर्यस्यायामिति वृद्धाच्छः । अगस्त्यस्यापत्यमिति ऋष्यण् । तदन्तान्ङीप् छश्च । नक्षत्रसंबन्धिन्यणीत्यर्थः । तिष्यपुष्ययोरित्युभयोपादानात्सिध्यशब्दस्य यलोपाभावः । अन्तित इति । अपादाने चाहीयरुहोरिति तसिः । तादेश्चेति । चकारात्कादेश्च । यदा तादेस्तदाऽन्तमः । कादिलोपे त्वन्तितमः । तसीत्येष इति । कादिलोपो बहुलमित्येव विषयमनुपादाय पठितव्यमित्यर्थः । दाशतय इति । दशावयवा यस्य दशतयः । तत्र भवो दाशतयः । चतुःषष्ट्याख्यो ग्रन्थः । षौ लोप इति । षुशब्देनोत्त-

---

उ०—भाव इत्यर्थः । एवं चेदमेवोपधाग्रहणं सह तेनासिद्धत्वे ज्ञापकमिति भावः । इत्येव सिद्ध इति । सूर्यशब्दस्य द्विरपाठाल्लाघवं भवतीति भावः । छश्चेति । आगस्त्यापत्यमित्यर्थ इति भावः । नक्षत्रसंबन्धिनीति । नक्षत्रवाचकाद्योऽण् स सर्वोऽपि गृह्यते । अत एव तिष्ये पुष्ये च भवस्तैषः पौष इत्यत्रापि लोपः। इदमेव ध्वनयता भगवता तैषं पौष इति लिङ्गभेदेनोदाहृतम् । आद्यस्य तिष्येण युक्तमहरित्यर्थः । अन्त्यस्य पुष्ये भव इत्यर्थः । व्यावर्त्यं तु तिष्यसंज्ञकपुरुषस्येदं तैष्यमित्याहुः । तत्र तिष्यस्य प्राप्ते नियमार्थं पुष्यस्य त्वप्राप्ते विधिः। सूत्रेऽर्थग्रहणमस्तु किमुभयोपादानेन तत्राऽऽह—उभयोपादानेति । ननु तसीत्यस्याभावे सर्वत्र कादिलोपः स्यादत आह—कादिलोपो बहुलमिति । एवं चेष्टविषये लोपसिद्धिरिति भावः । चतुःषष्ट्याख्य इति । चतुःषष्ट्यध्याययुक्तत्वाच्च बह्वृचानां संहिता तथोच्यते। सैव दशम-

---

*४. २. ३. + ५. ४. ४५.

तथाऽघौ येऽन्त्यथर्वसु ।

अन्तिये च दूरके ।

**बिल्वकादिभ्यश्छस्य लुक् ॥ ६ । ४ । १५३ ॥**

छग्रहणं शक्यमकर्तुम् । इह कस्मान्न भवति । बिल्वकेभ्यः÷ । भस्येति* वर्तते । एवमपि बिल्वकाय अत्र प्राप्नोति । तद्धितस्येति+ वर्तते । एवमपि बिल्वकस्य विकारोऽवयवो वा बैल्वकः× अत्र प्राप्नोति । तद्धिते तद्धितस्येति* वर्तते । एवमपि बिल्वकीयायां भवो बैल्वकः बैल्वकस्य किंचिद्बैल्वकीयम्×× अत्र प्राप्नोति । न स बिल्वकात् । बिल्वकादिभ्यो यो विहित

---

**प्र०**—रपदं पूर्वाचार्यप्रसिद्ध्योच्यते । अन्तिके सीदतीति सत्सूद्विषेति क्विप् । पूर्वपदादिति षत्वम् । **अघाविति** । अनुत्तरपद इत्यर्थः । ये यत्प्रत्यये परतोऽन्तीति कृतकादिलोपोऽन्तिकशब्दो गृह्यतेऽथर्ववेदे । अन्तिके भव इति भवे च्छन्दसीति यति कृतेऽन्तिय इति भवति । कादिलोपस्यासिद्धवदत्राऽऽभादित्यसिद्धत्वाद्यस्येति लोपो न भवति ।

**बिल्व०** । **छग्रहणमिति** । कृतकुगागमस्य निर्देशाच्छ एव ग्रहीष्यत इति भावः । **बिल्वकेभ्य इति** । बिल्वशब्दादल्पाद्यावर्थे कप्रत्ययेऽसति छग्रहणे कुगागमनिर्देश एव न निश्चीयेतेति कप्रत्ययान्तादपि परस्य भ्यसो लुक्प्रसङ्गः । **भस्येति वर्तत इति** । तत्रार्थाद्विभक्तिविपरिणामे सति भसंज्ञकेभ्यः परस्य लुग्भवति । **बैल्वक इति** । अनुदात्तादेश्चेत्यञ् । **तद्धित इति** । नस्तद्धित इत्यतस्ताद्धित इति वर्तते । तेन च बिल्वकादिभ्यो भसंज्ञकेभ्यः परस्य तद्धितस्य तद्धिते परतो लुग्भवतीति सूत्रार्थः संपद्यते । **एवमपीति** । बिल्वा विद्यन्तेऽस्यामिति 'उत्करादिभ्यश्छः' नडादीनां कुक् चेति छः कुगागमश्च । ततस्तत्र भव इत्यण् । तस्मिन्परतश्छस्य लुक् । ततो वृद्धाच्छः । असति च्छग्रहणे छे परतोऽणो लुक्प्रसङ्गः । ततश्च न लुमताऽङ्गस्येति प्रत्ययलक्षणप्रतिषेधाद्वृद्ध्यभावे रूपं न सिध्येत् । **न स बिल्वकादिति** । विहित इति शेषः । **बिल्वकादिभ्यो यो विहित इति** । बिल्वका-

---

**उ०**—ण्डलाख्यावयवसत्त्वाद्वाशतयशब्दवाच्या । ननु कादिलोपे यस्येति लोपेऽन्तिय इत्यसंगतमत आह—**कादिलोपस्येति** ।

**बिल्वका०** । **कृतकुगिति** । नडाद्यन्तर्गणबिल्वादयः कृतकुकोऽत्र गृह्यन्त इति परश्छ एव संभवतीति भावः । ननु कृतकुगागमनिर्देशे कथं बिल्वकेभ्य इत्यत्र प्राप्तिरत आह—**असतीति** । नन्वनुवर्तमानमपि भस्येत्यन्वयायोग्यमत आह—**तत्रार्थादिति** । **अनुदात्तादेश्चेति** । अपवादत्वेन कोपधत्वादणिति वक्तुमुचितम् । **तद्धितस्येति** । हलस्तद्धितस्येत्यतस्तदनुवृत्तेरिति

---

÷ ५. ३. ८५. * ६. ४. १२९. + ६. ४. १५०. × ४. ३. १४०. * ६. ४. १४४;१५०. ×× ४. २. ९१; ४. ३. ५३; ४. २. ११४.

इत्युच्यते न चासौ बिल्वकशब्दाद्विहितः । किं तर्हि । बिल्वकीयशब्दात् । एवं तर्हि सिद्धे सति यच्छग्रहणं करोति तज्ज्ञापयत्याचार्यो भवत्येषा परिभाषा संनियोगशिष्टानामन्यतराभाव उभयोरप्यभाव इति । तस्माच्छग्रहणं कर्तव्यं छस्यैव लुग्यथा स्यात्कुको मा भूदिति×× ।

## तुरिष्ठेमेयःसु ॥ ६ । ४ । १५४ ॥

तुः सर्वस्य लोपो वक्तव्योऽन्त्यस्य** लोपो मा भूदिति । स तर्हि वक्तव्यः । न वक्तव्यः ।

---

प्र०—द्भ्य इत्यागन्तुनाऽकारेण कृतकुगागमनिर्देशः । तेनायमर्थः । भाविकुगागमेभ्यो बिल्वादिभ्यो यो विहितः प्रत्ययस्तस्य तद्धिते लुग्भवति । न च च्छादन्यो भाविकुगागमेभ्यो बिल्वादिभ्यः प्रत्ययो विधीयत इति नार्थश्छग्रहणेन । **एवं तर्हीति** । छग्रहणं छमात्रस्य लुग्यथा स्यात्कुगागमो मा निवृतदित्येवमर्थं क्रियते । यदि चैषा परिभाषा न स्यात्तदा कुको नैव निवृत्तिः प्राप्नोतीति किं तदभावार्थेन च्छग्रहणेन । क्वचित्त्वेषा परिभाषा नाऽऽश्रीयते । यथा श्यैनेय इत्यादौ यस्येति लोपेन निवृत्तेऽपीकारे तत्संनियुक्तो नकारो न निवर्तते । तथा च स्त्रियाः पुंवदित्यत्रोक्तमेतभार्य इत्यत्र पुंवद्भावेन स्त्रीप्रत्ययमात्रस्य निवृत्तिः क्रियतेऽर्थस्य त्वनिवृत्तत्वान्नकारस्य श्रवणं प्रसज्येतेति । तथा श्रोत्रियस्य घलोपश्चेति घे निवृत्तेऽपि श्रोत्रभावो न निवर्तत इति तत्रानित्या परिभाषेति प्रतिविधेयम् ।

---

उ०—भावः । नन्वणो लुका लोपेन वा निवृत्तौ विशेषाभावोऽत आह—**ततश्चेति** । द्रव्याश्रयत्वाच्च पूर्वलुको नासिद्धत्वम् । ननु कप्रत्ययान्तबिल्वकप्रकृतिकविकाराद्यर्थकाण्णन्तबैल्वकशब्दादिमर्थे छे बैल्वकीय इत्यादौ लुक् स्यात् । तस्याणो बिल्वकाद्विहितत्वादत आह—**कृतकुगागमेति** । गणपाठस्य शीघ्रोपस्थितिकत्वेन तेषामव ग्रहात् । नहि कान्तानां क्वचित्पाठोऽस्ति । गणपाठसत्त्वेनैव च प्रकारवाचितानाऽऽदिशब्दस्येति भावः । **भाविकुगागमेभ्य इति** । कुक्संनियोगेन प्रत्ययविधानादिति भावः । **छग्रहणेनेति** । न च तापितेऽपि कथं चारितार्थ्यं कुग्विशिष्टानुवादसामर्थ्येनैव तदनिवृत्तेः । अन्यथा बिल्वादिभ्य इत्येव वदेत् । बिल्वादय एव नडादौ पठिताः । न च बिल्वादिभ्यो भवाद्यर्थाणादीनामपि लुगापत्तिः । लक्षणप्रतिपदोक्तपरिभाषया बिल्वादिपुरस्कारविहितप्रत्ययस्यैव लुग्विधानादिति वाच्यम् । ततोऽपि प्रतिपदोक्तत्वेन बिल्वादिभ्योऽणिति विकरार्थस्य लुगापत्तिवारणार्थं तत्सार्थक्यादिति भाष्याशयात् । **नकारो न निवर्तत इति** । अचः परस्मिन्निति स्थानिवत्त्वेनैव सिद्धेरिदं चिन्त्यम् । श्रोत्रियस्येत्यादि त्वनित्यत्वफलमेव ।

**तुरिष्ठे मे०** । प्रयोजनाभावं दर्शयति—**टेरित्येवेति** । आसुतिमिति द्वितीयादर्शना-

---

×× ४. २ ९१ ** १ १ ५२

**तुः सर्वलोपविज्ञानमन्त्यस्य वचनानर्थक्यात् ॥ १ ॥**

तुः सर्वलोपो विज्ञायते। कुतः। अन्त्यस्य वचनानर्थक्यात् । अन्त्यस्य लोपवचने प्रयोजनं नास्तीति++ कृत्वा सर्वस्य भविष्यति ।

अथवा लुक्प्रकृतः×× सोऽनुवर्तिष्यते । अशक्यो लुगनुवर्तयितुम् । किं कारणम् ।

विजयिष्ठकरिष्ठयोर्गुणदर्शनात् । विजयिष्ठकरिष्ठयोर्गुणो दृश्यते*** । विजयिष्ठः । आसुतिं करिष्ठः ।

**टेः ॥ ६ । ४ । १५५ ॥**

**णाविष्ठवत्प्रातिपदिकस्य ॥ १ ॥**

णौ प्रातिपदिकस्येष्ठवद्भावो वक्तव्यः । किं प्रयोजनम् ।

**पुंवद्भावरभावटिलोपयणादिपरार्थम् ॥ २ ॥**

पुंवद्भावार्थम् । एनीमाचष्ट एतयति । श्येतयति* । रभावार्थम् । पृथुमाचष्टे प्रथयति । म्रदयति+ । टिलोपार्थम् । पटुमाचष्टे पटयति । यणादिपरा-

---

प्र०— तुरि० । **तुः सर्वस्येति** । सर्वस्य तृशब्दस्य लोपो न त्वलोऽन्त्यस्येत्यर्थः । **अन्त्यस्य लोपवचन इति**। टेरित्येवान्त्यलोपस्य सिद्धत्वात्। **विजयिष्ठ इति**। विजेतृशब्दात्तुः छन्दसीतीष्ठन्प्रत्ययः। तस्य लुकि सति न लुमताऽङ्गस्येति प्रत्ययलक्षणप्रतिषेधाद्गुणो न स्यात् । पूर्वं तु गुणो न प्रवर्तते । अन्तरङ्गानपि विधीन्बहिरङ्गो लुग्बाधत इति वचनात् । **करिष्ठ इति** । तृन्नन्तादिष्ठन्प्रत्ययः ।

**टेः । णाविति** । प्रातिपदिकग्रहणं प्रत्ययकार्याणामतिदेशो मा भूदित्येवमर्थम् । तेन बहून्याचष्टे भावयतीति णिचो यिण्न भवति । तदभावे भूभावेनापि न भवितव्यं संनियोगशिष्टत्वादिति बहयतीति भवितव्यमिति केचित् । **एतयतीति** । तसिलादि-त्वादिष्टे पुंवद्भावो विहित इति णावपि भवति । टिलोपेनैव संनियोगशिष्टत्वान्नका-

---

उ०—दाह—**तृन्नन्तादिति** । एवं च न लोकेति निषेधात्पष्ठ्यभाव इति भावः ।

**टेः । इत्येवमर्थमिति** । इदमुपलक्षणम् । तेन चकासादिभ्यो हेतुमण्णावेतदप्रवृत्तिरपि तत्फलम् । एतेन णावित्युपमेये सप्तमीदर्शनेनेष्ठवदित्यत्रापि सप्तम्यन्ताद्वतिसत्त्वेनेष्ठनि पूर्वकार्यस्यैवातिदेशेन सिद्धे प्रातिपदिकग्रहणं व्यर्थमित्यपास्तम् । **भावयतीति** । न च संनियोगशिष्टन्यायाद्भूभावो दुर्लभः । भू च बहोरित्यत्र पुनर्बहुग्रहणसामर्थ्येन संनियोगशिष्टत्वाभावात् । प्रत्ययादेशत्वभ्रमस्तु व्याख्यानात्सुपरिहर इत्याशयः । इदमेव केचिदित्यत्रारुचिबीजम् । एतयतीत्यत्र पुवत्त्वं आभीयासिद्धत्वानित्यत्वाट्टिलोपो भवत्येव । अन्यथा वृद्धौ पुक्येतापयतीत्यापत्तिः । **तसिलादित्वादिति** । भस्याढ इति तत्रोक्तेरिति भावः । **तेन**

---

++ ६. ४. १५५ ×× ६. ४. १५३. *** १. १. ६३. * ६. ३. ३५. + ६. ४. १६१.

र्थम् । स्थूलमाचष्टे स्थवयति । दवयति* । किं पुनरिदं परिगणनमाहोस्विदुदाहरणमात्रम् । उदाहरणमात्रमित्याह प्रादयोऽपि हीष्यन्ते । प्रियमाचष्टे प्रापयतीति+ ।

भारद्वाजीयाः पठन्ति । णाविष्ठवत्प्रातिपदिकस्य पुंवद्भावरभावटिलोपयणादिपरप्रादिविन्मतोर्लुक्कन्विध्यर्थमिति÷ ।

**इष्ठस्य यिट् च ॥ ६ । ४ । १५९ ॥**

किमयं यिशब्द आहोस्विद्यकारः । किंचाऽऽतः । यदि लोपोऽप्यनुवर्तते** ततो यिशब्दः । अथ निवृत्तं ततो यकारः ।

---

**प्र०**—रनिवृत्तौ सिद्धायां पुंवद्वचनं संनियोगशिष्टपरिभाषाया अनित्यत्वज्ञापनार्थम् । तेन श्यैनेय इत्यादिसिद्धं भवति । **विन्मतोरिति** । स्रग्विणमाचष्टे स्रजयति । अङ्गवृत्त इति वृद्धिरत्र न भवति । यत्र त्वनिष्ठितमङ्गं तत्र वृद्धिर्भवत्येव । प्रापयति स्थापयतीति । युवानमाचष्टेऽल्पमाचष्टे कनयति ।

**इष्ठ०** । **किमयमिति** । किमिकारान्तः समुदाय आगमोऽथ यकारमात्रमिकारस्तूच्चारणार्थ इति प्रश्नः । **किंचात इति** । उभयथा दोषाभाव इत्यर्थः । तत्प्रतिपादयति—**यदीति** ।

---

उ०—**श्यैनेय इति** । इदं चिन्त्यमिति बिल्वकादिभ्य इति सूत्रे निरूपितम् । किंच ज्ञापकमप्यसंगतम् । दरदमाचष्टे दारदयतीत्याद्यर्थं पुंवद्भावस्याऽऽवश्यकत्वात् । स्रजशब्दादस्मायामेधेति विनिः । णिच् । विन्मतोर्लुक् । नन्वत उपधाया इति वृद्धिः प्राप्नोतीत्यतः—**अङ्गवृत्तेति** । अत एव वृक्षव् करोतीत्याष्टमिकभाष्यप्रयोगः संगच्छते । **यत्र त्वनिष्ठितमिति** । तस्या अनित्यत्वात्क्वचिदप्रवृत्तिरिति भावः । परे तु लक्ष्यविशेषे लक्ष्यानुरोधाद्भाष्यानुरोधाच्चेष्ठवदित्यभावातिदेशोऽपि । तेन दवयतीत्यादौ वृद्धिर्न । प्रापयतौ च भवत्येव । एवं चाङ्गवृत्त इत्यस्य लक्ष्यासाधकत्वम् । अत एव भाष्ये सिद्धान्ते तत्परिभाषाया ज्ञापकोत्तरं णिवेर्गुणप्रतिषेधश्चोदितः स न वक्तव्य इत्येव प्रयोजनमुक्तम् । न तु दवयतीत्यादिसिद्धिरितीदं चिन्त्यमित्याहुः । प्रापयतौ वृद्धौ पुक्० । युवाल्पयोरिति [illegible] । उदाहरणमात्रत्वादेव भसंज्ञाप्रकृतिभावादीनामप्यतिदेशः । उदाहरणत्व एव [illegible] उपष्टम्भकं न तु तदपि परिगणनमिति बोध्यम् । तत्र प्रातिपदिकाण्णिजपि [illegible] स्रजयतीत्याद्यर्थं [illegible]वश्यकमिति बोध्यम् ।

**इष्ठस्य** । किंचाऽऽत इत्यस्य सर्वत्र यादृगर्थस्तादृगत्र नेत्याह—[illegible] । लोपानुवृत्तावयमर्थः—बहोः परस्येष्ठस्य लोपो यिडागमश्चेति । अत्रान्त्यः पक्षो युक्तः । प्रक्रिया लाघवात् ।

---

* ६. ४ [illegible] ५६. + ६. ४. १५७; ७. २. ११५; [illegible] ३. ३६. ÷ ५ ३. ६[illegible]; [illegible]
** ६. ४, १५८,

## ज्यादादीयसः ॥ ६ । ४ । १६० ॥

किमर्थं ज्यात्परस्येयस आत्वमुच्यते न लोपः प्रकृतः÷× सोऽनुवर्तेत । का रूपसिद्धिः ज्यायान् । अकृद्यकार इति दीर्घत्वं भविष्यति++। एवं तर्हि सिद्धे सति यज्ज्यात्परस्येयस आत्वं शास्ति तज्ज्ञापयत्याचार्यो भवत्येषा परिभाषाऽङ्गवृत्ते पुनर्वृत्तावविधिरिति । किमेतस्य ज्ञापने प्रयोजनम् । पिबेर्गुणप्रतिषेधश्चोदितः÷÷ स न वक्तव्यो भवति ।

अथ किमर्थं ज्यात्परस्येयसो दीर्घ उच्यते न अकार एवोच्येत । का रूपसिद्धिः ज्यायान् । आन्तर्यतो दीर्घस्य दीर्घो भविष्यति । एवं तर्हि सिद्धे सति यद्दीर्घग्रहणं करोति तज्ज्ञापयत्याचार्यो भवत्येषा परिभाषा भाव्यमानेन सवर्णानां ग्रहणं नेति ।

## र ऋतो हलादेर्लघोः ॥ ६ । ४ । १६१ ॥

कथमिदं विज्ञायते । हलादिरङ्गस्येति । आहोस्विद्धलादेर्ऋकारस्येति । युक्तं पुनरिदं विचारयितुम् । नन्वनेनासंदिग्धेनाङ्गविशेषणेन भवितव्यम् । कथं

---

प्र०— **ज्यादा०** । ज्यात्परस्येयस आदेः परस्येत्याकारः क्रियते । तत्रोच्यते—**किमर्थमिति** । **अकृद्यकार इति** । क्ङितीति तत्र नानुवर्तत इति भावः । उरुयेत्यादौ छान्दसत्वाद्दीर्घाभावः । **अङ्गवृत्त इति** । अङ्गे वृत्तं निष्पन्नं यत्कार्यं तस्मिन्सति पुनरन्यस्याङ्गकार्यस्य प्रवृत्तावविधानं भवति । ज्ञाजनोर्जेत्यत्रापीयं परिभाषा ज्ञापिता । तत्रास्मिन्स्थिते ज्ञापके जेत्यादेशविधानं दीर्घश्रवणार्थम् । तस्मिंश्च ज्ञापके सति ज्यायानिति सिद्धयर्थमाद्वचनम् । अन्यथाऽऽदिलोपे कृते परिभाषावशाद्दीर्घो न स्यात् । **पिबेरिति** । पाघ्रादिसूत्रेण यदा पिबादेशो हलन्तः क्रियते तदा गुणप्रसङ्गः । यदा त्वदन्तस्तदा गुणप्राप्त्यभावः ।

**र ऋतो** । **कथमिदमिति** । इहाङ्गस्येति प्रकृतमृत इति च श्रुतं तत्र विशेषणविशेष्यभावे कामचारात्प्रश्नः । **युक्तं पुनरिति** । धात्वादेरित्यादाववयववाचिन आदिशब्दस्य दर्शनादवयव्यपेक्षत्वाच्चावयवस्यावयवान्तरेण संबन्धाभावादिति भावः ।

---

उ०— **ज्यादा०** । नन्वक्रुदित्यत्र क्ङितीत्यननुवृत्तावुरुयेत्यादौ टा इत्यस्य याटि दीर्घः स्यादत आह—**उरुयेत्यादाविति** । **अङ्ग इति** । अङ्गाधिकार इत्यर्थः । भाष्ये **न अकार एवेति** । ज्याद् ईयस इति सूत्रं पाठ्यमिति भावः । इयं शङ्का नाणादित्सूत्रमादाय । सूत्रशेषेण विरोधात् । किंच तथा सत्युक्तमित्येव वदेत् । न त्वेतज्ज्ञापयतीति । तस्माज्जातिपक्षाश्रयेणेयं शङ्का । उत्तरं तु स्पष्टमेव जातिपक्षेऽपि भाव्यमानविषयो नेति ।

**र ऋतो हलादेरिति** । **तत्रेति** । आदिशब्दस्य प्रसिद्धावयवार्थपरिग्रहे प्रकृतविशेषणत्वम् । अप्रसिद्धपूर्ववृत्तिसमीपार्थपरिग्रहे श्रुतविशेषणत्वमिति भावः । **अवयववाचिन**

---

÷× ६. ४. १५८. ++ ७ ४ २५. ÷÷ ७, ३, ७८.

ऋकारस्य नाम हलादिः स्यादन्यस्यान्यः । अयमादिशब्दोऽस्त्येवावयववाची । तद्यथा । ऋगादिः अर्धर्चादिः श्लोकादिरिति । अस्ति सामीप्ये वर्तते । तद्यथा । दधिभोजनमर्थसिद्धेरादिः । दधिभोजनसमीपे । घृतभोजनमारोग्यस्याऽऽदिः । घृतभोजनसमीपे । यावता सामीप्येऽपि वर्तते जायते विचारणा हल्समीपस्यर्कारस्य स्यादथवा हलादेरङ्गस्येति । किंचाऽऽतः। यदि विज्ञायते हलादेरङ्गस्येति अप्रथीयान् अत्र न प्राप्नोति । अथ विज्ञायते हलादेर्ऋकारस्येति अनृचीयान् अत्रापि प्राप्नोति । उभयथा स्वृचीयानित्यत्र प्राप्नोति । यथेच्छसि तथाऽस्तु। अस्तु तावद्धलादेरङ्गस्येति । कथमप्रथीयान् । तद्धितान्तेन समासो भविष्यति । न प्रथीयानप्रथीयानिति । भवेत्सिद्धं यदा तद्धितान्तेन समासो यदा तु खलु समासात्तद्धितोत्पत्तिस्तदा न सिध्यति । नैव समासात्तद्धितोत्पत्त्या भवितव्यम् ।

---

प्र०—**अन्यस्यान्य इति** । अत्यन्तभेदादसंबन्धं परस्परस्यावयवयोर्दर्शयति । यत्र भेदाभेदविवक्षा वृक्षाणां वनं वृक्षाः वनमिति तत्रावयवावयविभावो नान्यत्रेत्यर्थः । **दधिभोजनमिति** । यदृच्छोपनतं दधिभोजनं कार्यसिद्धेः सूचकत्वात्समीपमित्यर्थः । **अप्रथीयानिति** । अपृथुशब्दात्पृथुसदृशगुणवचनादीयसुन्प्रत्ययः । **अनृचीयानिति** । न सन्त्यृचो येषां तेऽनृचा माणवकास्ते सन्ति यस्मिन्देशे सोऽनृचवांस्तत ईयसुन् विन्मतोरिति मतुब्लुक् । अत्राङ्गं हलादि न भवति । ऋकारस्तु हलादिरिति रादेशप्रसङ्गः । **स्वृचीयानिति** । स्वृग्वच्छब्दादीयसुन् मतुपो लुक् । **यथेच्छसीति** । वक्ष्यमाणपरिगणनादतिप्रसङ्गनिरासादिति भावः । **न वै समासादिति** । प्रकृताभिप्रायेणैतदुच्यते। ईदृशात्समासादीदृशस्तद्धितो नोत्पद्यते । तथा हि—अपृथुशब्दस्तत्पुरुषो बहुव्रीहिर्वा गुण वचनो न भवतीति तत ईयसुन्न भवत्येव । अथ मत्वन्तादीयसुन उत्पत्तिः । तन्न।

---

उ०—**इति** । प्रथमावयववाचिन इत्यर्थः । नन्ववयवावयविनोरपि भेदादन्यस्यान्य इति हेतुरनैकान्तिकोऽत आह—**अत्यन्तेति** । **अवयवयोरिति** । समुदायावयवयोर्हल्ऋकारयोः परस्परस्यासंबन्धमित्यन्वयः । अवयवावयविनोस्तु नात्यन्तं भेद इत्याह—**यत्रेति** । न चैवं दिदीय इत्यादौ युट एकारावयवत्वं न स्यात् । आद्यन्ताविति वचनेनावयवसदृशत्वबोधनेनावयवप्रयुक्तकार्यबोधनाददोषः । ननु दधिभोजनानन्तरमर्थासिद्धिर्न दृश्यत इति कथमत आह—**यदृच्छेति** । कार्यारम्भ इति शेषः । भाष्ये **दधिभोजनसमीप इति** । यतो दधिभोजनसमीपेऽर्थसिद्धिरतस्तदर्थसिद्धेरादिः समीपमित्यर्थः । एवमन्यत्रापि बोध्यम् । ननु नञ्समासस्य गुणवचनत्वाभावात्कथमीयसुनत आह—**अपृथुशब्दादिति** । **अनृचा इति** । ऋक्पूरिति समासान्तः । विन्मतोर्लुग्विधानादेवागुणवचनादपीयसुन् । **स्वृग्वच्छब्दादिति** । न पूजनादिति समासान्तनिषेधः । ननु समासात्तद्धितोत्पत्तेर्बहुश उपलम्भान्नैवेत्ययुक्तमत आह—**प्रकृतेति** । तदभिप्रायेण भाष्यं योजयति—**तथा हीति** । **गुणमुक्तवानिति** ।

किं कारणम् । बहुव्रीहिणोक्तत्वान्मत्वर्थस्य । भवेद्यदा बहुव्रीहिस्तदा न स्याद्यदा तु खलु तत्पुरुषस्तदा प्राप्नोति । न पृथुरपृथुः अयमप्यपृथुः अयमप्यपृथुः अयमनयोरप्रथीयानिति । न समासादजादिभ्यां भवितव्यम् । किं कारणम् । गुणवचनादित्युच्यते× न च समासो गुणवचन इति । यदा तर्हि समासाद्विन्मतुपौ विन्मतुबन्तादजादी तदा प्राप्नुतः* । अविद्यमानाः पृथवोऽपृथवः अपृथवोऽस्य सन्त्यपृथुमान् अयमप्यपृथुमान् अयमप्यपृथुमान् अयमनयोरप्रथीयानिति । नैष दोषः । अपृथव एव न सन्ति कुतो यस्यापृथव

प्र०—बहुव्रीहिणोक्तत्वान्मतुपोऽभावात् । नापि तत्पुरुषान्मतुबुत्पत्तिः । लाघवाद्बहुव्रीहेर्न्याय्यत्वात् । **भवेद्यदेति** । स ह्यन्यपदार्थप्रधानत्वाद्गुणवचनो न भवति । **यदा त्विति** । यथाऽब्राह्मण इति ब्राह्मणसदृशः क्षत्रियादिरुच्यते तथाऽपृथुरिति पृथुसदृशगुणान्तरयुक्तोऽभिधीयते । **न च समास इति** । गुणमुक्तवान् गुणवचनः । यः शब्दो गुणमभिधाय गुणोपसर्जने द्रव्ये वर्तते तस्मादजादिभ्यां भाव्यम् । न च समासः केवले गुणे कदाचित्प्रयुज्यते । नित्यं द्रव्यवाचित्वात् । अथवाऽपृथुशब्दः पृथुसदृशगुणवाचित्वेऽपि विशिष्टगुणवचनो न भवति । पृथुशब्दवत् । **अपृथव एव न सन्तीति** । मतुपः प्रकृतय इति शेषः । समानेऽर्थे बहुव्रीहिणा भाव्यं नतु मत्वर्थीयार्थेन तत्पुरुषेण । भिन्नार्थत्वे तु भाव्यमेव । गौरखरवदरण्यं कृष्णसर्पवान् वल्मीक इति । अत्र हि जातिविशेषेण तद्वत्ताप्रतिपिपादयिषिता नान्तरेण तत्पुरुषं मत्वर्थीयार्थं बहुव्रीहिमात्रेण प्रतिपादयितुं शक्यते । अन्ये त्वाहुः । अविद्यमाना ये पृथवस्ते सन्तीति विरोधादस्त्युपाधिकत्वाभावान्मतुब्न भवतीति । एतदपरे न क्षमन्ते । पृथुत्वगुणरहिताः स्वरूपेण विद्यमानाः पृथव एवापृथव उच्यन्त इति कथं सत्त्वोपाधिकत्वं न स्यात् । ननु च यथाऽनृचीयानित्यत्र बहुव्रीह्यर्थेन तद्वत्ताविवक्षायां मत्वन्तादीयसुन् भवति तथाऽपृथुशब्दादपि मतुपा तदन्ताच्चेयसुना भाव्यम् । एवं तर्ह्यनभिधानाद्बहुव्रीहेः कुतश्चिन्मतुपा न भवितव्यमिति मन्यते । तदेवमप्रथीयानिति तद्धितान्तेन समास

उ०—बाहुलकात्कर्तरि भूते ल्युट् । ननु पृथुशब्दोऽपि सदा गुणिवचनो न कदाचिदपि शुक्लादिवद्गुणवचन इति ततोऽप्युत्पत्तिरेवं सति न स्यादत आह—**अथवेति** । येषां विशेषरूपेण गुणः प्रवृत्तिनिमित्तं ते गुणवचना इत्यभिमानः । वस्तुत आकडारसूत्रोक्तरीत्या समाससंज्ञया गुणवचनसंज्ञाया बाधाभिप्रायेणेदं भाष्यं व्याख्येयम् । अपृथव एव न सन्तीति भाष्यमपि प्रकृताभिप्रायेणेत्याह—**मतुप इति** । तदुपपादयति—**समान इति** । गौरखरादिशब्दा जातिविशेषवचना न तु यौगिका इत्याह—**अत्र हीति** । मत्वर्थीयार्थे मत्वर्थीयफलकम् । शक्यत इत्यस्य जातिविशेषवतेति शेषः । **पृथव एवेति** । आरोपित पृथुत्ववन्त एवेत्यर्थः । **तथाऽपृथुशब्दादपीति** । माणवादिपरबहुव्रीहेरित्यर्थः । **कुतश्चिन्मतुपेति** । क्वचिद्बहुव्रीहिणा न भाव्यमिति वक्तुमुचितम् । अपृथव एव न सन्तीति भाष्यात् । ननु मातयती-

× ५. ३. ५८. * ५. ३. ६५.

इति । इह कस्मान्न भवति । मातयति भ्रातयति । लोपो×ऽत्र बाधको भविष्यति । इदमिह संप्रधार्यम् । टिलोपः क्रियतां रभाव इति किमत्र कर्तव्यम् । परत्वाद्रभावः । यदि पुनरवशिष्टस्य रभाव उच्येत । नैवं शक्यम् । इहापि प्रसज्येत । कृतमाचष्ट कृतयतीति । एवं तर्हि परिगणनं कर्तव्यम् । पृथुमृदुकृशभृशदृढपरिवृढानामिति वक्तव्यम् ।

**प्रकृत्यैकाच् ॥ ६ । ४ । १६३ ॥**

प्रकृत्यैकाजिति किमिष्ठेमेयःस्वाहोस्विदविशेषेण । किंचाऽतः । यद्यविशेषेण स्वी स्वी+ शौवम्* अधुनेत्यत्रापि** प्राप्नोति । स्विखिनावेव न स्तः । कथम् । उक्तमेतदेकाक्षराकृतो जातिः सप्तम्यां च न तौ स्मृतौ÷ । स्ववान् स्ववानित्येव भवितव्यम् । शौवमिति परत्वादैजागमे÷* कृते टिलोपेन भवितव्यम् । अधुनेति सप्रकृतिकस्य सप्रत्ययकस्य स्थाने निपातनं क्रियते । इह

प्र०—इति स्थितम् । स्वृचीयानित्येतस्यापि परिहाराय चोद्यमुपन्यस्यति—**इह कस्मादिति । मातयतीति** । उणादयोऽव्युत्पन्नानि प्रातिपदिकानीति पक्षाश्रयणात्तुरिष्ठेमेयःस्विती-ष्ठवद्भावात्तृशब्दस्य लोपाभावः । **यदि पुनरिति** । टिलोपोऽप्यनुवर्तते ततश्चान्त्यस्य ऋशब्दस्य टिलोपोऽनन्त्यस्य तु रभाव इति मातयतीत्यादौ रादेशाभावः । **कृतयतीति** । अत्रानन्त्य ऋकारोऽस्तीति रभावप्रसङ्गः । एवं स्वृचीयानित्यत्रापि । **एवं तर्हीति** । परिगणने च सति हलादेर्लघोरिति न कर्तव्यम् ।

**प्रकृ० । किमिष्ठेमेयःस्विति** । किं प्रत्यासत्त्याश्रयेणेष्ठेमेयसोऽपेक्ष्यन्तेऽथ व्याप्त्याश्रयेण तद्धित इति प्रश्नः । **स्वीति** । स्वशब्दादिनि कृते प्रकृतिभावाद्यस्येति लोपो न प्राप्नोति । **शौवमिति** । शुनो विकारावयवयोः प्राण्यत्रि कृते नस्तद्धित इति टिलोपो न प्राप्नोति । **अधुनेति** । इदमोऽधुनाप्रत्यये परत इशादेशस्तस्य यस्येति लोपो न प्राप्नोति । **शौवमिति** । टिलोपं बाधित्वा परत्वाद्वृद्धिः प्राप्ता द्वारादीनां चेति प्रतिषिध्यते । ऐजागमश्च क्रियते । तत्रैकाच्त्वाभावात्प्रकृतिभावाभावः । **अधुनेति** । इदमोऽश्भा-

उ०—त्यत्र तुरिष्ठेमेयःस्विति प्राप्नोतीत्यत आह—**उणादय इति** । ननु लोपं बाधित्वा रभावप्रवृत्तेरुक्तत्वात्कथमवशिष्टस्य रभाव आशङ्क्यते तत्राऽऽह—**टिलोपोऽपीति** । ऋकाररूपायाष्टेर्लोपो भवतीत्युक्ते सामर्थ्यादनन्त्यस्य रभावः फलतीति भावः । तृशब्दस्यान्त्यस्य टिलोप इत्यन्वयः । तस्यैव टित्वादिति भावः । **मातयतीत्यादाविति** । अनन्त्यऋकारस्याभावादित्यर्थः । **न कर्तव्यमिति** । ऋजिष्ठकृशिष्ठादौ प्रसङ्गाभावादिति भावः ।

**प्रकृत्यै० । तद्धित इति** । नस्तद्धित इत्यतस्तदनुवृत्तेरिति भावः । **विकारावयवयोरिति** । अर्थान्तरे तु तस्येदमित्यण्यन्निति प्रकृतिभावाच्छौवनमिति भाव्यम् । संकोचे तु शुनः संकोच इत्यनेन टिलोपेन भाव्यमिति भावः । **तत्रेति** । ऐजागमे कृते पुनःप्रसङ्ग-

× ६. ४. १५५. + ५. २ ११५; ६ ४, १४८. * ४. ३ १५४; ६. ४. १४४.
** ५. ३. १७; ६. ४. १४८, ÷ ५. २. ११५. ÷* ७, ३, ४.

तर्हि प्राप्नोति । द्रव्यम्+÷ ।

यस्येत्यादौ प्रकृतिभावः । यस्येति*+ यस्य लोपप्राप्तिस्तस्य प्रकृतिभावो न चैतानि यस्येत्यादौ । एवमपि श्रिये हितः श्रीयः** ज्ञा देवताऽस्य स्थालीपाकस्य ज्ञः×+ स्थालीपाक इत्यत्र प्राप्नोति । तस्मादिष्ठेमेयःसु प्रकृतिभावः ।

अथेष्ठेमेयःसु प्रकृतिभावे किमुदाहरणम् । प्रेयान् प्रेष्ठः÷÷ । नैतदस्ति । प्रादीनामसिद्धत्वान्न भविष्यति । इदं तर्हि । श्रेयान् श्रेष्ठः÷++ ।

**प्रकृत्यैकाजिष्ठेमेयःसु चेदेकाच उच्चारणसामर्थ्यादवचनात्प्रकृतिभावः ॥ १ ॥**

प्रकृत्यैकाजिष्ठेमेयःसु चेत्तन्न । किं कारणम् । एकाच उच्चारणसामर्थ्यादन्तरेणापि वचनं प्रकृतिभावो भविष्यति ।

---

प्र०—वोऽधुनाप्रत्ययश्च निपात्यते । **द्रव्यमिति** । द्रोर्विकारो द्रोश्चेति यत्प्रत्ययः । ओर्गुण इति गुणोऽत्र न प्राप्नोति । **यस्येत्यादाविति** । यस्येत्यादीनि कार्याण्यपेक्ष्य प्रकृतिभावो विधीयते । ओर्गुणस्तु तेभ्यः पूर्व इति प्रकृतिभावाभावः । **श्रिय हित इति** । प्राक्क्रीताच्छ इति च्छः । तत्र यस्येति लोपो न प्राप्नातीतीयङः प्रसङ्गः । **प्रादीनामिति** । असिद्धत्वादेवैकाच्त्वाभावात्प्रकृतिभावोऽप्यत्र नास्ति नापि टिलोपः । स्थान्याश्रयष्टिलोपः प्राप्नोतीति चेत् । विप्रतिषेधे तावदसिद्धत्वाभावस्य ज्ञापितत्वात्परत्वात्प्रादिषु कृतेषु तेषामसिद्धत्वेनाविद्यमानत्वान्न स्वाश्रयो नापि पराश्रयष्टिलोपः प्राप्नोत । **श्रेयानिति** । असिद्धाधिकाराद्बहिः आदिविधानादसिद्धत्वाभावः । **एकाच उच्चारण-**

---

उ०—विज्ञानाट्टिलोप इति भावः । भाष्ये प्रतिषेधशब्देन प्रकृतिभावोऽभिसहित इत्याह—**प्रकृतिभाव इति** । क्वचित्तु भाष्येऽपि तथैव पाठः । तत्र यस्येत्यादीत्यादिग्रहणं प्रकारार्थं लोपत्वेन च सादृश्यमत एवाग्रे न चैतानि यस्येत्यादावित्युक्तं भाष्ये । एतानीति बहुवचनं तु प्रयोगभेदेनौर्गुण इत्यस्य भेदमाश्रित्य । यस्येति यस्य लोपप्राप्तिरित्येतत् । यस्येतीत्येवमादिना यस्य लोपप्राप्तिरिति व्याख्येयम् । अत एव कनयति कनिष्ठ इत्यादावल्लोपोऽन इति लोपो न । न च तत्रोच्चारणसामर्थ्यादल्लोपाभावः । एवमपि नस्तद्धित इत्यस्याऽऽपत्तेः । उच्चारणं तु सर्वादेशत्वसंपादनेन चरितार्थम् । इनण्यनेत्यादिसाहचर्याल्लोपविषय एव प्रकृतिभावः । एतेनानन्तरत्वाट्टेरित्यस्यैवायं बाधक इति निरस्तम् । षपूर्वेति सूत्रस्थभाष्यप्रामाण्येन 'अन्' इत्यस्याल्लोपबाधकताया आवश्यकत्वेन तत्साहचर्यादर्थानुरोधाच्चैतद्विषयेऽपि न्यायाप्रवृत्तेरेवोचितत्वात् । नैकाजिति वक्तव्ये प्रकृतिग्रहणाच्च । अत एवोपक्रमे शौवमित्यत्राविशेषेणेति पक्षे नस्तद्धित इति न प्राप्नोतीति कैयटोक्तिः संगच्छते । **स्थान्याश्रय इति** । शास्त्रासिद्धत्वाश्रयणादिति भावः । **विप्रतिषेधे तावदिति** । अत्र विषये स्थानिनो निवर्तनात्स्थानिकार्याप्राप्तिरिति भावः । **न स्वाश्रय इति** । असिद्धत्वादिति भावः । **पराश्रय इति** ।

---

÷+ ४. ३. १६१; ६. ४. १४६. *+ ६. ४. १४८. ** ५. १. १; ६. ४. १४८.
×+ ४. २. २४; ६. ४. १४८. ÷÷ ६. ४. १५७. ÷++ ५. ३. ६०.

## विन्मतोस्तु लुगर्थम् ॥ २ ॥

विन्मतोस्तु लुगर्थं प्रकृतिभावो वक्तव्यः* । स्राग्वितरः स्रजीयान् । स्राग्वितमः स्रजिष्ठः । स्रुग्वत्तरः स्रुचीयान् । स्रुग्वत्तमः स्रुचिष्ठः । ननु च विन्मतोर्लुक्टिलोपं+ बाधिष्यते । कथमन्यस्योच्यमानमन्यस्य बाधकं स्यात् । असति खल्वपि संभवे बाधनं भवत्यस्ति च संभवो यदुभयं स्यात् । यथैव खल्वपि विन्मतोर्लुक्टिलोपं बाधत एवं नस्तद्धिते [ १४४ ] इत्येतमपि बाधेत । यतरो नौ ब्रह्मीयान् । ब्रह्मवत्तर इति । यत्तावदुच्यते कथमन्यस्योच्यमानमन्यस्य बाधकं स्यादितीदं तावदयं प्रष्टव्यः । यदि तर्हि विन्मतोर्लुङ्नोच्येत किमिह स्यादिति । टिलोप इत्याह । टिलोपश्चेन्नाप्राप्ते टिलोपे विन्मतोर्लुगार-

---

प्र०—**सामर्थ्यादिति** । अकार उच्चारणार्थो न प्रतिज्ञातोऽपि तु श्रवणार्थः । **विन्मतोस्तु लुगर्थमिति** । लुक्यर्थो यस्य तल्लुगर्थं लुकि कृते टिलोपाभावार्थमित्यर्थः । **कथमन्यस्येति** । विन्मतुबन्तस्य टिलोपं लुग्बाधतां तस्मिंस्तु कृते यष्टिलोपः प्राप्नोति तं कथं बाधते । नहि तस्मिन्प्राप्ते लुगारभ्यत इत्यर्थः । **यथैवेति** । लुको बाधकत्वाभ्युपगमेऽतिप्रसङ्ग इत्यर्थः । **ब्रह्मीयानिति** । अतिशयेन ब्रह्मवानितीयसुनि मतुप्लुकि च नस्तद्धित इति टिलोपः । **नाप्राप्त इति** । यद्यपि विषयभेदेन टिलोपो भिन्नस्तथाऽप्यनपेक्षितविषयभेदं टिलोपशास्त्रं येन नाप्राप्तिन्यायेन लुका बाध्यते तेन स्रजीयानित्येतस्मिन्नङ्गे सांप्रतिकी भाविनी च टिलोपप्राप्तिः पटिष्ठादौ सावकाशा लुका

---

उ०—तस्याभावादिति भावः । अनयोर्यौगपद्यासंभवरूपो विरोधः । आदेशे प्रियशब्दस्येष्ठाद्यानन्तर्यविघातात्, टिलोपे च प्रियशब्दस्याऽऽदेशनिमित्तानन्तर्यविघातात् । स्थानिवद्भावस्त्वादेशप्रवृत्त्युत्तरं न तत्प्रवृत्तिसमये, कृते च टिलोपे प्रादीनां चारितार्थ्यमिति वार्तिकमतेनेदं बोध्यम् । वस्तुतस्तु पूर्वप्राप्तटिलोपं बाधित्वा परत्वात्प्राद्यादेशे कृते पुनस्तन्निमित्तटिलोपः सकृद्गतिन्यायेन न भवति । आदेशनिमित्तस्त्वसिद्धत्वादेव नेति भाष्याशयः । **श्रवणार्थ इति** । न च लोपेऽपि ण्यन्ताच्चाङि अशश्रदित्यादावकारश्रवणाय तदुच्चारणं चरितार्थम् । ईदृशेऽपि विषये द्विर्वचनेऽचीत्यादेः प्रवृत्त्यभावस्य तत्रैवोपपादितत्वात् । ननु प्रकृतिभावस्य विन्मतोर्लुक् न प्रयोजनमत आह—**लुगर्थमिति** । ननु विन्मतुबन्तस्य लुक्टिलोपौ प्राप्नुत इति किमुच्यतेऽन्यस्येतीत्यत आह—**विन्मतुबन्तस्येति** । भाष्ये दोषान्तरमाह—**यथैव खल्वपीति** । तदाशयमाह—**लुक इति** । **टिलोप इति** । इष्यत इति शेषः । तथा चाऽऽरण्यके तस्माद्ब्राह्मणं ब्रह्मिष्ठं कुर्विति प्रयोगः । **अनपेक्षितविषयभेदमिति** । तन्न्यायस्य तथैव स्वरूपादिति भावः । अनयाऽपि युक्त्या प्रेष्ठादौ टिलोपवारणं श्रेष्ठज्येष्ठादौ च । एवं भूयानित्यादौ भ्वादेशस्य गुणापवादत्वान्नाऽऽदेशस्य गुणः । असिद्धत्वाद्युक्तिस्तु भाष्ये वार्तिकमतेनैकदेशिन इति बोध्यम् । **स्रजीयानित्येतस्मिन्नङ्ग इति** । अनेनाभिन्नविषयत्वं

---

* ५. ३. ६५. + ६. ४. १५५.

भ्यते स बाधको भविष्यति । यदप्युच्यतेऽसति खल्वपि संभवे बाधनं भवत्यस्ति च संभवो यदुभयं स्यादिति सत्यपि संभवे बाधनं भवति । तद्यथा । दधि ब्राह्मणेभ्यो दीयतां तक्रं कौण्डिन्यायेति सत्यपि संभवे दधिदानस्य तक्रदानं निवर्तकं भवति । एवमिहापि सत्यपि संभवे विन्मतोर्लुक्टिलोपं बाधिष्यते । यदप्युच्यते यथैव खल्वपि विन्मतोर्लुक्टिलोपं बाधत एवं नस्तद्धित इत्येतमपि बाधेतेति न बाधते । किं कारणम् । येन नाप्राप्ते तस्य बाधनम् । नाप्राप्ते टिलोपे विन्मतोर्लुगारभ्यते नस्तद्धित इत्येतस्मिन्पुनः प्राप्ते चाप्राप्ते च। अथवा पुरस्तादपवादा अनन्तरान्विधीन्बाधन्त इत्येवं विन्मतोर्लुक्टिलोपं बाधि-

---

प्र०—बाध्यते तत्र विन्नन्तस्य नान्तत्वान्नस्तद्धित इत्ययमपि टिलोपो लुका बाध्यते । मतोस्तु लुका नस्तद्धित इति टिलोपो न बाध्यते । ननु किमुच्यते नस्तद्धित इत्यस्मिन्पुनःप्राप्ते चाप्राप्ते चेति यावता मतोर्नान्तित्वाभावादप्राप्त एव नस्तद्धित इति टिलोपः । **नैष दोषः** । मतुप्प्रत्ययो नकारान्तादनकारान्ताच्च विधीयते। तत्र यद्यप्यकृते मतुब्लुकि नस्तद्धित इति टिलोपो न प्राप्नोति तथाऽपि मतुब्लुकि कृते प्राप्नोति । एकदेशविकृतं चानन्यवदिति यदेवाङ्गं ब्रह्मवदिति तदेव ब्रह्मन्निति । तदेवमभेदाश्रयेणेदमुक्तं प्राप्ते चाप्राप्ते चेति । **अथवेति** । ननु विन्मतोर्लुगित्येतस्य नस्तद्धित इत्ययमेव योगोऽनन्तरः, टेरित्ययं तु व्यवहितः । **तत्र केचिदाहुः** । पाठक्रमादर्थक्रमो बलीयानिति । टेरित्येष योगः सर्वविषयस्य व्यापनादनन्तरो भवति । यद्येवं पूर्वमेवायमर्थ उक्तो येन नाप्राप्त इति किमर्थं पुनरुच्यते । पूर्वमुत्सर्गापवादन्याय उक्त इदानीं त्वर्थक्रमप्रतिपत्त्याश्रयेणोच्यते येन हि सर्वो विषयो व्याप्तः स एव बाधितुं युक्तः । यस्तु विषयविशेषे प्रवर्तते तस्य बाधा न युक्ता । सामान्ये हि पूर्वं प्रतिपत्तिरुदेति पश्चाद्विशेषेषु । अन्ये तु न्यास भेदाश्रयेण व्याचक्षते टेरित्यस्य

---

उ०—लुग्लोपयोर्दर्शयति—**नस्तद्धित इत्ययमपीति** । फलोदाहरणमस्य चिन्त्यम् । क्व तर्हि नान्तस्य टिलोपे येन नाप्राप्तिन्यायाभाव उक्तोऽत आह—**मतोस्त्विति** । ननु कृते मतुब्लुकि शब्दान्तरस्य टिलोपः प्राप्नोति नतु मत्वन्तस्येति कथं लुको नस्तद्धित इत्यस्मिन्प्राप्त आरम्भोऽत आह—**एकदेशेति** । **तदेवमभेदेति** । नान्तमत्वन्तयोरभेदाश्रयेणेति भावः । **नन्विति** । विन्मतोरिति लुक् पञ्चमाध्यायस्थः । **अर्थक्रमः** । बुध्यारोहविषयः क्रमः । **सर्वविषयव्यापनादिति** । यद्बाधकं तस्य बहुषु बाध्येषु किं बाध्यमिति विशेषचिन्तायां येन तस्य सर्वोऽपि विषयो व्याप्तस्तद्बाधेन विनाऽस्य प्रवृत्त्ययोगात्तत्रावश्यबाधनीये तेन चारितार्थ्यादन्यबाधने मानाभाव इत्ययं न्यायोऽथवेत्यनेन दर्शित इत्यर्थः । अत्रार्थे पौनरुक्त्यं शङ्कते—**यद्येवमिति** । सर्वविषयव्यापनेन बाधकोपस्थितिकाले झटिति बुद्धिसंनिधानादनन्तरत्वमिति । अनेनापि न्यायेन तस्यैव बाध इति भाष्यार्थ इत्युत्तरम् । **टेरित्यस्य**

ष्यते । नस्तद्धित इत्येतं न बाधिष्यते । यदि तर्हि विन्मतोर्लुकि टिलोपं बाधते पयिष्ठ इति न सिध्यति पयसिष्ठ इति प्राप्नोति । यथालक्षणमप्रयुक्त इति ।

**प्रकृत्याऽके राजन्यमनुष्ययुवानः ॥ ३ ॥**

राजन्यमनुष्ययुवानोऽके प्रकृत्या भवन्तीति वक्तव्यम् । राजन्यकम्× । मानुष्यकम्× यौवनिका* ।

**न मपूर्वोऽपत्येऽवर्मणः ॥ ६ । ४ । १७० ॥**

**मपूर्वात्प्रतिषेधे वा हितनाम्नः ॥ १ ॥**

मपूर्वात्प्रतिषेधे वा हितनाम्न इति वक्तव्यम् । आरोहितो वै हैतनामः । आरोहितो वै हैतनामनः । समानो हैतनामः । समानो हैतनामन इति च ।

---

**प्र०**—पश्चान्नस्तद्धित इति पठितव्यम् । **पयिष्ठ इति** । पयस्विन् इष्ठ इति स्थिते विनो लुकि कृतेऽसो लोपो न प्राप्नोति । **यथालक्षणमिति** । न भवति टिलोप इत्यर्थः । ततश्च रजस्विनमाचष्टे रजसयति । आयुष्मन्तमाचष्ट आयुषयतीति भवितव्यम् । **राजन्यकमिति** । समूहेऽर्थे गोत्रोक्षोष्ट्रेति वुञ् । आपत्यस्य च तद्धितेऽनातीति यलोपाभावार्थं प्रकृतिभावविधानं यस्येति लोपे सत्यसति वा विशेषाभावान्न तदर्थः प्रकृतिभावः । **यौवनिकेति** । यूनो भाव इति मनोज्ञादित्वाद्वुञ् । तत्र नस्तद्धित इति टिलोपः प्राप्तः प्रकृतिभावान्न भवति ।

**न म० । हैतनामन इति** । हितनाम्नोऽपत्यमित्यण् । अन्निति प्रकृतिभावात्पक्षे टिलोपाभावः ।

---

**उ०**—**पश्चादिति** । इदं चिन्त्यम् । एवं न्यास ओर्गुण इत्यादौ तद्धित इत्यस्य लाभे स्थूलदूरेत्यादौ चेष्ठेमेयःस्वित्यस्य लाभे क्लेशात् । अत्र केचित् । इदं भाष्यं न सूत्रप्रत्याख्यानपरं किंतु वृत्त्याद्युक्तोदाहरणेष्वन्यथासिद्धिप्रतिपादनपरम् । अत एव कनिष्ठ इत्यादौ नस्तद्धित इति टिलोपो नेति बोध्यम् । केचित्तु कन इत्यदन्त आदेशः, सूत्रे शकन्ध्वादित्वात्पररूपमित्याहुः । तन्न । यस्येत्यादिलोपेऽवश्यं प्राप्तेऽस्याऽऽरम्भाद्विन्मतोर्लुङ्न्यायेन पुनस्तदनापत्तौ कनिष्ठ इत्याद्यसिद्ध्यापत्तेः । एवं नेदसाधावपि हलन्तादेव । अकारस्तूच्चारणार्थः । परे तु किमुदाहरणमिति प्रश्ने परोक्तोदाहरणानामन्यथासिद्धिं प्रदर्श्योदाहरणान्तरानुपलम्भेऽस्योदाहरणाभाव एव । विन्मतोर्लुगिव प्रादयः श्रादयः कनादयश्च टिलोपे नाप्राप्त आरभ्यमाणास्तद्बाधका एव । कनिष्ठ इत्यादौ नस्तद्धित इति तु न । अनुच्चारणसामर्थ्यात् । सर्वादेशः केत्यादेशेनापि सिद्धः । टेरिति लोपस्य तु येन नाप्राप्तिन्यायेन कनादेशेन बाधादप्रवृत्तिरित्याहुः । **न भवतीति** । वस्तुतो नास्त्येवेदृशः प्रयोग इति बोध्यम् । **इति भवितव्यमिति** । यद्यभिधानमस्तीति बोध्यम् । विशेषाभावादिति । असत्यपि यस्येति लोपे पररूपेण रूपस्य सिद्धत्वादिति भावः ।

**न मपूर्वो० । पक्ष इति** । प्रतिषेधाभावपक्ष इत्यर्थः ।

---

× ४. २. ३९; ( ६. ४. १५१ ). * ५. १. १३३; ( ६. ४. १४४. )

**ब्राह्मोऽजातौ ॥ ६ । ४ । १७१ ॥**

अथ किमिदं ब्राह्मस्याजातावनो लोपार्थं वचनमाहोस्विन्नियमार्थम् । कथं च लोपार्थं स्यात्कथं वा नियमार्थम् । यदि तावदपत्य इति× वर्तते ततो नियमार्थम् । अथ निवृत्तं ततो लोपार्थम् । अत उत्तरं पठति ।

**ब्राह्मस्याजातौ लोपार्थं वचनम् ॥ १ ॥**

ब्राह्मस्याजातौ लोपार्थं वचनं क्रियते । अपत्य इति निवृत्तम् ।

**तत्राप्राप्तविधाने प्राप्तप्रतिषेधः ॥ २ ॥**

तत्राप्राप्तस्य टिलोपस्य विधाने प्राप्तस्य÷ प्रतिषेधो वक्तव्यः । ब्राह्मणः ।

**न वा पर्युदाससामर्थ्यात् ॥ ३ ॥**

न वा वक्तव्यः । किं कारणम् । पर्युदाससामर्थ्यात्पर्युदासोऽत्र भविष्यति । अस्त्यन्यत्पर्युदासे प्रयोजनम् । किम् । या जातिरेव नापत्यम् । ब्राह्म्योषधि-

प्र०— **ब्राह्मो०**। ब्राह्मशब्दोऽपत्येऽनपत्ये चेष्यते ब्राह्मो नारदो ब्राह्मो मुहूर्तो ब्राह्मः स्थालीपाक इति । जातौ त्वपत्ये ब्राह्मण इतीष्यते । अनपत्ये तु जातौ ब्राह्मी औषधिरिति टिलोप इष्यते । एतच्च यथाभिधानं न सिध्यतीति मत्वा पृच्छति—**अथ किमिद-मिति । यदि तावदिति** । ब्रह्मणोऽपत्यमित्यण् । अल्लोपोऽन इत्यकारलोपः प्राप्तो न संयोगाद्वमन्तादिति प्रतिषिद्धः । नस्तद्धित इति टिलोपे प्राप्तेऽनीति प्रकृतिभावः प्राप्तो न मपूर्वोऽपत्येऽवर्मण इति प्रतिषिद्धस्ततष्टिलोपे प्राप्ते नियमार्थमिदमजातावेवापत्ये टिलोपो भवति ब्राह्मो नारद इति । जातौ त्वपत्ये न भवति ब्राह्मण इति । एवमपत्ये सिध्यति व्यवस्था । अनपत्ये त्वनीति प्रकृतिभावाद्ब्राह्मशब्दो न सिध्यति । **अथ निवृत्तमिति** । अपत्यग्रहणे निवृत्ते विधिनियमसंभवे विधिरेव ज्यायानित्यनपत्येऽनीति प्रकृतिभावे प्राप्तेऽजातौ टिलोपार्थं निपातनं भवति । तत्र ब्राह्मो मुहूर्तो ब्राह्मः स्थालीपाक इति सिध्यति । ब्राह्मी औषधिरिति तु न सिध्यति । अजाताविति प्रतिषेधात् । ब्राह्मणी औषधिरिति प्राप्नोति । अपत्ये जातौ ब्राह्मण इति न सिध्यति । न मपूर्वोऽपत्येऽवर्मण इति प्रकृतिभावप्रतिषेधाट्टिलोपप्रसङ्गात् । **न वेति** । वक्ष्यमाणोऽभिप्रायः । इतरस्त्वेतमभिप्रायमबुद्ध्वाऽऽह—**अस्त्यन्यदिति** । ब्राह्मी औषधि-

उ०— **ब्राह्मोऽजातौ । ब्राह्मो नारद इति** । क्रमेण तस्यापत्यं तस्येदं साऽस्य देवतेत्यण् । **एतच्चेति** । उक्तं रूपजातं विधिपक्षे नियमपक्षे च यथेष्टं न सिध्यतीति भावः । अपत्य इत्यस्यानुवृत्तौ नियमार्थत्वमुपपादयति—**ब्रह्मणोऽपत्यमिति** । नियमपक्षे दोषं स्फोरयति—**अनपत्ये त्विति** । अनन्तरापत्ये जातित्वाभावादजाताविति विशेषणमपत्यस्य युज्यते । तन्निवृत्तौ किमिदमपत्ये नियमार्थमुतानपत्ये विध्यर्थमिति विशये विधिरेव युक्त इत्याह—**अनपत्य इति** । अत्र पक्षे प्राप्तस्य प्रतिषेधो वक्तव्य इति भाष्योक्तं दोषं स्फोरयितुं स्वयं दोषान्तरमप्याह—**ब्राह्मीति । वक्ष्यमाण इति** । नात्रापत्य इत्यादिना वक्ष्यमाणं योग-

× ६. ४. १७०. ÷ ६. ४. १७०; १४४.

१ क. ख. 'यः । न त्वपत्य इत्यनेन । इ' ।

रिति । न वा अत्रेष्यते । अनिष्टं च प्राप्नोतीष्टं च न सिध्यति । एवं तर्ह्यनुवर्ततेऽपत्य इति न त्वपत्य इत्यनेन निपातनमभिसंबध्यते । ब्राह्म इति निपात्यतेऽपत्येऽजाताविति । किं तर्हि । प्रतिषेधोऽभिसंबध्यते । ब्राह्म इति निपात्यतेऽपत्ये जातौ नेति ।

## कार्मस्ताच्छील्ये ॥ ६ । ४ । १७२ ॥

किमर्थमिदमुच्यते न नस्तद्धिते [ १४४ ] इत्येव सिद्धम् । न सिध्यति । अनणीति× प्रकृतिभावः प्रसज्येत । अणीत्युच्यते णश्चायम्÷ । एवं तर्हि सिद्धे सति यन्निपातनं करोति तज्ज्ञापयत्याचार्यस्ताच्छीलिके णेऽण्कृतानि भव-

---

प्र०— रित्यत्र कृतार्थः पर्युदासो ब्राह्मण इत्यत्र पूर्वसूत्रविहितप्रकृतिभावप्रतिषेधप्राप्तं टिलोपं न निवर्तयेत् । **न वा अत्रेष्यत इति** । अजाताविति पर्युदासः । न चानिष्टार्थे शास्त्रप्रक्लृप्तिरिति पर्युदाससामर्थ्याद्ब्राह्मण इत्यत्र टिलोपो न भविष्यतीत्यर्थः । इतरस्तु लक्षणमुपालब्धुमाह— **अनिष्टं च प्राप्नोतीति** । ब्राह्मणी औषधिरिति प्राप्नोति । अजाताविति पर्युदासात् । इष्टं च न सिध्यति ब्राह्मण इति । **एव तर्हीति** । योगविभागः क्रियत इति भावः । तत्र ब्राह्म इत्यत्र सामर्थ्यादपत्य इति न संबध्यते । अपत्ये टिलोपस्य सिद्धत्वात् । तेनानपत्ये सर्वत्र जातावजातौ च ब्राह्म इति निपात्यते । अपत्येऽपि ब्राह्मो नारद इत्यत्र परत्वाद्ब्राह्म इत्यनेनैव टिलोपो भवति । **ततोऽजाताविति** । तत्रापत्य इत्यनुवर्तते । तेनायमर्थो भवति— अपत्ये जातौ ब्राह्मणशब्दे टिलोपो न भवति । अजाताविति प्रसज्यप्रतिषेधो भवतिना नञः संबन्धादिति सर्वेष्टसिद्धिः ।

**कार्मस्ताच्छील्ये । किमर्थमिति** । कर्म शीलमस्य च्छत्रादिभ्यो ण इति णे कृते सिद्धष्टिलोप इति भावः । **ताच्छीलिक इति** । एवं च च्छत्रादिभ्योऽणिति लाघवाय कर्तव्यम् । णवचने प्रयोजनाभावात् । प्रज्ञाश्रद्धेति ज्वलितिकसन्तेभ्य इति

---

उ०—विभागं मनसिकृत्यैतदुक्तमित्यर्थः । **अजाताविति पर्युदास इति** । जातिं वर्जयित्वा ब्राह्म इति टिलोप इति सूत्रार्थः । मनुष्यजातिविशेषे ब्राह्मणशब्दप्रयोगस्येष्टत्वात्तत्रैव पर्युदासः फलतीति तात्पर्यम् । इष्टिमात्रमेतत् । नतु लक्षणेनायमर्थो लभ्यत इति । उत्तरभाष्यार्थमाह— **इतरस्त्विति । ब्राह्मण इतीति** । पूर्वसूत्रेण प्रकृतिभावप्रतिषेधेन टिलोपप्राप्तेरिति भावः । **अनेनैवेति** । नतु नस्तद्धित इत्यनेनेति भावः । इदं वस्तुस्वरूपकथनमात्रम् । **प्रसज्यप्रतिषेधेनेति** । अन्यथाऽपत्य इत्यनुवृत्तस्यानन्वयः स्यात् । अजातावपत्य इत्यर्थे विधेयानिर्देशादिति भावः । तदुक्तं भाष्येऽपत्ये जातौ नेति ।

**कार्मस्ता०** । भाष्येऽण्णन्तादितीकार इति । अणो व्यच इति फिञपि फलान्तरं बोध्यम् । अत एवोपक्रमभाष्येऽण्कृतानि भवन्तीति बहुवचनप्रयोग इत्याहुः । **एवं चेति** । ज्ञापके हि ज्ञापकसिद्धस्यासार्वत्रिकत्वाच्छात्रेति सिध्यतीति चिन्त्यमिदमित्यन्ये । अन्यत्र णवचने प्रयोजनमस्तीत्याह— **प्रज्ञेत्यादि** ।

---

× ६. ४. १६७. ÷ ४. ४. ६२.

न्तीति । किमेतस्य ज्ञापने प्रयोजनम् । चौरी तापसीत्यणन्तादितीकारः सिद्धो भवति× ।

**दाण्डिनायनहास्तिनायनाथर्वणिकजैह्माशिनेयवासिनायनिभ्रौणहत्यधैवत्यसारवैक्ष्वाकमैत्रेयहिरण्मयानि ॥ ६।४।१७४॥**

अत्र भ्रौणहत्ये किं निपात्यते । यकारादौ तद्धिते तत्वं निपात्यते ।

**भ्रौणहत्ये तत्वनिपातनानर्थक्यं सामान्येन कृतत्वात् ॥ १ ॥**

भ्रौणहत्ये× तत्वनिपातनमनर्थकम् । किं कारणम् । सामान्येन कृतत्वात् । सामान्येनैवात्र तत्वं भविष्यति हनस्तोऽचिण्णलोः [ ७. ३. ३२ ] इति ।

**ज्ञापकं तु तद्धिते तत्वप्रतिषेधस्य ॥ २ ॥**

एवं तर्हि ज्ञापयत्याचार्यो न तद्धिते तत्वं भवतीति । किमेतस्य ज्ञापने प्रयोजनम् । भ्रौणघ्नः वार्त्रघ्न इत्यत्र तत्वं न भवति ।

**ऐक्ष्वाकस्य स्वरभेदान्निपातनं पृथक्त्वेन ॥ ३ ॥**

ऐक्ष्वाकस्य+ स्वरभेदान्निपातनं पृथक्त्वेन कर्तव्यम् । ऐक्ष्वाकः ऐक्ष्वाकः ।

**एकश्रुत्या निर्देशात्सिद्धम् ॥ ४ ॥**

एकश्रुतिः स्वरसर्वनाम यथा नपुंसकं लिङ्गसर्वनाम ।

---

प्र०—तदस्यां प्रहरणमिति णवचने ङीबभावः प्रयोजनम् ।

**दाण्डि०** । **यकारादाविति** । भ्रूणघ्नो भाव इति ब्राह्मणादित्वात्ष्यञ् । **ज्ञापकं त्विति** । धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानमित्यनपेक्ष्य ज्ञापकमुक्तम् । तदपेक्षायां तत्वस्याप्रसङ्गात् । ननु टिलोपाभावार्थं निपातनं स्यादिति सति प्रयोजने ज्ञापकमनुपपन्नम् । नैष दोषः । उभयोरनित्ययोः परत्वाट्टिलोपं बाधित्वा तत्वं भविष्यति । अनेकप्रयोजनत्वाद्वा निपातनानाम् । अत एव कुत्वप्रतिषेधार्थमपि निपातनम् । **ऐक्ष्वाक इति** । इक्ष्वाकोरपत्यमिति जनपदशब्दादित्यञ् । उकारलोपो निपात्यते । ञित्वादाद्युदात्तत्वम् । इक्ष्वाकुषु जात इत्यणि प्राप्त ओर्देशे ठजिति ठञि प्राप्ते तं परत्वाद्बाधित्वा जनपदतदवध्योश्चावृद्धादपि बहुवचनविषयादिति वुञि प्राप्ते कोपधादित्यण् । तत्रान्तोदात्तत्वम् । तत्र भिन्नस्वरयोरेकस्मिन्निपात्यमानेऽपरस्यासंग्रहादुभयमपि निपात्यम् । **एकश्रुतिनिर्देशादिति** । स्वरभेदप्रत्यस्तमयेन निपातनं सर्वस्वरलौकिकप्रयोगसंग्रहार्थमित्यर्थः । **यथा नपुंसक-**

---

उ०— **दाण्डिनाय०** । भाष्ये—**सामान्येनेति** । ष्यञि परतो नस्तद्धित इति टिलोपं बाधित्वा परत्वाद्धनस्त इति तत्वं भविष्यतीति भावः । **अनपेक्ष्येति** । वस्तुतः स एवार्थोऽनेन ज्ञाप्यत इति शब्दान्तरेण भाष्य उक्तमिति बोध्यम् । **तत्वस्य** तकारस्य । **अत एवेति** । अनेकप्रयोजनत्वादेवेत्यर्थः । भाष्ये—**एकश्रुतिनिर्देशादिति** । ननु सूत्रे द्वंद्वसत्त्वेन समासान्तोदात्तत्वे तन्निमित्तशेषनिघातेन निर्देशान्नाद्युदात्तस्य नाप्यन्तोदात्तस्य निर्देश इति शङ्कैवायुक्तेति चेन्न । तदीयविग्रहवाक्याभिप्रायेण शङ्कोत्तरयोः सत्त्वात् । एकश्रुतेः स्वरसर्वनामत्वं दर्शयति—**स्वरभेदेति** । **प्रत्यस्तमयः** त्यागः । यथा तस्यापत्यमित्याद्यावुपगु-

---

×४, ४, ६२; ४. १, १५. + ५, १. १२४, *४. १. १६८; ६ १, १९७; ४. ३.१३२; ३, १, ३

अथ मैत्रेये किं निपात्यते ।

**मैत्रेये ढञि यादिलोपनिपातनम् ॥ ५ ॥**

मैत्रेये ढञि यादिलोपो निपात्यते । इदं मित्रयुशब्दस्य चतुर्ग्रहणं क्रियते । गृष्ट्यादिषु प्रत्ययविध्यर्थं पाठः क्रियते* । द्वितीयेऽध्याये यस्कादिषु लुगर्थं ग्रहणं क्रियते+ । सप्तमेऽध्याय इयादेशार्थम्× । इदं चतुर्थं यादिलोपार्थम् । द्विर्ग्रहणं शक्यमकर्तुम् । बिदादिषु* प्रत्ययविध्यर्थं पाठः कर्तव्यः। तत्र नैवार्थो लुका नापि यादिलोपेन÷ । इयादेशेनैव सिद्धम् । नैवं शक्यम् । इह हि मैत्रेयकः+÷ संघ इति संघाङ्कलक्षणेष्वञ्यञिञामण् [ ४. ३. १२७ ] इत्यणप्रसज्येत ।

हिरण्मये किं निपात्यते ।

**हिरण्मये यलोपवचनम् ॥ ६ ॥**

हिरण्मये यलोपो निपात्यते । हिरण्मयं कलशं बिभर्षि ।

अथ हिरण्यये किं निपात्यते** ।

**हिरण्ययस्य च्छन्दसि मलोपवचनात्सिद्धम् ॥ ७ ॥**

हिरण्यये छन्दसि मलोपो निपात्यते । हिरण्ययी नो नयतु । हिरण्ययाः पन्थान आसन् । हिरण्ययमासनम् ।

---

**प्र०–मिति** । सामान्यस्थितावाविर्भावतिरोभावस्थितिविशेषाणामन्तर्भावात् । **मैत्रेय इति** । मित्रयोरपत्यमिति गृष्ट्यादिभ्यश्चेति ढञ् । मित्रयु एय इति स्थित ओर्गुण इति गुणापवादे टेर्लोपोऽकद्र्वा इति लोपे प्राप्ते केकयमित्रय्विति यादेरियादेशे प्राप्ते लोपो निपात्यते । तल्लोपस्यासिद्धत्वाद्यस्येति लोपाभावादतो गुण इति पररूपमेकारः । **द्वितीय इति** । मित्रयव इति बह्वु लुगर्थः पाठः। **सप्तम इति** । ढञोऽन्यत्रेयादेशः । मित्रयोरिदं मैत्रेयमिति । **मैत्रेयक इति** । मित्रयूनां संघ इति गोत्रेऽलुगचीति लुकि प्रतिषिद्धे ढञन्ताद्गोत्रचरणाद्वुञिति वुञ् । यदि तु संघाङ्के त्यत्र न मैत्रेयादित्युच्यते तदा त्रीणि ग्रहणानि स्युरितीह निपातनं न कर्तव्यं स्यादिष्टस्य सिद्धत्वात् ।

---

**उ०–**प्रभृतीन् विशेषानभेदेन सर्वनाम प्रतिपादयति तथैकश्रुतिरप्युदात्तादीन् विशेषानिति सर्वस्वरसंग्रहसिद्धिरित्यर्थः । नपुंसकस्य लिङ्गसामान्यत्वमाह—**सामान्यस्थिताविति** । परिणाम इत्यर्थः । आविर्भावतिरोभावप्रागवस्थाऽत्र स्थितिविशेषः । ननु यस्येति लोपाभावे वृद्धिरेचीति स्यादत आह–**अतो गुण इति** । भाष्ये— **नैवार्थो लुकेति** । ञ्णोश्चेत्येव सिद्धत्वादिति भावः । **न मैत्रेयादिति** । अणि निषिद्धे वुञ् सिद्ध एवेति भावः । **तदा त्रीणीति** । बिदादिष्वेकम् । इयादेशार्थमपरम् । अणुनिषेधार्थं तृतीयमित्यर्थः । नञा सहात्रापि न्यासे चत्वारि ग्रहणानीति पदलाघवाभावान्नोक्तमिदं भगवतेति सर्वेष्टसिद्धिः ।

---

*४. १. १३६ +२. ४. ६३. × ७. ३. २. *४. १ १०४; २. ४ ६४. ÷ २ ४. ६३; ६. ४. १७४ +÷ ४. ३. १२६. ** ६, ४. १७५

इति श्रीभगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये षष्ठस्याध्यायस्य चतुर्थे पादे चतुर्थमाह्निकम् । पादश्च समाप्तः ।

॥ षष्ठोऽध्यायः समाप्तः ॥

---

**युवोरनाकौ ॥ ७ । १ । १ ॥**

युवोरनाकावित्युच्यते कयोर्युवोरनाकौ भवतः । प्रत्यययोः । कथं पुनरङ्गस्ये-

---

प्र०— इत्युपाध्यायजैयटपुत्रकैयटकृते भाष्यप्रदीपे षष्ठस्याध्यायस्य चतुर्थे पादे चतुर्थमाह्निकम् ॥ पादश्चतुर्थोऽध्यायश्च षष्ठः समाप्तः ॥

**युवोरनाकौ** । इह युवोरिति समाहारद्वंद्वे युवुन इति प्राप्नोति । इतरेतरयोगे तु युव्वोरिति । तत्र सौत्रत्वान्निर्देशस्य नुममकृत्वोकारलोपं वा कृत्वा निर्देश इति न दोषः । केचित्तु कर्मधारयं व्याचक्षते । अवयवधर्मेण समुदायस्य व्यपदेशात् । यथा समं चूर्णं कृष्णैत इति । एवं युश्चासौ समुदायो युवुलक्षणो वुश्चासाविति । तत्र समुदायस्याङ्गनिमित्तत्वासंभवादवयवयोर्यथासंख्यं कार्यविज्ञानम् । यथा च भाष्यं कयोर्युवोरिति तथेतरेतरयोगे द्वंद्व इति निर्णयः । अतिप्रसङ्गं मत्वा पृच्छति— **कयोरिति** । **प्रत्यययोरिति** । अङ्गाधिकारादङ्गस्य निमित्ते यौ युवू तयोरनाकाविति सूत्रार्थाश्रयणात् । **कथं पुनरिति** । अङ्गाधिकारादङ्गस्यैव कार्यित्वं युक्तमिति भावः । सिद्धान्तवादिना तु वैयधिकरण्येन संबन्धो दर्शयितव्यः । संप्रति

---

उ०— इति श्रीशिवभट्टसुतसतीगर्भजनागोजीभट्टकृते भाष्यप्रदीपोद्द्योते षष्ठस्याध्यायस्य चतुर्थे पादे चतुर्थमाह्निकं पादश्चाध्यायश्च समाप्तः ॥

**युवोरनाकौ** । युवोरिति निर्देशानुपपत्तिमुद्भाव्य परिहरति—**इहेति** । नपुंसकत्वान्नुमः प्राप्तेरिति भावः । **युव्वोरिति** । ओसि यणादेशप्रसङ्गादिति भावः । आद्ये समाधत्ते—**नुममकृत्वेति** । सौत्रत्वादिति भावः । द्वितीय आह—**उकारलोपं वेति** । छान्दसोवर्णलोप इति भावः । **समं चूर्णमिति** । चूर्णं कणसमुदायः । तत्रावयवैसामान्यात्समुदायस्य तथा व्यपदेशः । कृष्णैत इत्यत्रावयवयोः कृष्णैतत्वात्समुदायस्य तथा व्यपदेशः । वर्णो वर्णेनेति समानाधिकरणसमासः । नन्वेवं समुदायस्यानाकौ स्यातामत आह—**तत्रेति** । **यथा चेति** । छान्दसश्च वर्णलोप इति तद्भावः । **अतिप्रसङ्गमिति** । युग्माभुज्युरित्यादौ । **अङ्गस्यैवेति** । युवुशब्दान्तस्याङ्गस्येत्यर्थ इति भावः । यद्यपि सिद्धान्तेऽपि वैयधिकरण्यसंबन्धोऽभिमतस्तथाऽपि शिष्यबुद्धिपरीक्षार्थं तदनाश्रयणेन परिहरतीत्याह—**सिद्धान्तवादिना त्विति** । ननु शास्त्रतोऽत्र विभक्तिरस्त्येवेत्यत आह—**लौकिक**

त्यनुवर्तमाने÷ प्रत्यययोः स्याताम् । युशब्दवुशब्दान्तमताद्विभक्तावङ्गं भवति । यदि युशब्दवुशब्दान्तस्याङ्गस्यानाकौ भवतः सर्वादेशौ प्राप्नुतः× । निर्दिश्यमानस्याऽऽदेशा भवन्तीत्येवं न भविष्यतः। यत्र तर्हि विभक्तिर्नास्ति। नन्दना कारिकेति+ । अत्रापि प्रत्ययलक्षणेन विभक्तिः । यत्र तर्हि प्रत्ययलक्षणं नास्ति । नन्दनप्रियः कारकप्रिय इति* । मा भूतां याऽसौ सामासिकी विभक्तिस्तस्यां याऽसौ समासाद्विभक्तिस्तस्यां भविष्यतः। न वै तस्यां युशब्दवुशब्दान्तमङ्गं भवति । भवेद्यो युशब्दवुशब्दाभ्यामङ्गं विशेषयेत्तस्यानन्त्ययोर्न स्यातां वयं खल्वङ्गेन युशब्दवुशब्दौ विशेषयिष्यामः । अङ्गस्य युवोरनाकौ भवतो यत्रतत्रस्थयोरिति। यत्र तर्हि समासाद्विभक्तिर्नास्ति । नन्दनदधि कारकदधि×। एवं तर्हि ।

न वा परं निमित्तं संज्ञा च प्रत्ययलक्षणेन ।

---

**प्र०**—तु सामानाधिकरण्येन संबन्धमाश्रित्य समाधीयते । **युशब्दवुशब्दान्तमिति** । कृत्तद्धितान्तत्वाद्युवुशब्दान्तस्य प्रातिपदिकत्वाद्विभक्तावुत्पन्नायां सत्यङ्गत्वे अनाकौ क्रियेते इत्यर्थः । **यत्र तर्हि विभक्तिर्नास्ति नन्दना कारिकेति** । लौकिके प्रयोगेऽत्यन्तमत्र विभक्तेरभावः । अत्राऽऽहुः—विभक्तावुत्पन्नायामनाकयोः कृतयोरकारान्तलक्षणेन टापा भाव्यम् । ततो हल्ङ्याब्भ्यादिलोपेनेत्यानुपूर्व्या सिद्धमेतत् । यथा या सेति । ततश्चाग्रन्थोऽयमिति नन्दन कारकेति पाठो युक्तः । नन्द् यु स इति स्थिते संबुद्धिगुणे कृतेऽकृते वा नित्यत्वादेङ्ह्रस्वात्संबुद्धेरिति लोपे कृतेऽङ्गत्वाभावादनाकाप्रसङ्गः । **नन्दनप्रिय इति** । अन्तरङ्गानपि विधीन् बहिरङ्गो लुग्बाधत इति लुकि कृते न लुमताऽङ्गस्येति प्रत्ययलक्षणप्रतिषेधादनाकयोरप्रसङ्गः । **भवेदिति** । विशेषणविशेष्यभावे कामचारादङ्गेन युवू विशेष्येते न च तावङ्गान्तौ संभवतः। न च विशेष्येण तदन्तविधिर्भवतीति युवुभ्यां तदन्तविध्यभावाद्यत्र तत्र स्थितयोरङ्गावयवयोर्युवोरनाकौ भवतः । **नन्दनदधीति** । स्वमोर्नपुंसकादिति लुकि नित्यत्वात्कृते न लुमताऽङ्गस्येति प्रत्ययलक्षणप्रतिषेधादादेशाप्राप्तिः । **न वा परमिति** । नहीह विभक्तिः प्रत्ययान्तरं वा परं निमित्तत्वेनोपात्तमिति प्रत्ययलक्षणत्वमनाकयोर्नास्तीति न लुमताऽङ्गस्येति प्रत्ययलक्षणप्रतिषेधस्यायमविषयः । केवलमङ्गस्य युवोरनाकौ भवत इत्युच्यते। अस्ति च प्रत्ययलक्षणेनाङ्गसंज्ञा । नहि तस्यां विधीयमानायां न लुमताऽङ्गस्येति

---

**उ०**—**इति** । **नित्यत्वादिति** । अकृते गुणे ह्रस्वान्तत्वात्कृत एङन्तत्वाल्लोपप्राप्तेरिति भावः । **अन्तरङ्गानपीति** । एतेनान्तरङ्गत्वात्पूर्वमनाकाभ्यां भाव्यमित्यपास्तम् । नन्वङ्गस्य विशेषणत्वात्तदन्तविधिः स्यादत आह—**न च ताविति** । नापि युवुभ्यामित्याह—**न च विशेष्येणेति** । **नित्यत्वादिति** । अन्तरङ्गानपीति

---

÷६. ४. १, × १, १, ५५. + ६, १, ६८. * २, ४, ७१; १, १, ६३. × ७. १. २३; १, १, ६३.

न चेह परं निमित्तमाश्रीयते । अस्मिन्परतो युवोरनाकौ भवत इति । किं तर्हि । अङ्गस्य युवोरनाकौ भवत इति । अङ्गसंज्ञा च भवति प्रत्ययलक्षणेन । अथवा तयोरेव यदङ्गं तन्निमित्तत्वेनाऽऽश्रयिष्यामः । कथम् । अङ्गस्येति संबन्धसामान्ये षष्ठी विज्ञास्यते । अङ्गस्य यौ युवू । किंचाङ्गस्य युवू । निमित्तम् । ययोर्युवोरङ्गमित्येतद्भवति । कयोश्चैतद्भवति । प्रत्यययोः ।

**युवोरनाकाविति चेद्धातुप्रतिषेधः ॥ १ ॥**

---

प्र०—प्रतिषेधः प्रवर्तते । लब्धाङ्गसंज्ञस्य कार्यान्तरे विधातव्ये स प्रतिषेधः प्रवर्तते । न चाङ्गसंज्ञाऽङ्गस्य कार्यमिति प्रतिषेधाभावः । ननु चाङ्गस्येत्यत्राऽऽसप्तमाध्यायपरिसमाप्तेरङ्गाधिकारे वव्रश्चत्यत्रोरदत्त्वस्य परनिमित्तकत्वात्स्थानिवद्भावे सति न संप्रसारणे संप्रसारणमिति वकारस्य संप्रसारणप्रतिषेध उक्तः स इहत्येन न वा परं निमित्तमित्यनेन ग्रन्थेन विरुध्यते । नास्ति विरोधो दर्शनभेदाद्यथोद्देशं संज्ञापरिभाषमिति पक्षमाश्रित्य न वा परं निमित्तमित्याद्युक्तम् । कार्यकालं संज्ञापरिभाषमाश्रित्य वव्रश्चेत्युक्तम् । तत्र हि पक्ष उरदित्यत्राङ्गसंज्ञासूत्रोपस्थानात्संनिहितः प्रत्ययो निमित्तत्वेनाऽऽश्रीयत इति परनिमित्तत्वं भवति । **अथवेति** । भवतु कार्यकालपक्षस्तत्रापि न दोष इति भावः । **निमित्तत्वेनेति** । अनाकादेशविधाने । **संबन्धसामान्ये षष्ठीति** । निमित्तनिमित्तिभावलक्षणश्च संबन्धोऽन्तरङ्गत्वादा श्रीयते प्रत्ययनिमित्तत्वाच्चाङ्गव्यपदेशस्य प्रत्यययोरेव ग्रहणं विज्ञायते । **धातुप्रतिषेध इति** । नन्वधुने-

---

उ०—न्यायाच्चेत्यपि बोध्यम् । प्रत्ययलक्षणत्वं प्रत्ययनिमित्तकत्वम् । **न चाङ्गसंज्ञेति** । न लुमता तस्मिन्निति वार्तिकरीत्या प्राप्तेः सूत्रेऽप्यङ्गपदं पूर्वोपलक्षणमेवेति चिन्त्यमेतत् । तस्मान्निषेधानित्यत्वादङ्गसंज्ञा भवतीत्येव भाष्याशयः । **विरुध्यत इति** । उरदत्त्ववदत्स्यापि परनिमित्तत्वादिति भावः । **संनिहित इति** । स च लक्ष्यानुरोधादावृत्त्याऽत्वविशेषणमिति भावः । प्रकृते त्वावृत्त्या निमित्तत्वे न मानमित्येव भाष्याशयो युक्तः । यथोद्देशपक्षे तु सर्वथाऽसंनिधानेनेवेति तत्पक्षेणैव भाष्यं योजितमुपाध्यायैः । कार्यकालपक्ष इति चाऽऽवृत्तेरप्युपलक्षणमिदम् । अन्ये तु यथोद्देशेऽपि संज्ञापरिभाषादेशे कार्याणां गमनमिति क्ङिति चेति सूत्रकैयटोक्तपक्षे संनिधानं दुर्वारमिति भाष्यासंगतिरेव कैयटोक्तव्याख्यान इत्याहुः । परे त्वङ्गसंज्ञायाः परनिमित्तत्वेन तद्द्वारद्वाऽत्वस्यापि परनिमित्तत्वमिति स्थानिवद्भावप्रवृत्तिरत्त्वस्य साक्षात्परनिमित्तत्वाभावेऽपि । अत एवाजर्घा इत्यादावत्त्वसिद्धिरितीदं तच्च सममिति न कश्चिद्भाष्ययोर्विरोधप्रसङ्ग इत्याहुः । ननु युवोरङ्गनिमित्तत्वमित्यङ्गस्य निमित्तत्वोक्तिरयुक्तेत्यत आह—**अनाकेति** । तयोरेव यद्रूपं युवु इति तदङ्गं प्रति निमित्तत्वेनाऽऽश्रयिष्याम इति भाष्यार्थ इति भावः । संबन्धान्तरस्यापि संभवादाह—**अन्तरङ्गत्वादिति** । शब्दयोश्च निमित्तनिमित्तिभावो वा स्थान्यादेशभावो वा । तत्रान्त्यस्यासंभवादाद्यस्यैव ग्रहणमिति भावः । युक्त्यन्तरमाह—**प्रत्यय-**

युवोरनाकाविति चेद्धातुप्रतिषेधो वक्तव्यः। युत्वा युतः युतवान् युतिः।

**भुज्य्वादीनां च ॥ २ ॥**

भुज्य्वादीनां च प्रतिषेधो वक्तव्यः। भुज्युः कंयुः शंयुरिति××।

**अनुनासिकपरत्वात्सिद्धम् ॥ ३ ॥**

अनुनासिकपरयोर्युवोर्ग्रहणं न चैतावनुनासिकपरौ। यद्यनुनासिकपरयोर्ग्रहणं नन्दनः कारकः अत्र न प्राप्नुतो न ह्येताभ्यां युशब्दवुशब्दाभ्यामनुनासिकं परं पश्यामः। अनुनासिकपरत्वादिति नैवं विज्ञायते अनुनासिकः पर आभ्यां ताविमावनुनासिकपरौ अनुनासिकपरत्वादिति। कथं तर्हि। अनुनासिकः परोऽनयोस्ताविमावनुनासिकपरौ अनुनासिकपरत्वादिति। यद्यनुनासिकपरयोर्ग्रहणमित्संज्ञा प्राप्नोति+। तत्र को दोषः।

---

प्र०—वोक्तं प्रत्यययोर्ग्रहणमिति। सत्यमुक्तं न तु लभ्यते। सामानाधिकरण्येन संबन्धसंभवे वैयधिकरण्यपक्षाश्रयणस्यायुक्तत्वात्। भेदे हि निमित्तनिमित्तिभावो भवति। अभेदे च संभवति कथं भेद आश्रीयते। अथवा भाष्यकारेण पूर्वं स्वातन्त्र्येणोक्तमिदानीं वार्तिकमवतारितमित्यदोषः। **भुज्य्वादीनां चेति**। भुज्य्वादीनां संबन्धिनः प्रत्ययस्येत्यर्थः। सत्यपि वैयधिकरण्येन संबन्धेऽतिप्रसङ्गः। **भुज्युरिति**। भुजिमृङ्भ्यां युक्त्युकौ चेति युक्प्रत्ययः। मृत्युरित्यत्र त्युप्रत्ययो न युरिति मत्वा भाष्यकारेण मृत्युरिति नोदाहृतम्। **कंयुरिति**। कंशंभ्यां बभयुस्तितुतयस इति युस्प्रत्ययः। ननु सित्करणं पदत्वे सति हल्यनुस्वारार्थमिति तत एवाऽऽदेशो न भविष्यति। नैतदस्ति। अवग्रहाय सित्त्वं स्यात्। अहलादावप्यनुस्वारार्थं वा। **नह्येताभ्यामिति**। रञ्जेः क्युन्वुञ्वुन्ष्वुन्नित्यादीनामेवं प्रसङ्गः। **अनुनासिकः परोऽनयोरिति**। अवयवान्तरापेक्षया लब्धपरव्यपदेशोऽवयव एवानुनासिक आश्रीयते नान्यः। नच भुज्युरित्यादावुकारस्य सानुनासिकत्वं प्रतिज्ञातमिति दोषाभावः। **इत्संज्ञा प्राप्नोतीति**। लोपस्तु

उ०—**निमित्तत्वाच्चेति**। वैयधिकरण्याश्रयणस्यायुक्तत्वमुपपादयति—**भेदे हीति**। भेदस्य हि संबन्धितावच्छेदकयोर्यो विरोधस्तज्ज्ञानसापेक्षज्ञानकत्वादविरोधे संभवति विरोधस्यान्याय्यत्वात्स न न्याय्यः। अत एव निषादस्थपतौ कर्मधारय एवाऽऽश्रीयते। न च कर्मधारये स्वामिवाचकस्थपतिशब्दस्य पूर्वनिपातापत्तिः। राजदन्तादिषु पाठादित्याहुः। **वार्तिकमिति**। तदर्थप्रतिपादकमित्यर्थः। भुज्य्वादीनां प्राप्त्यभावादनर्थकः प्रतिषेधोऽत आह—**संबन्धिन इति**। **सत्यपीति**। यद्यङ्गनिमित्तयुवोरित्यर्थेन युत्वादावदोष इत्युच्यते तथाऽप्ययं दोष इत्यर्थः। **न युरितीति**। एवं च तत्र योरङ्गनिमित्तत्वाभावादप्राप्तेस्तन्नोदाहृतमित्याशयः। अवग्रहेऽवान्तरपदत्वस्य नियामकतायाः सर्वत्रादर्शनादाह—**अहलादावपीति**। नन्दनादावप्रवृत्तावप्यनाकयोरवकाशं दर्शयति—**क्युन्वुञ्वुन्निति**। **अवयवान्तरेति**। एवं चोकार एवानुना-

---

×× ५. २. १३८. + १. ३. २.

---

१ ञ, प्रायेणाद°।

**तत्र ङीबुनुमोः प्रतिषेधः ॥ ४ ॥**

ङीबुनुमोः प्रतिषेधो वक्तव्यः । नन्दनः कारकः । नन्दना कारिका । उगिल्लक्षणौ ङीबुनुमौ प्राप्नुतः+ ।

**धात्वन्तस्य च ॥ ५ ॥**

धात्वन्तस्य च प्रतिषेधो वक्तव्यः । दिवु सिवु ।

**षिट्टित्करणं तु ज्ञापकमुगित्कार्याभावस्य ॥ ६ ॥**

यदयं युशब्दवुशब्दौ षिट्टितौ करोति शिल्पिनि ष्वुन् [ ३. १. १४५ ] ट्युट्युलौ तुट् चेति* तज्ज्ञापयत्याचार्यो न युवोरुगित्कार्यं भवतीति । कथं कृत्वा ज्ञापकम् । षिट्टित्करण एतत्प्रयोजनं षिट्टित इतीकारो यथा स्यात्÷ । यदि चात्रोगित्कार्यं स्यात्षिट्टित्करणमनर्थकं स्यात् । पश्यति त्वाचार्यो न युवोरुगित्कार्यं भवतीति ततो युशब्दवुशब्दौ षिट्टितौ करोति ।

**न वा षित्करणं ङीष्विधानार्थम् ॥ ७ ॥**

नैतदस्ति ज्ञापकम् । अस्ति ह्यन्यदेतस्य वचने प्रयोजनम् । किम् । षित्करणं क्रियते ङीष्विधानार्थम् । षित इति ङीष्यथा स्यात् ।

**टित्करणमनुपसर्जनार्थम् ॥ ८ ॥**

टित्करणेऽप्यन्यत्प्रयोजनमस्ति । किम् । अनुपसर्जनाट्टित इतीकारो यथा स्यात् । टितोऽनुपसर्जनाद्भवत्युगित उपसर्जनाच्चानुपसर्जनाच्च । एवं तर्हि ।

**विप्रतिषेधात्तु टापो बलीयस्त्वम् ॥ ९ ॥**

विप्रतिषेधात्तु टापो बलीयस्त्वं भविष्यति । टापोऽवकाशः× । खट्वा माला । ङीपोऽवकाशः । गोमती यवमती । इहोभयं प्राप्नोति । नन्दना कारिका । टाब्भवति विप्रतिषेधेन । नैष युक्तो विप्रतिषेधः । विप्रतिषेधे परमित्युच्यते +। पूर्वश्च टाप्परो ङीप् । ङीपः परष्टाप्करिष्यते । सूत्रविपर्यासः कृतो भवति । एवं तर्ह्युगितो ङीब्भवतीत्यत्राप्यतष्टाबित्यनुवर्तिष्यते । एवमप्य-

---

प्र०—भवतु मा वा भूदिति न विचार्यते । कृतेऽप्युकारलोपेऽवशिष्टस्याऽऽदेशविधानेन रूपनिष्पादनात् । दिवु इत्ययमप्यनुनासिकपर इत्यादेशप्रसङ्गः । **न वा षित्करणमिति** । ङीपि सतीकारोऽनुदात्तो भवति ङीषि तूदात्त इति सति प्रयोजने न ज्ञापकं षित्करणम् । **टित्करणमिति** । टिड्ढेत्यत्रानुपसर्जनादिति वर्तते । अत्रोगिल्लक्षणे ङीप्यविशेषेण प्राप्तेऽनुपसर्जनादेव यथा स्यादिति नियमार्थं टित्करणं स्यादित्यज्ञापकमुगित्कार्याभावस्य । **विप्रतिषेधादिति** । पूर्वविप्रतिषेधोऽत्र विवक्षितः । **एवं**

---

उ०—सिक इत्याश्रितमित्यर्थः। **दिवु इतीति**। उदितो वेतीड्विकल्पार्थं हि तत्रोकारोऽनुनासिकः।

---

+ ४. १. ६; ७. १. ७०.. * ४. ३. २३. ÷ ४. १. ४१; १५. × ४. १. ४. + १. ४. २.

कारान्तादुगित इहैव स्यात्। नन्दना कारिका गोमती यवमतीत्यत्र न स्यात्। एवं तर्हि संबन्धानुवृत्तिः करिष्यते। अजाद्यतष्टाप् [ ४. १. ४ ] ऋन्नेभ्यो ङीप् [ ५ ] अतष्टाप्। उगितश्च [ ६ ] ङीब्भवति अतष्टाप्। वनो र च [ ७ ] वनो ङीब्भवति उगितोऽतष्टाप्। पादोऽन्यतरस्याम् [ ८ ] ङीब्भवति उगितोऽतष्टाप्। तत ऋचि*। ऋचि च टाब्भवति। उगितोऽत इति निवृत्तम्। तत्रायमप्यर्थो द्विष्टाब्ग्रहणं न कर्तव्यं भवति। प्रकृतमनुवर्तते। सिध्यत्येवं यत्त्विदं वार्तिककारः पठति विप्रतिषेधात्तु टापो बलीयस्त्वमित्येतदसंगृहीतं भवति। एतच्च संगृहीतं भवति। कथम्। इष्टवाची परशब्दः+। विप्रतिषेधे परं यदिष्टं तद्भवतीति।

---

प्र०—तर्हीति। यदीष्टवाची परशब्दो न गृह्यते तदाऽनुवृत्तिर्वाक्यभेदश्चाऽऽश्रीयत इत्यर्थः। [illegible]पीति। एकवाक्यताश्रयणेन पर्यनुयुङ्क्ते। तत्रादन्तादुगितः पर्यायेण टापूङीपोः प्रसङ्गः। **एवं तर्हि संबन्धानुवृत्तिरिति**। यद्यपि वाक्यभेदेन संबन्धे दोषाभावः। उगितो ङीप् भवति। अदन्तादुगितो टाब्भवतीति। तथाऽपि परिहारान्तरसद्भावप्रतिपादनायेदमुक्तम्। **उगितश्च ङीब्भवतीति**। अतष्टाबित्युत्तरार्थमत्रानुवर्तते। वनो र चेत्यत्रात उगितष्टाबिति वर्तते तत्र वन्नन्तस्यानुगित्त्वाददन्तत्वासंभवाच्च वाक्यभेद आश्रीयते। वन्नन्तस्य ङीब्रौ भवतः, उगितोऽदन्तान्ङीबपवादष्टाबिति। अतष्टाबित्यस्योत्तरत्रोपस्थानाय प्रतिसूत्रमनुवृत्तिं दर्शयति। टाबृचीत्यत्र टाब्ग्रहणं न कर्तव्यं भवतीति टाप उत्तरत्रानुवृत्तिरुपयुज्यते। टापः स्वातन्त्र्यानिराकरणायात उगित इत्येताभ्यां संबन्धः। **उगितोऽत इति निवृत्तमिति**। उगित इत्यस्य निवृत्तिराख्यायते। अत इत्येतत्सर्वत्र प्रकरणेऽनुवर्तते शितिर्ब्राह्मणीति ङीब्नकारौ मा भूता-

---

उ०—ङीपूङीषोर्विशेषं दर्शयति—**ङीपीति**। **वाक्यभेद इति**। उगितो ङीप्। अदन्तादुगितष्टाबित्यर्थ इति भावः। वाक्यभेदे प्रमाणमुगितश्चेति सूत्रमेवेति बोध्यम्। **उत्तरार्थमत्रानुवर्तत इति**। इह तु न फलम्। न चोगितोऽदन्ताट्टाब्विधानं फलम्। उगित इत्यस्य ङीपा सह संबद्धतया पूर्वकूलक्षप्रवृत्तेरत इत्यस्य सत्त्वेन चोगित इत्यस्य तद्वाक्येऽसंबन्धेन तस्य फलस्य वक्तमशक्यत्वमिति भावः। नन्वेवं वनो र चेत्यनेनैकवाक्यतयैव संबन्धः स्यादत आह—**तत्रेति**। **अदन्तत्वासंभवाच्चेति** यज्वभ्यामित्यादावपि बहिरङ्गविभक्तिनिमित्तनलोपस्यासिद्धत्वात्संनिपातपरिभाषया टापोऽप्राप्तेश्चेति भावः। नन्वेवमपि पादोऽन्यतरस्यामित्यादावनुवृत्तिप्रदर्शनं व्यर्थमत आह—**अतष्टाबिति**। अतोऽनन्तरमित्यर्थः। उत्तरत्रोपस्थितेः फलं दर्शयति—**टाबृचीति**। नन्वेवमपि टाप एव सा दर्श्यताम्। अत उगित इत्यनयोस्तत्प्रदर्शनं व्यर्थमत आह—**टापः स्वातन्त्र्येति**। पादोऽन्यतरस्यामित्यत्रेति शेषः। अत

---

* ४. १. ९. + १. ४. २.

**धात्वन्तस्य चार्थवद्ग्रहणात् ॥ १० ॥**

अर्थवतोर्युवोर्ग्रहणं न च धात्वन्तोऽर्थवान् ।

**नुम्विधौ झल्ग्रहणम् ॥ ११ ॥**

नुम्विधौ× झल्ग्रहणं कर्तव्यम् । झलन्तस्योगित इष्यते । उगिदचां सर्वनामस्थानेऽधातोर्झल इति । तच्चावश्यं कर्तव्यम् ।

**लिङ्गविशिष्टप्रतिषेधार्थम् ॥ १२ ॥**

प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणं भवतीति यथेह भवति गोमान् यवमानेवं गोमती यवमतीत्यत्रापि स्यात् ।

**न वा विभक्तौ लिङ्गविशिष्टाग्रहणात् ॥ १३ ॥**

न वा वक्तव्यम् । किं कारणम् । विभक्तौ लिङ्गविशिष्टग्रहणं नेत्येषा परिभाषा कर्तव्या । कः पुनरत्र विशेष एषा वा परिभाषा क्रियेत झल्ग्रहणं वेति । अवश्यमेषा परिभाषा कर्तव्या । बहून्येतस्याः परिभाषायाः प्रयोजनानि । कानि ।

**प्रयोजनं शुनः स्वरे ॥ १४ ॥**

यथेह भवति* शुना शुन एवं शुन्या शुन्या+ इत्यत्रापि स्यात् ।

**यूनः संप्रसारणे ॥ १५ ॥**

---

प्र०—मिति । कृकवाकुरित्यत्र जातिलक्षणो ङीष् मा भूदित्येवमर्थम् । **धात्वन्तस्य चार्थवद्ग्रहणादिति** । वर्णसमुदायग्रहणमित्यर्थवद्ग्रहणपरिभाषोपतिष्ठते । प्रत्ययाप्रत्यययोः प्रत्यये संप्रत्यय इत्ययमप्यत्र परिहारः संभवति । **एवं गोमतीति** । ईकारात्परो नुम्प्राप्तोऽझलन्तत्वान्न भवति । एवं नन्दनः कारक इत्यत्राझलन्तत्वान्नुमभावः । **न वा विभक्ताविति** । विभक्तौ यत्कार्यं विधीयते लिङ्गविशिष्टस्य तन्न भवतीत्यर्थः । **शुनेति** । सावेकाच इति प्राप्तं विभक्तेरुदात्तत्वं न गोश्वन्निति प्रतिषिध्यते । **शुन्येति** । गौरादित्वान्ङीषि कृत उदात्तयणो हल्पूर्वादित्यस्य विभक्तिस्वरस्य प्रतिषेधप्रसङ्गः । ननु विभक्तेरेतत्कार्यं न तु विभक्तौ परतः पूर्वस्येति कथं लिङ्गविशिष्टपरिभाषायाः प्रतिषेधः । नैष दोषः । विभक्तेर्यत्कार्यं यच्च विभक्तौ कार्यमिति सर्वत्र प्रतिषेध-

---

उ०—इत्येतादिति :समुदायस्यैव निवृत्तिः कथ्यते । एकदेशस्त्वनुवर्तत एवेति भावः । **वर्णसमुदायेति** । उकारविशिष्टयोर्ग्रहणादिति भावः । **इत्ययमपीति** । अस्याः परिभाषाया असाधारणप्रयोजनस्य भाष्येऽदर्शनादियं निष्फलेति केचित् । भाष्ये नुमापत्तिदोषं परिहरति— **नुम्विधाविति** । **नैष दोष इति** । विभक्ताविति विषयसप्तमीति भावः । नन्वस्य दोषस्यान

---

× ७. १, ७०. * ६. १. १८२. + ४, १, ४१; ३. १. ३; ६. १. १७४.

यूनः संप्रसारणे प्रयोजनम् । यथेह भवति+ यूनः पश्येत्येवं युवतीः पश्येत्यत्रापि स्यात् ।

## उगिदचां नुम्विधौ ॥ १६ ॥

उगिदचां नुम्विधौ प्रयोजनम् । यथेह भवति* गोमान् यवमानित्येवं गोमती यवमतीत्यत्रापि स्यात् ।

## अनडुहश्चाऽऽम्विधौ ॥ १७ ॥

अनडुहश्चाऽऽम्विधौ प्रयोजनम् । यथेह भवति÷ अनड्वानित्येवमनडुहीत्यत्रापि स्यात् । न वा भवत्यनड्वाहीति । भवत्यन्येन यत्नेन । आमनडुहः स्त्रियां वेति× । लिङ्गविशिष्टग्रहणादीकारान्तस्य प्राप्नोति ।

## पथिमथोरात्त्वे ॥ १८ ॥

पथिमथोरात्त्वे प्रयोजनम् । यथेह भवति+ पन्था मन्था एवं पथी मथीत्यत्रापि प्राप्नोति । न केवलः पथिशब्दः स्त्रियां वर्तते । उपसमस्तस्तर्हि वर्तते । सुपथीति+× ।

## पुंसोऽसुङ्विधौ ॥ १९ ॥

पुंसोऽसुङ्विधौ प्रयोजनम् । यथेह भवति×÷ पुमानेवं पुंसीत्यत्रापि स्यात् । न केवलः पुंशब्दः स्त्रियां वर्तते । उपसमस्तस्तर्हि वर्तते । सुपुंसीति ।

## सख्युर्णित्त्वानङौ ॥ २० ॥

---

प्र०—प्रवृत्तिः । **एवं युवतीरिति** । एवमर्थमन इत्युभयोः शेष इति नाऽऽश्रयितव्यं भवति । **पथीति** । समासैकदेश उदाहृतः । इतर एतावदेवोदाहृतमिति मत्वाऽऽह—**न केवल इति** । **सुपथीति** । शोभनः पन्था अस्यामिति बहुव्रीहिः । न पूजनादिति समासान्तप्रतिषेधः । ऋन्नेभ्यो ङीबिति ङीप् । भस्य टेर्लोप इति टिलोपः । **सुपुंसीति** । शोभनः पुमांसोऽस्यामिति बहुव्रीहिः । उरःप्रभृतिषु पुमानिति विभक्त्यन्तपाठस्य प्रयोजनमुक्तम्—एकवचनान्तस्यैव नित्यः कप् यथा स्यादिति । तेनात्र शेषाद्विभाषेति विकल्पो भवति । पातेर्डुम्सु-

---

उ०—इत्यपकर्षेण परिहृतत्वात्कथमेतत्प्रयोजनमत आह—**एवमर्थमिति** । साधुत्वान्वाख्यानप्रवृत्तस्य भगवतोऽसाधुशब्दोच्चारणमनुचितमत आह—**समासैकदेश इति** । भाष्ये—**उपसमस्त इति** । समस्तपर्यायोऽयम् । आचारक्विबन्तात्कर्तृस्त्रियां क्विबनभिधानेति भावः । आचारक्विबेव नेत्यन्ये । ननु ऋक्पूरिति समासान्ते सति टापि सुपथेति भाष्यमत आह—**न पूजनादिति** । वस्तुतः षचः प्राचीनेष्वेव स इति सिद्धान्तादिनः स्त्रियामिति कपो दुर्वारत्वादिदं चिन्त्यम् । समासान्तविधेरनित्यत्वात्तदभाव इत्युचितम् । **पातेर्डुमिति** । सूतेः सपूप्रसवे पुमानिति स्त्रियामिति सूत्रस्थभाष्यात्सूतेर्म्सुन् सस्य पो ह्रस्वश्चेति वक्तुमुचितम् ।

---

+ ६. ४. १३३. * ७. १. ७०. ÷ ७. १. ९८. × ७. १. ९८. + ७. १. ८५. +× ५. ४. ६९; ४. १. ५; ७. १. ८८. ×÷ ७. १. ८९.

सख्युर्णित्त्वानङो प्रयोजनम् । यथेह भवति+÷ सखा सखायौ सखाय एवं सखी सख्यौ सख्य इत्यत्रापि प्राप्नोति ।

**भवद्भगवदघवतामोच्चावे ॥ २१ ॥**

भवद्भगवदघवतामोच्चावे प्रयोजमम् । यथेह भवति** भोः भगोः अघो इत्येवं भवति भगवति अघवतीत्यत्रापि स्यात् ।

एतान्यस्याः परिभाषायाः प्रयोजनानि यदर्थमेषा परिभाषा कर्तव्या । एतस्यां च सत्यां नार्थो झल्ग्रहणेन ।

तदेतदनन्यार्थं झल्ग्रहणं कर्तव्यं नुम्प्रतिषेधो वा वक्तव्यः । उभयं न वक्तव्यम् । उपरिष्टाज्झल्ग्रहणं क्रियते÷ तत्पुरस्तादपकृष्यते । एवमपि सूत्रविपर्यासः कृतो भवति । एवं तर्हि योगविभागः करिष्यते÷ । उगिदचां सर्वनामस्थानेऽधातोः [ ७. १. ७० ] । युजेरसमासे [ ७१ ] । ततो नपुंसकस्य । नपुंसकस्य नुम्भवति । झल इत्युभयोः शेषः । ततोऽचः । अजन्तस्य च नपुंसकलिङ्गस्य नुम्भवति ।

यद्यपि तावदेतदुगित्कार्यं परिहृतमिदमपरं प्राप्नोति । शातनितरा पातनितरा÷÷ । उगितो नद्या घादिषु ह्रस्वो भवतीत्यन्यतरस्यां ह्रस्वत्वं प्रसज्येत× नित्यं चेष्यते । उगितो या नद्येवमेतद्विज्ञायते । उगित एषा नदी । उगितो या परा । अत्र चैव दोषो भवत्युगितो ह्येषा परा नद्येषुमतितरायां*× च प्राप्नोति । उगितः परा या विहिता । उगित एषा विहिता । उगित इत्येवं या विहिता । एवमपि भोगवतितरायां÷ दोषो भवति । भोगवतितरा भोगवतीतरा । तस्मादु-

---

प्र०—ञिति प्रत्ययस्योगित्त्वादुगितश्चेति ङीप् । **सखी सख्याविति** । सख्यशिश्वीति भाषायामिति ङीष् । अनङ्णित्त्वे अत्र प्राप्नुतः । ङीष्विधानं तु सखीभ्यामित्याद्यर्थं स्यात् । **भवद्भगवादिति** । यदा संबुद्ध्या भवदादयो विशेष्यन्ते तदा भवत्यादीनामपि प्रसङ्गः । यदा त्ववशब्दो विशेष्यते तदा येन नाव्यवधानमित्येकवर्णव्यवधाने ओत्त्वं प्रवर्तते भवत्यादौ तु वर्णद्वयव्यवधानादोत्त्वाभावः । तदभावात्तत्संनियोगविहितस्य रुत्वस्याप्यभाव इति केचिदाहुः । **नार्थो झल्ग्रहणेनेति** । गोमत्याद्यर्थेनेत्यर्थः । **पुरस्तादिति** । उगिदचां सर्वनामस्थानेऽधातोर्झल इति । ततो युजेरसमासे नपुंसकस्याच इति । अत्र झल इति वर्तते । **उभयोः शेष इति** । युजेर्झलन्तत्वाव्यभिचारादाद्यन्तावेव योगावपेक्ष्येते । झलिति लुप्त-

---

उ०—**केचिदाहुरिति** । प्रत्ययस्य प्रकृत्यंश उत्थिताकाङ्क्षतया भवदादिविशेषणत्वमेव युक्तमिति । अत्रारुचिः—भाष्ये—एवं भवति भगवतीति पाठः । भाष्ये—**योगविभाग इति** । योगविभागेऽपि क्रमभङ्गाभावान्न विपर्यास इति भावः । ननु झल इत्यस्य सूत्रत्रयेऽपि संबन्धादुभयोः शेष इत्ययुक्तमत आह—**युजेरिति** । ननु झल इति करणे सूत्रभेदः स्यादत आह—

---

+÷ ७. १. ९२; ९३ ** ८. ३. १. ÷ ७. १. ७२. ÷÷ ३. ३. ११७; ४. १. १५. × ६. ३. ४५. *× ५. ३. ९४; ४. ३. १२०; ४. १. १५; ६. ४. १४८. ÷ ४. १. ७३.

गितो या नद्युगितो या विहितेत्येवमेतद्विज्ञास्यते । एवं विज्ञायमाने शातनितरायां दोष एव ।

**सिद्धं तु यवोरनुनासिकत्वात् ॥ २२ ॥**

सिद्धमेतत् । कथम् । यकारवकारयोरेवेदमनुनासिकयोर्ग्रहणम् । सन्ति हि यणः सानुनासिका निरनुनासिकाश्च ।

---

प्र०—षष्ठीकं पदमाश्रीयते । **शातनितरेति ।** शातिपातिभ्यां करणे ल्युटि कृते गौरादिषु शातनपातनेति पाठान्ङीष् । **उगितो या नदीति ।** उगिच्छब्दोच्चारणेनेति भावः । इतरोऽगृहीताभिप्राय आह—**उगित एवेति ।** पूर्वेणैवाभिप्रायेणाऽऽह—**उगितो या परेति ।** उगिच्छब्दव्यापारेण विहितोगितः परेत्यर्थः । इतर आह—**अत्र चैवेति । इषवोऽस्य** सन्तीति इषुमान् तस्येदमित्यण् ङीप् । यस्येति लोपे कृत उगितः परा नदीति विकल्पेन ह्रस्वत्वं प्राप्नोति नित्यं चेष्यते । पूर्वोक्तेनाभिप्रायेणाऽऽह—**उगितो या परा विहितेति ।** ऐषुमतितरायां चाणन्तान्नदी विहिता नतूगितः । इतरस्तु शातनितरामाश्रित्याऽऽह—**उगित एवेति । भोगवतीतरेति ।** शार्ङ्गरवादिषु भोगवद्गौरिमतोः संज्ञायामिति पाठान्ङीन्प्रत्ययः । उगित इत्येवं न विहित इति विकल्पेन ह्रस्वत्वं न प्राप्नोति । **उगितस्तु विहित इति ।** विधानाश्रयणे तु विकल्पः सिध्यति शातनितरायां तु विकल्पः प्राप्नोति । **सिद्धं त्विति ।** भाष्यकारीयमिदं वाक्यमित्याहुः । अन्ये त्वनुनासिकपरत्वादिति वाक्यमेवानेन व्याख्यातमित्याहुः । अनुनासिकप्रधानत्वादिति हि तस्यार्थः । अनुनासिकयणौ य्वृ इहानुकृतावित्यतिप्रसङ्गाभावः । उकारस्तु निरनुनासिक एवेत्युगित्कार्याभावः ।

---

उ०—**झलितीति । करण इति ।** भावे स्त्रीत्वानुपपत्तिरित्यर्थः । **गौरादिष्विति ।** टित्वान्ङीपि सिद्धे गौरादिपाठकल्पने मानं चिन्त्यम् । वस्तुतो ण्यासश्रन्थेति युजर्थः स पाठ आवश्यक इति तत्त्वम् । **इतर आहेति ।** अगृहीताभिप्राय इति शेषः । भाष्ये—**अत्र चैव दोष इति ।** अत्र दोषश्चादैषुमतितरायामपि दोष इति भाष्यार्थः । न चोगितः परेत्यर्थेऽपि पूर्वस्मात्परस्य ह्रस्वे कर्तव्येऽणो लोपस्य स्थानिवत्त्वादैषुमतितरेत्यत्र न दोष इति वाच्यम् । बहिर्भूततरनिमित्तकत्वेन बहिरङ्गह्रस्वस्य स्थानिवत्सूत्रदृष्ट्याऽसिद्धत्वेन पूर्वत्रासिद्धीय इव स्थानिवत्त्वाप्रवृत्तेः । पञ्चमीसमासस्यानित्यत्वाच्च । **विधानाश्रयणे त्विति ।** विधानमेवाऽऽश्रीयते न तु स्वरूपपरत्वमिति भावः । भाष्ये—**सिद्धं तु य्वोरिति ।** केचित्तु युशब्द उकार उच्चारणार्थः । वस्तु केवल एव । विभक्त्या चैवोच्चारणे सहायसंपादनात् । प्रत्ययेष्वप्युकार उच्चारणार्थ एव । एवं चाङ्गाधिकारादङ्गसंज्ञानिमित्तयोर्य्वोरादेशविधानादतिप्रसङ्गाभावेन य्वोरनुनासिकत्वप्रतिज्ञाफलं चिन्त्यमिति वदन्ति । तन्न । विधेयविषय उच्चारणार्थानामपीत्संज्ञायास्तस्य लोप इति सूत्र उक्तत्वात् । तस्मादनुनासिकयण्विशिष्टयोर्युव्वोरिमावादेशाविति भाष्यतात्पर्यम् । **उकारस्त्विति ।** ल्युडादाविति शेषः। यत्र ल्युडादावनाकाविष्येते तेऽनुनासिकयणः पठनीयाः । भुज्युरित्यादयश्च निरनुनासिका इति दोषाभावः ।

**आयनेयीनीयियः फढखछघां प्रत्ययादीनाम् ॥ ७ । १ । २ ॥**

**आयनादिषूपदेशिवद्वचनं स्वरसिद्ध्यर्थम् ॥ १ ॥**

आयनादिषूपदेशिवद्भावो वक्तव्यः । उपदेशावस्थायामायनादयो भवन्तीति वक्तव्यम् । किं प्रयोजनम् । स्वरसिद्ध्यर्थम् । उपदेशावस्थायामायनादिष्विष्टः स्वरो यथा स्यादिति । शिलेयम्+× तैत्तिरीयः** । अक्रियमाणे ह्युपदेशिवद्भावे प्रत्ययसंज्ञासंनियोगेनाऽऽद्युदात्तत्वे कृत++ आन्तर्यत आदेशा अस्वरकाणामस्वरकाः स्युः ।

**न वा क्वचिच्चित्करणादुपदेशिवद्वचनानर्थक्यम् ॥ २ ॥**

न वा वक्तव्यम् । किं कारणम् । क्वचिच्चित्करणात् । यदयं क्वचिद्घादींश्चितः करोत्यग्राद्यद्घच्छौ च [ ४. ४. ११६; ११७ ] तज्ज्ञापयत्याचार्य उपदेशावस्थायामायनादयो भवन्तीति । कथं कृत्वा ज्ञापकम् । चित्करण एतत्प्रयोजनं चितः [ ६. १. १६३ ] इत्यन्तोदात्तत्वं यथा स्यादिति । यदि चोपदेशावस्थायामायनादयो भवन्ति ततश्चित्करणमर्थवद्भवति ।

प्र०— **आयनेयी०** । **आयनादिष्विति** । अङ्गाधिकारे विधानात्प्रकृतिप्रत्ययापेक्षा बहिरङ्गा आयन्नादयः प्रत्ययाद्युदात्तत्वं तु प्रकृतिनिरपेक्षत्वादन्तरङ्गमिति तदेव पूर्वं प्राप्नोतीत्युपदेशिवद्वचनं कर्तव्यम् । **शिलेयमिति** । शिलेव शिलेयम् । शिलाया ढ इति ढः । **तित्तिरिणा प्रोक्तमधीते** । तित्तिरिवरतन्तु इति छण् । **अस्वरकाः स्युरिति** । प्रवृत्तिकालापेक्षयेदमुच्यते । प्रयोगे तु स्वररहितस्याच उच्चारणाभावादनुदात्तं पदमेकवर्जमिति वचनाच्चानिष्टस्वराः प्राप्नुवन्ति । केचित्त्वान्तर्यत इत्यन्यथा व्याचक्षते । यथा—अनुदात्तोच्चारणे गात्राणां स्रंसनं स्वरस्य स्निग्धता कण्ठविवरस्य महत्त्वं च भवति । एवं व्यञ्जनोच्चारणेऽपि । अयोग्यत्वात्त्वनुदात्तधर्मोपजनो व्यञ्जनेषु नास्ति तदेवमस्वरकाणामुदात्तत्वरहितानामस्वरका इष्टोदात्तत्वरहितत्वादनुदात्ता एव स्युरित्यर्थः । **न वेति** । सत्यप्यङ्गाधिकारेऽङ्गत्वमनपेक्ष्य प्रत्ययोत्पत्तिकाल एवाऽऽयन्नादयो भवन्तीति चित्करणेन ज्ञाप्यते । तत्राङ्गानपेक्षत्वाद-

उ०— **आयनेयी०** । आयनादिषु ह्रोऽन्त इत्यन्तादेशोऽपि गृह्यत इति धातोरिति सूत्रस्थभाष्यस्वरसः । ठस्येक इत्ययमपि गृह्यत इति कश्चित् । ननु परत्वादाद्युदात्तात्पूर्वमायन्नादयो भविष्यन्तीत्यत आह—**अङ्गाधिकार इति** । **प्रकृतिनिरपेक्षत्वादिति** । प्रत्ययसंनियोगशिष्टत्वादित्यपि बोध्यम् । उपदेशिवद्वचने तु कृतायनादीनामेव फञादीनामाद्युदात्तत्वविशिष्टानां विधानान्न दोषः । अन्यथा शिलेयमित्यादौ व्यञ्जनस्यैवाऽऽदेशादन्तोदात्तत्वं प्राप्नोति मध्योदात्तत्वं चेष्यत इति भावः । ननु स्वररहितस्याच उच्चारणायोगात्कथमस्वरकाः स्युरत आह—**प्रवृत्तिकालेति** । **अनुदात्तधर्मेति** । अनुदात्तत्वरूपधर्मेत्यर्थः ।

+× ५. ३. १०२, ** ४. ३. १०२, ++ ३. १. ३.

तत्रोणादिप्रतिषेधः ॥ ३ ॥

तत्रोणादीनां प्रतिषेधो वक्तव्यः । शङ्खः शण्ढ इति ।

धातोर्वेयङ्वचनात् ॥ ४ ॥

अथवा यदयमृतेरीयङ् [ ३. १. २९ ] इति धातोरीयङं शास्ति तज्ज्ञापयत्याचार्यो न धातुप्रत्ययानामायनादयो भवन्तीति । यदि हि स्युर्ऋतेश्छङित्येव ब्रूयात् । सिद्धे विधिरारभ्यमाणो ज्ञापकार्थो भवति । न चर्तेश्छङा सिध्यति । छङि सति वलादिलक्षण इट् प्रसज्येत*। इटि कृतेऽनादित्वादादेशो न स्यात् । इदमिह संप्रधार्यम् । इट् क्रियतामादेश इति किमत्र कर्तव्यम् । परत्वादिडागमः । नित्य आदेशः । कृतेऽपीटि प्राप्नोत्यकृतेऽपि । अनित्य आदेशो न हि कृत इटि प्राप्नोति । किं कारणम् । अनादित्वात् । अन्तरङ्गस्तर्ह्यादेशः । काऽन्तरङ्गता । इदानीमेव ह्युक्तमायनादिषूपदेशिवद्वचनं स्वरसिद्ध्यर्थमिति । तदेतदृतेरीयङ्वचनं ज्ञापकमेव न धातुप्रत्ययानामायनादयो भवन्तीति ।

प्रातिपदिकविज्ञानाच्च पाणिनेः सिद्धम् ॥ ५ ॥

---

प्र०—सति बहिरङ्गत्वे परत्वान्नित्यत्वाच्च कृतेष्वायनादिषु प्रत्ययाद्युदात्तत्वं भवतीतीष्टस्वरसिद्धिः । तत्रोणादिप्रतिषेध इति । ये त्वनुणादयः खल्घञादयस्तेषु खघयोरित्संज्ञया भाव्यं खित्यनव्ययस्य चजोः कुघिण्ण्यतोरिति लिङ्गाच्चाद्धितेषु सावकाशेनाऽऽदेशविधानेनेत्संज्ञा न बाध्यते । नित्य आदेश इति । उपदेशे यः प्रत्ययादिस्तस्याऽऽदेश इति कृतेऽपीटि प्राप्नोति । अनादित्वादिति । सांप्रतिकं प्रत्ययादित्वमाश्रित्याऽऽदेशो विधीयते । प्रातिपदिकविज्ञानादिति । पक्षान्तरैरपि परिहाराः संभवन्तीत्यव्युत्पत्तिपक्षाश्रयः ।

---

उ०—परत्वान्नित्यत्वाच्चेति इदं चिन्त्यम् । आद्युदात्तत्वविशिष्टानामेव प्रत्ययानां विधानात् । तस्मान्नित्करणेन प्रत्ययसंबन्ध्यादेशानामुत्पत्तिसंनियोगशिष्टकार्यादपि पूर्वं प्रवृत्तिर्ज्ञाप्यत इति भाष्यार्थः । प्रत्ययविध्येकवाक्यतया कृतायनादिकानामेव चाऽऽद्युदात्तत्वविशिष्टानां तत्तच्छास्त्रैर्विधानमिति तात्पर्यम् । न बाध्यत इति । ततश्चोपदेश एवेत्त्वे लोपे चाऽऽदेशाप्राप्तिरित्युणादीनामित्येवोक्तमिति भावः । इटि कृते प्राप्त्यभावात्कथमादेशानां नित्यत्वमत आह—उपदेश इति । इति मन्यत इति शेषः । सांप्रतिकमिति । उपदेश इति पदाभावादित्यर्थः । सांप्रतिकसद्भावे भूतपूर्वगत्याश्रयणस्यायुक्तत्वादिति भावः । भाष्ये—ज्ञापकमेवेति । न च छसुनाविति वाच्ये तरबीयसुनावित्युक्तिः प्रातिपदिकप्रत्ययानामप्यादेशाभावं ज्ञापयेत् । आयनादीनां निर्विषयत्वापत्तेः फघछानां धातुप्रत्ययेष्वभावाद्वुफञादीनां खित्वस्य ण्यक्षत्रियेत्यादिनिर्देशानां चासंगत्यापत्तेश्चेत्याहुः । भाष्ये—प्रातिपदिकविज्ञा-

---

*७. २ ३५.

प्रातिपदिकविज्ञानाच्च भगवतः पाणिनेराचार्यस्य सिद्धम् । उणादयोऽव्युत्पन्नानि प्रातिपदिकानि ।

झोऽन्तः ॥ ७ । १ । ३ ॥

झादेशे धात्वन्तप्रतिषेधः ॥ १ ॥

झादेशे धात्वन्तस्य प्रतिषेधो वक्तव्यः । उज्झिता उज्झितुमिति । प्रत्ययाधिकारात्सिद्धम् । प्रत्ययग्रहणं प्रकृतमनुवर्तते । क्व प्रकृतम् । आयनेयीनीयियः फढखछघां प्रत्ययादीनाम् [ ७.१.२. ] इति ।

प्रत्ययाधिकारात्सिद्धमिति चेदनादेरादेशवचनम् ॥ २ ॥

प्रत्ययाधिकारात्सिद्धमिति चेदनादेरादेशो वक्तव्यः । अपि नः श्वो विजनिष्यमाणाः पतिभिः सह शयान्तै+ । एवं तर्हि प्रत्ययग्रहणमनुवर्तते आदिग्रहणं निवृत्तम् । कथं पुनः समासनिर्दिष्टानामेकदेशोऽनुवर्तत एकदेशो वा निवर्तते ।

असमासनिर्देशात्सिद्धम् ॥ ३ ॥

असमासनिर्देशः करिष्यते । प्रत्ययस्याऽऽदीनामिति । स तर्ह्यसमासनिर्देशः कर्तव्यः । न कर्तव्यः । क्रियते न्यास एव । कथम् । अविभक्तिको निर्देशः । प्रत्यय आदीनामिति ।

---

प्र०—झोऽन्तः । इह प्रत्ययग्रहणेऽनुवर्तमान एकसमासनिर्दिष्टमादिग्रहणमप्यनुवर्तते तथा च शयान्ता इत्यत्रानादित्वाज्झस्यान्तादेशो न स्यादिति प्रत्ययग्रहणं नानुवर्त्यमिति मत्वाऽऽह—झादेश इति । झकारोपदेशस्तु प्रत्यय इव लाघवार्थः स्यात् । शयान्ता इति । शीङ् उपसंवादाशङ्कयोश्चेति लेट् । तस्य झः । लेटोऽडाटावित्याडागमः । टेरेत्वम् । वैतोऽन्यत्रेत्यैत्त्वम् । झोऽन्तादेशः । शब्लुक् । शीङः सार्वधातुके गुण इति गुणः । कथं पुनरिति । यदाऽर्थाधिकारपक्ष उपात्तार्थशब्दाधिकारपक्षो वा तदाऽयं पर्यनुयोगः । वर्तिपदार्थस्य समुदायेऽर्थेऽन्तर्भावात्पृथगनुवृत्त्यसंभवात् । यदा त्वनाश्रितार्थे

---

उ०—नाच्च पाणिनेरिति । अत्र पाणिनेरित्युक्त्या सर्पिषा यजुषेत्यादिकतिपयातिरिक्तोणादिषु पाणिनेरव्युत्पत्तिपक्ष एवाभिप्रेत इति दर्शयति । वस्तुतः सर्पिषेत्यादौ षत्वमपि बहुलग्रहणादिति सर्वथाऽव्युत्पत्तिरेव तेष्विति बोध्यम् ।

झोऽन्तः । अनादित्वादिति । अन्तरङ्गत्वादन्तादेशात्पूर्वमेवाऽऽडागम इति भावः । नन्वेवं धातुषु झकारोपदेशो व्यर्थोऽत आह—झकारोपदेशस्त्विति । प्रत्यये अति अत अन्तेति त्रिरुच्चारणाभावो लाघवम् । अत्र तु बहुवर्णोच्चारणाभावो लाघवमिति बोध्यम् । यदाऽर्थाधिकारेति । अर्थाध्याहारपक्षवत्तदा बोधनिर्वाहः । पदजन्योपस्थितेः शाब्दबोधाङ्गत्वेऽप्याह—उपात्तार्थेति । अन्तर्भावात्पृथगुपस्थित्यभावादिति भावः । यदा त्विति

---

\+ ३ ४. ९४.

**तत्र शयान्ता इत्यनकारान्तत्वादङ्गस्याद्भावप्रतिषेधः ॥४॥**

तत्रैतस्मिन्प्रत्ययग्रहणेऽनुवर्तमान आदिग्रहणे निवृत्ते शयान्ता इत्यनकारान्तत्वादङ्गस्याद्भावः प्राप्नोति* तस्य प्रतिषेधो वक्तव्यः ।

**सिद्धमनानन्तर्यादनकारान्तेनाद्भावनिवृत्तिः ॥ ५ ॥**

सिद्धमेतत् । कथम् । अनानन्तर्यादनकारान्तेनाद्भावो न भविष्यति ।

कथं कृत्वा चोदितं कथं कृत्वा परिहारः । अनकारान्तग्रहणं प्रत्ययविशेषणमिति कृत्वा चोदितं झकारविशेषणमिति कृत्वा परिहारः । यद्यनकारान्तग्रहणं झकारविशेषणं शेरते अत्र न प्राप्नोति* ।

**तत्र रुटि संनियोगवचनात्सिद्धम् ॥ ६ ॥**

तत्र रुटि संनियोगः करिष्यते । क एष यत्नश्चोद्यते संनियोगो नाम । चकारः कर्तव्यः । रुट् च । किंच । यच्चान्यत्प्राप्नोति । किंचान्यत्प्राप्नोति । अद्भावः । स तर्हि चकारः कर्तव्यः । न कर्तव्यः । योगविभागः करिष्यते । शीङः । शीङ उत्तरस्य झस्याद्भवति । ततो रुट् । रुट् च भवति शीङ

---

प्र०–शब्दमात्रं प्रतिज्ञातस्वरितत्वमनुवर्तत इति पक्षस्तदा नास्ति चोद्यावकाशः । संख्याव्ययादेर्ङीबित्यतो दामहायनान्ताच्चेत्यत्राव्ययग्रहणाननुवृत्तावपि संख्याग्रहणानुवृत्तिदर्शनात् । तत्रेति । अन्तरङ्गत्वादाटि कृते झादेशापवादोऽदादेशः प्राप्नोति । अनकारान्तादङ्गात्प्रत्ययस्य परत्वात् । सिद्धमिति । अनकारान्तेनाङ्गेन प्राधान्याज्झकार एव विशेष्यते । तत्र व्यवधानाददादेशाभावः । अन्तादेशस्त्ववधिमनुपादाय विधीयमानो व्यवधानेऽपि भवति । शेरत इति । प्रतिपदविधेर्बलवत्त्वाद्रुटि कृते व्यवधानाददादेशो न प्राप्नोति । निर्दिश्यमानस्याऽऽदेशा भवन्तीति वचनाज्झकारमात्रस्याऽऽदेशो विधीयते । रुटि संनियोगवचनादिति । आगमादेशयोः सह विधानादागमेन

---

उ०–पक्षाङ्गीकारफलमाह—**संख्याव्ययादेरिति । संख्याग्रहणेति ।** संख्यादिग्रहणेत्यर्थः । **अन्तरङ्गत्वादाटि कृत इति** । इदं वस्तुस्थितिकथनम् । अन्तरङ्गत्वं चाङ्गसंज्ञानपेक्षणात् । लावस्थायामेव प्रवृत्तेर्वा । अनकारान्तादङ्गात्परप्रत्ययावयवझस्यादित्यर्थात् । आटः प्रत्ययभक्तत्वेन व्यवधायकत्वाभावादिति भावः । **प्राधान्यादिति ।** तस्य स्थानित्वेन प्राधान्यम् । प्रत्ययस्त्ववयवित्वेन तद्विशेषणमिति भावः । अत्राङ्गस्येत्यत इत्यनुरोधात्पञ्चम्या विपरिणम्यते । झोऽन्त इत्यत्र त्वङ्गनिमित्तप्रत्ययावयवस्य झस्येत्यर्थान्नावध्युपादानमिति बोध्यम् । **प्रतिपदविधेरिति ।** शीङो हि झस्य रुट् क्रियते स चानवकाशः । तत्रावश्यं प्राप्त आरम्भादिति भावः । एतेन परत्वान्नित्यत्वाद्रुडित्यपास्तम् । ननु रुडपि झोऽन्त इत्यतोऽनुवृत्तवर्णस्यैवेति रुटि सति तत्सहितस्याऽऽदेशेन भाव्यमिति कथं तस्य व्यवधायकत्वमत आह—**निर्दिश्यमानस्येति** । तादृशं झकाररूपं च व्यवहितमेवेति भावः ।

---

* ७. १. ५. ÷ ५. १. ६.

इति । एवमपि पर्यायः प्रसज्येत । एवं तर्ह्यच्छब्दस्य रुटं वक्ष्यामि । तदच्शब्दग्रहणं कर्तव्यम् । न कर्तव्यम् । प्रकृतमनुवर्तते । क्व प्रकृतम् । अदभ्यस्तात् [ ७. १. ४ ] इति । तद्वै प्रथमानिर्दिष्टं षष्ठीनिर्दिष्टेन चेहार्थः । शीङ इत्येषा पञ्चमी अदिति प्रथमायाः षष्ठीं प्रकल्पयिष्यति तस्मादित्युत्तरस्य [ १. १. ६७ ] इति ।

## शीङो रुट् ॥ ७ । १ । ६ ॥

### रुटि दृशिगुणप्रतिषेधः ॥ १ ॥

रुटि दृशिगुणः प्राप्नोति×। अदृश्रमस्य केतव इति । तस्य प्रतिषेधो वक्तव्यः । न वक्तव्यः । परस्मिन्निति क्ङिति च [१. १. ५] इति प्रतिषेधो भविष्यति । एवमप्यदृश्रमस्य केतव इत्यत्र प्राप्नोति । एवं तर्हि पूर्वान्तः करिष्यते ।

---

प्र०—स्थानिनो व्यवधानाभावः । एवमपि पर्याय इति । अड्भावे कृते रुण्न प्राप्नोति झस्य रुड्विधानादल्विधित्वात्स्थानिवत्त्वाभावाद्रुटि कृतेऽड्भावो न प्राप्नोति । व्यवधानात् । ततो विप्रतिषेधाभावाच्च पर्यायप्रसङ्गः । एवं तर्हीति । अच्छब्दस्य रुटि सत्यवयवावयवोऽपि समुदायावयवो भवतीति रुटा व्यवधानाभावाद्गुणः शीङः प्रवर्तते ।

शीङो रुट् । अदृश्रमिति । दृशेर्लुङि झेरन्तादेश इरितो वेत्यङि तस्य चान्तरङ्गत्वाद्गुणात्पूर्वं रुटि कृत ऋदृशोऽङि गुण इति गुणप्रसङ्गः । परस्मिन्निति । यदा क्ङिति चेत्यत्र निमित्तसप्तमीपक्षस्त्यक्तः परसप्तमीपक्ष आश्रितस्तदैतदुच्यते । वार्णादाङ्गं बलवदित्यनपेक्षिते वर्णाश्रयत्वादन्तरङ्ग एकादेशे कृते तस्य परं प्रत्यादिवद्भावान्ङित्सार्वधातुकं परमाश्रित्य क्ङिति चेति गुणप्रतिषेधः प्रवर्तते । येन नाप्राप्तिन्यायेन तन्निमित्त एव प्रतिषेधो गुणेन बाध्यते नतु ङित्सार्वधातुकनिमित्तः प्रतिषेधाश्च बलीयांसो भवन्तीत्युभयप्रसङ्गे प्रतिषेधः प्रवर्तते । अदृश्रमिति । मिबादेशस्यामः पित्वान्ङित्वाभावान्नास्ति गुणप्रतिषेधः । एवं तर्हीति । पूर्वान्ते रुटचलघूपधत्वाद्गुणा-

---

उ०—भाष्ये एवमपि पर्याय इति । योगविभागपक्षेऽयं दोषः । सहविधानबोधकचकाराभावात् । तदाह—अड्भावे कृत इत्यादि । चकारकरणे तु तत्करणप्रयुक्तं गौरवमेव दोष इति भावः । नन्वच्छब्दस्य रुटि तेन समुदायस्य व्यवधानाच्छीङः सार्वधातुक इति गुणो न स्यादत आह—अच्छब्दस्येति ।

शीङो रुट् । गुणात्पूर्वं रुटीति । बहुलं छन्दसीत्यङ्गसंज्ञानिमित्तप्रत्ययमात्राश्रयो रुडन्तरङ्गः । गुणस्तु प्रकृतिप्रत्ययोभयविशेषाश्रयत्वाद्बहिरङ्ग इति भावः । कृत इति । तत्र कृतेऽपीत्यर्थः । ननु प्रतिषेधविषयेऽयं गुणः प्रतिषेधं बाधेतेत्यत आह—येन नेति । तन्निमित्त एवेति । अङ्गनिमित्त एवेत्यर्थः । नन्वेवमपि परत्वाद्गुणः प्रतिषेधं बाधेतेत्यत आह—प्रतिषेधाश्चेति । विध्युन्मूलकत्वादिति भावः । प्रत्यापत्तिः प्रतिप्रसवः । यदि दृशोऽपूर्वो

---

× ३. १. ५७. ७. ४. १६. ७. ४. १६.

## पूर्वान्ते शीङो गुणविधिः ॥ २ ॥

पूर्वान्ते शीङो गुणो विधेयः। शेरते। सूत्रं च भिद्यते। यथान्यासमेवास्तु। ननु चोक्तं रुटि दृशिगुणप्रतिषेध इति। पूर्वान्तेऽप्येष दोषः। कथम्। अयं दृशिगुणः प्रतिषेधविषय आरभ्यते स यथैव क्ङिति चेत्येतं प्रतिषेधं बाधत एवमनुपधाया अपि प्रसज्येत। तस्मादुभाभ्यामेव दृशेरक्प्रत्ययान्तरं वक्तव्यं पितरं च दृशेयं मातरं च दृशेयमित्येवमर्थम्+।

## झादेशादाड्लेटि ॥ ३ ॥

झादेशादाड्लेटि÷ भवति विप्रतिषेधेन। झादेशस्यावकाशः× लुनते लुनताम् अलुनत। आटोऽवकाशः। पताति दिद्युत्। उदधिं च्यावयाति। इहोभयं प्राप्नोति। अपि नः श्वो विजानिष्यमाणाः पतिभिः सह शयान्तै। आड्लेटि भवति विप्रतिषेधेन स तर्हि पूर्वविप्रतिषेधो वक्तव्यः।

## न वा नित्यत्वादाटः ॥ ४ ॥

न वा वक्तव्यः। किं कारणम्। नित्यत्वादाटः। नित्य आडागमः। स कथं नित्यः। यद्यनकारान्तग्रहणं झकारविशेषणम्। अथ हि प्रत्ययविशेषणं झादेशोऽपि नित्यः।

---

प्र०—भावः। लघूपधगुणस्यैव हि ऋदृशोऽङि गुण इति प्रत्यापत्तिः क्रियते। अथवा गुणश्रुत्येक उपस्थानात्तस्यैवाङ्ग विशेषणाद्येन नाव्यवधानमित्येकवर्णव्यवहितस्य गुणो भवति रुटि कृते न भवति। शेरत इति। रुकि सत्यनिगन्तत्वाद्गुणाप्रसङ्गः। पूर्वान्तेऽपीति। क्ङिति चेति गुणे प्रतिषिद्धेऽपूर्व ऋदृशोऽङि गुण इति गुणो विधीयते। स यथैव प्रतिषेधविषये प्रवर्तते तथैवानुपधाया अपि इकः प्रवर्तेत। अङ्गग्रहणं च श्रुतत्वाद्दृशेरेव विशेषणं नेकः। दृशेरक्प्रत्ययान्तरमिति। यश्च लिङ्याशिष्यङ् यश्चेरितो वेत्यङ् तत्प्रसङ्गे छन्दसि दृशेरग्वक्तव्यः। अथ भाषाया-मदर्शन्नित्यत्र ङित्सार्वधातुकनिमित्तः प्रतिषेधः कस्मान्न भवति। क्ङितीति निमित्तसप्तमीविज्ञानाद्वाणादाङ्गं बलीय इत्येकदेशात्पूर्वमेव गुणविधानाद्वा स्थानिवद्भावादेकादेशस्य व्यवधानात्कृतार्थस्य वा प्रतिषेधस्य परत्वाद्गुणेन बाधनात्। झादेशोऽपि

---

उ०—गुणो विधीयत इत्याश्रीयते तदाऽपि न दोष इत्याह—अथवेति। अनुपधाया अपीति। प्रतिषेधसूत्राणां परिभाषावद्विध्येकवाक्यतया क्ङितीत्यस्योपधाया इत्यस्य च बाधे विनिगमकाभावादिति भावः। नन्विकोऽङ्ग विशेषणान्न दोष इत्युक्तं तत्राऽऽह—अङ्गग्रहणं चेति। लिङ्गाच्छ्रुतेर्बलवत्त्वादिति भावः। लिङ्याशिष्यङिति। दृशेयमित्यत्रास्य प्राप्तिः। स्थानिवद्भावादिति। अचः परस्मिन्नित्यनेन। कृतार्थस्य वेति। भिन्न इत्यादौ। अत्र विधेरेव निषेधापवादकत्वेन निषेधाश्च बलीयांस इत्यस्याविषय इति भावः। झादेशादिति

---

+ ३. १. ८६. ÷ ३. ४. ९४. × ७. १. ५.

**अन्तरङ्गलक्षणत्वाच्च ॥ ५ ॥**

अन्तरङ्गः खल्वप्याडागमः । कथमन्तरङ्गः । यदि प्राग्लादेशाद्धात्वधिकार:× । अथ हि लादेशे धात्वधिकारोऽनुवर्तत उभयं समानाश्रयम् । यद्येवानकारान्तग्रहणं प्रत्ययविशेषणमथापि लादेशे धात्वधिकारोऽनुवर्तत उभयथाऽपि पूर्वविप्रतिषेधेन नार्थः । कथम् । बहुलं छन्दसि [ २.४.७३ ] इत्येवमत्र शपो लुग्भविष्यति । तत्रानत इति प्रतिषेधो भविष्यति ।

**वेत्तेर्विभाषा ॥ ७ । १ । ७ ॥**

**बहुलं छन्दसि ॥ ७ । १ । ८ ॥**

**अतो भिस ऐस् ॥ ७ । १ । ९ ॥**

**बहुलं छन्दसि ॥ ७ । १ । १० ॥**

इदं बहुलं छन्दसीति द्विः क्रियते । एकं शक्यमकर्तुम् । कथम् । यदि तावत्पूर्वं क्रियते परं न करिष्यते । अतो भिस ऐसित्यत्र बहुलं छन्दसीत्येतदनुवर्तिष्यते । अथ परं क्रियते पूर्वं न करिष्यते । बहुलं छन्दसीत्यत्र रुडप्यनुवर्तिष्यते ।

अपर आह । उभे बहुलग्रहणे एकं छन्दोग्रहणं शक्यमकर्तुम् । कथम् । इदमस्ति । वेत्तेर्विभाषा । ततश्छन्दसि । छन्दसि च विभाषा । ततोऽतो भिस ऐस्भवति । छन्दसि विभाषेति ।

---

**प्र०—नित्य इति** । द्वयोश्च नित्यत्वे 'न वां नित्यत्वादाटः' इति न शक्यते वक्तुम् । अविशेषणपक्षेऽप्यभेदाश्रयेणाऽऽटो नित्यत्वम् । भेददर्शने तु शब्दान्तरप्राप्त्याऽऽडप्यनित्यः । **यदि प्राग्लादेशादिति** । तदा प्रत्ययमात्रापेक्षत्वादाडन्तरङ्गः ।

**वेत्तेर्विभाषा** । **अतो भिस ऐसित्यत्रेति** । वाक्यभेदेन संबन्धाद्भाषायामप्यैस् भवति । **छन्दसि च विभाषेति** । प्रत्ययमात्रस्य च्छन्दसि रुड् विधीयते विभाषा । व्यवस्थितविभाषाविज्ञानाच्च यथाप्रयोगं रुड्विधिः ।

---

**उ०**—पूर्वविप्रतिषेधवार्तिकमाटोऽन्तरङ्गत्वं लावस्थायामाटः प्रवृत्तिं चानभ्युपगम्येति बोध्यम् । अत्रत्यसिद्धान्तोऽप्येवमेव । शयान्तै इत्यत्र पूर्वमाटोऽप्रवृत्तावदादेशः स्यात् । पूर्वमाटि तु तेन व्यवधानान्नादादेश इति भावः । शब्दान्तरप्राप्त्याऽऽटोऽनित्यत्वं स्यादित्याशङ्क्याऽऽह—**अभेदाश्रयेणेति** । स्थानिविशेषमनादृत्य कार्यमात्रस्याभेदाश्रयेणेत्यर्थः । **भेदेति** । कार्यिभेदात्कार्यभेदाश्रयण इत्यर्थः ।

**वेत्तेर्विभाषा** । ननु बहुलग्रहणाभावे शीङो रुडिति सूत्रभाष्योक्तादृश्रमित्यादौ रुण्न स्यादत आह—**प्रत्ययमात्रस्येति** । नन्वेवमपि सर्वस्य प्रत्ययस्य विभाषा रुट् स्यादत आह—**व्यवस्थितेति** ।

---

× ३. १. ९१; ३. ४. ७८.

**अतो भिस ऐस् ॥ ७ । १ । ९ ॥**

इह वृक्षैः प्लक्षैरिति परत्वादेत्त्वं प्राप्नोति*। ऐस्भाव इदानीं क्व भविष्यति ।

कृत एत्त्वे भौतपूर्व्यात् ।

कृत एत्त्वे भूतपूर्वमकारान्तमित्यैस्भविष्यति ।

ऐस्तु नित्यस्तथा सति ।

एवं सति नित्य ऐस्भावः । कृतेऽप्येत्त्वे प्राप्नोत्यकृतेऽपि प्राप्नोति । नित्यत्वादैस्त्वे कृते विहतनिमित्तत्वादेत्त्वं न भविष्यति ।

एत्त्वं भिसि परत्वाच्चेदत ऐस्क्व भविष्यति ।

कृत एत्त्वे भौतपूर्व्यादैस्तु नित्यस्तथा सति ।

**नेदमदसोरकोः ॥ ७ । १ । ११ ॥**

इमौ द्वौ प्रतिषेधावुच्येते । उभौ शक्याववक्तुम् । कथम् । एवं वक्ष्यामि । इदमदसोः कादिति । तन्नियमार्थं भविष्यति । इदमदसोः कादेव नान्यत इति ।

**टाङसिङसामिनात्स्याः ॥ ७ । १ । १२ ॥**

किमर्थमिनादेश उच्यते न नादेश एवोच्येत । का रूपसिद्धिः वृक्षेण प्लक्षेण । एत्त्वे योगविभागः करिष्यते+ । कथम् । इदमस्ति । बहुवचने झल्येत् [ ७. ३. १०३ ]। ओसि च [ १०४ ] । तत आङि च । आङि च परतोऽत एत्त्वं भवति । वृक्षेण प्लक्षेण । तत आपः संबुद्धौ च [ १०६ ]

---

प्र०– अतो भिस ऐस् । परत्वादिति । एत्त्वस्यावकाशः वृक्षेष्विति । ऐसोऽवकाशः कृत एत्त्वे । प्रागेत्त्वादुभयप्रसङ्गे परत्वादेत्त्वप्रसङ्गः । मुख्यशब्दार्थाश्रयणेनानवकाशं मत्वा पृच्छति—ऐस्भाव इदानीमिति । कृत एत्त्व इति । सांप्रतिकाभावे भूतपूर्वगतिराश्रीयते । ननु नाप्राप्त एत्त्व ऐसारभ्यमाणस्तस्यापवादो युक्तः । उत्सर्गापवादयोश्चायुक्तो विप्रतिषेधः । एवं तर्हि पूर्वपक्षवादिनोत्सर्गापवादमनाश्रित्य चोदितमिति तदनुसारेणैव सिद्धान्तवादी परिहरति—ऐस्तु नित्य इति ।

टाङसिङसामिनात्स्याः । आङि चेति । स्थानिवद्भावान्नादेश एत्वं विज्ञा-

---

उ०– अतो भिस ऐस् । मुख्यशब्दार्थेति । एवं चैत्त्वमपवादत्वाद्बाधित्वैसिति भावः । अनाश्रित्येति । सर्वथाऽसंभव एव बाधकत्वमिति वार्तिककारीयेत्यर्थः । तथा सतीत्यनेनानवकाशत्वमेव दृढीकृतम् । कृते चारितार्थ्यमङ्गीकृत्य परत्वादेत्त्वमित्यङ्गीकार इति हि तदर्थः । अङ्गीकार इत्यनेनानवकाशत्वं सूचितम् ।

टाङसि० । नादेश आङोऽभावादाह—स्थानिवद्भावादिति । न च परत्वादेत्त्वे नादेशविधायकवैयर्थ्यापत्तिः । तत्सामर्थ्यादेव पूर्वं नादेश एत्त्वमिति क्रमाश्रय-

---

* ७. ३. १०३. + ७. ३. १०५.

रणसामर्थ्याद्बाध्यते सवर्णदीर्घत्वमपि न प्राप्नोति । नैष दोषः। यं विधिं प्रत्युपदेशोऽनर्थकः स विधिर्बाध्यते यस्य तु विधेर्निमित्तमेव नासौ बाध्यते। पररूपं प्रत्यकारोच्चारणमनर्थकं सवर्णदीर्घत्वस्य पुनर्निमित्तमेव ।

ङेर्यः ॥ ७।१।१३ ॥

किमिदं चतुर्थ्येकवचनस्य ग्रहणमाहोस्वित्सप्तम्येकवचनस्य ग्रहणम्। कुतः संदेहः। समानो निर्देशः। चतुर्थ्येकवचनस्य ग्रहणम्। कथं ज्ञायते। लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेति। इहापि तर्हि चतुर्थ्येकवचनस्य ग्रहणं स्यात्। ङेराम्नद्याम्नीभ्यः [ ७. ३. ११६ ]। एवं तर्हि व्याख्यानतो विशेषप्रतिपत्तिर्न हि संदेहादलक्षणमितीह चतुर्थ्येकवचनस्य ग्रहणं व्याख्यास्यामस्तत्र सप्तम्येकवचनस्येति ।

---

प्र०— **ङेर्यः । कुतः संदेह इति ।** प्रयोगे वृक्षायेत्यादौ चतुर्थ्यवगमादयुक्तः संदेह इति भावः । इतरो लक्षणमात्रशरणो भूत्वाऽऽह—**समानो निर्देश इति ।** लक्षणप्रतिपदोक्तयोरिति चतुर्थ्येकवचनस्य ङे इति रूपं प्रतिपदोक्तं सप्तम्येकवचनस्य तु घेर्ङितीति गुणे कृते ङेः इति लाक्षणिकं रूपम् । **इहापि तर्हीति।** ङेरिति षष्ठ्यन्तं रूपमुपात्तं तच्चोभयोरपि लाक्षणिकमिति परिभाषाया अयमविषयः । अथ प्रत्ययात्पूर्वस्य भागस्य लाक्षणिकत्वप्रतिपदोक्तत्वसंभवापेक्षा परिभाषाप्रवृत्तिस्तदाऽन्यत्रापि प्रवर्तेत । **एवं तर्हीति ।** लिङ्गदर्शनं चास्ति। तस्मै प्रभवति संतापादिभ्यः । तदस्यां प्रहरणमिति क्रीडायां ण इति ।

---

उ०—विभक्त्यादेशेभ्यः परत्वाज्जरसादेशेऽतिजरसेत्याद्यपीतीत्येवेत्यसंगतम् । अतिजरांसीत्यत्र जसः शिभावे कृते नुम्जरसोः प्राप्तौ नुम् विप्रतिषेधेनेति जराया इति सूत्रस्थभाष्येण विभक्तित्वज्ञानप्रकृतिप्रत्ययोभयसापेक्षजरसादेशापेक्षया विभक्तिकार्याणामन्तरङ्गत्वात्पूर्वं प्रवृत्तिस्वीकारेणादोषात्। टाङसीत्यादीनामङ्गनिमित्तटादीनामित्यर्थ इति नोभयापेक्षत्वम्। एतेन प्रत्ययविशेषापेक्षत्वेनाऽऽदेशा बहिरङ्गा इत्यपास्तम्। तादृशबहिरङ्गस्य भाष्ये क्वाप्याश्रयणाभावात्। किंच प्रकृतिप्रत्ययविशेषापेक्षत्वेन बहिरङ्गत्वं न वाचनिकम्। किंतु यद्विशेषधर्मज्ञानात्पूर्वमवश्यं यत्सामान्यधर्मज्ञानं तत्र पूर्वोपस्थितत्वेन सामान्यधर्मापेक्षस्यान्तरङ्गत्वं तद्बीजम् । अस्ति च रुदश्च पञ्चभ्य इत्यत्र निमित्तभूतसार्वधातुकत्वज्ञानार्थं धातुविहितप्रत्ययत्वज्ञानं पूर्वमावश्यकम्। एवं च पूर्वोपस्थितसार्वधातुत्वलिङ्त्वज्ञानमात्रापेक्षया सुटः सार्वधातुकत्वज्ञानकाले प्रवृत्तिरित्यन्तरङ्गत्वं यासुटः। तदुत्तरप्रवृत्तिकत्वाच्च बहिरङ्गत्वमीटः। नचैवं प्रकृते। किंच परत्वाज्जरसादेशे, एतत्कैयटग्रन्थस्यासंभवदुक्तिकत्वं । पूर्वं जरसादेश इनाद्यप्राप्त्या तदभावपक्षे च तस्याप्राप्त्या संनिपातपरिभाषयाऽनभ्युपयन्नित्यस्यासंगतत्वादिति दिक्।

**ङेर्यः।** ङेरित्यत्र प्रकृतिरूपापेक्षया लाक्षणिकत्वादि कथ्यत इत्याह—**चतुर्थ्येकवचनेति।**

---

१ ख. °रूपस्य ला°।

## सर्वनाम्नः स्मै ॥ ७ । १ । १४ ॥

## अश एकादिष्टात्स्मायादीनामुपसंख्यानम् ॥ १ ॥

अश+ एकादिष्टात्स्मायादीनामुपसंख्यानं कर्तव्यम् । अथो अत्रास्मै । अथो अत्रास्मात् । अथो अत्रास्मिन्निति । एकादेशे* कृतेऽत इति स्मायादयो न प्राप्नुवन्ति । किं पुनः कारणमेकादेशस्तावद्भवति न पुनः स्मायादयः । न परत्वात्स्मायादिभिर्भवितव्यम् । न भवितव्यम् । किं कारणम् । नित्यत्वादेकादेशः । नित्य एकादेशः । कृतेष्वपि स्मायादिषु प्राप्नोत्यकृतेष्वपि । नित्यत्वादेकादेशे कृतेऽत इति स्मायादयो न प्राप्नुवन्ति । किमुच्यतेऽश इति नेहापि कर्तव्यम् । अत्रास्मै । अत्रास्मात् । अत्रास्मिन्निति । एकादेशे कृतेऽत इति स्मायादयो न प्राप्नुवन्ति । आनुपूर्व्या सिद्धमेतत् । नात्राकृतेषु स्मायादिषु हलादिर्विभक्तिरस्ति हलादौ चेद्रूपलोपो÷ न चाकृत इद्रूपलोप एकादेशः प्राप्नोति । तदानुपूर्व्या सिद्धम् । तत्तर्ह्युपसंख्यानं कर्तव्यम् ।

## न वा बहिरङ्गलक्षणत्वात् ॥ २ ॥

न वा कर्तव्यम् । किं कारणम् । बहिरङ्गलक्षणत्वात् । बहिरङ्गलक्षण एकादेशः । अन्तरङ्गाः स्मायादयः । असिद्धं बहिरङ्गमन्तरङ्गे ।

## जसः शी ॥ ७ । १ । १७ ॥

## जश्शसोः शिः ॥ ७ । १ । २० ॥

किमर्थं शीभावः शिभावश्चोच्यते न शिभाव एवोच्येत । का रूपसिद्धिः । ते ये के । आद्गुणेन सिद्धम्× । नैवं शक्यम् । इह हि त्रपुणी जतुनी÷ । दीर्घश्रवणं न स्यात् । एवं तर्हि शीभाव एवोच्यताम् । नैवं शक्यम् । इह हि कुण्डानि वनानीति ह्रस्वस्य श्रवणं न स्यात् । तस्माच्छीभावः शिभावश्च वक्तव्यः ।

---

प्र०— **सर्वनाम्नः स्मै** । अश एकादिष्टादिति । लोकेऽर्थप्रतिपादनाय वाक्यमुच्चार्यते तदेव व्याकरणेऽपि विभज्यान्वाख्यायते । ततश्चात्र अ ए इति स्थिते नित्यत्वादेकादेशः प्राप्नोति । तस्मिन्कृतेऽदन्तत्वाभावाद्वर्णविधावन्तादिवद्भावाभावात्ताद्रूप्यानतिदेशात्स्मायाद्यसिद्धिः । **आनुपूर्व्येति** । अत्र इदम् ए इति स्थिते त्यदाद्यत्वे कृते स्मादयः । ततो नित्यत्वाद्गुणं बाधित्वेद्रूपलोपे कृते सवर्णदीर्घत्वेन रूपं सिध्यतीत्यर्थः । **नवेति** । पदद्वयाश्रयत्वादेकादेशो बहिरङ्गः । एकपदाश्रयत्वात्स्मायाद्योऽन्तरङ्गाः ।

**जसः शी** । शीभावशिभावयोः क्वचिद्रूपाभेदं दृष्ट्वा प्रश्नः—**किमर्थमिति** ।

---

उ०— **सर्वनाम्नः** । पदसंस्कारपक्षे स्वार्थद्रव्यलिङ्गादिक्रमेणान्वाख्यानपक्षे च दोषाभावादाह—**लोक इति** । वर्णविधावित्यस्य प्रत्याख्यानेऽप्याह—ताद्रूप्येति ।

---

+ २. ४. ३२. * ६. १. १०१. ÷ ७. २. ११३ × ६. १. ८७. ÷ ७. १. ७३.

## औङ आपः ॥ ७ । १ । १८ ॥

किमर्थो ङकारः । सामान्यग्रहणार्थः । औ इत्युच्यमाने प्रथमाद्विवचनस्यैव स्यात् । अथाप्यौडित्युच्यत एवमपि द्वितीयाद्विवचनस्यैव स्यात् । अस्ति प्रयोजनमेतत् । किं तर्हीति । ङित्कार्यं तु प्राप्नोति । खट्वे माले। याडापः [ ७. ३. ११३ ] इति याट् प्राप्नोति । नैष दोषः। नैवं विज्ञायते ङकार इदस्य सोऽयं ङित् ङितीति । कथं तर्हि । ङ एवेन्ङित् ङितीति। एवं सति वर्णग्रहणमिदं भवति वर्णग्रहणेषु चैतद्भवति यस्मिन्विधिस्तदादावल्ग्रहण इति । न दोषो भवति । अथवा वर्णग्रहणमिदं भवति न चैतद्वर्णग्रहणेषु भवत्यननुबन्ध-

---

**प्र०– औङ आपः । किमर्थ इति ।** औङ इति भूतानुवादः । न क्वचिदौङिति रूपं विज्ञातमभूत्तस्य च भूतवदुपादाने किं प्रयोजनमिति प्रश्नः । **औ इत्युच्यमान इति** । निरनुबन्धकपरिभाषयेति भावः । यद्यपि टकारः प्रत्याहारार्थत्वात्समुदायानुबन्धस्तथाऽप्यनेकान्ता अनुबन्धा इति दर्शन एकान्ता इति दर्शने वाऽवयवावयवस्यापि समुदायावयवत्वदर्शनात्प्रत्ययस्याप्यनुबन्धः स्यात् । प्रयोजनाभावात्प्रत्ययानुबन्धो न भवतीति चेदिह तस्य ग्रहणं मा भूदिति प्रयोजनं स्यात् । यद्येवमौङ इत्युच्यमाने तदनुबन्धकग्रहणे नातदनुबन्धकस्येति द्वितीयाद्विवचनग्रहणं न प्राप्नोति ङकारोच्चारणसामर्थ्याद्भविष्यतीत्यदोषः । **ङित्कार्यं त्विति** । औङ इति वचनात्प्रथमाद्वितीयाद्विवचनयोरौङो विधायकवाक्यमनुमीयत इत्युपदेशेऽन्त्यत्वान्ङकारस्येत्संज्ञायां सत्यां ङित्कार्यप्रसङ्गः । **अथवेति** । औङ इति वर्णमात्रं निर्दिश्यते ङकारस्त्वसंदेहार्थो नानुबन्धार्थः । ऋदोरबिति यथा दकारः । अङ्गाक्षिप्तश्च प्रत्यय औकारेण विशेष्यत

---

**उ०– औङ आपः** । ननूभयसंग्रहार्थं ङकारोच्चारणसत्त्वात्किमर्थ इति प्रश्नानुपपत्तिरत आह—**औङितीति** । असिद्धस्यानुवादे न प्रयोजनमित्यर्थः । **अनेकान्ता इति** । अत्र पक्ष आनन्तर्यमेव संबन्धो न त्ववयवावयविभावः । तच्च समुदायस्येव प्रत्ययस्याप्यस्तीत्यर्थः । **अवयवावयवस्यापीति** । द्विगता अपि हेतवो भवन्ति । आम्राश्च सिक्ताः पितरश्च तृप्ता इति न्यायात् । अवयवस्य समुदायस्य चावयवत्वं न विरुध्यत इति भावः । **इह** । शीविधौ । **तस्य** । द्वितीयाद्विवचनस्य । **न प्राप्नोतीति** । अत्र टकारस्याप्यनुबन्धस्य भावादिति भावः । नन्वौङो विधानाभावेनोपदेशाभावात्प्रत्ययाद्यन्तत्वाभावाच्चेत्संज्ञाभावेन कथमित्कार्यापादनमत आह—**औङ इतीति** । चित्रङ इवेति भावः । असिद्धानुवादाभावात्तदनुपपत्त्या औऔटौरौङ् भवतीति वाक्यमनुमीयत इति तात्पर्यम् । नच याट्यवश्यंप्राप्ते शीभावारम्भादयमपवाद इति न दोषः । कृते चारितार्थ्येनासंभव एव बाधकत्वमिति वार्तिकरीत्या शङ्कासत्त्वात् । इत्संज्ञकङकारादाविति व्याख्यान आङ्याजयारामुपसंख्यानमिति सुपां सुलुक्सूत्रस्थवार्तिकविहिताङः प्रबाहवेत्युदाहरणमसंगतं स्यादित्यरुचेराह—भाष्ये—**अथवा वर्णेति** । **असंदेहार्थ इति** । आव इत्युच्यमाने किमयमाव उत औ इति संदेहः स्यादिति भावः । ननु

कग्रहणे न सानुबन्धकस्येति। अथवा पूर्वसूत्रनिर्देशोऽयं पूर्वसूत्रेषु च येऽनुबन्धा न तैरिहेत्कार्याणि क्रियन्ते।

औकारोऽयं शीविधौ ङिद्गृहीतो ङिच्चास्माकं नास्ति कोऽयं प्रकारः।
सामान्यार्थस्तस्य चाऽऽसञ्जनेऽस्मिन्ङित्कार्यं ते श्यां प्रसक्तं स दोषः ॥१॥
ङित्त्वे विद्याद्वर्णनिर्देशमात्रं वर्णे यत्स्यात्तच्च विद्यात्तदादौ।
वर्णश्चायं तेन ङित्त्वेऽप्यदोषो निर्देशोऽयं पूर्वसूत्रेण वा स्यात् ॥ २ ॥

**अष्टाभ्य औश् ॥ ७ । १ । २१ ॥**

औशघौ

औशघाविति वक्तव्यम्। किमिदमघाविति। अनुत्तरपद इति। किं प्रयोजनम्। इह मा भूत्। अष्टपुत्रः अष्टभार्य इति।

अस्तु लुक्तत्र।

अस्त्वत्रौश्त्वं लुग्भविष्यति*।

प्र०—इत्यौकारान्तस्य शीभावो विधीयमानोऽन्तवद्भावात्केवलस्याप्यौकारस्य प्रवर्तते। प्रत्ययस्य चानुबन्धभावाभावाभ्यां निरनुबन्धकपरिभाषा व्यवस्थां करोति न वर्णस्य। **अथवेति**। पूर्वाचार्यैर्ह्रे अपि द्विवचने ङिती पठिते। न चेह क्वचिदप्यौङ् प्रत्ययोऽस्ति। सामान्यग्रहणार्थं च पूर्वसूत्रनिर्देशस्तेन यः पूर्वसूत्र औङ् तस्य ग्रहणं भवतीति प्रथमाद्वितीयाद्विवचनयोर्ग्रहणसिद्धिः। **वर्णश्चायमिति**। औकारो वर्ण एव निर्दिष्टो न प्रत्यय इत्यर्थः। **तेन ङित्त्वेऽप्यदोष इति**। ङित्त्वे सति यो दोषः स नास्ति। ङित्त्वस्यैवाभावादित्यर्थः।

**अष्टाभ्य औश्**। **औशघाविति**। औशादेशो नाप्राप्ते लुक्यारभ्यमाणो विशेषाभावात्सर्वस्य लुको बाधकः प्राप्नोतीति भावः। इतरो येन नाप्राप्तिन्यायेन षड्भ्यो लुगित्यस्यैवायमपवादो न सुपो धातुप्रातिपदिकयोरित्यस्यापीति मत्वाऽऽह—**अस्त्विति**। भवत्वौशादेशस्तस्य लुग्भविष्यतीत्यर्थः। एतच्चौशादेशप्रवृत्तिमभ्युपगम्योच्यते। नित्य-

उ०—निरनुबन्धकत्व औटः सानुबन्धकत्वाद्ग्रहणं न स्यादत आह—**प्रत्ययस्य चेति**। तदेतद्भाष्य उक्तं—नचैतद्वर्णग्रहणेष्वित्यादिना। अनेन औ इत्युच्यमाने प्रथमाद्विवचनस्यैव स्यादिति दोष उद्धृतः। ङित्त्वाभावाच्च याट्प्राप्तिरेव नेति बोध्यम्। ननु संभवति प्रत्ययग्रहणे कुतो वर्णग्रहणं स्यादित्यरुचेराह—भाष्ये—**अथवेति**। **नचेहेति**। एवं च सामर्थ्यात्पूर्वसूत्रनिर्देशस्तत्फलं च सामान्यग्रहणमिति भावः। भाष्ये—**कोऽयं प्रकार इति**। अयुक्तोऽयं निर्देशप्रकार इत्यर्थः। **ङित्त्वे विद्याद्वर्णेति**। याडाप इत्यत्रानुवृत्तं ङितीति कर्मधारयेण वर्णनिर्देश इत्यर्थः। तदादिविधौ च स्वरूपसत्सप्तम्येव निमित्तं न त्वर्थनिर्देश इत्युक्तम्। **वर्णश्चायमिति**। चशब्दो वार्थे। ननु ङित्त्वस्यैवाभावे ङित्त्वे न दोष इत्ययुक्तमत आह—**ङित्त्वे सतीति**। **अष्टाभ्य औश्**। **सर्वस्य**। षड्भ्य इत्यस्य सुपो धात्वित्यस्य च। **प्रवृत्तिमभ्युपगम्येति**।

* २. ४. ७१.

षड्भ्योऽप्येवं प्रसज्यते।

इहापि तर्हि प्राप्नोति। अष्टौ तिष्ठन्ति। अष्टौ पश्येति+।

अपवादः

अपवादत्वादत्रौश्त्वं लुकं बाधिष्यते। इहापि तर्हि बाधेत। अष्टपुत्रः अष्टभार्यः।

यस्य विषये

यस्य लुको विषय औश्त्वं तस्यापवादः।

योवा तस्मादनन्तरः ॥ १ ॥

---

प्र०—त्वात्पूर्वमेव लुका भाव्यम्। अन्तरङ्गानपि विधीन्बहिरङ्गो लुग्बाधत इति वा। इतरो लुको विशेषमपश्यन्यद्यपवादे प्रवृत्त उत्सर्गः प्रवर्तते तदाऽतिप्रसङ्ग इत्याह—**षड्भ्य इति**। सूत्रैकदेशानुकरणमेतत्। षड्भ्यो लुगित्ययमप्यौशो लुक् प्राप्नोति। अथ विधानसामर्थ्यान्न भवति तदाऽष्टपुत्र इत्यत्रापि न प्राप्नोतीत्यर्थः। इतरो येन नाप्राप्ते तस्य बाधकमित्याश्रित्याऽऽह—**अपवाद इति**। षड्भ्यो लुगिति सर्वत्र प्राप्नोतीति स एवौशा बाध्यते सुपो धातुप्रातिपदिकयोरित्ययं तु क्वचित्प्राप्नोतीति तं प्रत्यस्य बाधकत्वायोगात्। अन्तरङ्गानपि विधीन्बहिरङ्गो लुग्बाधत इति पूर्वमेव प्रवर्तते। **यो वा तस्मादिति**। औशः षड्भ्यो लुगित्ययमनन्तरो द्वितीयाध्यायविहितस्तु व्यवहितः। ननु मध्येऽपवादा इति द्वितीयाध्यायविहितस्यैव लुको बाधा प्राप्नोति। नैष दोषः। यत्र द्वावपि व्यवहितौ पूर्वोत्तरौ तत्र पूर्वानुभवाहितसंस्कारोपजनितस्मृत्युपारूढस्य पूर्वस्य युक्तो बाधः। इह त्वनेकाध्यायव्यवहितो द्वितीयाध्यायविहितो लुङ् महता यत्नेन स्मरणीयः। अनन्तरस्त्वनुभवनीय इति स एव बाध्यते। अथवा सत्यामसत्यां वोपलब्धौ प्रत्यासत्त्याऽनन्तरस्यैव बाधेन भाव्यम्। एतच्च लुकः समकक्ष्यत्वमभ्युपगम्योक्तम्। भिन्नकक्ष्यौ त्वेतौ लुकौ।

---

उ०—वस्तुतोऽस्त्वत्रौश्त्वमित्यस्य प्राप्नोत्वत्रौश्त्वमित्यर्थः। लुग्भविष्यतीत्यस्य लुग्बाधको भविष्यतीत्यर्थ इति न दोषः। गौणेऽप्यस्य प्रवृत्तिमभ्युपगम्यौशघाविति वार्तिकं प्रवृत्तमिति बोध्यम्। प्रियाष्टादीनां त्वनभिधानमेवेति तदाशयः। **क्वचिदिति**। समासादावित्यर्थः। ननु समासेऽप्यन्तरङ्गत्वादौश् प्राप्नोतीत्यत आह—**अन्तरङ्गानपीति**। **व्यवहिताविति**। कालतस्तुल्यावित्यर्थः। **तत्र पूर्वेति**। तत्र को बाध्यतामिति विशेषचिन्तायां पूर्वस्यैव बाधो न्याय्य इति भावः। पूर्वानुभवजसंस्कारजन्यस्मृतिविषयस्येत्यक्षरार्थः। उत्तरस्य त्वननुभव. स्मृत्ययोगः। न्यायान्तरसत्त्वेऽपि प्रत्यासत्तिन्याय एवाऽऽश्रीयत इत्यर्थो यो वा तस्मादनन्तर इति भाष्यस्येत्याह—**अथवेति**। येन नाप्राप्त्या यत्रोभयबाधकत्वं प्राप्तं तत्रैते न्याया व्यवस्थापका इत्याशयेनाऽऽह—**एतच्चेति**। एवं च ' यस्य विषये ' इत्येष एव समाधर्भस्य

---

\+ ७. १. २२

---

१ ख. °तिर्भवतीत्याशयेनौश° ।

**शिशीलुग्नुम्विधिषु नपुंसकग्रहणं शब्दग्रहणं चेदन्यपदार्थे प्रतिषेधः ॥ २ ॥**

शिशीलुग्नुम्विधिषु नपुंसकग्रहणं शब्दग्रहणं चेदन्यपदार्थे प्रतिषेधो वक्तव्यः। बहुत्रपुः बहुत्रपू बहुत्रपव इति। अस्तु तर्ह्यर्थग्रहणम्। यद्यर्थग्रहणं प्रियसक्थ्ना ब्राह्मणेनेत्यनङ् न प्राप्नोति* । अस्तु तर्हि शब्दग्रहणमेव । ननु चोक्तं शिशीलुग्नुम्विधिषु नपुंसकग्रहणं शब्दग्रहणं चेदन्यपदार्थे प्रतिषेध इति ।

**सिद्धं तु प्रकृतार्थविशेषणत्वात् ॥ ३ ॥**

सिद्धमेतत् । कथम् । प्रकृतस्यार्थो विशेष्यते । किंच प्रकृतम् । अङ्गम्+ । अङ्गस्य शिशीलुङ्नुमो भवन्ति नपुंसके वर्तमानस्य । कथं प्रियसक्थ्ना ब्राह्मणेन ।

---

प्र०–धिर्बलवानिति । **शिशीति** । अङ्गस्येत्यनुवर्तनादङ्गस्य य औङ् नपुंसकात्परस्तस्य शीति विज्ञायमाने शब्दग्रहणं भवति । यदाऽप्यङ्गादिति विभक्तिविपरिणाम आश्रीयते नपुंसकेन चाङ्गं विशेष्यते नपुंसकान्तादङ्गात्परस्येति तदाऽपि शब्दग्रहणम् । यदा तु नपुंसकाद्यो विहित इत्याश्रीयते प्रधानं वा नपुंसकमङ्गेन विशेष्यते नपुंसकादङ्गात्परस्येति तदाऽर्थग्रहणम् । शब्दद्वारकं चार्थेन पौर्वापर्यादिकमाश्रीयते । **प्रियसक्थ्नेति** । नपुंसकस्य झलच इत्यतो नपुंसकग्रहणमस्थ्यादिसूत्रेऽनपुंसकसंज्ञाशब्दनिवृत्त्यर्थमनुवर्तते । यद्यप्यभिव्यक्त. पदार्था ये स्वतन्त्रा लोकविश्रुताः। शास्त्रार्थस्तेषु कर्तव्यः शब्देषु न तदुक्तिषु । इति संज्ञाशब्दानामप्रसङ्गस्तथाऽपि न्यायानुसरणे गौरवप्रसङ्गान्नपुंसकानुवृत्तिराश्रीयते । उत्तरार्थं च। ई च द्विवचन इत्यत्र नपुंसकस्येति पुंवदिति चानुवर्तते । तेन च्छन्दसि नपुंसकस्य पुंवद्भावान्मधोर्गृह्णातीत्यादौ नुमभावसिद्धिः। **सिद्धं त्विति** । विषयविभागाश्रयेणाभिमतार्थसिद्धिः।

---

उ०–मिति। भाष्ये काकुः। न वक्तव्यमित्यर्थः। हेतुस्तु प्रसिद्ध एव। अन्तरङ्गानपीति न्यायरूप इति तदाशयः । एतेनैतद्भाष्यबलादन्तरङ्गानपीति न्यायः सामासिकलुग्विषय एवेति भ्राम्यन्तः परास्ताः । एङ्ह्रस्वादिति सूत्रस्थभाष्यविरोधात् । **अङ्गस्य य औङिति** । अङ्गस्य निमित्तमित्यर्थः । **नपुंसकाद्यो विहित इति** । नपुंसकादर्थादित्यर्थः । **नपुंसकादङ्गादिति** । नपुंसकत्वविशिष्टाङ्गार्थादित्यर्थः । कथं पुनरर्थेन पौर्वापर्यमत आह—**शब्दद्वारकं चेति** । आदिना विधानम् । स्त्रिया इति सूत्रस्थेन नह्यर्थेन पौर्वापर्यमस्तीति भाष्येणेदं विरुध्यते । तस्मादर्थग्रहणमित्यस्य भाष्यस्य नपुंसकार्थादङ्गात्परस्येत्यर्थः । अर्थपरस्य नपुंसकशब्दस्यार्थप्रतिपादके लक्षणेति भावः । अनङ्विधौ नपुंसकग्रहणाभावात्कथमव्याप्त्युद्भावनमत आह—**नपुंसकस्येति** । **तेन च्छन्दसीति** । वाक्यभेदेन संबन्धादिति भावः । व्यत्ययो बहुलमिति लिङ्गव्यत्ययेनापीदं सिध्यति । किंचाभिव्यक्तेति न्यायः पदकार्य एवेति नात्र तस्य विषयोऽत एव सर्वनामसंज्ञायाः प्रतिषेध आरब्ध इत्यन्ये । अस्थ्यादिषु शब्दग्रहणमित्यनेन

---

* ७. १. ७५. + ६. ४. १.

**अस्थ्यादिषु शब्दग्रहणम् ॥ ४ ॥**

अस्थ्यादिषु नपुंसकग्रहणं शब्दग्रहणं द्रष्टव्यम् ।

युक्तं पुनरिदं विचारयितुम् । नन्वनेनासंदिग्धेनार्थग्रहणेन भवितव्यं न हि नपुंसकं नाम शब्दोऽस्ति । किं तर्ह्युच्यतेऽस्थ्यादिषु शब्दग्रहणमिति । अत्रा प्यर्थग्रहणमेव । अत्रैतावान्संदेहः क्व प्रकृतस्यार्थो विशेष्यते क्व गृह्यमाण-स्येति । शिशीलुग्नुम्विधिषु प्रकृतस्यार्थो विशेष्यतेऽस्थ्यादिषु गृह्यमाणस्य ।

**अड्डतरादिभ्यः पञ्चभ्यः ॥ ७ । १ । २५ ॥**

**अद्भावे पूर्वसवर्णप्रतिषेधः ॥ १ ॥**

अद्भावे पूर्वसवर्णस्य* प्रतिषेधो वक्तव्यः । कतरात्तिष्ठति । कतरत्पश्य ।

**सिद्धमनुनासिकोपधत्वात् ॥ २ ॥**

सिद्धमेतत् । कथम् । अनुनासिकोपधोऽच्शब्दः करिष्यते ।

---

प्र०—शिशीलुङ्नुम्विधिष्वर्थग्रहणमस्थ्यादिषु शब्दग्रहणमित्यर्थः । **अस्थ्यादिष्विति**। विशेषण-विशेष्यभावे कामचारान्नपुंसकार्थविशिष्टैरस्थ्यादिभिरङ्गं विशेष्यत इति नपुंसकास्थ्याद्यन्त-स्याङ्गस्यानपुंसकस्याप्यनङ् भवति पदाङ्गाधिकारे तस्य च ग्रहणं तदुत्तरपदस्य चेति वच-नात्केवलानामप्यस्थ्यादीनामनङ् भवति। इदानीं भाष्यकारो विचारमेव पूर्वोक्तमाक्षिपमाण आह—**युक्तं पुनरिति** । अर्थमनपेक्ष्य शब्दग्रहणपक्षासंभव इति भावः । **किं तर्ह्युच्यत इति** । नैवेदं वक्तव्यमित्यर्थः । कस्मान्न वक्तव्यमित्याह—**अत्रापीति** । अर्थधर्मत्वाल्लि-ङ्गस्य नपुंसकार्थाभिधायित्वादस्थ्यादयो नपुंसकशब्देनाभिधीयन्त इत्यर्थग्रहणमेव भवति । तस्माद्विशेषणविशेष्यभावविचार एव युक्तो न तु यथेष्टसिध्यनङ्गत्वादसंभवादेकतरपक्ष-ग्रहणविचारः ।

**अड्डतरादिभ्यः । अद्भाव इति** । सुस्थानिकेऽदादेशेऽयं दोषः । अमादेशे त्वदि स्थानिवद्भावादमि पूर्व इति पूर्वरूपं सिद्धमिति । **सिद्धं त्विति** । अनुनासिकत्वेन निर्दृ-

---

उ०—गृह्यमाणास्थ्यादिविशेषणं नपुंसकग्रहणमित्युक्तमित्याह—**विशेषणेति। नपुंसकार्थविशि-ष्टैरिति** । गुणः कृतार्थसंस्कार इति न्यायादिति भावः । **नैवेदमिति** । किंशब्द आक्षेप इत्यर्थः । नत्वित्यस्यैकतरपक्षग्रहणविचार इत्यनेनान्वयः । युक्त इति च शेषः । तत्र हेतुः—यथेष्टेत्यादिः । शब्दग्रहणपक्षस्य यथेष्टसिद्ध्यनङ्गत्वादर्थपक्ष एवेष्टसंग्रहादसंभवाच्चास्य पक्षस्य कोट्यन्तराभावेन वार्तिककृत्कृतो विचारो न युक्त इत्यर्थः । एवं च गृह्यमाणसंभवे तद्वि-शेषणमेव लिङ्गग्रहणं तदभावे प्रकृतस्याङ्गस्येति निर्णयः । अत एव वा शाविति नासूत्रि । तथा हि—नपुंसकग्रहणं गृह्यमाणशत्रन्तस्यैव नपुंसकत्वं यथा स्यादित्यर्थम् । तेन बहवो ददतो येषु तानि बहुददतीत्यत्र न। बहूनि ददन्ति येषु ते बहुददन्त इत्यत्र च नुम्भवतीति बोध्यम् ।

**अड्ड०** । **अमादेशे त्विति** । कतरत्पश्येति भाष्योदाहरणस्य हे कतरत्त्वं पश्येत्यर्थो

---

* ६. १. १०२.

अथवाऽनन्तरस्य लुको बाधकं भविष्यति । कुत एतत् । अनन्तरस्य विधिर्वा भवति प्रतिषेधो वेति । अथेह कस्मान्न भवत्यौश्त्वम् । अष्ट तिष्ठन्ति । अष्ट पश्येति ।

आत्वं यत्र तु तत्रौश्त्वम् ।

यत्रैवाऽऽत्वं तत्रैवौश्त्वेन भवितव्यम् । कुत एतत् ।

तथा ह्यस्य ग्रहः कृतः ।

तथा ह्यस्याऽऽत्वभूतस्य ग्रहणं क्रियते । अष्टाभ्य इति । ननु च नित्यमात्वम्+ । एतदेव ज्ञापयत्याचार्यो विभाषात्वमिति यदयमात्वभूतस्य ग्रहणं करोति । अष्टाभ्य इति । इतरथा ह्यष्टन इत्येव ब्रूयात् ।

औशवादस्तु लुकश्च षड्भ्योऽप्येवं प्रसज्यते ।
अपवादो यस्य विषये यो वा तस्मादनन्तरः ॥ १ ॥
आत्वं यत्र तु तत्रौश्त्वं तथा ह्यस्य ग्रहः कृतः ।
स्वमोर्लुक्च त्यदादीनां कृते ह्यत्वे न लुग्भवेत् ॥ २ ॥

**प्र०**—एकस्य सर्वत्र प्राप्त्याऽपरस्य क्वचित्प्राप्त्या । अथेहेति । अष्टाभ्य इति विभक्तौ लक्षणवशाद्याकारो निर्दिष्टोऽशक्य औशो विषयेऽपि स्वविषयेऽवस्थापयितुम् । **आत्वं यत्रेति।** कृताकारस्यानुकरणमष्टाभ्य इति । ननु चेति । लक्षणवशाद्विभक्तावाकारं विधाय निर्देशः कृत इति चोदकाशयः । एतदेवेति । लाघवार्थमष्टन इति वक्तव्ये कृतात्वस्येदमनुकरणं तस्य चैतत्प्रयोजनं कृतात्वाद्यथा स्यादकृतात्वान्मा भूदिति । यदि च नित्यमात्वं स्यात्ततो व्यवच्छेद्याभावात्कृतात्वानुकरणमनर्थकं स्यात्तस्मात्कृतात्वानुकरणनिर्देश आत्वविकल्पस्य ज्ञापकः । स्वमोरिति । उत्तरसूत्रोपस्थाप्यमानार्थसंग्रहः ।

**उ०**—इति भावः । ननु कृतात्वनिर्देशादात्वाभावे कथमतिव्याप्तिरत आह—**अष्टाभ्य इति। अष्टन इति ।** न च यथाश्रुते बहुवचनेन गौणेऽप्रवृत्तिः । तत्र तु तदभावेन गौणेऽपि स्यादिति दोष इति वाच्यम् । आत्वपक्ष एव प्रवृत्तिरित्यर्थबोधनार्थं बहुवचनस्य चारितार्थ्येनेतरार्थकल्पने मानाभावात् । न च कृतात्वानुकरणादेकवचनेनैव सिद्धौ गौणेऽप्रवृत्त्यर्थमिति वाच्यम् । अष्टन इत्येव ब्रूयादिति भाष्यविरुद्धसूत्राशयकल्पनाया अनौचित्यात् । शब्दबाहुल्येन बहुवचनस्य न्याय्यत्वाच्च । ‘ तिसृभ्यो जस् ’ इतिवत् । गौणानां प्रियाष्टादीनामनभिधानस्य ष्णान्ता षडिति सूत्रभाष्य उक्तत्वाच्च । **ज्ञापक इति ।** इदं च हलीत्यननुवृत्तिपक्षे । तदनुवृत्तिपक्षे तु जस्शसोर्विषय आत्वस्यापीदमेव ज्ञापकमिति बोध्यम् । **उत्तरसूत्रोपस्थाप्यमानेति ।** उत्तरसूत्र उपसंख्यायमानेत्यर्थः ।

+ ७. २. ८४.

१ क. °पे अव° ।

## स्वमोर्नपुंसकात् ॥ ७ । १ । २३ ॥

### स्वमोर्लुक्त्यदादिभ्यश्च ॥ १ ॥

स्वमोर्लुक्त्यदादिभ्यश्चेति वक्तव्यम् । इहापि यथा स्यात् । तद्ब्राह्मणकुलमिति । किं पुनः कारणं न सिध्यति ।

कृते ह्यत्वे न लुग्भवेत् ।

अत्वे× कृते लुग्न प्राप्नोति । इदमिह संप्रधार्यम् । अत्वं क्रियतां लुगिति किमत्र कर्तव्यम् । परत्वादत्वम् । नित्यो लुक् । कृतेऽप्यत्वे प्राप्नोत्यकृतेऽपि । अनित्यो लुग्न हि कृतेऽत्वे प्राप्नोति । अमोऽम् [ ७. १. २४ ] इत्यम्भावेन भवितव्यम् । तस्मात्त्यदादिभ्यश्चेति वक्तव्यम् ।

इदं विचार्यते शिशीलुग्नुम्विधिषु* नपुंसकग्रहणं शब्दग्रहणं वा स्यादर्थग्रहणं वेति । कश्चात्र विशेषः ।

---

प्र०–**स्वमोर्नपुंसकात्** । **तादिति** । तदोः सः साविति सत्वमत्र प्राप्नोति । **नित्यो लुगिति** । अत्वं तु लुकि कृते न लुमताऽङ्गस्येति प्रत्ययलक्षणप्रतिषेधात्स्यादिनिमित्तकत्वाभावान्न प्राप्नोतीत्यनित्यम् । **अनित्यो लुगिति** । यस्य च लक्षणान्तरेण निमित्तं विहन्यते न तदनित्यमित्येतत्तु पाक्षिकम् । यदा द्वयोर्लक्षणयोः संप्रधारणं क्रियते तदा यल्लक्षणप्रवृत्तावपि यस्य द्वितीयस्य लक्षणस्य प्रवृत्तिव्याघातो नास्ति तदापि न तस्य दौर्बल्यम् । लक्षणान्तरेणैवैतत्प्रवृत्तिनिवारणाद्यथा वालिसुग्रीवयोर्युद्धे भगवता रामेण वालिनो वधेऽपि न सुग्रीवापेक्षं दौर्बल्यमभिदधति शूरमानिनः । एतद्दर्शनसंग्रहेणोच्यते यस्य च लक्षणान्तरेणेति । यदा त्वेष न्याय आश्रीयते लक्षणान्तरप्रवृत्तिनिमित्तमुपसंहरल्लक्षणं बलवद्भवतीतरत्तु तदुपसंहृतनिमित्तलक्षणान्तरोपपादितप्रवृत्तिविघातं दुर्बलमेव । तथा च भगवद्वासुदेवसहायत्वात्पाण्डवा बलिनो दुर्बलान्धार्तराष्ट्रान्विजिग्यिरे । तदा नास्त्येतद्यस्य च लक्षणान्तरेणेति । केचित्त्वन्तरङ्गानपि विधीन्बहिरङ्गो लुग्बाधत इत्यत्रापिग्रहणान्नित्यानां च परेषां च लुका बाधनमिच्छन्तस्त्यदाद्यत्वं लुका बाध्यत इत्याहुः । तथा चोच्यते सर्वविधिभ्यो लुग्वि-

---

उ०–**स्वमोर्नपुं०** । **सत्वमत्रेति** । सावत्वे कृते लुगप्राप्ताविति भावः । **पाक्षिकमिति** । कृताकृतप्रसङ्गमात्रेणापि क्वचिन्नित्यताभ्युपगमादिति भावः । तदेवोपपादयति—**यदा द्वयोरिति** । **उपसंहरदिति** । संपादयदित्यर्थः । यथाऽत्वशास्त्रम् । **इतरत्त्विति** । यथा लुक्शास्त्रम् । **तदुपसंहृतेति** । तच्छब्देन प्रकृतेऽत्वविधायकं परामृश्यते । तत्संपादितनिमित्तकेनातोऽमिति लक्षणान्तरेणोपपादितः प्रवृत्तिविघातो यस्य तल्लुक्शास्त्रं दुर्बलमित्यर्थः । यथा वासुदेवसहायत्वेऽपि पाण्डवानां बलवत्त्वमेव व्यवहरन्ति तद्वदित्यर्थः । **वासुदेवसहायत्वादिति** । ल्यब्लोपे पञ्चमी । तत्सहायत्वं ज्ञात्वाऽपीत्यर्थः । **विजिग्यिर इति** । इत्यभिदधतीत्यनुषज्यते । वचनं विनाऽपीष्टसिद्धिं दर्शयति—**केचित्त्विति** । त्यदादिभ्यश्चेति वक्तव्य-

---

× ७. २. १०२. * ७. १. १९; २०; २३; ७२.

**दुक्करणाद्वा ॥ ३ ॥**

अथवा दुग्डवरादीनामिति वक्ष्यामि+ ।

**डित्करणाद्वा ॥ ४ ॥**

अथवा डिदच्शब्दः करिष्यते+। स तर्हि डकारः कर्तव्यः । न कर्तव्यः । क्रियते न्यास एव । द्विडकारको निर्देशः । अद्ड्डतरादिभ्य इति ।

**नेतराच्छन्दसि ॥ ७ । १ । २६ ॥**

**इतराच्छन्दसि प्रतिषेध एकतरात्सर्वत्र ॥ १ ॥**

इतराच्छन्दसि प्रतिषेध एकतरात्सर्वत्रेति वक्तव्यम् । एकतरं तिष्ठति । एकतरं पश्य ।

**नपुंसकादेशेभ्यो युष्मदस्मदोर्विभक्त्यादेशा विप्रतिषेधेन ॥ २ ॥**

---

प्र०—त्तिर्लक्ष्यते तेनोच्चारणार्थोऽकारो दकारमात्रं त्वादेशः। आदेः परस्येत्यम आदेर्भवति मकारस्य तु संयोगान्तस्य लोप इति लोपः । उच्चारणार्थानां त्वनुनासिकत्वप्रतिज्ञायां ब्रुवो वचिरिति वच्यादीनां नुम्प्रसङ्गः । एतस्मिन्पक्षे हे कतरदित्यत्र संबुद्धिलोपप्रसङ्गं मत्वाऽऽह—**दुक्करणादिति** । कार्यिभेदाच्च दुका लुक् न बाध्यते । **द्विडकारक इति** । दकारस्य ष्टुत्वं स्वरूपविनाशप्रसङ्गान्न कृतं नापि डकारस्य संयोगान्तलोपः ।

**नेतरात्** । **नपुंसकादेशेभ्य इति** । अलिङ्गे युष्मदस्मदी इत्यनाश्रित्यायं विचारः । स्वौजसमां लुक्शीशयः परत्वादमा बाध्यन्त इत्यर्थः ।

---

उ०—बोध्यः । **निवृत्तिर्लक्ष्यत इति** । इत्संज्ञायां फलाभावादिति भावः । **संयोगान्तस्य लोप इति।** उत्तरसूत्रे झल्ग्रहणेन क्वचिदझलोऽपि लोप इत्यभिप्रेत्येदम् । नन्वच्चारणार्थस्यापि निवृत्तयेऽनुनासिकत्वमावश्यकमत आह—**उच्चारणार्थानां त्विति** । परे तु विधेयविषय उच्चारणार्थस्यापि यत्नं विना निवृत्तिर्दुर्लभेत्यनुनासिकत्वमावश्यकम् । वच्यादौ नुम् तु न धातूपदेश इदित्त्वाभावात् । येषां हि पदार्थोपस्थितिकाले धातुत्वं तेषामुपदेशो धातूपदेशोऽस्य तु विधानोत्तरमतिदेशेन धातुत्वं स्थानिवद्भावेन भाव्यातिदेशिकधातुत्वं गृहीत्वैकः सत्त्वाच्चेत्याहुः । ननु येन नाप्राप्तिन्यायेन दुका लुको बाधे कतरदित्यादिरूपासिद्धिरत आह—**कार्यिभेदाच्चेति** । ननु कार्यिभेदेऽपि नुम्नुटेरिव बाधकत्वं दुर्वारमित्यरुचेराह—भाष्येऽथवा डिदिति । ननु त्रिडकारक इति वक्तुं युक्तमत आह—**दकारस्येति** । **स्वरूपेति** । विवक्षितादेशस्वरूपेत्यर्थः । **नापीति** । पूर्वोक्तहेतोरेव । एतदर्थमेव विधेयस्याप्यदःपूर्वनिर्देशः ।

**नेतरा०** । **अमा बाध्यन्त इति** । विभक्त्यादेशशब्देनामेवोच्यते । स्थानिभेदमाश्रित्य बहुवचनम् । यूयमित्यादावमादौ कृतेऽन्त्यस्य शेषेलोपे तन्निमित्तके कृते जसः शीत्यादि तु न । संनिपातपरिभाषाविरोधात् । ईदृशेऽपि संनिपातपरिभाषाप्रवृत्तावत्र

---

+ १. १. ४६; ७. १. २३. + ६. ४. १४३.

नपुंसकादेशेभ्यो युष्मदस्मदोर्विभक्त्यादेशा भवन्ति विप्रतिषेधेन । नपुंसकादेशानामवकाशः÷ । त्रपु त्रपुणी त्रपूणि । युष्मदस्मदोर्विभक्त्यादेशानामवकाशः* । त्वं ब्राह्मणः अहं ब्राह्मणः । युवां ब्राह्मणौ आवां ब्राह्मणौ । यूयं ब्राह्मणाः वयं ब्राह्मणाः । इहोभयं प्राप्नोति । त्वं ब्राह्मणकुलम् । अहं ब्राह्मणकुलम् । युवां ब्राह्मणकुले आवां ब्राह्मणकुले । यूयं ब्राह्मणकुलानि वयं ब्राह्मणकुलानि । युष्मदस्मदोर्विभक्त्यादेशा भवन्ति विप्रतिषेधेन । अथेदानीं युष्मदस्मदोर्विभक्त्यादेशेषु कृतेषु पुनःप्रसङ्गाच्छिशीलुग्नुम्विधयः कस्मान्न भवन्ति । सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेवेति ।

## युष्मदस्मद्भ्यां ङसोऽश् ॥ ७ । १ । २७ ॥

किमर्थः शकारः । सर्वादेशार्थः । शित्सर्वस्येति+ सर्वादेशो यथा स्यात् । नैतदस्ति प्रयोजनम् । अक्रियमाणेऽपि शकारेऽलोऽन्त्यस्य विधयो भवन्तीत्यन्त्यस्याकारे कृते त्रयाणामकाराणामतो गुणे पररूपत्वे×÷ सिद्धं रूपं स्यात् तव स्वम् । मम स्वम् । यद्येतल्लभ्येत कृतं स्यात् । तत्तु न लभ्यम् । किं कारणम् । अत्र हि तस्मादित्युत्तरस्याऽऽदेः परस्य [ १.१.६७;५४ ] इत्यकारस्य प्रसज्येत । अत उत्तरं पठति ।

---

प्र०–युष्मदस्मद्भ्यां ङसोऽश् । **किमर्थ इति** । अकारस्याकारवचने प्रयोजनाभावादादेः परस्येत्यस्यानुपस्थानादलोऽन्त्यस्येति सकारस्याकारः । अतो गुण इति पररूपेण सिद्धमिति भावः । इतरस्त्वस्त्यकारस्याकारवचने प्रयोजनमिति मत्वाऽऽह—**शित्सर्वस्येति । अन्तरेणापि शकारं सर्वादेशो भविष्यतीति** । आद्यानुसंहाराभावेऽन्त्या-

---

उ०–पूर्वपक्षसिद्धान्ताकरणपरं भाष्यमेव मानम् । ङेप्रथमयोरित्यत्राममनुवर्त्याम् अमेवेति व्याख्याने पुनःप्रसङ्गेन श्याद्यापादनपरभाष्याविरोधः । अङ्गवृत्तपरिभाषा तु न क्वापि भाष्ये लक्ष्यसिद्ध्य आदृता शिशीविषयेऽपि पूर्वपक्षासंगतेश्च । अत एव ज्यादादीयसः, श्नाजनोर्जा, रीङृतः; इत्येतेष्वेतत्परिभाषाज्ञापनोत्तरं किमेतस्य ज्ञापने प्रयोजनमिति प्रश्ने पिबतेर्गुणप्रतिषेधो न वक्तव्यो भवतीत्येवोक्तं नतु किंचिदपि लक्ष्यं प्रयोजनत्वेनोक्तम् । भ्यसोऽभ्यमित्यत्र सिद्धान्तेऽभ्यमित्येव च्छेद इति स्पष्टं युष्मदस्मदोरनादेश इति सूत्रे भाष्ये । भाष्ये शिशीलुग्विधय इत्येव पाठः । क्वचिन्नुम्विधय इति पठ्यते सोऽपपाठः । अमः सर्वनामस्थानत्वाभावात्प्रकृतेरिगन्तत्वाभावाच्चेत्याहुः ।

**युष्मदस्मद्भ्याम्** । **अस्त्यकारस्येति** । शेषेलोप इत्यर्थः । **संपद्यत इति** ।

---

÷ ७. १. २३; १९; २०. * ७. १. २८. * १. १. ५५. ×÷ १. १. ५२; ६. १. ९७.

**ङस आदेशे शित्करणानर्थक्यमकारस्याकारवचनानर्थक्यात् ॥१॥**

ङस आदेशे शित्करणमनर्थकम् । किं कारणम् । अकारस्याकारवचनानर्थक्यात् । अकारस्याकारवचने प्रयोजनं नास्तीति कृत्वाऽन्तरेण शकारं सर्वादेशो भविष्यति ।

**अर्थवत्त्वादेशे लोपार्थम् ॥ २ ॥**

अर्थवत्त्वकारस्याकारवचनम् । कोऽर्थः । आदेशे लोपार्थम् । यः स शेषे लोपः [ ७. २. ९० ] आदेशे स विज्ञायते । ननु चाऽऽदेशो या विभक्तिरित्येवमेतद्विज्ञायते । आदेश एषा विभक्तिः । कथम् ।

सर्वे सर्वपदादेशा दाक्षीपुत्रस्य पाणिनेः ।
एकदेशविकारे हि नित्यत्वं नोपपद्यते ॥

**तस्माच्छित्करणम् ॥ ३ ॥**

तस्माच्छकारः कर्तव्यः । न कर्तव्यः । क्रियते न्यास एव । कथम् । प्रश्लिष्टनिर्देशोऽयम् । अ अ अ इति । सोऽनेकाल्शित्सर्वस्य [ १. १. ५५ ] इति सर्वस्य भविष्यति ।

---

प्र०—नुसंहाराद्द्वयोरकारयोः पररूपमित्यर्थात्सर्वादेशः संपद्यते । **यः शेषे लोप इति** । अनादेशे आत्वयत्वविधानादादेशः शेषः । **ननु चेति** । शेषे लोप इत्यत्र विभक्तावित्यनुवर्तते तद्विशेषणं च शेषग्रहणमित्यादेशो या विभक्तिरिति विज्ञायते । नहि तदादिविधिरस्ति । यत आदेशादाविति विज्ञायेत । तस्मात्सत्यप्यादेशादित्वे विभक्तेरनादेशत्वान्नैवायं शेषः । ततो नास्त्यकारस्याकारवचने प्रयोजनम् । **सर्वे सर्वपदादेशा इति** । आदिविकारद्वारेण विभक्तेरेवाऽऽदेशो विधीयत इति विभक्तेरेवाऽऽदेशः स्यादिति शित्त्वं सर्वादेशार्थं क्रियते । सर्वपदादेशा इत्यत्र पदशब्देन न सुप्तिङन्तमुच्यते किं तर्हि पद्यते प्रतीयते येनार्थः, अन्वयव्यतिरेकाभ्यां कल्पिताभ्यां यस्य कल्पितार्थवत्ता तदभिधीयते । तत्रानन्यार्थादकारविधानादेकदेशद्वारेण विभक्तेरेवाऽऽदेशः । **प्रश्लिष्टनिर्देश इति** । ततश्चाकारद्वयलक्षणः समुदायोऽनेकाल्त्वात्सर्वादेशः प्रवर्तते । तस्मिन्प्रवृत्तेऽतो गुण इति पररूपमिति सिद्धमिष्टम् ।

---

उ०—सर्वादेशफलसंपत्त्या सर्वादेशो भविष्यतीत्युक्तमिति भावः । न चान्त्यस्याऽऽदेशेऽपि विभक्तेरनादेशरूपत्वाद्योऽचीति दुर्वारम् । पररूपे विभक्तेरेवाऽऽदेशरूपत्वात् । न च वार्णादाङ्गं बलीय इति पररूपात्पूर्वमेव यत्वम् । एकस्थानिकत्व एव वार्णाङ्गयोस्तत्प्रवृत्तेरित्याशयात् । **अनादेश इति** । न चाऽऽदेशवत्त्वात्कथमयं शेष इति वाच्यम् । अनादेशपदे लाघवेन तत्पुरुषस्यैवाङ्गीकारादिति भावः । **नहि तदादीति** । अल्ग्रहणे तद्विज्ञानादिति भावः । ननु विभक्तेरयमादेशो न पदस्येति कथमत्रायं न्यायोऽत आह—**पदशब्देनेति** । अस्य च न्यायस्य शित्करणमेव ज्ञापकमिति बोध्यम् ।

## ङे प्रथमयोरम् ॥ ७ । १ । २८ ॥

प्रथमयोरित्युच्यते कयोरिदं प्रथमयोर्ग्रहणं किं विभक्त्योराहोस्वित्प्रत्यययोः। विभक्त्योरित्याह। कथं ज्ञायते। अन्यत्रापि हि प्रथमयोर्ग्रहणे विभक्त्योर्ग्रहणं विज्ञायते न प्रत्यययोः । क्वान्यत्र । प्रथमयोः पूर्वसवर्णः [ ६. १. १०२ ] इति। अस्ति कारणं येन तत्र विभक्त्योर्ग्रहणं विज्ञायते । किं कारणम्। अचीति* तत्र वर्तते न चाजादी प्रथमौ प्रत्ययौ स्तः। ननु चैवं विज्ञायतेऽजादी यौ प्रथमावजादीनां वा यौ प्रथमाविति । यत्तर्हि तस्माच्छसो

प्र०— ङे प्रथमयोरम् । प्राधान्यलक्षणस्य प्रथमार्थस्येहासंभवात्संनिवेशापेक्षया यस्य तावद्ग्रहणं विज्ञायते तत्र विशेषज्ञानाय पृच्छति—कयोरिति । यदि स्त्रीलिङ्गेन निर्देशस्ततो विभक्त्योर्ग्रहणेन भाव्यम् । पुंलिङ्गेन निर्देशे तु प्रत्यययोः। तत्र यद्यन्तरङ्गं प्राथम्यमाश्रीयते ततः पुंलिङ्गेन निर्देशात्प्रत्ययग्रहणम् । वर्गस्यासमाप्तावेव प्रत्यययोः प्राथम्यसंप्रत्ययात् । अथ तु सपूर्वायाः प्रथमाया विभाषा प्रथमायाश्च द्विवचन इत्यत्र शास्त्रे प्रसिद्धिराश्रीयते । ततः स्त्रीलिङ्गनिर्देशाद्विभक्तिग्रहणम् । प्रत्ययग्रहणपक्षे च युष्मदस्मदोः प्रातिपदिकत्वात्प्रातिपदिकप्रत्यययोः सु औ इत्यनयोर्ग्रहणेन भाव्यम् । ननु द्वयोः कथं प्राथम्यं यावताऽऽद्यापेक्षया परस्य द्वितीयत्वम्। नैष दोषः । राश्यपेक्षया द्व्यात्मकस्य समुदायस्य प्राथम्याविरोधात् । प्रथमसाहचर्याद्वा द्वितीयस्यापि प्रथमव्यपदेशः। यथाऽर्धर्चाः पुंसि चेति गोमयादीनामर्धर्चव्यपदेशः । अन्यत्रापीति । प्रसिद्धिमाह—अस्ति कारणमिति । यस्मात्कारणात्तत्र विभक्तिग्रहणं तदिह नास्ति । न चाजादी इति। प्रथमयोर्विशेष्यत्वमचीत्यस्य विशेषणत्वमिति भावः । न चाजादित्वं सोः संभवतीति सामर्थ्यात्तत्र विभक्तिग्रहणं विज्ञायते । अजादी यौ प्रथमाविति । अजादी विशेष्यौ प्राथम्यं विशेषणं तेन चाजादित्वाभावात्सुः परिहृत औजसोः प्राथम्यं न विहन्ति । यथा ब्राह्मणौ ब्राह्मणपङ्क्तौ ब्राह्मणौ प्रथमावानयेत्युक्तेऽब्राह्मणः प्रथमोऽपि चोदनायामनन्तर्भावाद्ब्राह्मणयोर्न प्रथम

उ०— ङे प्रथम०। ननु प्रथमशब्दस्यानेकार्थत्वेनाऽऽद्यर्थवृत्तेरेव ग्रहणमिति निश्चयाभावः कुतोऽयं संदेहोऽत आह—प्राधान्येति । लिङ्गविषयसंदेहस्यापि निदानमाह—तत्र यदीति । अन्तरङ्गत्वमेव दर्शयति—वर्गस्येति । ननु प्रत्यययोर्ग्रहणे तिङामाद्ययोः प्रत्यययोस्तित्तसोर्ग्रहणं कुतो नेत्यत आह—प्रत्ययग्रहणेति । स्त्रीलिङ्गनिर्देशे तु प्रथमादिशब्दानां सुपां त्रिकेष्वेव रूढत्वादन्यग्रहणसंभव एव नेति भावः। समुदायस्येति। उद्भूतावयवभेदस्येत्यर्थः। ङेप्रथमयोरित्येकपदमेव। साहचर्याद्वेति। ङे इति लुप्तषष्ठीकं पृथक्पदमेव । एवं च द्विवचननिर्देशसामर्थ्याद्द्वितीयोऽपि प्रथमशब्देन लक्ष्यत इति भावः। अजादी विशेष्याविति। पूर्वं तदादिविधिः। पश्चाद्विशेषणत्वम्। शब्दरूपं विशेष्यमादाय भाष्य-

* ६. १. ७७.

नः पुंसि [ ६. १. १०३ ] इत्यनुक्रान्तं पूर्वसवर्णं प्रतिनिर्दिशति तज्ज्ञापयत्याचार्यो विभक्त्योर्ग्रहणमिति । इहाप्याचार्यप्रवृत्तिर्ज्ञापयति विभक्त्योर्ग्रहणमिति यदयं शसो न [ ७. १. २९ ] इति प्रतिषेधं शास्ति । नैष प्रतिषेधः। नत्वमेतद्विधीयते । सिद्धमत्र नत्वं तस्माच्छसो नः पुंसीति । यत्र तेन न सिध्यति तदर्थम् । क्व च तेन न सिध्यति । स्त्रियां नपुंसके च । युष्मान्ब्राह्मणीः पश्य अस्मान्ब्राह्मणीः पश्य । युष्मान्ब्राह्मणकुलानि पश्य अस्मान्ब्राह्मणकुलानि पश्येति । यत्तर्हि युष्मदस्मदोरनादेशे द्वितीयायां च [ ७. २. ८६; ८७ ] इत्याह तज्ज्ञापयत्याचार्यो विभक्त्योर्ग्रहणमिति ।

**भ्यसोऽभ्यम् ॥ ७ । १ । ३० ॥**

किमयं भ्यम्शब्द आहोस्विदभ्यम्शब्दः । कुतः संदेहः । समानो निर्देशः ।

---

प्र०—व्यपदेशविघातहेतुः । **अजादीनां वेति** । अचीत्यनुवृत्तं निर्धारणसप्तम्यन्तं विज्ञायते । **यदयं शसो नेति** । ङे प्रथमयोरित्यम्भावस्य प्राप्तस्य शसो नेति निषेधः क्रियते । ततो योऽचीति यत्वे प्राप्ते द्वितीयायां चेत्यात्वे कृते प्रथमयोः पूर्वसवर्ण इति पूर्वसवर्णे तस्माच्छसो नः पुंसीति नत्वे युष्मानस्मानिति रूपं सिध्यति । इतरः- प्रतिषेध आश्रीयमाणे पुंस्येव नत्वं स्यान्नस्त्रीनपुंसकयोरिति मत्वाऽऽह—**नैष प्रतिषेध इति** । आदेः परस्येत्यादेर्नकारे कृते सकारस्य संयोगान्तत्वाल्लोपः । एतच्चाभ्युपगम्य लिङ्गवत्त्वमुक्तम् । **यत्तर्हीति** । यदि प्रत्यययोरिदं ग्रहणं स्यात्ततो द्वितीयाया अनादेशत्वात्तस्यामात्वं सिद्धमेवेति द्वितीयायां चेत्यात्वविधानमनर्थकं स्यात् । ननु च योऽचीति यत्वे प्राप्ते तद्बाधनार्थमात्वविधानं स्यादिति कथं ज्ञापकम् । उच्यते । यद्येतावत्प्रयोजनं स्याद्योऽच्यनमोटोरिति ब्रूयाद्यत्वे प्रतिषिद्ध आत्वस्य भावाद्युष्मानस्मानित्यत्रापि शसो नकारे कृते शेषे लोप इति लोपे सुपि चेति दीर्घत्वं भविष्यति ।

**भ्यसो भ्यम्** । **किमयमिति** । संहितायां निर्देशस्य साम्याद्विचारः । चत्वारोऽत्र पक्षाः संभवन्ति । भ्यमादेशः शेषे लोपोऽन्त्यलोपः । भ्यमादेशः शेषे लोपष्टिलोपः । अभ्यमादेशः शेषे लोपोऽन्त्यलोपः । अभ्यमादेशः शेषे लोपष्टिलोप इति । तत्र यदा भ्यमादेशस्तदा शेषे लोपोऽन्त्यलोप एवाऽऽश्रयितव्यः । टिलोपे रूपासिद्धिप्र-

---

उ०—प्रमाण्यात्तदादिविधिरिति भावः । **निर्धारणेति** । जातावेकवचनम् । **आदेर्नकार इति** । शसो नेत्युच्चारणार्थाकारेणाविभक्तिको निर्देश इत्यर्थः । **एतच्चेति** । तदनभ्युपगमे तु पुंस्यप्यसिद्धिरिति भावः । लिङ्गत्वमिति पाठेऽर्शआद्यजन्तात्त्वः । **आत्वं सिद्धमिति** । युष्मदस्मदोरित्यनेन । ननु युष्मानित्यत्राऽऽदेशविभक्तित्वात्कथमात्वमत आह—**युष्मानित्यादि** । **लोप इति** । अन्त्यलोप इत्यर्थः । स एव च सिद्धान्त इति भावः ।

**भ्यसो भ्यम्** । **शेषे लोपष्टिलोप इति** । शेष इति विषयसप्तम्या स्थानी निर्दिष्टः,[1] मपर्यन्ताच्च शेष इति भावः । **टिलोपे रूपासिद्धीति** । एवं च टिलोपान्त्यलोपयो-

---

१ ख. वचनविपरिणामेनेत्यर्थः ।

किंचातः। यदि तावद्भ्यम्शब्दः शेषे लोपश्चान्त्यस्यैत्त्वं प्राप्नोति÷। अथाभ्यम्शब्दः शेषे लोपश्च टिलोप उदात्तनिवृत्तिस्वरः प्राप्नोति× । यथेच्छसि तथाऽस्तु। अस्तु तावद्भ्यम्शब्दः शेषे लोपश्चान्त्यस्य। ननु चोक्तमेत्त्वं प्राप्नोतीति। नैष दोषः। अङ्गवृत्ते पुनर्वृत्तावविधिर्निष्ठितस्येति न भविष्यति। अथवा पुनरस्त्वभ्यम्शब्दः शेषे लोपश्च टिलोपः। ननु चोक्तमुदात्तनिवृत्तिस्वरः प्राप्नोतीति। नैष दोषः। उक्तमेतदादौ सिद्धमिति+ ।

**साम आकम् ॥ ७। १। ३३ ॥**

**किमर्थमामः ससकारस्य ग्रहणं क्रियते। न आम आकमित्येवोच्येत। के-**

---

प्र०—सङ्गात्। अभ्यमादेशे शेषेलोपेऽन्त्यलोपे च द्वयोरकारयोः पररूपमेकादेश उदात्तेनोदात्त - इत्युदात्तत्वं भवति। युष्मदस्मदोः प्रातिपदिकस्वरेण प्रत्ययस्वरेण वाऽन्तोदात्तत्वात्। टिलोपपक्षे चाकारोच्चारणमर्थवत्। अन्त्यलोपेऽप्येत्त्वनिवृत्त्यर्थमित्यकारोच्चारणसामर्थ्यात्सवर्णदीर्घत्वेन भाव्यमिति न चोदनीयं तदेवं द्वितीयः पक्षोऽत्यन्तदुष्टस्तृतीयस्तु निर्दोष इति तत्परिहारेण पक्षद्वयाश्रयो भाष्ये विचारः । **उदात्तनिवृत्तिस्वर इति** । कर्षात्वतो घञोऽन्त उदात्त इत्यतोऽन्तग्रहणमनुदात्तस्य च यत्रोदात्तलोप इत्यत्रानुवर्तते ततश्चान्तोदात्तं पदं प्राप्नोति मध्योदात्तं चेष्यते । **अङ्गवृत्त इति**। एत्त्ववत् सुपि चेति दीर्घत्वमपि न भवति। **आदौ सिद्धमिति**। अन्तग्रहणं नानुवर्तते। उच्चारणक्रमप्रत्यासत्त्या चाऽऽदेरेवोदात्तत्वम् ।

**साम आकम्**। **किमर्थमिति**। युष्मद् आम् इति स्थित आदेशेनात्र भाव्यमिति यत्वं न प्रवर्तते । आदेशश्च शेष इत्यकृत आदेशे शेषत्वाभावाल्लोपाप्रसङ्गः । त्यदाद्यत्वमपि नास्ति द्विपर्यन्तानां विधानात्। ततश्चानकारान्तत्वादादेशप्रवृत्तिकाले सुण्नास्तीति नार्थः ससकारनिर्देशेन। कृतेऽप्याकमादेशे शेषे लोपे टिलोपे च तथैव सुण्नास्तीति भावः । इतरः कृत आदेशे शेषे लोपेऽन्त्यलोपे च सुट्प्रा-

---

उ०—लक्ष्यानुरोधेन व्यवस्थेति भावः। **टिलोपपक्षे चेति**। अभ्यमादेशपक्ष इदम्। **अत्यन्तदुष्ट इति**। रूपासिद्धेरिति भावः । नन्वमभ्यम आद्याकारस्योदात्तनिवृत्तिस्वरेऽपि न कश्चिद्दोषोऽत आह—**कर्षात्वत इति**। **उच्चारणक्रमेति**। इदं चिन्त्यम्। णिजां त्रयाणामित्यत्र त्रयाणां ग्रहणादाद्युदात्तश्चेत्यादावादिग्रहणाच्चास्यात्र शास्त्रेऽनाश्रयणात्। तस्मान्निमित्तत्वानादरेण यत्रानुदात्ते परत उदात्तलोपस्तस्योदात्त इत्यर्थादादेरेवेति बोध्यम्।

**साम आकम्**। **आदेशेनात्र भाव्यमिति**। अकृतव्यूहपरिभाषयेति भावः। तदभावे नित्यत्वादाकमिति बोध्यम्। शेषे लोपे टिलोपे चेति पाठः। चो वाक्यालंकारे। **इतर इति**।

---

÷ ७. २. ९०; ७. ३. १०३. × ६. १. १६१; १५९. + ६. १. १६१

---

१ ख. 'वाद्युदात्त'।

नेदानीं ससकारस्य भविष्यति । आमः सुडयं भक्त* आम्ग्रहणेन ग्राहिष्यते । अत उत्तरं पठति ।

**साम्ग्रहणं यथागृहीतस्याऽऽदेशवचनात् ॥ १ ॥**

साम्ग्रहणं क्रियते । निर्दिश्यमानस्याऽऽदेशा भवन्तीत्येवं ससकारस्य न प्राप्नोति । इष्यते च स्यादिति तच्चान्तरेण यत्नं न सिध्यतीति साम आकम् । एवमर्थमिदमुच्यते ।

**न वा द्विपर्यन्तानामकारवचनादामि सकाराभावः ॥ २ ॥**

न वैतत्प्रयोजनमस्ति । किं कारणम् । द्विपर्यन्तानामकारवचनात् । द्विपर्यन्तानां हि त्यदादीनामत्वमुच्यते÷ तेनाऽऽमि सकारो न भविष्यति ।

**सुट्प्रतिषेधस्त्वादेशे लोपविज्ञानात् ॥ ३ ॥**

सुट्प्रतिषेधस्तु वक्तव्यः । किं कारणम् । आदेशे लोपविज्ञानात् । यः स शेषे लोपः [ ७. २. ९० ] आदेशे स विज्ञायते ।

**न वा टिलोपवचनादादेशे टाप्प्रतिषेधार्थम् ॥ ४ ॥**

---

प्र०—प्नोतीति भाविनः सुटो निवृत्त्यर्थं ससुट्कोपादानं कर्तव्यमिति मत्वाऽऽह—**केनेदानीमिति** । स एव परमतमाशङ्कते—**आमः सुडयमिति** । सुडप्ययमाम्भक्त इति यदि त्वं मन्यसे तत इदमुच्यते—**साम्ग्रहणमिति** । **निर्दिश्यमानस्येति** । यदि ससकारको न निर्दिश्येत तदाऽऽदेशविधानकालेऽसंनिहितः पश्चादन्त्यलोपे कृते प्राप्नुवन्सुट् केन निवर्त्येत । इष्यते च तन्निवृत्तिरित्येवमर्थं ससकारग्रहणम् । अथवा त्यदाद्यत्वे कृते सुटि च निर्दिश्यमानस्याऽऽदेशा इति सुट्सहितस्य न प्राप्नोति । यस्तु निर्दिश्यते तस्य वचनसामर्थ्यान्निर्दिष्टग्रहणपरिभाषानुपस्थानाद्व्यवहितस्याऽऽकमादेशः प्राप्नोति ससुट्कनिर्देशात्ससुट्कस्य भवति । अत्र पक्ष आमोऽयं भक्त आम्ग्रहणेन ग्राहिष्यत इति चोदकस्यैव ग्रन्थः । इतरस्तु पूर्वां व्याख्यामबुद्ध्वोत्तरां च दोषवतीमवगम्याऽऽह—**नवेति** । **टिलोप इति** । वक्ष्यमाणमपर्यन्तस्थान्यपेक्षया शेषे विज्ञा-

---

उ०—ससुट्कोपादानं विना भाविसुण्निवृत्तये नान्यो हेतुर्विद्यत इति भाष्यार्थः । शेषे लोपेऽन्त्यलोपे चेति पाठः । अत्रापि चः पूर्ववत् । यद्युत्तरवादिनोऽयमाशयस्तर्ह्यामोऽयमिति चोदकवचोऽनुपपन्नमत आह—**स एवेति** । अत उत्तरं पठतीत्येतव्द्याचष्टे—**तत इदमिति** । **यदि ससकारक इति** । निर्दिश्यमानस्य भाविनो विद्यमानस्य वाऽऽदेशा निवर्तका भवन्तीति सकाराभावे ससकारस्य निवत्तिर्न प्राप्नोतीति भाष्यार्थ इति भावः । अत्र व्याख्यानेन वेत्याद्यग्रिमभाष्यास्वारस्यं मत्वा पक्षान्तरमाह—**अथवेति** । द्विपर्यन्तानामित्यनभ्युपगम्येदम् । ननु निर्दिश्यमानस्य तर्हि व्यवहितत्वान्न स्यादत आह—**यस्त्विति** । **वचनसामर्थ्यादिति** । चिन्त्यमिदम् । अतिंत्वांकमिति गौणे चरितार्थत्वात् । तस्मादत्र न स्यादित्येव भाष्याशयः । **इतरस्त्विति** । चोदक इत्यर्थः । **उत्तरां चेति** । त्यदाद्यत्वे कृत इति यत्तदनुपपन्नमित्यनेन प्रति-

---

* ७. १. ५२. ÷ ७. २. १०२÷

न वा सुट्प्रतिषेधो वक्तव्यः। किं कारणम्। टिलोपवचनात्। आदेशे यः स शेषे लोपष्टिलोपः स वक्तव्यः। किं प्रयोजनम्। टाप्प्रतिषेधार्थम्। टाब्मा भूदिति*। स तर्हि टिलोपो वक्तव्यः।

**न वा लिङ्गाभावाट्टिलोपवचनानर्थक्यम्॥ ५॥**

न वा वक्तव्यम्। किं कारणम्। लिङ्गाभावात्। अलिङ्गे युष्मदस्मदी। किं वक्तव्यमेतत्। न हि। कथमनुच्यमानं गंस्यते। न ह्यस्ति विशेषो युष्मदस्मदोः स्त्रियां पुंसि नपुंसके वा। अस्ति कारणं येनैतदेवं भवति। किं कारणम्। योऽसौ विशेषवाची शब्दस्तदसांनिध्यात्। अङ्ग हि भवांस्तमुच्चा-

---

प्र०—यमाने टिरेव शेष इति तस्यैव लोपो विज्ञायते। शेष इति स्थानी विषयसप्तम्या निर्दिष्टः। लोपस्य चास्मिन्पक्ष उत्सर्गत्वादनादेश आत्वयत्वविधानादादेश एव विभक्ताववस्थितः। **टाप्प्रतिषेधार्थ इति**। टापोऽनुत्पत्त्यर्थमित्यर्थः। युष्मदस्मदोर्द्रव्यवाचित्वाद्द्रव्यस्य च लिङ्गसंख्यासंबन्धादन्त्यलोपे सत्यकारान्तत्वाट्टाप्प्राप्नोति। सांनिपातपरिभाषायाश्च दोषः पठितस्तयदादेशकाः प्राब्विधाविति टापि सा नाऽऽश्रीयते। **अलिङ्गे इति**। अभिधेयस्यालिङ्गत्वादलिङ्गे। शब्दशक्तिस्वाभाव्याद्द्रव्यरहित एव ताभ्यामर्थोऽभिधीयत इति तन्निवृत्तये टिलोपो नाऽऽश्रयितव्यः। **योऽसौ विशेषवाचीति**। ननु द्योतकाष्टाबादयः। तदुक्तं सिद्धं तु स्त्रियाः प्रातिपदिकविशेषणत्वात्स्वार्थे टाबादय इति। नैष दोषः। इदमप्युक्तम्। अथवा प्रकृतिरेव स्त्रियामभिधेयायामिति। अथवा वचिर्द्योतने वर्तते वाचकेन खल्वप्युत्पत्तव्यम्। वाचकश्च प्रातिपदिकार्थे वाचकत्वेऽप्रयु-

---

उ०—पादित इत्यर्थः। भाष्ये—**सुट्प्रतिषेधस्त्विति**। आदेशात्पूर्वं सुट् दुर्लभः। आदेशोत्तरं जातस्य तु निवृत्तिः कर्तुमशक्येति सुट्प्रतिषेध एव कर्तव्य इत्यर्थः। आदेशे स विज्ञायत इत्यनेन तत्रान्त्यलोपविधानमुक्तम्। तेन च सुटः प्राप्त्युपपादनं बोध्यम्। ननु षष्ठ्यनिर्देशाभावात्कथं तस्य स्थानित्वमत आह—**शेष इतीति**। यः स इति यः प्रासङ्ग आदेशे शेषे लोपः स टिलोपो वक्तव्य इति भाष्याक्षरार्थः। नन्वत्र पक्षे शेषग्रहणस्य विभक्तिविशेषणत्वाभावादादेश इति कथं लभ्यतेऽत आह—**लोपस्य चेति**। **अवस्थित इति**। अस्य लोप इति शेषः। अवस्थितिरिति पाठान्तरम्। प्रतिषेधशब्देनानुत्पत्तिर्विवक्षितेत्याह—**टाप इति**। **टापि सेति**। अन्यथा या सेत्यादौ न टाप् स्यात्। तेन सांनिपातपरिभाषया टाब्न स्यादिति न शङ्क्यमिति भावः। ननु लिङ्गस्यार्थधर्मत्वाद्युष्मदस्मदोः कथमलिङ्गे इत्युक्तमत आह—**अभिधेयस्येति**। ननु नयोर्द्रव्यवाचित्वेन लिङ्गयोग आवश्यकोऽत आह—**शब्द शक्तीति**। द्रव्यत्वं तद्वाच्यस्यार्थस्य संख्याकारकत्वाभ्यां योगादेवेति भावः। भाष्ये विशेषवाचीत्यनेन टाबादिर्विवक्षितः। तत्र तेषां द्योतकत्वाद्वाचित्वमनुपपन्नमिति शङ्कते—**नन्विति**। वाचकेन खल्वपीत्याद्यतिशायने तमबित्यत्रोक्तम्। तेषां च द्योतकत्वमेवाभ्युपगतमिति

---

* ४. १. ४.

रेव तु मंस्यते स विशेषः । ननु च नैतदेवं भवितव्यम् । न हि शब्दनिमित्तकेन नामार्थेन भवितव्यम् । किं तर्हि । अर्थनिमित्तकेन नाम शब्देन भवितव्यम् । तदेतदेवं दृश्यतामर्थरूपमेवैतदेवंजातीयकं येनात्र विशेषो न गम्यत इति । अवश्यं चैतदेवं विज्ञेयम् । यो हि मन्यते योऽसौ विशेषवाची शब्दस्तदसांनिध्याद्विशेषो न गम्यत इतीहापि तस्य विशेषो न गम्येत दृषत् सामिदिति ।

---

प्र०—अन्यतमित्यत्र वाच्यवाचकयोरिति प्रयुक्तः । वाह शब्दनिमित्तकेनेति । ननु शब्दनिमित्त एवार्थः । तथा चैकरूपोऽप्यर्थो भिन्नशब्दोच्चारणान्नानारूपः प्रतिभाति । यथा पचति पाकं करोति । पाकक्रियाया निर्वृत्तिं करोतीति । तथा च बलाहकाद्विद्योतते बलाहके विद्योतते बलाहको विद्योतत इति । कसादीनां च साधनत्वं शब्दोपहितरूपाणां बुद्धिविषयाणां हन्मीति चेत्यत्र प्रतिपादितम् । एवं तर्हि यः शब्दो लोकेऽत्यन्तमदृष्टप्रयोगस्तन्निमित्तोऽर्थो न भवतीत्युच्यते । शब्दं प्रयुयुक्षमाणेन लोकस्यानुसरणात् । स्वसामर्थ्येन हि शब्दोऽर्थं प्रत्याययतीति । तच्च सामर्थ्यं लौकिकप्रयोगादवधार्यम् । अर्थरूपमिति । सत्यपि वस्तुतो लिङ्गवत्त्वे युष्मदस्मद्भ्यां न तत्प्रत्याययितुं शक्यत इत्यर्थः । युष्मदस्मद्भ्यां चार्थरूपं शब्देनोच्यते । न वस्तुरूपम् । तस्यैव वस्तुनो ब्राह्मणादिशब्दैर्लिङ्गयुक्तस्य प्रतिपादनात् । न चायं नियमः । सत्त्वभूतोऽर्थोऽवश्यं लिङ्गयुक्तः प्रतीयत इति । पञ्च सप्तेति लिङ्गानवगमात् । तथा च षट्संज्ञकेभ्यः स्त्रीप्रत्ययप्रतिषेधः प्रत्याख्यायते । केचिल्लिङ्गविशेषनिषेधं मन्यमाना लिङ्गं सर्वनामनपुं-

---

उ०—भावः । ननु शब्दनिमित्त एवार्थ इति । [illegible] वस्त्वभिधेयम् । तदुच्यते—यच्छब्द आह तदस्माकं प्रमाणमिति । पचतीत्यत्र क्रिया प्रधानं द्वितीये पच्यर्थस्याप्राधान्यं कर्मत्वेन प्रतीतिश्च । तृतीये तु क्रियाया अप्यप्राधान्यम् । तथा बलाहक इत्यत्र सिद्धत्वात्, द्वितीये निमित्तत्वात्, तृतीये बलाहकस्याभेदाध्यवसायः । वस्तु त्वेकमेव सर्वत्रापि । शब्दोपरक्तं प्रतिभासमानं [illegible] इत्यत्र दृष्टान्तान्तरमाह—कसादीनां चेति । बुद्धिविषयाणामिति । कथकथाक्वारीति भावः । कसादीनामिदानीमविद्यमानत्वादिति तात्पर्यम् । यः शब्द इति । लोकव्यवहारादस्य शब्दस्य यत्रार्थे सामर्थ्यमवगतं ततोऽन्यो योऽर्थः स तन्निमित्तो न भवति । उत्पत्तिसिद्धार्थप्रत्यायनाय शब्दप्रयोगादित्यर्थनिमित्तकेन शब्देन भवितव्यमिति भाष्यार्थ इति भावः । अर्थरूपशब्देनेति । निरनुस्वारः पाठः । युष्मदस्मच्छब्दवर्णानन्तरं यो बौद्धार्थः प्रतीयते सोऽत्रार्थरूपशब्देनोच्यत इत्यर्थः । वस्तुरूपस्य लिङ्गवत्त्वे दृष्टान्तमाह—तस्यैवेति । ततश्च केवलयुष्मदस्मद्भ्यां लिङ्गविशेषान-[illegible]त्वमिति भावः । पञ्च सप्तेत्याद्यर्थस्य सत्त्वरूपत्वं तु कारकत्वेनान्वयादेवेति बोध्यम् । प्रत्याख्यायत इत्यस्य केश्चिद्वार्तिककाराद्यभिमत इति शेषः । नन्वत्र वार्तिककृताऽनयोरलिङ्गत्वमुक्तं पूर्वत्र तु लिङ्गवत्त्वमाश्रित्य विप्रतिषेध उक्त इति विरोधोऽत आह—केचिदिति ।

## तस्मात्सुट्प्रतिषेधः ॥ ६ ॥

तस्मात्सुट्प्रतिषेधो वक्तव्यः ससकारग्रहणं वा कर्तव्यम् । अथ क्रियमाणेऽपि ससकारग्रहणे कस्मादेवात्र सुण्न भवति । ससकारग्रहणसामर्थ्याद्भाविनः सुट आदेशो विज्ञायते ।

---

प्र०—सकयोगं युष्मदस्मदोरिच्छन्ति । तथा च शिशीलुङ्नुमां युष्मदस्मद्विभक्त्यादेशानां च प्रतिषेध उक्तः । अन्ये तु दर्शनभेदेन शिशीलुङ्नुमां विप्रतिषेधः पुंसि नत्वं च लिङ्गवत्त्वाभ्युपगमेन प्रदर्शितम् । सत्त्वभूतस्यार्थस्यावश्यं लिङ्गसंख्यायोगः । तथा च षट्संज्ञेभ्यः स्त्रीप्रत्ययनिषेधः कृतः । इह त्वलिङ्गत्वेन टाप्परिहृत इति विरोधं परिहरन्ति । **तस्मादिति** । टाबभावे टिलोपानाश्रयणादन्त्यलोपे सति सुटः प्राप्तस्य प्रतिषेधो विधेयः । लाघवात्ससकारग्रहणं कर्तव्यम् । **अथेति** । आदेशप्रवृत्तिकाले संनिहित आदेशेन निवर्त्यो नान्यः । **ससकारग्रहणसामर्थ्यादिति** । नहि सत आदेशेन निवृत्तिः क्रियते किं तर्ह्यत्यन्ताभावस्तस्मान्विषये तस्यानेनोपायेनाऽऽख्यायते शास्त्रेण तु प्रसङ्गवतो निवृत्तिराख्यायत इति भाविनः सुटो निवृत्तिः ससुट्कनिर्देशेन प्रतिपाद्यते ।

---

उ०—अत्र लिङ्गवत्त्वपक्ष एव युक्तः । सूत्रवार्तिकोभयसमतत्वात् । टिलोपस्त्वनर्थक एव । सन्निपातपरिभाषया टापोऽप्राप्तेः । अत एव वार्तिककृता त्यदाद्यत्वविषय एव टाब्विधौ तस्या दोष उक्तो नतु सामान्यतष्टाब्विधौ । अत्र 'न वा लिङ्गाभावात्' इत्युक्तिस्त्वेकदेशिन इति तुच्छत्वात्सूत्रवार्तिकविरुद्धत्वाच्च न तत्खण्डने भगवत आदर इति बोध्यम् । **टाबभाव इति** । अलिङ्गत्वात्सन्निपातपरिभाषया वा तदभावे सिद्ध इत्यर्थः । ससकारग्रहणं वेत्येव ज्याय इत्याह—**लाघवादिति** । अत्र सूत्रे सकारग्रहणं भाष्यकैयटयोः सुट्ग्रहणं चाऽऽगमोपलक्षणम् । तेन प्रत्ययोत्तरपदयोश्चेति सूत्रोदाहृतेऽतित्वाकमित्यादौ भाविनुटोऽपि व्यावृत्तिः । **नहि सत इति** । शब्दानित्यत्वप्रसङ्गादिति भावः । **किं तर्हीति** । यथाऽऽर्धधातुकविषयेऽस्तेरप्रयोगो भूशब्दस्य च प्रयोगोऽस्तेर्भूरित्यनेनोपायेन प्रतिपाद्यत इति भावः । कथं तर्हि स्थानिना निवर्त्याऽऽदेशः क्रियत इति शास्त्रव्यवहारोऽत आह—**शास्त्रेणेति** । प्रसङ्गवतो बुद्धिस्थितस्यास्त्युपदेशात्सर्वत्रास्तिबुद्धौ प्रसक्तायामार्धधातुके भूबुद्धिप्रतिपादनेन तद्बुद्धिनिवृत्तिः क्रियते सैव च विषय आरोप्यत इति भावः । **भाविनः सुट इति** । भाविसुट्बुद्धेरित्यर्थः । तन्निवृत्तिश्चाऽऽमोऽभावात् । अत्र सामः स्थानित्वोक्त्याऽऽकमि स्थानिवत्त्वेन साम्त्वमेव न त्वाम्त्वम् । अत एवातित्वाकमित्यादौ प्रत्ययोत्तरपदयोरिति सूत्रभाष्योदाहृते आकमनुडभावौ सिद्धौ । आम्येव साम्त्वस्याऽऽहार्यारोपेणाऽऽदेशः । आदेशस्य आम्त्वाभावाच्चात्र न नुट् । नच यत्र भावी सुट् तत्रैवायम् । सामो भावित्वस्य सर्वथा दुरुपपादत्वादिति भाष्यविरुद्धकल्पना व्यर्थेति दिक् ।

## आत औ णलः ॥ ७ । १ । ३४ ॥

इह पपौ तस्थाविति त्रीणि कार्याणि युगपत्प्राप्नुवन्ति द्विर्वचनमेकादेश औत्वमिति+। तद्यदि सर्वत्र औत्वं लभ्येत कृतं स्यात्। अथापि द्विर्वचनं लभ्येतैवमपि कृतं स्यात्। तत्तु न लभ्यम्। किं कारणम्। अत्र हि परत्वादेकादेशो द्विर्वचनं बाधते। परत्वादौत्वम्। नित्य एकादेश औत्वं बाधत। कं पुनर्भवानौत्वस्यावकाशं मत्वाऽऽह नित्य एकादेश इति। अनवकाशमौत्वमेकादेशं बाधिष्यते। औत्वे कृते द्विर्वचनमेकादेश इति यद्यपि परत्वादेकादेशः स्थानिवद्भावाद्द्विर्वचनं भविष्यति*।

---

प्र०- आत औ णलः। त्रीणि कार्याणीति। लित्स्वरस्तु प्रयोजनाभावान्नोपन्यस्तः। सर्वथाऽन्तोदात्तत्वस्य सिद्धत्वात्। औत्वं लभ्येत कृतं स्यादिति। एकादेशे कृत औत्वाप्राप्तिदोषस्तावत्परिहृत इत्यभिसंधाय द्विर्वचनासिद्धावपि कृतमित्युक्तम्। द्विर्वचनं लभ्येतेति। एकादेशे कृते व्यपवर्गाभावाद्या द्विर्वचनाप्राप्तिः सा परिहृता भवतीत्येतावता द्विर्वचनसिद्ध्या कृतमित्युक्तम्। परत्वादेकादेश इति। वर्णाश्रयत्वादन्तरङ्गत्वाद्वपीति द्रष्टव्यम्। नित्य एकादेश इति। यद्यप्यकृत औत्वे सवर्णदीर्घत्वं प्राप्नोति कृते तु वृद्धिस्तथाऽपि स्यात्ति भेदमनाश्रित्यैकादेशसामान्याश्रयं नित्यत्वमुच्यते। औत्वं तु कृत एकादेशे नैव प्राप्नोतीत्यनित्यम्। अनवकाशमौत्वमिति। सावकाशस्य सवर्णदीर्घस्य बाधकमित्यर्थः। यद्यपीति। वार्णादाङ्गं बलीय इति पूर्वं द्विर्वचनं भवति। अथाप्यङ्गाधिकारविहितमाङ्गमुच्यते तथाऽपि न दोष इति भावः। स्थानिवद्भावादिति। द्विर्वचननिमित्तेऽचि परतोऽजादेशः स्थानिवद्भवतीति सूत्रार्थमाश्रित्यैकादेशे कृतेऽच्परत्वाभावात्स्थानिवद्भावाभाव आशङ्कितः। अचि यो विहितोऽजादेशः स स्थानिवदिति सूत्रार्थाश्रयणेन तु स्थानिवद्भाव उक्तः। नहि स्थानिवद्भावस्य परतोऽच्निमित्तभूत आश्रीयते। किं तर्ह्यादेशस्य। यदि तर्हि स्थानिवद्भावाद्द्विर्वचनं ततो नित्यं तदिति पूर्वमेव तेन प्रवर्त्यम्। नैतदस्ति।

---

उ०- आत औ०। सर्वथेति। सत्यसति लित्स्वर एकादेश उदात्तेनोदात्त इत्यनेनान्तोदात्तत्वासिद्धेरिति भावः। एतेन त्रीणीति न्यूनमित्यपास्तम्। नन्वौत्वेऽपि द्वित्वात्पूर्वमन्तरङ्गत्वादेकादेशे व्यपवर्गाभावेन द्वित्वं न स्यादिति कृतमित्ययुक्तमत आह—एकादेश इति। ननु द्वित्व एकादेश औत्वं न स्यादित कथं कृतं स्यादत आह एकादेश इति। भाष्ये परत्वादौत्वमिति। एकादेशबाधकमिति, पूर्वपक्षः। वार्णादाङ्गमिति। प्रत्यये परतः पूर्वस्य विधानादिदमप्याङ्गमिति भावः। स्थानिवद्भावाभाव इति। तत्र सति परत्वादेकादेश आशङ्कित इत्यर्थः। चोदकेन स्थानिवत्त्वमनाश्रित्य चोदितं तदाशयमाह—द्विर्वचननिमित्त इति। अचि परत इति स्थानिवत्त्वस्य निमित्तमित्यर्थः। यदि तर्हीति। एवं च स्थानिवद्भावादिति हेतुरयोग्यो नित्यत्वादिति भाष्यं युक्तमिति भावः। नन्वनवका-

+ ६. १. ८; १०; ., १. ३, * १. १. ५९.

**विदेः शतुर्वसुः ॥ ७ । १ । ३६ ॥**

**विदेर्वसोः किस्त्वम् ॥ १ ॥**

विदेर्वसोः किस्त्वं वक्तव्यम् । किं प्रयोजनम् । वसुग्रहणेषु लिडादेशस्यापि* ग्रहणं यथा स्यात् । किंच कारणं न स्यात् । अननुबन्धकग्रहणे हि सानुबन्धकस्य ग्रहणं नेत्येवं लिडादेशस्य न प्राप्नोति सानुबन्धको हि स क्रियते। किं पुनः कारणं स सानुबन्धकः क्रियते । अयमृकारान्तानां लिटि गुणः प्रतिषेधविषय आरभ्यते+ स पुनः कित्करणाद्बाध्यते । आतिस्तीर्वान् निपुपूर्वानिति । स तर्ह्यस्यैवमर्थोऽनुबन्धः कर्तव्यः । न कर्तव्यः । क्रियते न्यास एव ।

प्र०—एकादेशोऽपि नित्योऽन्तरङ्गश्चेति स एव पूर्वं प्रवर्तते । क्रमप्रतिपत्त्यर्थं चानवकाशत्वमौत्वस्याऽऽश्रितम् । वृद्धिलक्षणं चैकादेशमौत्वं न बाधते नहि तस्मिन्नप्राप्त औत्वमारभ्यते ।

विदेः शतुर्वसुः । वसोः किस्त्वमिति । लिडादेशस्य किस्त्वमस्तीति तदनुरोधेन किस्त्वमुच्यते । अनुबन्धान्तरेणापि तस्य सानुबन्धकत्वं संपद्यत । **अननुबन्धकग्रहण इति** । स्थानिवद्भावादुगित्कार्यस्य सिद्धत्वादुकार उच्चारणार्थो नानुबन्ध इति मन्यते । सत्यपि वाऽस्य सानुबन्धकत्वे तदनुबन्धकग्रहणपरिभाषया क्वसोरग्रहणप्रसङ्गः । परिभाषोपादानं त्वग्रहणोपलक्षणम् । **किं पुनः कारणमिति** । असंयोगाल्लिट् किदिति किस्त्वस्य सिद्धत्वाद्वसुरेव लिटो विधीयताम् । **अयमिति** । यथा तेरतुरित्यादौ गुणो भवति तथा वसावपि स्यादिति तद्बाधनार्थं किस्त्वं क्रियते । एतच्च प्रयोजनोपलक्षणमिति संयोगान्तार्थमपि किस्त्वमित्याहुः । तेनाऽऽजिवानित्यज्ञेः ।

उ०—शमौत्वं दीर्घवद्वृद्धिमपि बाधेतेत्यत आह—**क्रमेति**।औत्वं ततो वृद्धिस्ततः स्थानिवत्त्वाद्द्वित्वमिति क्रमप्रतिपत्त्यर्थं यदनवकाशत्वमाश्रितं तन्न नित्यत्ववदेकादेशसामान्यापेक्षं किंतु दीर्घापेक्षमेवेति वृद्धिर्भवत्येवेत्यर्थः । तदाह—**वृद्धिलक्षणं चेति** ।

विदेः श० । ननु वसोः किस्त्वं न गुणाभावाय शतृस्थानिकत्वेन ङित्त्वादेव सिद्धेः । किंतु सामान्यग्रहणार्थं तस्य चानुबन्धान्तरेणापि संभवात्किं ककारानुबन्धेनेत्यत आह—**लिडादेशस्येति** । ननु वसुरुकारेण सानुबन्धक इति किमुच्यतेऽननुबन्धकग्रहण इति तत्राऽऽह—**स्थानिवदिति** । ननु विधेयविषय उच्चारणार्थस्यापीत्संज्ञाऽऽवश्यकयेव । किंचाल्विधित्वादुगित्त्वं दुर्लभमित्यत आह—**सत्यपि वेति** । **तदनुबन्धकेति** । यावदनुबन्धैरनुबन्धवत्ता तदन्यतमरहितग्रहणे तद्विशिष्टग्रहणं नेति भाष्यार्थ इति भावः । उपलक्षणमित्यस्य तथा भाष्यं व्याख्येयमित्यर्थः । ननु क्वसोः किस्त्वं गुणप्रतिषेधार्थं स्यादिति प्रश्नासंगतिरत आह—**असंयोगादिति** । आजिवानित्यादौ नलोपः किस्त्वस्य फलं रेधिवानित्यादावेत्त्वा-

* ३. २. १०७. + ५. ४. ११; १. २. ५; १ १, ५.

द्विसकारको निर्देशः । विदेः शतुर्वसुस्समासेऽनञ्पूर्वे क्त्वो ल्यप् ।

**समासेऽनञ्पूर्वे क्त्वो ल्यप् ॥ ७ । १ । ३७ ॥**

**ल्यबादेश उपदेशिवद्वचनम् ॥ १ ॥**

ल्यबादेश उपदेशिवद्भावो वक्तव्यः । उपदेशावस्थायां ल्यब्भवतीति वक्तव्यम् । किं प्रयोजनम् ।

**अनादिष्टार्थम् ॥ २ ॥**

---

**प्र०**–रेधिवानिति रधेर्नुमि सिद्धं भवति । ननु संयोगान्तार्थत्वे कित्त्वस्य कथं प्रतिषेधविषय आरभ्यमाणो गुणो बाध्यः । उच्यते । ऋकारान्तेभ्यः परस्य क्वसोरौपदेशिकातिदेशिककित्त्वद्वयसामर्थ्यात्क्ङिति चेति गुणनिषेधो द्विरुपतिष्ठते । तत्र पुनरुपस्थानं प्रतिषेधविषये गुणनिषेधं विधास्यति । केचिदाहुः—छान्दसः क्वसुः । ततश्छन्दस्युभयथेति सार्वधातुकत्वान्ङित्त्वान्नलोपस्य सिद्धत्वात्संयोगान्तार्थं कित्त्वं नोपयुज्यते । **द्विसकारक इति** । वसुसित्यादेशो निर्दिष्टः । तत्र सकारस्य रुत्वविसर्जनीयौ कृतौ ततः सकारेण सानुबन्धत्वं वसोः संपद्यत इति वसुप्रदेशेषूभयोरविशेषणाद्ग्रहणं सिध्यति ।

**समासेऽनञ्पूर्वे क्त्वो ल्यप्** । **ल्यबादेश इति** । अनेकपदाश्रयसमासनिमित्तो ल्यबादेशो बहिरङ्गो हित्वादयस्त्वेकपदविषयप्रकृतिप्रत्ययापेक्षा अन्तरङ्गा इति पूर्वं प्राप्नुवन्तीति भावः । तत्रोपदेशे समास इति विरोधात्समासो विषयत्वेनाऽऽश्रीयते समासे विषयेऽकृत एव तस्मिन्क्त्व उपदेशावस्थायामेव ल्यब्भवति तस्मिन्कृतेऽनल्विधाविति स्थानिवत्त्वनिषेधाद्द्वित्वाद्यभावः । पूर्वोक्तविरोधपरिहाराय भाष्यकारोऽतिदेशं व्याचष्टे—**उपदेशिवद्भावो वक्तव्य इति** । **उपदेशावस्थायामिति** । अत्राप्युपमानोपमेयसंबन्धो द्रष्टव्यः । कृतेऽपि समासे ल्यब्भवन्नुपदेशिवद्भवति । अकृतेषु हित्वादिषु भवतीत्यर्थः । अथवा समास इति विषयसप्तम्याश्रयमेव भाष्यम् । उपदेशावस्थायां ल्यब्भवतीत्युपदेशिवद्भावो वक्तव्य इत्येतत्तु वस्तुव्याख्यानम् । उपदेशावस्थायां ल्यब्भवन्नन्यैर[illegible]भिस्तुल्यं भवतीत्यर्थः । **अनादिष्टार्थमिति** । आदेश आदिष्टं

---

**उ०**–भ्यासलोपौ [illegible] सिद्धात् । अन्यार्थत्वात्कित्त्वस्य सामर्थ्याभावादिति भावः । **द्विरुपतिष्ठत इति** । निषेधसूत्राणां परिभाषात्वादिति भावः । **केचिदिति** । अत्र पक्षे कित्त्वसामर्थ्यात्प्रतिषेधविषयगुणनिषेधः सूपपादः । अत एकेत्यत्र क्ङितीत्यनुवृत्त्यैत्त्वाभ्यासलोपावपि सिद्धाविति भावः ।

**समासेऽनञ्०** । **विरोधादिति** । क्त्वोपदेशे समासाभावादिति भावः । **अनल्विधाविति** । तकारादौ हलादौ चाऽऽदेशानां विधानादिति भावः । **अत्राप्युपमानेति** । उपदेशावस्थायामित्यथ इति भावः । **तर्ह्युपदेशिद्भाव इति** भाष्यमयुक्तं स्यादतआह–**उपदेशिवद्भावो वक्त**

अकृतेष्वादेशेषु ल्यब्यथा स्यात्। के पुनरादेशा उपदेशिवद्वचनं प्रयोजयन्ति। हित्वदत्त्वात्त्वेत्त्वेत्त्वदीर्घत्वशूडिटः×। हित्वम्। हित्वा प्रधाय। हित्वम्। दत्त्वम्। दत्त्वा प्रदाय। दत्त्वम्। आत्त्वम्। खात्वा प्रखन्य। आत्त्वम्। इत्त्वम्। स्थित्वा प्रस्थाय। इत्त्वम्। ईत्त्वम्। पीत्वा प्रपाय। ईत्त्वम्। दीर्घत्वम्। शान्त्वा प्रशम्य। दीर्घत्वम्। शत्वम्। पृष्ट्वा आपृच्छ्य। शत्वम्। ऊठ्। द्यूत्वा प्रदीव्य। ऊठ्। इट्। देवित्वा प्रदीव्य। किं पुनः कारणमादेशास्तावद्भवन्ति न पुनर्ल्यप्। न परत्वाल्ल्यपा भवितव्यम्। सन्ति चैवात्र केचित्पर आदेशा अपि च

**बहिरङ्गलक्षणत्वात्॥ ३॥**

बहिरङ्गो ल्यप्। अन्तरङ्गा आदेशाः। असिद्धं बहिरङ्गमन्तरङ्गे। स तर्ह्युपदेशिवद्भावो वक्तव्यः। न वक्तव्यः। आचार्यप्रवृत्तिर्ज्ञापयत्यन्तरङ्गानपि विधीन्बहिरङ्गो ल्यब्बाधत इति यदयमदो जग्धिर्ल्यप्ति किति [२. ४. ३६] इति ति कितीत्येव सिद्धे ल्यब्ग्रहणं करोति।

---

प्र०—तस्याभावोऽनादिष्टमित्यव्ययीभावः। **प्रखन्येति**। ये विभाषेति विकल्पेनाऽऽत्त्वमिष्यते जनसनखनां सञ्झलोरित्यनेन तु ल्यबादेशात्पूर्वं नित्यं प्राप्नोति। **प्रदीव्येति।** पूर्वमिटि कृते निर्दिश्यमानस्याऽऽदेशा भवन्तीति केवलस्य क्त्वो ल्यपि सति इटः श्रवणं प्राप्नोति। अथापि कथंचित्सेट्कस्य स्थाने ल्यप् स्यात्तथाऽपि स्थानिवद्भावान्न क्त्वा सेडिति कित्त्वप्रतिषेधाद्गुणः प्रसज्येत। दीर्घत्वस्यासिद्धत्वात्। **परत्वादिति।** इष्टत्वादित्यर्थः। इतरस्त्विष्टानिष्टविभागो न ज्ञायत इति व्यवस्थाशब्द एवानेन परंशब्दः प्रयुक्त इति मत्वाऽऽह—**सन्ति चेति**। **बहिरङ्गलक्षणत्वादिति**। समासापेक्षं बहिरङ्गं लक्षणं शास्त्रमस्येति समासः। अथवा बहिरङ्गः समासो लक्षणं निमित्तमस्येत्यर्थः। **यदयमिति**। ति कितीत्येव जग्धिभावस्य ल्यबादेशात्प्रागेव सिद्धत्वाल्ल्यब्ग्रहणं यथोक्तमर्थं ज्ञापयति। स्थानिवत्सूत्रे युष्मदस्मदोरनादेश इत्यनादेशग्रहणं

---

उ०—**व्य इत्येतत्त्विति**। **अव्ययीभाव इति**। अर्थाभावे। तेन हित्वाद्यादेशाभावार्थमित्यर्थः। तत्पुरुषेणैवार्थलाभादव्ययीभावो न युक्त इति नञ्सूत्रे निरूपितम्। नन्वेवं सति प्रखायेत्यसाध्वेव स्यादत आह—**ये विभाषेति**। भाष्ये—**ईत्त्वं पीत्वा प्रपायेति**। एवं च न ल्यपीति सूत्रमसंगतं स्यादुपदेशवचनाभाव इति भावः। **अथापीति**। तदन्तविधिविषय एवैषा परिभाषा नतु यदागमा इत्येतद्विषय इति यद्यभ्युपगम्येतेत्यर्थः। इदं तु प्रौढ्यैव। पादः पदिति सूत्रस्थभाष्यविरोधात्। किंच सेट्त्वमशास्त्रीयत्वात्स्थानिवत्त्वेन दुर्लभमित्यन्ये। केचित्तु विशिष्टस्य निर्दिश्यमानत्वाभावान्निर्दिश्यमानस्य च व्यवहितत्वाल्लुचपोऽप्राप्तिरेवात्र दोष इत्याहुः। **दीर्घत्वस्य**। हलि चेत्यस्य। **समासापेक्षमित्यादि।** लक्षणशब्दः शास्त्रपरो निमित्तपरो वेति भावः। **ज्ञापयतीति**। एवं न ल्यपीत्यपि ज्ञापकं बोध्यम्। ननु ल्यब्ग्रहणं स्थानिवत्सूत्रेऽन्यार्थज्ञापकमुक्तमिति चरितार्थं कथमस्यार्थस्य

---

× ७. ४. ४२; ४६; ६. ४ ४२; ७. ४. ४०; ६. ४. ६६; १५; १९. ७. २. ५६.

**स्नात्वाकालकादिषु च प्रतिषेधः ॥ ४ ॥**

स्नात्वाकालकादिषु च प्रतिषेधो वक्तव्यः । स्नात्वाकालकः पीत्वास्थिरकः भुक्त्वासुहितक इति ।

**तदन्तनिर्देशात्सिद्धम् ॥ ५ ॥**

तदन्तनिर्देशात्सिद्धमेतत् । कथम् । क्त्वान्तस्य ल्यपा भवितव्यं न चैतत्क्त्वान्तम् ।

**समासनिपातनाद्वा ॥ ६ ॥**

अथवाऽवश्यमत्र समासार्थं निपातनं कर्तव्यं+ तेनैव यत्नेन ल्यबपि न भविष्यति ।

**अनञो वा परस्य ॥ ७ ॥**

---

प्र०—तत्स्थानापत्त्या तद्धर्मलाभस्य स्वरूपविधिना निरस्तस्य ज्ञापकमुक्तम् । ल्यब्ग्रहणं त्वलाश्रयेषु कार्येषु तद्धर्मलाभाभावस्य । यमर्थमन्तरेण यस्यानुपपत्तिस्तस्य सर्वस्य ज्ञापकं तद्भवतीत्यनेकोऽप्यर्थो ल्यब्ग्रहणेन ज्ञाप्यत इति विरोधाभावः । **स्नात्वाकालकादिष्विति** । मयूरव्यंसकादिषु समासप्रकरणात्समासार्थ एवैषां पाठः । तत्र समासेऽनञ्पूर्वे यो व्यवस्थितः क्त्वाप्रत्ययस्तस्य ल्यब्विधीयमानोऽत्रापि प्राप्नोति । **तदन्तनिर्देशादिति** । क्त्वान्तः समास इह निर्दिश्यत इत्यर्थः । समास इति निर्धारणे सप्तमी सामान्यापेक्षं चैकवचनम् । अथवा छान्दसं बहुवचनस्य स्थाने । निर्धारणं च समानजातीयस्य भवतीति क्त्वान्तः समासो गृह्यते निर्धार्यमाणस्य क्त्वाग्रहणेन विशेषणात्तदन्तविधौ सत्ययमर्थो भवति । समासेष्वनञ्पूर्वेषु क्त्वान्तस्य समासस्य ल्यब्भवति स च निर्दिश्यमानस्याऽऽदेशा भवन्तीति क्त्व एव भवति । **समासनिपातनाद्वेति** । समुदायानां साधुत्वमभ्यनुज्ञायते प्राकरणिकाप्राकरणिककार्यभावाभावविधानद्वारेणेत्यर्थः । **येषु चात्र** स्नात्वाकालकादिषूत्तरपदानुपात्ताक्रियापेक्षः क्त्वाप्रत्ययस्तेषां सापेक्षत्वेऽपि निपातनात्समासः । **अनञो वा परस्येति** । अनञ् चासौ पूर्वश्चेति समासो निपा-

---

उ०—ज्ञापकं स्यादत आह—**स्थानिवत्सूत्र इति** । **यमर्थमिति** । यं यमर्थमित्यर्थः । ननु मयूरव्यंसकादिपाठादेव ल्यबभावः सिद्धोऽत आह—**मयूरेति** । प्रकरणात्समासविध्यर्थ एव स पाठ इति भावः । ननु क्त्वान्तनिर्देशेऽपि स्नात्वेति क्त्वान्तमस्त्येवेत्यत आह—**क्त्वान्तः समास इति** । ननु विविभक्तिकत्वात्कथं समासपदेन त्क्वः सामानाधिकरण्यमत आह—**निर्धारण इति** । समास इति सप्तमी षष्ठ्यर्थे सौत्रीति वक्तुं युक्तम् । **समुदायानामिति** । समुदायनिपातनसामर्थ्यादप्राकरणिकमपि किंचिन्निपातनान्निषिध्यत इति भावः । ननु क्रिययोः समानकर्तृकयोः पूर्वकालवृत्तिक्रियावाचकात्क्त्वाविधानेन स्नात्वाकालक इत्यत्र क्त्वा दुर्लभः । पीत्वासुहितक इत्येवोदाहर्तुं युक्तम् । संपत्त्यादिक्रियापेक्षक्त्वाप्रत्यये तु सापेक्षत्वात्समासो दुर्लभ इत्यत आह—**येषु चेति** । **सापेक्षत्वेऽपीति** । स्नात्वाकालकः संपन्न

---

+ २. १. ७२, ग०.

अथवाऽनञः परस्य ल्यपा भवितव्यं न चात्रानञं पश्यामः। ननु च धातुरेवानञ्। न धातोः परस्य भवितव्यम्। किं कारणम्। नञिवयुक्तमन्यसदृशाधिकरणे तथा ह्यर्थगतिः। नञ्युक्तमिवयुक्तं वाऽन्यस्मिंस्तत्सदृशे कार्यं विज्ञायते। कुत एतत्। तथा ह्यर्थो गम्यते। तद्यथा। अब्राह्मणमानयेत्युक्ते ब्राह्मणसदृशं पुरुषमानयति नासौ लोष्टमानीय कृती भवति। एवमिहाप्यनञिति नञ्प्रतिषेधादन्यस्मादनञो नञ्सदृशात्कार्यं विज्ञास्यते। किंचान्यदनञ् नञ्सदृशम्। पदमित्याह।

अथवा प्रत्ययग्रहणे यस्मात्स तदादेर्ग्रहणं भवतीत्येवं धातुरपि क्त्वाग्रहणेन ग्राहिष्यते। ननु चेयमपि परिभाषाऽस्ति कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणं भवतीति साऽपीहोपतिष्ठेत। तत्र को दोषः। इह न स्यात्। प्रकृत्य प्रहृत्य।

---

प्र०—तेनात्पूर्वशब्दस्य परनिपातः। विशेष्यत्वेन विवक्षितत्वाद्वा। अनञिति वा लुप्तसप्तमीकं पृथक्पदम्। सतिसप्तमी चेयम्। अनञि एव सति क्त्वो ल्यब्भवति। अथाऽनञः परस्येत्यर्थोऽवतिष्ठते। तदन्तविधिश्चात्र नाऽऽश्रीयते। क्त्वाप्रत्ययस्य प्राधान्येन प्रकृत्या-द्विशेषणत्वाभावात्। येन विधिस्तदन्तस्येति। प्रत्ययग्रहणपरिभाषाश्रयस्तु तदन्तविधिः परस्ताद्वक्ष्यते येन नाव्यवधानमिति च धातुना व्यवधानमाश्रीयते। ननु चेति। असत्त्वभूतार्थवाचित्वादिना धर्मेण धातुरपि नञ्सदृशो भवति। न धातोः परस्येति। पदत्वनिबन्धनं सादृश्यमाश्रीयते न तु धर्मान्तरनिबन्धनम्। नास्त्यत्र प्रमाणमित्याशङ्क्याऽऽह—**अथवेति**। क्त्वाग्रहणेन धातुप्रत्ययसमुदायस्य परिग्रहात्तदवयवत्वाद्धातोः स्वावयवेन पौर्वापर्यासंभवाद्धातुर्नञ्ग्रहणेन न गृह्यते। प्रकृत्येति। गतेः क्त्वान्ते समुदायेऽनुप्रवेशात्पौर्वापर्याभावात्तद्व्यतिरिक्तनञ्सदृशशब्दान्तराभावाल्ल्य-

---

उ०—इत्यर्थात्प्रतीयमानक्रियासापेक्षत्वेऽपीत्यर्थः। नन्वनञ एव इति स्वाश्रयेण विशेषणे कथमनञः परस्येत्यर्थलाभोऽत आह—**अनञ्चासाविति**। वस्तुतः क्त्वाग्रहणमकृत्वा नञ इत्येव सूत्रं पाठ्यमिति भाष्याशयः। नन्वनञः परस्य क्त्वान्तस्येत्यर्थ उत क्त्व एव वा। नाऽऽद्यः। ननु च धातुरेवेति भाष्यासंगतेः। नान्त्यः। प्रकृत्येत्यादौ धातुना व्यवधानात्ल्यबनापत्तेः। नञिवयुक्तन्यायेन पदात्परस्येत्यर्थादत आह—**तदन्तविधिश्चेति**। येन विधिस्तदन्तस्येति तदन्तविधिश्चात्र नाऽऽश्रीयत इति पूर्वेणान्वेति। विशेष्यासंनिधानादिति भावः। **प्रत्ययग्रहणपरिभाषेति**। अस्या आशयं वक्ष्यामः। नन्वेवं प्रकृत्येत्यादौ न स्यादत आह—**येन नेति**। **पदत्वनिबन्धनमिति**। लक्ष्यमूलकाद्व्याख्यानादिति भावः। भाष्ये—**अथवा प्रत्ययग्रहण इति**। न च विशेष्याभावात्तदन्तविधिः कथं प्राप्तः। नानेनापि तदन्तविधिबोधनं किंतु येन विधिरित्यस्यैवेति वाच्यम्। शब्दशास्त्रत्वेनोपस्थितशब्दरूपं विशेष्यमादाय तदन्तविधेरदोषात्। तत्तात्पर्यग्राहकं तु येन विधिरिति सूत्रस्थं यस्मादित्यादि वार्तिकमेव। वस्तुतोऽयं वाचनिक इत्येव युक्तम्। अन्यथा वनो र चेत्यादौ समासप्रत्ययविधावित्यनेना-

क तर्हि स्यात् । परमकृत्वा उच्चमकृत्वा× । न वा अत्रेष्यते । अनिष्टं च प्राप्नोतीष्टं च न सिध्यति । गतिकारकपूर्वस्यैवेष्यते । कुतो नु खल्वेतद्द्वयोः परिभाषयोः सावकाशयोः समवस्थितयोः प्रत्ययग्रहणे यस्मात्स तदादेर्ग्रहणं भवति कृद्ग्रहणे गतिकारकपूर्वस्येति चेयमिह परिभाषा भवति प्रत्ययग्रहणे यस्मात्स तदादेर्ग्रहणं भवतीतीयं न भवति कृद्ग्रहणे गतिकारकपूर्वस्यापीति ।

---

प्र०—पोऽप्राप्तिः । **परमकृत्वेति** । परमशब्दो न गतिर्न च कारकमिति क्त्वान्तेऽनन्तर्भूतः पूर्व इति ततः परस्य क्त्वान्तस्य ल्यप्प्रसङ्गः । गतिकारकपूर्वस्यापीत्यपिशब्दात्केवलस्यापि कृत्वेत्यादेः क्त्वान्तस्य ग्रहणात् । आचार्य आह—**न वा अत्रेष्यत इति** । तस्मात्कृद्ग्रहणपरिभाषाऽत्र नाऽऽश्रीयते । चोदक आह—**अनिष्टं चेति** । आचार्य आह—**गतिकारकपूर्वस्यैवेष्यत इति** । प्रकृत्य पार्श्वतः कृत्येत्यादौ ल्यबादेश इष्यते । कृद्ग्रहणपरिभाषोपस्थाने च न सिध्यतीति नासावाश्रीयते । चोदक आह—**कुतो न्विति** । प्रत्ययग्रहणपरिभाषाया अवकाशः—उपगोरपत्यमौपगव इत्यत्र तद्धितान्तस्य प्रातिपदिकत्वात्सुब्लुक्भवति । कृद्ग्रहणपरिभाषाया अवकाशः—व्यावलेखी व्यावचर्चीति णचः स्त्रियामञिति गतिपूर्वस्य णजन्तत्वादञि सति वृद्धिस्वरौ भवतः। अत्र हि प्रत्ययग्रहणपरिभाषायाः स्त्रीप्रत्यये चानुपसर्जने नेति प्रतिषेधादुपस्थानाभावः। एवं सावकाशयोः परिभाषयोर्भिन्नफलयोर्विरोधात्पर्यायोऽप्रतिपत्तिर्वा प्राप्नोति । प्रत्ययग्रहणपरिभाषायामाश्रीयमाणायां प्रकृत्येति गतेः क्त्वान्तेऽनन्तर्भावात्पौर्वापर्योपपत्तौ ल्यप्

---

उ०—स्यापि निषेधः स्यात्।मम तु सौत्रस्यैव स निषेध इति भावः । एवं च समासेऽनञः परस्याङ्गनिमित्तक्त्वान्तावयवस्य निर्दिश्यमानस्य क्त्वो ल्यबिति सूत्रार्थ इति स्नात्वाकालकादौ न दोष इति भावः । भाष्ये—**गतिकारकपूर्वस्यापीति** । गत्यादिसंनिधाने विशिष्टस्यैव क्त्वान्तग्रहणेन ग्रहणं तदसंनिधाने धातुप्रत्ययसमुदायस्यापीत्यर्थस्तदाह—**गतेः क्त्वान्त इति** । ल्यपोऽप्राप्तिरिति । सूत्रं परमकृत्वेत्यादौ चरितार्थं स्यादिति भावः । भाष्ये—**परमकृत्वेति** । सन्मह्त्परमेति विशेषणसमासः । **केवलस्यापीति** । यत्र तु गतिकारकपूर्वत्वं तत्र विशिष्टस्यैव क्त्वान्तत्वं न केवलस्य, अन्यत्र तु केवलस्यापि तत्त्वमिति भावः । गतिरनन्तर इत्यत्र तु गतेः पूर्वपदभूतायाः क्तान्त उत्तरपदे कार्यविधानात्तत्समवधानेऽपि केवलस्य क्तान्तत्वेन ग्रहणम् । न चेह तथा मानमस्तीति तात्पर्यम् । आचार्य आह—**न वा अत्रेति** । अनञ इति मञ्भिन्नमव्ययमेव गृह्यत इति तदाशयः । **तस्मादिति** । यतः परमकृत्वेत्यत्र नेष्यते प्रकृत्येत्यत्र चेष्यते तस्मादित्यर्थः । **चोदक इति** । आशयानभिज्ञ इति शेषः । परिभाषानाश्रयणे मानाभावात् । अनिष्टे परमकृत्वेत्यत्रैव प्राप्नोति । इष्टे च प्रकृत्येत्यत्र न प्राप्नोतीति भावः । **आचार्य आहेति** । भाष्य एवकारस्य परमकृत्वेत्यादिव्यावर्त्यमिति भावः । पार्श्वत इत्याद्यादित्वात्सप्तम्यन्तात्तसिः । स्वाङ्गे तस्प्रत्यय इति क्त्वा । अत्र हि **प्रत्ययेति** । यद्यपि तदादिनियमे निषिद्धे कृद्ग्रहणपरिभाषां विनाऽपि समुदायस्य तदन्त-

---

× २. १. ६१.

आचार्यप्रवृत्तिर्ज्ञापयतीयमिह परिभाषा भवति प्रत्ययग्रहण इतीयं न भवति कृद्ग्रहण इति यदयमनञिति प्रतिषेधं शास्ति । कथं कृत्वा ज्ञापकम् । अयं हि नञ् न गतिर्न च कारकं तत्र कः प्रसङ्गो यन्नञ्पूर्वस्य स्यात् । पश्यति त्वाचार्य इयमिह परिभाषा भवति प्रत्ययग्रहण इतीयं न भवति कृद्ग्रहण इति ततोऽनञिति प्रतिषेधं शास्ति ।

किं नञः प्रतिषेधेन न गतिर्न च कारकम् ।
यावता नञि पूर्वे तु ल्यब्भावो न भविष्यति ॥ १ ॥

---

प्र०—सिध्यति । ननु कृद्ग्रहणपरिभाषाश्रयण इति फलभेदः । कार्यकालं संज्ञापरिभाषमित्यत्र दर्शने समानदेशत्वात्परिभाषयोः परत्वेनापि व्यवस्था नास्ति । सांकूटिने त्वेवमव्यस्थाप्रसङ्गाद्यथोद्देशपक्ष आश्रयितव्यः । तत्र हि परत्वेन व्यवस्थासिद्धिः । प्रत्ययग्रहणपरिभाषाऽङ्गसंज्ञासूत्रे योगविभागेन व्यवस्थापिता । कृद्ग्रहणपरिभाषा तु गतिरनन्तर इत्यत्रानन्तरग्रहणेन ज्ञापनात्परा भवति । **यदयमिति** । कथं पुनरेतज्ज्ञापकं यावता सत्यामपि कृद्ग्रहणपरिभाषायामपिशब्दात्केवलस्यापि क्त्वान्तस्य ग्रहणादकृत्वेत्यादौ नञोऽगतित्वादकारकत्वाच्च क्त्वान्तेऽनन्तर्भावादसत्यनञ्ग्रहणे ल्यप्प्रसङ्गः । अप्रकृत्येत्यादौ च प्रतिषेधार्थमनञ्पूर्वग्रहणं स्यात् । उच्यते । अपिग्रहणेन प्रत्ययग्रहणपरिभाषा समुच्चीयते न त्वन्यपूर्वम् । तत्र समास इति वचनात्केवलस्य कृत्वादेर्ग्रहणाभावादपिशब्दसमुच्चेतव्यस्याभावाद्गतिकारकपूर्वस्यैव समासस्य

---

उ०—त्वात्सिध्यति तथाऽपि तदधिकग्रहणाभावाय तद्विषयसत्तामात्रेणावकाशोक्तिरिति बोध्यम् । पर्यायादिबीजं विप्रतिषेधसूत्र उक्तम् । व्यक्तिपक्षाभिप्रायेण पर्यायः । जातिपक्षे त्वप्रवृत्तिः । **कार्यकालमिति** । कार्यकालपक्षेऽपि शास्त्रपाठकृतपरत्वानपगमाच्चिन्त्यमिदम् । **सांकूटिने त्विति** । अभिविधौ भाव इनुणः स्त्रीप्रत्ययत्वाभावादणिनुण इत्यत्र प्रत्ययग्रहणपरिभाषोपस्थाने कूटिनित्यस्य वृद्धिस्वरौ स्यातामिति परत्वात्कृद्ग्रहणपरिभाषैवात्राऽऽश्रयणीयेति भावः । न च कृद्ग्रहणपरिभाषायामपिशब्देन केवलस्यापि ग्रहणेन केवलादपि कदाचिदण् स्यादिति वाच्यम् । गतिकारकसमभिव्याहारे तत्पूर्वस्य ग्रहणं तदसमभिव्याहारे तु प्रत्ययग्रहणपरिभाषासिद्धस्यापीत्येवापेरर्थात् । अत एव पुंयोगादिति सूत्रे सांकूटिनस्य गतिकारकोपपदानामिति कृद्ग्रहण इति परिभाषाभ्यां सिद्धिरुक्ता भाष्ये । प्रत्ययग्रहण इतीयमेव भवति परत्वान्न्याय्याऽपि कृद्ग्रहणपरिभाषा न भवतीति कुत इति । एवं चेष्टासिद्ध्यनिष्टापत्ती तदवस्थे इति भाष्यार्थः । **केवलस्यापीति** गत्याद्यसमवधान इति भावस्तदाह—**अकृत्वेत्यादाविति** । गत्यादिसमवधानेऽपि तत्फलमाह-**अप्रकृत्येत्यादाविति** । **केवलस्येति** । अपिशब्दसमुच्चेतव्यत्व तत्रैवेति भावः । अयं भावः । क्त्वान्तस्य समासस्य ल्यबित्यर्थोऽस्तु सूत्रस्य । तत्र पूर्वपदापेक्षायां कृद्ग्रहणपरिभाषया गतिकारकरूपमेव ग्रहीष्यत इति परमकृत्वेत्यत्र न । प्रकृत्येत्यत्राप्रकृत्येत्यत्र च सिद्धम् । अकृत्वेत्यादौ च न भविष्यतीत्यतोऽनञ्पूर्वग्रहणं व्यर्थमिति ।

प्रतिषेधात्तु जानीमस्तत्पूर्वं नेह गृह्यते ।
प्रत्ययग्रहणे यावत्तावद्भवितुमर्हति ॥ २ ॥

**सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः ॥ ७ । १ । ३९ ॥**

सुपां च सुपो भवन्तीति वक्तव्यम् । युक्ता माताऽऽसीद्धुरि दक्षिणायाः । दक्षिणायामिति प्राप्ते । तिङां च तिङो भवन्तीति वक्तव्यम् । चषालं ये अश्वयूपाय तक्षति । तक्षन्तीति प्राप्ते ।

लुकि किमुदाहरणम् । आर्द्रे चर्मन् । लोहिते चर्मन् । नैतदस्ति । पूर्वसव-

---

प्र०—ग्रहणं भविष्यतीति किमनञ्पूर्व इत्यनेन । तत्क्रियमाणं कृद्ग्रहणपरिभाषाया अनुपस्थानं ज्ञापयति तदुपस्थाने तु तूष्णींभूय नानाभूय द्विधाभूयेत्यादौ ल्यम्न स्यात् । तदेवं कृद्ग्रहणपरिभाषानुपस्थाने नञ्सदृशादव्ययात्पदात्प्रत्यासत्तिन्यायात्समासावयवात्परस्य धात्वादेः क्त्वान्तस्य समासे क्त्वो ल्याब्विधीयमानः स्नात्वाकालकः परमकृत्वेत्यादौ न भवति परमं कृत्वा परमकृत्वेति सन्महादिति समासः । परमत्वस्य क्रियाविशेषणत्वात्सामानाधिकरण्यात् । **तत्पूर्वमिति** । गतिकारकपूर्वमित्यर्थः । **प्रत्ययग्रहण इति** । प्रत्ययग्रहणपरिभाषया यावद्ग्राह्यं तावद्गृह्यते ।

**सुपां सुलुक्पूर्वसवर्ण०** । सुशब्द आदेश उच्यमानेऽन्ये सुपो न प्राप्नुवन्तीत्याह—**सुपां चेति** । एतच्च सर्वं व्यत्ययो बहुलमिति व्यत्ययेन सिध्यति । **पूर्वसवर्णेनापीति** । चर्मन् इ इति स्थित इकारस्य पूर्वसवर्णो नकारस्तस्मिन्पूर्वस्य नकारस्य स्वादिष्विति पदसंज्ञायां सत्यां लोपः । एवं च न ङिसंबुद्ध्योरित्यत्र ङिग्रहणमपि न कर्तव्यं भवति । प्रातिप-

---

उ०—**अनुपस्थानं ज्ञापयतीति** । तदनुपस्थितौ क्त्वान्तस्य समासस्येत्यर्थोऽशक्यः । प्रत्ययग्रहणपरिभाषया तस्य क्त्वान्तत्वाभावात् । तथा च समासे विद्यमानस्य क्त्वान्तस्येत्यर्थो वाच्यः । एवं चोक्तदोषवारणायानञ्पूर्व इत्यावश्यकमिति भावः । गतिकारकपूर्वक्त्वासमासस्येत्यर्थे लक्ष्यासिद्धिं दर्शयति—**तूष्णीमिति** । तूष्णीमि भुवः । नाधार्थप्रत्यये च्व्यर्थ इति क्त्वा । उपपदसमासः । एतानि च न गतिसंज्ञकानि नापि कारकाणीति । एतेनानञ्पूर्वग्रहणेन गत्यादिसमवधानेऽप्यपिना केवलं समुच्चीयत इत्यपास्तम् । अप्रकृत्येत्यत्राप्यनापत्तेश्च । गत्यादिपूर्वस्य क्तान्तस्य समासस्यानञ्पूर्वस्येत्यर्थापत्तेरिति सुधियो विभावयन्तु । सिद्धान्तार्थे परमकृत्वेत्यादावप्राप्त्युपायमाह—**नञ्सदृशादव्ययादिति** । स्नात्वाकालकादिव्यावृत्त्यर्थमिदम् । वस्तुतोऽव्ययादित्येव सिद्धे पदादित्युक्तिर्व्यर्थैव । सुन्दरः स्नात्वाकालक इत्यादिव्यावृत्तये समासावयवादिति । **गतिकारकपूर्वमिति** । तत्पूर्वमेवेत्यर्थः । **भाष्ये प्रत्ययग्रहणे यावदिति** । समासे विद्यमानस्य क्त्वान्तस्येत्यर्थादिति भावः ।

**सुपां सुलुक्०** । **सुशब्द इति** । लुक्साहचर्यादयं सुः सर्वादेशश्छान्दसत्वाद्वा शेशकारोच्चारणं तु ‘ शे ’ इत्यत्र विशेषणार्थम् । **पूर्वसवर्णो नकार इति** । घोषवत्त्वेन साम्यादि-

र्णेनाप्येतत्सिद्धम्+ । इदं तर्हि । यत्स्थवीयस आव सनुत सप्तऋषयः सप्त साकम् । ननु चैतदपि पूर्वसवर्णेनैव सिद्धम् । न सिध्यति । यद्यत्र पूर्वसवर्णः स्यात्त्यदाद्यत्वं प्रसज्येत*। इदं चाप्युदाहरणम् ।आर्द्रे चर्मन् । लोहिते चर्मन् । ननु चोक्तं पूर्वसवर्णेनाप्येतत्सिद्धमिति । न सिध्यति । यद्यत्र पूर्वसवर्णः स्यादान्तर्यतो दकारः प्रसज्येत । अस्तु । संयोगान्तलोपेन सिद्धम्× ।

इयाडियाजीकाराणामुपसंख्यानम् ॥ १ ॥

इयाडियाजीकाराणामुपसंख्यानं कर्तव्यम् । दार्विया परिज्मन् । इया । डियाच्* । सुक्षेत्रिया सुगातुया । डियाच् । ईकार । दृतिं न शुष्कं सरसी शयानम् ।

आङ्याजयारां चोपसंख्यानं कर्तव्यम् । आङ्÷ । प्र बाहवा । अयाच् ।

प्र०—दिकान्तत्वाभावाद्विभक्तिनकारस्य नलोपाप्रसङ्गात् । पूर्वस्य च नकारस्य लोपस्येष्टत्वात् । यदिति । यच्छब्दात्परस्य सुपो लुक् । प्रत्ययलक्षणनिषेधात्त्यदाद्यत्वाभावः। येष्विति प्राप्ते । त्यदाद्यत्वमिति । सुशब्दस्य पूर्वसवर्णो भवन्नलोऽन्त्यस्येत्युकारस्य दकारः प्राप्नोति ततस्त्यदाद्यत्वे बहुवचने झल्येदित्येत्वे स्कोः संयोगाद्योरिति सकारलोपे च येदिति स्यात् । अथाप्येकवचनस्य स्थाने पूर्वसवर्णो दकारः क्रियते तथाऽपि स्थानिवद्भावात्स्मिन्भावः प्राप्नोति । आन्तर्यत इति । निरनुनासिकस्येकारस्य सदृशो दकारः । संयोगान्तलोपेनेति । न ङिसंबुद्ध्योरिति नलोपप्रतिषेधात्संयोगान्तलोपः । अन्यथा नलोपे कर्तव्ये संयोगान्तलोपोऽसिद्धः स्यात् । एवं च नलोपप्रतिषेधे ङिग्रहणं कर्तव्यमेवेति प्रक्रियालाघवाय चर्मन्नित्यत्र लुगेव विधेय इत्याहुः । दार्वियेति । दारुशब्दादियादेशः । सुक्षेत्रियेति । सुक्षेत्रेणेति प्राप्ते । सरसी इति । सरःशब्दात्परस्य ङिशब्दस्येकारः । प्रबाहवेति । प्रबाहुशब्दात्परस्य टाप्रत्ययस्याऽऽङादेशः । घेर्ङितीति गुणः । ननु 'ङित्त्वे विद्याद्वर्णनिर्देशमात्रं वर्णे यत्स्यात्तच्च विद्यात्तदादौ' इत्युक्तम् । ततश्च गुणो न प्राप्नोति । ङित्करणसामर्थ्याद्भविष्यतीत्यदोषः । अथवा ङितीति बहुव्रीहिराश्रीयते । तत्र परिहारान्तरमाश्रयणीयम् । वर्णश्चायं तेन ङित्त्वे न दोषो निर्देशोऽयं पूर्वसूत्रेण वा स्यादिति ।

उ०—त्यर्थः । उकारस्य दकार इति । निरनुनासिकत्वादित्यर्थः । येदिति स्यादिति । सर्वस्य पूर्वसवर्णेऽपायमेवाऽऽपत्तिः । सदृशो दकार इति । घोषवत्त्वादल्पप्राणत्वाच्चेत्यर्थः । इत्याहुरिति । भाष्यकृता तु रूपसिद्धिमाश्रित्य निराकृतम् । वस्तुतस्तदप्युदाहरणमेवेति तद्भावः । ध्वनितं चेदं न ङीति सूत्रे भाष्ये । दारुशब्दादिति । ततः परस्य सुप इत्यर्थः । डियाचो डित्त्वं टिलोपाय । चित्त्वं स्वरार्थम् । सरःशब्दादिति । एवं निष्पन्नः सरसीशब्द आद्युदात्तः ।

+ १. ४. १७; ८. २. ७. * ७. २. १०२; ७. ३. १०३, ८. २. २९. × ८. २. २३.
* ६. ४ १४३, ÷ ७. ३. १११.

स्वप्नया सचसे जनम् । अयाच् । अयाट् ÷ । स नः सिन्धुमिव नावया ।

अमो मश् ॥ ७ । १ । ४० ॥

किमर्थः शकारः । शित्सर्वस्येति+ सर्वादेशो यथा स्यात् । अक्रियमाणे हि शकारेऽलोऽन्त्यस्य विधयो भवन्तीत्यन्त्यस्य प्रसज्येत* । अत उत्तरं पठति ।

अमो मश्च मकारस्य

मकारस्य मकारवचने प्रयोजनं नास्तीति कृत्वा तत्रान्तरेण शकारं सर्वादेशो भविष्यति ।

वचनादन्यबाधनम् ।

अस्त्यन्यन्मकारस्य मकारवचने प्रयोजनम् । येऽन्ये मकारादेशाः प्राप्नुवन्ति तद्बाधनार्थम् । तद्यथा । मो राजि समः क्वौ [ ८. ३. २५ ] इति मकारस्य मकारवचनसामर्थ्यादनुस्वारादयो बाध्यन्ते । एवं तर्हि द्विमकारको निर्देशः करिष्यते× ।

द्विमकार ईडपृक्ते

यदि द्विमकारकोऽपृक्ताश्रय ईण्न प्राप्नोति**। वधीं वृत्रं मरुत इन्द्रियेण। यकारादौ न दुष्यति ।

---

प्र०—**स्वप्नयेति** । अयाचोऽकारोच्चारणं सुपि चेति दीर्घनिवृत्त्यर्थम् । **नावयेति** । उपोत्तमं रितीति मध्योदात्तं पदं भवति ।

**अमो मश्** । **अमो मश् न मकारस्येति** । मकारस्य मकारः प्रयोजनाभावान्न भविष्यतीति शकारो न वक्तव्य इत्यर्थः। **वचनादिति**। वधीं वृत्रमित्यादौ मकारस्यानुस्वारनिवृत्त्यर्थो मकारः स्यादित्यर्थः । **द्विमकारक इति** । अमो म्मिति करिष्यते भिन्नजातीयवर्णद्वयोच्चारणे प्रयत्नस्य गौरवं भवति। समानजातीयवर्णद्वये तु लाघवं तत्रैकस्य मकारस्य संयोगान्तलोपः करिष्यते। **ईण्न प्राप्नोतीति**। ईटि कर्तव्ये संयोगान्तलोपस्यासिद्धत्वादपृक्तत्वाभावात् । **यकारादाविति** । अमो मिति सूत्रं कर्तव्यं तत्र यकारस्य लुप्तनिर्दिष्टत्वादनेका-

---

उ०—संप्रति वेदेऽन्तोदात्तं पठ्यते तत्तु सरसीशब्दान्ङेर्लुकि बोध्यम् । इदं चेदृतौ चेति सूत्रे भाष्ये स्पष्टम् । स्वरव्यत्ययो वा बोध्यः ।

**अमो मश्** । ननु मकारकरणेन शप्रत्याख्याने न फलमत आह—**भिन्नजातीयेति**। पृथक्स्थानकरणव्यापाराश्रयणादिति भावः । मकारोत्तराकारस्तूभयोच्चारणार्थ आवश्यकः । अनुनासिकत्वेनेत्संज्ञायां च तल्लोपः। **संयोगान्तलोप इति**। क्वचिदङ्लोऽपि लोपाङ्गीकारादिति भावः। वधीमित्यत्र हनो वध लुङि मिपोऽम् तस्य मश् । अकार उच्चारणार्थ इत्यस्तिसिच

---

+ ६. १. २१७. + १. १. ५५. * १. १. ५२. × ८. २. २३. ** ७. ३. ९६.

किं यकारो न श्रूयते । लुप्तनिर्दिष्टो यकारः ।

अमो मश्च मकारस्य वचनादन्यबाधनम् ।
द्विमकार ईडपृक्ते यकारादौ न दुष्यति ॥

**आज्जसेरसुक् ॥ ७ । १ । ५० ॥**

इह ये पूर्वासो य उपरासः आज्जसेरसुगित्यसुकि कृते जसो ग्रहणेन ग्रहणाच्छीभावः प्राप्नोति÷× । एवं तर्हि जसि पूर्वान्तः करिष्यते । यदि पूर्वान्तः क्रियते का रूपसिद्धिः ब्राह्मणासः पितरः सोम्यासः । सवर्णदीर्घत्वेन++ सिद्धम् । न सिध्यति । अतो गुणे [ ६. १. ९७ ] इति पररूपत्वं प्राप्नोति । अकारोच्चारणसामर्थ्यान्न भविष्यति । यदि तर्हि प्राप्नुवन्विधिरुच्चारणसामर्थ्याद्बाध्यते सवर्णदीर्घत्वमपि न प्राप्नोति । नैष दोषः । यं विधिं प्रत्युपदेशोऽनर्थकः स विधिर्बाध्यते यस्य तु विधेर्निमित्तं नासौ बाध्यते । पररूपं च प्रत्यकारोच्चारणमनर्थकं सवर्णदीर्घत्वस्य पुनर्निमित्तमेव । अथवाऽसुट् करिष्यते*। एवमपि ये पूर्वासो य उपरास इत्यसुटि कृते जसो ग्रहणेन ग्रहणाच्छीभावः प्राप्नोति । नैष दोषः । निर्दिश्यमानस्याऽऽदेशा भवन्तीत्येवमस्य न भविष्यति । यस्तर्हि निर्दिश्यते तस्य कस्मान्न भवति । असुटा व्यवहितत्वात् । सिध्यति । सूत्रं तर्हि भिद्यते । यथान्यासमेवास्तु । ननु चोक्तं ये पूर्वासो य उपरासः असुकि कृते जसो ग्रहणेन ग्रहणाच्छीभावः प्राप्नोतीति । नैष दोषः। इदमिह संप्रधार्यम् । शीभावः क्रियतामसुगिति किमत्र कर्तव्यम्। परत्वादसुक् ।

---

प्र०—ल्त्वात्सर्वादेशोऽयं मो भविष्यतीति प्रत्याख्यातं शित्त्वम् ।

आज्जसेरसुक् । **जसो ग्रहणेनेति** । तद्वक्तस्तद्ग्रहणेन गृह्यत इति सागमकस्य शीभावप्रसङ्गः । **पूर्वान्त इति** । अस्य जस्यसुगिति सूत्रन्यासेन पूर्वान्तेऽसुक्यकारान्तात्परो जस् न भवतीति शीभावाप्रसङ्गः । **अथवाऽसुडिति** । असुट्यकारोच्चारणं दध्यस्यतीत्याद्यर्थमिति पररूपं स्यादिति पक्षान्तरोपन्यासः । असुटि प्रथमयोः पूर्वसवर्ण इति दीर्घः सिध्यति । **परत्वादिति** । असुकोऽवकाशः ब्राह्मणास इति । शीभावस्य भाषाविषयोऽवकाशः ।

---

उ०—इतीट् । सिच इट् । इट ईटीति सिचो लोपः । सवर्णदीर्घः । **लुप्तनिर्दिष्टेति** । लोपो व्योरिति लोपः । तस्य च नासिद्धत्वमित्यपृक्तत्वमस्त्येवेत्याहुः* ।

**आज्जसेरसुक्** । **सागमकस्येति** । ग्रहणादिति शेषः । शीभावस्तु निर्दिश्यमानपरिभाषया प्रत्ययांश एवेति बोध्यम् । नन्वत्र न्यासे कथं पूर्वान्तः स्यादत आह—**अस्य जसीति** । नन्वसुटि पररूपं स्यादत आह—**असुटीति** ।

---

÷× ७. १. १७. ++ ६. १. १०१. * ६. १. १२.

---

* आहुरित्यस्याग्रे ' इदं प्रत्याख्यानमेकदेशिन इति केचित् ' इत्यधिकं ख. पुस्तके ।

अथेदानीमसकि कृते पुनःप्रसङ्गविज्ञानाच्छीभावः कस्मान्न भवति । सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेवेति ।

**अश्वक्षीरवृषलवणानामात्मप्रीतौ क्यचि ॥ ७ । १ । ५१ ॥**

**अश्ववृषयोर्मैथुनेच्छायाम् ॥ १ ॥**

अश्ववृषयोर्मैथुनेच्छायामिति वक्तव्यम् । अश्वस्यति वडवा । वृषस्यति गौः । मैथुनेच्छायामिति किमर्थम् । अश्वीयति वृषीयति ।

**क्षीरलवणयोर्लालसायाम् ॥ २ ॥**

क्षीरलवणयोर्लालसायामिति वक्तव्यम् । क्षीरस्यति माणवकः । लवणस्यत्युष्ट्र इति ।

अपर आह । सर्वप्रातिपदिकेभ्यो लालसायामिति वक्तव्यं दध्यस्यति मध्वस्यतीत्येवमर्थम् ।

अपर आह । सुक्वक्तव्यो दधिस्यति मधुस्यतीत्येवमर्थम् ।

**आमि सर्वनाम्नः सुट् ॥ ७ । १ । ५२ ॥**

**त्रेस्त्रयः ॥ ७ । १ । ५३ ॥**

**ह्रस्वनद्यापो नुट् ॥ ७ । १ । ५४ ॥**

इमे बहव आम्शब्दाः । कास्प्रत्ययादाममन्त्रे लिटि [ ३. १. ३५ ] । ङसोसाम्× । किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे [ ५. ४. ११. ] । ङेराम्नद्याम्नीभ्यः [ ७. ३. ११६ ] इति । कस्येदं ग्रहणम् । षष्ठीबहुवचनस्य ग्रहणम् ।

---

प्र०- अश्वक्षीर० । अश्वस्यतीति । मैथुनेच्छाप्रतिपादनपरत्वाद्योगस्याश्ववृषोपादानमतन्त्रमिति मनुष्यादावपि कवयः प्रयुञ्जते । लालसाऽतिशयेनाभ्यवजिहीर्षा । यस्तु लवणमैश्वर्यार्थमिच्छति तत्र लवणीयतीत्येव भवति ।

**आमि सर्वनाम्नः । कस्येदमिति ।** किमिदं सर्वेषामामां ग्रहणमथ कस्यचिदेवेति प्रश्नः । ननु च सर्वनाम्न इत्युपादानाद्घादामो लिट्यामश्च ग्रहणशङ्कैव न युक्ता ।

---

उ०- अश्वक्षीर० । **कवय इति** । इति रामो वृषस्यन्तीमित्यादौ । भाष्यस्वरसस्त्वेषामसाधुत्वे । अत एव वडवेति गौरिति च कर्तृपदमुपात्तम् । वार्तिके पञ्चमी षष्ठ्यर्थे । दध्यस्यति मध्वस्यतीत्येवमर्थमिति भाष्यस्वरसाद् द्वावेवाऽऽगमिनौ । यदि वार्तिकस्थसर्वशब्दस्वारस्यादन्यत्रापीष्यते तदैवमर्थ इत्येवंशब्दः स्वार्थं न परिपुष्येदिति सुबूधातुवृत्तौ माधवः । एवंशब्दः प्रकार इत्यन्ये ।

**आमि सर्व०** । ननु यदर्थस्येह ग्रहणं संभवति तदर्थस्योत्तरत्रानुवृत्तिः स्यादत आह-

---

× ४, १, २,

अथास्य कस्मान्न भवति कास्प्रत्ययादाममन्त्रे लिटीति । अननुबन्धकग्रहणे हि न सानुबन्धकस्येति । स तर्ह्यस्यैवमर्थोऽनुबन्धः कर्तव्य इहास्य ग्रहणं मा भूदिति । ननु चावश्यं मकारस्येत्संज्ञापरित्राणार्थोऽनुबन्धः कर्तव्यः । नार्थ इत्संज्ञापरित्राणार्थेन । इत्कार्याभावादत्रेत्संज्ञा न भविष्यति । इदमस्तीत्कार्यं मिदचोऽन्त्यात्परः [ १. १. ४७ ] इत्यचामन्त्यात्परो यथा स्यात् । प्रत्ययान्तादयं विधीयते तत्र नास्ति विशेषो मिदचोऽन्त्यात्पर इति वा परत्वे प्रत्ययः पर इति÷ वा । यस्तर्हि न प्रत्ययान्तादिजादेश्च गुरुमतोऽनृच्छः [ ३. १. ३६ ] इति। अत्राप्यास्कासोराम्वचनं× ज्ञापकं नायमचामन्त्यात्परो भवतीति । कथं कृत्वा ज्ञापकम् । न ह्यस्ति विशेष आम्यचामन्त्यात्परे सत्यसति वा । अयमस्ति विशेषः । असत्यामि द्विर्वचनेन भवितव्यं सति न भवितव्यम् । सत्यपि भवितव्यम् । कथम् । आमस्तन्मध्यपतितत्वाद्धातुग्रहणेन ग्रहणात् ।

---

प्र०—उच्यते । इह तयोरसंभवेऽपि ह्रस्वनद्यापो नुडित्यत्र ह्रस्वात्तयोः संभवाद्विचारः क्रियते । तत्रेह सामान्यग्रहणे सति यथासंभवं प्रकरणे कार्यप्रतिपत्तिः । अथवा पूर्वोपात्तसदृशशब्दान्तरानुमानपक्ष उत्तरसूत्रे तयोः संभवादिह विचारः । ननूत्तरसूत्रेऽपि यस्यैवाऽऽम्नदीभ्यां परस्य संभवः स एव ह्रस्वादपि परस्तत्साहचर्याद्ग्रहीष्यते । नैतदस्ति । व्याप्तिन्यायाश्रयेण सर्वस्य ग्रहणप्रसङ्गात् । **प्रत्ययान्तादिति** । ते चाजन्ताः । ननु हलन्तेभ्य आचारक्विबन्तेभ्य आमस्त्येव । नैतदस्ति । एकीयमतमेतत् । तत्रापि हलन्तेभ्योऽनभिधानादाचारक्विबभावः । **यस्तर्हीति** । ईहेरूहेश्च मध्य आमि कृते यणादेशप्रसङ्गः । **आस्कासोरिति** । अन्त्यादचः पर आमि सवर्णदीर्घत्वे सति विशेषाभावः । **सति न भवितव्यमिति** । रूपान्तराद्धातुत्वाभावात् । **आम इति** । अकृत एकादेश

---

उ०—**तत्रेहेति**। **उत्तरसूत्र इति** ।अत एव भाष्ये सूत्रत्रयग्रहणम्। **यस्यैवेति**। ङेरामः षष्ठीबहुवचनस्य चेत्यर्थः । एवं चेतरद्वयोपादानं व्यर्थमिति भावः। त्रेरिति सूत्रे तु षष्ठीबहुवचनातिरिक्तस्यासंभव एवेति तात्पर्यम् । भाष्ये—**अनुबन्ध इति** । अनुनासिकत्वेनेत्संज्ञक इत्यर्थः । उच्चारणार्थानामप्यपगमायेत्त्वस्याऽऽवश्यकत्वादिति भावः । **ते चाजन्ता इति** । न च जागर्तेरामि तस्य मित्त्वादन्त्यादचः परत्वे स्वावयवेन पौर्वापर्याभावाद्गुणो न स्यादिति वाच्यम् । अङ्गाधिकारे ‘ अयामन्त० ’ इति ण्यन्तस्याऽऽम्यय्विधानेन तस्यान्तावयव इत्यस्यासंबन्ध इत्याशयात् । **एकीयमतमेतदिति** । सर्वप्रातिपदिकेभ्यः क्विबित्येतत् । **तत्रापीति** । एकीयमताश्रयणेऽपीत्यर्थः । **क्विबभाव इति** । अत्र चेदमेव भाष्यं मानम् । न चावगल्भादिभ्यो हलन्तेभ्यः क्विबस्त्येव । तत्रत्याकारस्यानुनासिकत्वेनेत्संज्ञकतया लोपादिति वाच्यम् । अकारान्तरप्रश्लेषेण तस्यैवानुबन्धत्वस्वीकारेणादोषादिति भावः । नन्वासादौ सवर्णदीर्घे रूपान्तराभावाद्द्वित्वसिद्धेः किं तन्मध्यपतितन्यायाश्रयेणेत्यत आह—**अकृत इति** ।

---

÷ ३. १. २. × ३. १. ३७; ३५.

तदेतत्कासाञ्चक्रेराम्वचनं ज्ञापकमेव नायमचामन्त्यात्परो भवतीति। अथापि कथंचिदित्कार्यं स्यादेवमपि न दोषः। क्रियते न्यास एव। आम अमन्त्र इति यद्येवमामामन्त्र इति प्राप्नोति। शकन्ध्वादिन्यायेन+ निर्देशः। अथवाऽस्त्वस्य ग्रहणं को दोषः। इह कारयांचकार हारयांचकार चिकीर्षांचकार जिहीर्षांचकार ह्रस्वनद्यापो नुडिति नुट्प्रसज्येत। लोपायादेशयोः* कृतयोर्न भविष्यति। इदमिह संप्रधार्यम्। लोपायादेशौ क्रियेतां नुडिति किमत्र कर्तव्यम्। परत्वान्नुट्। नित्यौ लोपायादेशौ। कृतेऽपि नुटि प्राप्नुतोऽकृतेऽपि। तत्र नित्यत्वाल्लोपायादेशयोः कृतयोर्विहतनिमित्तत्वान्नुण्न भविष्यति।

अथास्य कस्मान्न भवति किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्ष इति। अननुबन्धकग्रहणे हि न सानुबन्धकस्येति। स तर्ह्येवमर्थोऽनुबन्धः कर्तव्यः। ननु चावश्यमुगित्कार्यार्थोऽनुबन्धः कर्तव्यः। नार्थ उगित्कार्यार्थेनानुबन्धेन। लिङ्गविभक्तिप्रकरणे सर्वमुगित्कार्यं न चाऽऽमो लिङ्गविभक्ती स्तः। अव्ययमेषः।

प्र०—इदमुच्यते कृते त्वेकादेशे रूपान्तराभावः। अथापीति। प्रतिधातुभेदादामो यत्र त्कार्यं न संभवति तत्र मा भूदित्संज्ञा। आसिकासिचकासिषु प्रत्ययान्तेषु च धातुषु। ईक्षादौ कित्कार्यसंभवात्स्यादेवेत्संज्ञा। अथवाऽऽसादिषु विधानसामर्थ्यात्सवर्णदीर्घत्वं न स्यादित्संज्ञा तु स्यादेव। व्यञ्जनान्तेषु चाऽऽचारक्विबन्तेष्वित्कार्यसंभवादित्संज्ञा प्राप्नोति। नहि व्यञ्जनान्तेभ्य आचारे क्विब्भवतीत्यत्र किंचित्प्रमाणमस्ति। कारयांचकारेति। नुटि कृतेऽयादेशप्रसङ्गः। अव्ययमेष इति। अव्ययत्वात्स्त्रीत्वेन योगाभावादुगितश्चेति ङीम्नास्ति। तदभावादुगितश्चेति घादिषु ह्रस्वविकल्पो

उ०—वार्णादाङ्गमिति न्यायेन पूर्वं द्वित्वम्। द्वित्वं हि प्रत्ययनिमित्तत्वादाङ्गमिति भावः। भाष्ये—नायमचामन्त्यात्परो भवतीति। एवं च फलाभावान्मस्येत्संज्ञाप्रवृत्त्या तत्परित्राणार्थानुबन्धस्यानावश्यकत्वेनास्याऽऽमोऽत्र ग्रहणं स्यादेवेति पूर्वपक्षिण इदं वाक्यम्। स एवाऽऽह—अथापि कथंचिदित्का[र्यं] स्यादिति। अस्त्वेवमपि सूत्रभेद इति शेषः। सिद्धान्त्याह—एवमपि न दोषः। क्रियते न्यास एवेति। किमेत्तिङुपक्रमेण प्रवृत्ते—अथापि कथंचिदित्कार्यं स्यादिति भाष्ये—एवमपि गौरवमिति शेषः। अपूर्वकरणे हि स दोष इत्युक्तेराशयः। प्रत्ययान्तेषु च धातुष्वित्यन्तं पूर्वान्वयि। अथवेति। उपसंजातविरोधन्यायादिति भावः। विधिबाधापेक्षया परार्थेत्संज्ञाबाध एवोचित इत्याशयेन कथंचिदिति भाष्य उक्तम्। नहि व्यञ्जनान्तेभ्य इति। प्रत्ययान्तादयं विधीयते तत्र नास्ति विशेष इति भाष्यस्यात्रत्यापिशब्दस्य कथंचिदित्यस्य च प्रमाणस्य सत्त्वाच्चिन्त्यमिदम्। अयादेशप्रस[ङ्ग] इति। अयामन्तेत्यनेन। इदमेवाभिप्रेत्यायादेशो नित्य इति भाष्य उक्तम्। न च मालाशब्द[illegible]

+ ६, १, ९४. * ६. ४, ४८; ५५,

मकारस्य तर्हीत्संज्ञापरित्राणार्थोऽनुबन्धः कर्तव्यः । इत्कार्याभावादत्रेत्संज्ञा न भविष्यति । इदमस्तीत्कार्यं मिदचोऽन्त्यात्पर इत्यचामन्त्यात्परो यथा स्यात् । नैतदस्ति । यान्तादयं विधीयते तत्र नास्ति विशेषो मिदचोऽन्त्यात्पर इति वा परत्वे प्रत्ययः पर इति वा परत्वे । अथापि कथंचिदित्कार्यं स्यादेवमपि न दोषः । क्रियते न्यास एव । अथवाऽस्त्वस्य ग्रहणं को दोषः । इह पचतितराम् जल्पतितराम् ह्रस्वनद्यापो नुडिति नुट् प्रसज्येत । लोपे* कृते न भविष्यति । इदमिह संप्रधार्यम् । लोपः क्रियतां नुडिति किमत्र कर्तव्यम् । परत्वान्नुट् । एवं तर्हि ह्रस्वनद्यापो नुडित्यत्र यस्येति लोपोऽनुवर्तिष्यते ।

अथास्य कस्मान्न भवति ङेराम्नद्याम्नीभ्य इति । किंच स्यात् । कुमार्याम् किशोर्याम् खट्वायाम् मालायाम् तस्याम् यस्यामिति ह्रस्वनद्यापो नुडिति नुट् प्रसज्येत । आड्याट्स्याटोऽत्र बाधका भविष्यन्ति× । इदमिह संप्रधार्यम् । आड्याट्स्याटः क्रियन्तां नुडिति किमत्र कर्तव्यम् । परत्वादाड्याट्स्याटः । अथेदानीमाड्याट्स्याट्सु कृतेषु पुनःप्रसङ्गान्नुट् कस्मान्न भवति । सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेवेति ।

प्र०—नास्ति । विभक्तेर्लुकि प्रत्ययलक्षणप्रतिषेधान्नुमागम उगित्कार्यं नास्ति । **इत्संज्ञापरित्राणार्थ इति** । इत्संज्ञायाः परित्राणमिति साधनं कृतेति पञ्चमीसमासः । समुदायविशेषणं च मकार इति सापेक्षत्वात्समासाभावो न चोदनीयः । परित्राणं वा प्रधानं मकारमपेक्षते । भवति च प्रधानस्य सापेक्षस्यापि समासः । **अथापीति** । मित्त्वमेव ज्ञापकं स्यात् । अन्यतोऽप्ययं भवतीति । ततश्च स्यादेवेत्संज्ञा । **एवं तर्हीति** । उभयोरनित्ययोः परत्वान्नुटि प्राप्ते ह्रस्वनद्यापो नुडित्यत्र यस्य लोपस्तद्धित इति चानुवर्तते । तेन तद्धित आमि ह्रस्वस्य लोपो भवति । **पचतितरामिति** । अन्यस्य त्वामो नुड् भवति वृक्षाणामिति ।

उ०—लोपाभावेन तत्राऽऽबन्तत्वान्नुट्प्राप्तिर्दुर्वारा । भाष्यप्रामाण्येनाऽऽबन्तेभ्य आचारक्विपोऽनभिधानात् । **विभक्तेर्लुकीति** । अव्ययादाप्सुप इत्यनेन । नन्वित्संज्ञाशब्दस्य मकारसापेक्षत्वात्कथं समासोऽत आह—**समुदायेति** । ततोऽर्थशब्देन चतुर्थीसमासः । न चार्थशब्दतादर्थ्यं प्रति परित्राणस्यापि विशेषणतेति वाच्यम् । तस्य विभक्त्यर्थसमानार्थत्वेनादोषात् । लुप्तविभक्तेरेव सोऽर्थः । अर्थशब्दप्रयोगस्तु साधुत्वायेत्याशयात् । **उभयोरिति** । लोपे ह्रस्वाभावान्नुडप्राप्तिः । नुटि भत्वाभावाल्लोपाप्राप्तिरिति भावः । ननु नुड्विधौ यस्येति चेत्यनुवृत्तौ वृक्षाणामित्यत्रापि लोपः स्यादत आह—**तद्धित इति चेति** । वस्तुतो नद्याप्साहचर्याद्ध्रस्वादपि परस्य सुबाम एव ग्रहणमित्यत्र तत्त्वम् । भाष्यं तु न्यायव्युत्पादनपरम् ।

* ६. ४. १४८. × ७. ३. ११२; ११४.

श्रीग्रामण्योश्छन्दसि ॥ ७ । १ । ५६ ॥

अयं योगः शक्योऽवक्तुम् । कथं श्रीणामुदारो धरुणो रयीणाम् अपि तत्र सूतग्रामणीनाम् । इह तावच्छ्रीणामुदारो धरुणो रयीणाम् विभाषाऽऽमि नदीसंज्ञा* सा छन्दसि व्यवस्थितविभाषा भविष्यति । अपि तत्र सूतग्रामणीनामिति सूताश्च ग्रामण्यश्च सूतग्रामणि तत्र ह्रस्वनद्यापो नुडित्येव सिद्धम् ।

इति श्रीभगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये सप्तमस्याध्यायस्य प्रथमे पादे प्रथममाह्निकम् ।

---

इदितो नुम्धातोः ॥ ७ । १ । ५८ ॥

अथ धातोरिति किमर्थम् । अभैत्सीत् अच्छैत्सीत्+ ।

नुम्विधावुपदेशिवद्वचनं प्रत्ययविध्यर्थम् ॥ १ ॥

नुम्विधावुपदेशिवद्भावो वक्तव्यः । उपदेशावस्थायां नुम्भवतीति वक्तव्यम् ।

---

प्र०– श्रीग्राम० । विभाषेति । वाऽऽमीत्यनेन । तत्र दृष्टानुविधिश्छन्दसीति श्रीणामित्येवं छन्दसि भविष्यति नतु श्रियामिति । सूताश्च ग्रामण्यश्च सूतग्रामणीति समाहारद्वंद्वं कृत्वैकशेषः क्रियत इति बोद्धव्यं न त्वेकशेषे कृते समाहारद्वंद्वः क्रियते । एवं हि बहुवचनं न स्यात् । भाष्ये त्वत्रोभयं कार्यमित्येतावत्प्रदर्शितम् । क्रमस्तु स्वयमभ्यूह्य इष्टस्यार्थस्य सिद्धये ।

इत्युपाध्यायजैयटपुत्रकैयटकृते भाष्यप्रदीपे सप्तमाध्यायस्य प्रथमे पादे प्रथममाह्निकम् ॥

---

इदितो नुम्धातोः । धातोरिति किमर्थमिति । किमधातुनिवृत्त्यर्थं धातुग्रहणमथ धातुसंज्ञाप्रवृत्त्यवस्थायामेव प्राक्प्रत्ययोत्पत्तेर्नुम्विधानार्थमिति प्रश्नः । आचार्यदेशीयस्त्वधातुनिवृत्त्यर्थं धातुग्रहणं मत्वाऽऽह—अभैत्सीदिति । सिच इदितो नुम्न भवति । उपदेशिवद्भाव इति । यथोन्दीत्यादीनामुपदेशावस्थायां नकारः प्रत्यय-

---

उ०– श्रीग्राम० । भाष्योक्तप्रयोगातिरिक्तप्रयोगस्तु वेदे नास्त्येवेति बोध्यम् ।

इति श्रीशिवभट्टसुतसतीगर्भजनागोजीभट्टकृते भाष्यप्रदीपोद्द्योते सप्तमस्याध्यायस्य प्रथमे पादे प्रथममाह्निकम् ।

---

इदितो नुम् धातोः । इति प्रश्न इति । प्रयोजनद्वयसंभवेन संदेहात्प्रश्न इत्यर्थः । अस्य प्रयोजनस्याग्रे दूषयिष्यमाणत्वादाह—आचार्यदेशीय इति । उपदेशो यस्य नकारस्य स उपदेशी तद्वन्नुमिति वार्तिकार्थ इत्याह—यथेति । यत्किंचित्प्रत्ययस्य सवर्था

---

* १. ४, ५. + ३, १. ४४,

किं प्रयोजनम् । प्रत्ययाविध्यर्थम् । उपदेशावस्थायां नुमि कृत इष्टः प्रत्ययाविधिर्यथा स्यात् । कुण्डा हुण्डेति× ।

**इतरथा ह्यनकारे प्रत्ययः ॥ २ ॥**

अक्रियमाणे ह्युपदेशिवद्भावेऽनकारे यः प्रत्ययः प्राप्नोति स+तावत्स्यात्तस्मिन्नवस्थिते नुम् । तत्र को दोषः ।

**तत्रायथेष्टप्रसङ्गः ॥ ३ ॥**

तत्रायथेष्टं प्रसज्येत । अनिष्टे प्रत्ययेऽवस्थिते नुम् । अनिष्टस्य प्रत्ययस्य श्रवणं प्रसज्येत ।

**धातुग्रहणसामर्थ्याद्वा तदुपदेशे नुम्विधानम् ॥ ४ ॥**

धातुग्रहणसामर्थ्याद्वा तदुपदेशे धातूपदेशे नुम्भविष्यति । ननु चान्यद्धातुग्रहणस्य प्रयोजनमुक्तम् । किम् । अभैत्सीत् अच्छैत्सीदिति । नैतदस्ति प्रयोजनम् । प्रयोजनं नाम तद्वक्तव्यं यन्नियोगतः स्यात् । यच्चात्रेकारेण क्रियतेऽकारेणापि तच्छक्यं कर्तुम् ।

---

प्र०—विधिकाले संनिहितस्तथा नुमपीत्यर्थः । **किं प्रयोजनमिति** । नन्दिता नन्दक इत्यादि प्रत्यये परतो नुमि क्रियमाणेऽपि सिध्यतीति मत्वा प्रश्नः । **प्रत्ययविध्यर्थमिति** । इष्टप्रत्ययविध्यर्थमित्यर्थः । **अनकार इति** । असति नकारे यः प्रत्ययः प्राप्नोति स स्यादित्यर्थः । सांप्रतिकेषु शिक्षादिषु गुरुमत्सु संभवत्सु भाविगुरुमत्त्वाश्रयेण प्रत्ययविधानस्यायुक्तत्वात् । **तत्र को दोष इति** । नुमि कृतेऽपवादः प्रवर्तमान उत्सर्गं निवर्तयिष्यतीति भावः । **तत्रायथेष्टप्रसङ्ग इति** । उत्पन्न उत्सर्गे नुमि कृते सत्यामपि गुरुसंज्ञायामुत्सर्गेणैव प्रत्ययार्थस्य प्रत्ययोत्पत्तिनिमित्तस्याभिधानान्निमित्तवैकल्यादपवादाप्रवृत्तावुत्सर्गस्यैव श्रवणप्रसङ्गः । **धातुग्रहणेति** । अधातोरिदितोऽसंभवाद्धातुनिवृत्त्यर्थं धातुग्रहणं न भवतीति धातुसंज्ञाप्रवृत्त्यवस्थोपलक्षणार्थं विज्ञायते । **तेन** सत्यप्यङ्गाधिकारे भाव्यङ्गत्वाश्रयः पूर्वमेव नुम्भवति ततः प्रत्यय इत्यर्थः संपद्यते । **प्रयोजनं नामेति** । नियमेनावश्यंभावेन यदन्यथा साधयितुमशक्यं तत्प्रयोजनम् । सिचश्च नुमागमो धातुग्रहणमन्तरेणापि शक्यते निराकर्तुमित्यर्थः । **यच्चात्रेति** ।

---

उ०—प्राप्तेराह—**इष्टेति । स स्यादिति** । किन्नु स्यादित्यर्थः । ननु भाविगुरुमत्तामाश्रित्य कुण्डेत्यादौ गुरोश्च हल इत्यप्रत्ययः सेत्स्यतीत्यत आह—**सांप्रतिकेष्विति । निवर्तयिष्यतीति ।** लोपवज्जातनिवृत्तिः स्यादिति भावः । **उत्पन्न इति** । उत्सर्गापवादविषये जातनिवृत्तेरदर्शनेन प्रवृत्तस्य वचनशतेनापि बाधस्याशक्यत्वात्परदेशस्यावरुद्धत्वाच्चापवादाप्राप्तिरित्यपि बोध्यम् । नन्वेवमङ्गाधिकारो विरुध्येतेत्यत आह—**तेन सत्यपीति** । नियोगशब्दार्थमाह—**निय-**

---

× ३. ३. १०३ + ३. ३. ९४.

## शे मुचादीनाम् ॥ ७ । १ । ५९ ॥

### शे तृम्पादीनाम् ॥ १ ॥

शे तृम्पादीनामुपसंख्यानं कर्तव्यम् । तृम्पति तृम्फति । किमर्थमिदम् । न नुमनुषक्ता एवैते पठ्यन्ते ।

---

प्र०–सकारस्योच्चारणार्थ इकारः क्रियत इत्यकारेणापि सजित्येवं सकारः शक्य उच्चारयितुम् । तदेतदुक्तं भवति निरनुनासिक उच्चारणार्थः सिच इकार इतीदित्त्वाभावान्नुमभावः । अमंस्तेत्यादौ हनः सिजिति नलोपार्थात्किंत्त्वविधानाज्ज्ञापकादसत्यपीदित्त्वे नलोपाप्रसङ्गः । नन्वन्यत्किंत्त्वविधानस्य प्रयोजनमस्ति सिजाश्रयो नलोपो यथा स्यात्सार्वधातुकाश्रयो मा भूत्सिजाश्रयो हि नलोपोऽतोलोपेऽसिद्धः, न सार्वधातुकाश्रयः । समानाश्रयं ह्यसिद्धं न तु व्याश्रयम् । नैतदस्ति । असिद्धं बहिरङ्गमन्तरङ्ग इति सार्वधातुकाश्रयस्य नलोपस्य बहिरङ्गस्यान्तरङ्गेऽतोलोपे कर्तव्येऽसिद्धत्वादतोलोपाप्रसङ्गादुपदेशग्रहणानुवृत्त्याऽऽर्धधातुकोपदेशे यदकारान्तं तस्य लोपविधानाद्वा । तासेरपीकार उच्चारणार्थ इति नुमोऽप्रसङ्गः । मन्ताऽऽहन्तेत्यादावसिद्धवदत्राभादिति टिलोपस्यासिद्धत्वादनिदित्त्वेऽपि नलोपाप्रसङ्गः ।

शे मुचादीनाम् । शे तृम्पादीनामिति । आदिशब्दः प्रकारे । तेन नोपधा गृह्यन्ते । तेषां नलोपे कृते नुमागमस्तस्य विधानसामर्थ्यादसिद्धवदत्राऽऽभादिति वा नलोपस्यासिद्धत्वादुपधात्वाभावाल्लोपाभावः । किमर्थमिति । य एवोपदेशे नकारः

---

उ०–अनेनेति । तस्यापि व्याख्यानं यदन्यथेति । अकारेणापीति । प्रथमातिक्रमे कारणाभावादित्यर्थः । निरनुनासिक इत्यादि । इदं चिन्त्यम् । विधेयविषय उच्चारणार्थानामपीत्संज्ञाप्रवृत्तेः । तस्माद्भाष्योक्तमेव सम्यक् । नन्वमंस्तेत्यादावनिदितामिति नलोपव्यावृत्तय इदित्त्वं सार्थकमत आह–अमंस्तेति । सिजाश्रय इति । अहसातामित्यादावनुदात्तोपदेशेति विहितः । ननु सार्वधातुकाश्रय उपधालोपोऽप्याभीयत्वादसिद्धः स्यादेवेत्यत आह–समानाश्रयं हीति । बहिरङ्गस्येति । बहिर्भूततङपेक्षत्वात् । ननु तासेरिदित्त्वाभावे मन्तेत्यादौ टिलोपे तशब्दस्थानिकत्वेन ङितमाकारमाश्रित्य उपधानलोपः स्यादत आह–मन्तेत्यादाविति । लुटः प्रथमस्य डादेशः । वस्तुत उक्तरीत्या तासिरिदिदेव । सिचीव भाष्योक्तरीत्याऽत्र नुमभावः साध्यः । तदेवं धातुग्रहणं धातूपदेशावस्थायां नुमर्थमिति स्थितम् ।

शे मुचादीनाम् । ननु तृम्पादयस्तुदादौ पठ्यन्ते तत्र व्यवस्थावाच्यादिशब्दाश्रयणे निरनुषङ्गानामपि नुम्स्यादत आह—प्रकारेति । प्रकारः सादृश्यम् । ननु तेषां नुमि परस्य नस्यानुस्वारपरसवर्णयोः पूर्वनस्य श्रवणप्रसङ्गोऽत आह—तेषां नलोप इति । अनिदितामित्यनेन । अस्य नुमोऽपि लोपः कुतो नेत्यत आह—तस्येति । विधानेति । अत एव मुचादिष्वपि लोपाभावः । असिद्धत्वादिति । चिणो लुङ्न्यायेन । भाष्ये तृपित इति ।

**लुप्तनकारत्वात् ॥ २ ॥**

लुप्यतेऽत्र नकारोऽनिदितां हल उपधायाः क्ङिति [६. ४. २४] इति÷। यदि पुनरिम इदितः पठ्येरन् । नैवं शक्यम् । इह हि लोपो न स्यात् । तृपितः दृपित इति । यदि पुनरिमे मुचादिषु पठ्येरन् । न दोषः स्यात् । अथवा नैवं विज्ञायत इदितो नुम्धातोरिति । कथं तर्हि । इदितो नुम् । ततो धातोरिति ।

**नेट्यलिटि रधेः ॥ ७ । १ । ६२ ॥**

इमौ द्वौ प्रतिषेधावुच्येते । उभौ शक्यावक्तुम् । कथम् । एवं वक्ष्यामि ।

---

प्र०—पठ्यते तस्यैव श्रवणं भविष्यतीति प्रश्नः । **नुमनुषक्ता इति** । नुम्ग्रहणं नकारोपलक्षणार्थम् । **यदीति** । इदित्त्वे तु नुमः सिद्धिर्नच लोपः प्रसज्यते । **यदि पुनरिति** । नोपधानां मुचादिषु पाठे नुमः सिद्धिरित्यर्थः । **अथवेति** । मुचादिषु तावन्न पठिताः, गौरवप्रसङ्गश्च । नोपधानां मुचादिषु पाठेऽर्थनिर्देशः कर्तव्यः । अनोपधानामन्यत्र पाठेऽर्थो निर्देष्टव्य इति मत्वा परिहारान्तरोपन्यासः । **इदितो नुमिति** । नन्वेवं धातूपदेशावस्थायां नन्न लभ्यते । नैष दोषः । धिन्विकृण्व्योर चेति ज्ञापकाद्धातूपदेशावस्थायां नुम्न भविष्यति । अत्र ध्यागन्तुरिकार उच्चारणार्थ इत्यङ्गत्वाभावेऽपि नुमनुषक्तपाठस्येदमेव प्रयोजनम् । धातूपदेशावस्थायामेव नुम्यर्थो स्यादिति । यदि धातोरिति योगविभागः क्रियते तदा सर्वस्य सर्वत्र नुम्प्रसङ्गः । **नैष दोषः** । शे मुचादीनामिति शग्रहणस्य धातोरित्यत्र सिंहावलोकितन्यायेनापेक्षणाद्योगविभागस्येष्टसिद्ध्यर्थत्वाद्वा । अन्ये तु भाष्ये योगविभागादिवप्रदर्शितेत्याहुः । तेन शे मुचादीनामित्यत्र श इति योगविभागः क्रियते । तत्र च धातोरिति वर्तते । ततो मुचादीनामिति पूर्वयोगस्यासर्वविषयत्वज्ञापनार्थं तेनेष्टविषये नुमः सिद्धिः ।

**नेट्यलिटि रधेः** । **लिट्येवेति** । इट्येव लिटीत्येवं तु नियमो न भवति । शास्त्र-

---

उ०—अनिट्कारिकासु इयना निर्देशात्तौदादिकयोः सेट्त्वादिट् । इदित्पाठे हि सर्वत्र नुम्स्याल्लोपश्च न स्यादिति भावः । **न पठिता इति** । अनेन न्यासभेददोष उक्तः । दोषान्तरमाह—**गौरवेति** । द्विरर्थनिर्देशादिति भावः । **अर्थो निर्देष्टव्य इति** । अधुना तु तृप तृम्प तृफादित्यादिक्रमेण पठ्यन्ते । नन धिन्वीतीका निर्देशादिक्प्रत्ययेऽङ्गस्य धातोर्नुमुपदेश इति कथं ज्ञापकमत आह—**अत्र हीति** । अत्र चेदमेव भाष्यं मानम् । वस्तुतो विभक्तं धातोरिति सूत्रं पूर्वत्रापकृष्य तत्सामर्थ्यात्तदर्थलाभ इति बोध्यम् । ननु तर्हि शे सर्वधातोः प्रसङ्गोऽत आह—**योगविभागस्येति** । अत एवेदितो नुमिति चरितार्थम् । **दिक्प्रदर्शितेति** । अत्रारुचिबीजं तु भाष्यस्वारस्यभङ्गः । **इष्टविषये** । रनकारविषये ।

**नेट्यलिटि** । **इट्येवेति** । एवं नियमे ररन्धेत्यत्र न स्याद्रधितेत्यत्र च स्यादिति

---

÷ १. २. ४.

---

१ ख. 'रन्ते नु' ।

इति लिटि रधेर्नुम्भवतीति । तन्नियमार्थं भविष्यति । लिट्येवेडादौ नान्यस्मिन्निडादाविति ।

**आङो यि ॥ ७ । १ । ६५ ॥**

इह कस्मान्न भवति । आलभ्यते । अस्तु । अनिदितां हल उपधायाः क्ङिति [ ६. ४. २४ ] इति लोपो भविष्यति । इह तर्हि आलम्भ्या गौः पोरदुपधात् [ ३. १. ९८ ] इति यत्यवस्थिते नुम् । तत्र को दोषः । आलम्भ्या एष स्वरः+ प्रसज्येत आलम्भ्या इति* चेष्यते । नैष दोषः । [illegible]धातुग्रहणसामर्थ्यादुपदेशे नुम्विधानमिति÷ ।

**न सुदुर्भ्यां केवलाभ्याम् ॥ ७ । १ । ६८ ॥**

अथ केवलग्रहणं किमर्थं न न सुदुर्भ्यामित्येवोच्येत ।

---

प्र०—स्येष्टसिद्ध्यर्थत्वात्क्वसौ रेधिवानिति भवति द्विर्वचने सत्येत्त्वाभ्यासलोपयोः कृतयोरिटि नुमागमस्तस्यौपदेशिककित्त्वाश्रयो लोपः । ये तु क्वसुं छान्दसमेव मन्यन्ते तेषां विचार एवायं नास्ति । छन्दसि दृष्टानुविधानात् ।

**आङो यि** । **यत्यवस्थित इति** । यकारादेः प्रत्ययस्य निमित्तत्वेनोपादानात्पूर्वमेव तेनोत्पत्तव्यमिति भावः । **एवं स्वर इति** । कृदुत्तरपदप्रकृतिस्वरेण यतो नाव इत्याद्युदात्तत्वप्रसङ्गः । अन्तस्वरितत्वं चेष्यत इत्यर्थः । **धातुग्रहणसामर्थ्यादिति** । यीति विषयसप्तमी । तेन धातूपदेशावस्थायामेव यकारादौ प्रत्यये विधयभूते नुमागमस्ततोऽदुपधत्वस्य विघाताण्ण्यत्प्रत्यये सतीष्टस्वरसिद्धिः ।

**न सुदुर्भ्यां केवलाभ्याम्** । उपसर्गात्खल्घञोरिति प्राप्तो नुम्प्रतिषिध्यते । **केवलग्रहणमिति** । इह केवलग्रहणेन समानजातीय उपसर्ग एव निवर्तयितव्य

---

उ०—नञ्द्वयोपादानं सार्थकं स्यादिति भावः। ननु रेधिवानित्यत्र नुम्येत्त्वाभ्यासलोपौ न स्यातामत आह—**क्वसाविति** । एत्त्वाभ्यासलोपोत्तरं वस्वेकाजादितीट् । कृतद्वित्वानामेकाचां तत्र ग्रहात् । **औपदेशिकेति** । संयोगात्परत्वेनाऽऽतिदेशिककित्त्वाभावादिति भावः । **ये त्विति** । पपुष आगन्तं पपिवद्रूप्यमिति विभाषा पूर्वाह्णेतिसूत्रस्थभाष्यप्रयोगविरोधोऽत्रारुचिः । यत्तु भाष्येऽपि च्छान्दसः क्वसुरित्युच्यते तस्यायं क्वसुप्रयोगश्छान्दस इत्यर्थ इति न विरोधः ।

+ **आङो यि** । **यकारादेरिति** । यीत्यस्य परसप्तमीत्वात्पूर्वमदुपधत्वाद्यदेव स्यान्न तु ण्यदित्यर्थः । **कृदुत्तरेति** । यद्यपि ण्यत्यपि नुमा विहतनिमित्ततया वृद्धेरभावाद्रूपे न विशेषस्तथाऽपि स्वरे विशेष इत्यर्थः। **अन्तस्वरितत्वमिति** । कृदुत्तरपदप्रकृतिस्वरेणेत्यर्थः । ण्यति इत्यनुबन्धकत्वाद्यतो नाव इत्यस्याप्रवृत्तेः । ननूपदेशे नुमि यीति सप्तम्यनुपपन्नेत्यत आह—**विषयेति** ।

**न सुदुर्भ्याम्** । अनेकस्य नुमः प्रक्रान्तत्वात्कस्यायं प्रतिषेध इत्यत्राऽऽह—**उपसर्गादिति** । अनन्तरत्वात्खल्घञोरित्यनुवर्तनाच्चेति भावः । **समानजातीय इति** । केवलशब्दस्य

---

+ ६. १. २१३; ६. २. १३९. * ३. १. १२४; ६. १. १८५; ६. २. १३९. ÷ ७. १. ५८.

---

+ धनचिह्नान्तर्गतो ग्रन्थः क पुस्तके न दृश्यते ।

**सुदुरोः केवलग्रहणमन्योपसर्गप्रतिषेधार्थम् ॥ १ ॥**

सुदुरोः केवलग्रहणं क्रियतेऽन्योपसृष्टान्मा भूदिति । प्रसुलम्भम् । नैषोऽस्ति प्रयोगः । इदं तर्हि । सुप्रलम्भम् । प्रेण व्यवहितत्वान्न भविष्यति । इदं तर्हि । अतिसुलम्भम् । कर्मप्रवचनीयसंज्ञाऽत्र बाधिका भविष्यति सुः पूजायामतिरतिक्रमणे च [ १. ४. ९४; ९५ ] इति । यदा तर्हि नातिक्रमणं न पूजा । इदं चाप्युदाहरणम् । सुप्रलम्भम् । ननु चोक्तं प्रेण व्यवहितत्वान्न भविष्य-

---

प्र०—इष्यते । स च सुदुर्भ्यां पूर्वो नास्त्यनभिधानात्प्रत्ययाभावात् । सुदुर्भ्यां परे तु तस्मिन्पञ्चमीनिर्देशादेव व्यवधाने प्रतिषेधो न भविष्यतीति प्रश्नः । **नैषोऽस्ति प्रयोग इति** । प्रयुक्तानामिदमन्वाख्यानं न त्वनेनापूर्वः शब्दोपजनः क्रियते । अपि च प्रारम्भादिविशिष्टायाः क्रियायाः सुकरत्वं दुष्करत्वं च प्रतिपाद्यमिति पूर्वं प्रेण धातोः संबन्धः पश्चात्तद्विशिष्टस्य सुदुर्भ्याम् । **अतिसुलम्भमिति** । सौकर्यादिविशिष्टधात्वर्थस्यातिर्विशेषणमिति पूर्वं सुदुर्भ्यां संबन्धः पश्चादतिना । इतरस्तु पूजाया अतिक्रमणस्य वा द्योतकोऽतिशब्द इति मत्वाऽऽह—**कर्मप्रवचनीयसंज्ञेति** । तत-श्चोपसर्गत्वाभावादतः क्केवलावेवात्र सुदुराविति नुम्प्रतिषेधेन भाव्यम् । नहि विजातीयः केवलत्वं विहन्ति । यथा देवदत्तयज्ञदत्ताभ्यां कवलाभ्यां प्रवेष्टव्यमित्युक्ते पुरुषान्तरस्य प्रतिषिध्यते प्रवेशो नतु शुकादेरेवं सुदुरौ परस्परसाहितौ विजातीयसाहितावेकाकिनौ च केवलावेव भवतः। सुदुर्लभमतिसुलभं सुलभं दुर्लभमिति कृच्छ्राकृच्छ्रार्थौ च सुदुरौ क्रियाया विशेषकत्वादुपसर्गाविव खल्निमित्ततां प्रतिपद्येते । **यदा तर्हीति** । पूजातिक्रमणयोरतेः कर्मप्रवचनीयसंज्ञाविधानादन्यत्रोपसर्गत्वात्तत्सहितयोः सुदुरोः केव-

---

उ०—सजातीयान्तराभाववचनत्वात् । **उपसर्ग इति** । पूर्वसूत्रादुपसर्गपदानुवृत्तेः । **अनभिधानादिति** । तादृशस्थलेऽनभिधानेन खलादिप्रत्ययाभावादित्यर्थः । ननु शास्त्रेण प्रयोगः स्यादत आह—**प्रयुक्तानामिति** । अप्रयुक्ते शास्त्राप्रवृत्तेरिति भावः । **अपि चेति** । इदं चिन्त्यम् । सुकरत्वेन निर्णीतस्य प्रारम्भदर्शनात् । तस्मादनभिधानमेव युक्तम् । तदेव ध्वनयन्नाह—**सौकर्यादिविशिष्टधात्वर्थस्येति** । **उपसर्गत्वाभावादिति** । अत्रोपसर्गादित्यस्यानुवृत्तेरिति भावः । नन्वतिशब्दसत्त्वे कथं केवलत्वमत आह—**नहीति** । **परस्परेति** । सजातीयस्योभयान्यस्याभावात् । अत्र वदन्ति । किमत्र सुदुरोः परस्परसाहित्येन निमित्ततोत निरपेक्षतया । नाऽऽद्यः । सुलभमित्यसिद्ध्यापत्तेः । नान्त्यः । सुघटितवाक्ये केवलपदेनान्योपसर्गव्यावृत्तेरिवैतद्व्यावृत्तेरपि वक्तुं युक्तत्वादिति । चिन्त्यमेतत् । केवलपदेन सूत्रोपस्थितातिरिक्तोपसर्गान्तरमेव व्यावृत्त्यते । अत एव सुलभमित्येवेति कयटाशय इत्यन्ये । नन्वतिसुलभमित्यत्र नुम्कथम् । सोऽपि कर्मप्रवचनीयत्वेनोपसर्गत्वाभावात् । अकृच्छ्रार्थे हि खल् । अकृच्छ्रत्वं पूजैव। अत एव भाष्ये सुः पूजायामित्यस्यापि ग्रहणमत आह—**कृच्छ्राकृच्छ्रार्थौ चेति** । एवं चोपसर्गत्वाभावात्खलेव न स्यात् । भाष्ये त्वनुवृत्तिप्रदर्शनार्थमेव तदुपादानम् ।

तीति । नैष दोषः । सुदुर्भ्यामिति नैषा पञ्चमी का तर्हि । तृतीया । सुदुर्भ्यामुपसृष्टस्येति । व्यवहितश्चाप्युपसृष्टो भवति ।

**विभाषा चिण्णमुलोः ॥ ७ । १ । ६९ ॥**

**चिण्णमुलोरनुपसर्गस्य ॥ १ ॥**

चिण्णमुलोरनुपसर्गस्येति वक्तव्यम् । इह मा भूत् । प्रालम्भि । प्रलम्भं प्रलम्भम्* । तत्तर्हि वक्तव्यम् । न वक्तव्यम् । इहोपसर्गादित्यपि प्रकृतं नेत्यपि+ तत्राभिसंबन्धमात्रं कर्तव्यम् । विभाषा चिण्णमुलोरुपसर्गान्नेति ।

**उगिदचां सर्वनामस्थानेऽधातोः ॥ ७ । १ । ७० ॥**

अधातोरिति किमर्थम् । उखास्रत् पर्णध्वत् । अधातोरिति शक्यमवक्तुम् ।

---

प्र०—लत्वाभावान्नुम्भवत्येव । **का तर्हीति** । पञ्चमीपक्षेऽपि केवलग्रहणमतिसुलम्भमित्येवमर्थं कर्तव्यमिति क्रमानुलङ्घनाय तृतीयैवाऽऽश्रयितव्येति भावः । वाक्यकारेण पठितं सुदुरोः प्रतिषेधो नुम्विधितत्वषत्वणत्वेष्वित्यतस्तन्मते नातिसुलभमिति सोरुपसर्गत्वाभावान्नुम्न प्राप्नोति । भाष्यकारेण चात्र नुमागमोऽभ्युपगतस्तस्माद्वाक्यकारस्यापि केवलसुदुःशब्दविषय एव नुम्विधावुपसर्गसंज्ञानिषेधोऽभिमतः । षत्वेऽपि पूजायामेव । **तथा च** सुषिक्तं नाम किं तवात्रेति षत्वं च क्षेपे भवत्येव ।

**विभाषा चिण्णमुलोः** । लभेश्चेति नित्ये नुमि प्राप्ते विभाषाऽऽरभ्यते । **चिण्णमुलोरिति** । सोपसर्गस्य तु नित्यमेव नुम्भवति । उपसर्गान्नेति वाक्यभेदेन विकल्प एव प्रतिषिध्यत इति नित्यमेव नुम्भवति ।

**उगिदचाम्०** । **अधातोरिति किमर्थमिति** । अञ्चतिग्रहणान्नियमार्थाद्धातोर्निवृत्तिः

---

उ०—अक्रुच्छ्रत्वमात्रेण च न पूजेति भावः । एतेन सुदुरोरुपपदयोः खला घञो बाधात्सूत्रे घञ्ग्रहणं व्यर्थमित्यपि शङ्का समाहिता । कृच्छ्राकृच्छ्रातिरिक्तार्थयोस्तत्संभवात् । किंचास्मात्खल्कर्मण्येवेति भावेऽपि घञः संभवो बोध्यः । ननु सर्वथा केवलग्रहणस्य कर्तव्यत्वे भाष्ये तृतीयाश्रयणे को हेतुरत आह—**क्रमेति** । पञ्चमी हि परशब्दयोग उपपदविभाक्तिः । तृतीया तु कारकविभक्तिरिति तृतीयैवोचितेति बोध्यम् । **तस्मादिति** । भाष्यकारेणात्र नुमभ्युपगमादित्यर्थः । **प्रसङ्गादाह षत्वऽपीति** । इदं च प्रथमाध्यायशेषभाष्ये ध्वनितम् । **षत्वं चेति** । चेन सुलम्भं नाम किं त्वयाऽत्रेत्यादौ क्षेपे नुमित्येके ।

**विभाषा०** । प्राप्तविभाषेयमित्याह—**लभेश्चेति** । **नित्यमेवेति** । अनुपसर्गस्येति विकल्पस्यैव प्रतिषेधादिति भावः । **विकल्प एवेति** । अनन्तरत्वादिति भावः ।

**उगिदचाम्०** । **नियमार्थादिति** । न चाचामिति लुप्तनकारनिर्देशेन नलोपिन एव यथा स्यान्नतु पूजार्थस्येत्येतदर्थमचामित्यस्य चारितार्थ्यात्कथं त्वदुक्तनियमार्थत्वम् । भाष्य-

---

* ७, १. ६४. + ७. १, ६७; ६८,

कस्मान्न भवति उखास्रत् पर्णध्वदिति ।

**उगित्यश्वतिग्रहणात्सिद्धमधातोः ॥ १ ॥**

उगित्यञ्चतिग्रहणादधातोः सिद्धम् । अञ्चतिग्रहणं नियमार्थं भविष्यति । अञ्चतेरेवोगितो धातोर्नान्यस्योगितो धातोरिति । इदं तर्हि प्रयोजनमधातुभूतपूर्वस्यापि यथा स्यात् । गोमन्तमिच्छति गोमत्यति गोमत्यतेरप्रत्ययो गोमानिति।

**नपुंसकस्य झलचः ॥ ७ । १ । ७२ ॥**

**झलचो नुम्विधावुगित्प्रतिषेधः ॥ १ ॥**

झलचो नुम्विधावुगिल्लक्षणस्य+ प्रतिषेधो वक्तव्यः । गोमन्ति ब्राह्मणकुलानि । श्रेयांसि भूयांसि । ननु च झल्लक्षण उगिल्लक्षणं बाधिष्यते। कथमन्य-

---

प्र०—सिद्धेति भावः । **गोमानिति** । क्विबन्ता धातुत्वं न जहतीति धातुरयमित्यञ्चतिग्रहणान्नियमार्थान्न स्यात् । अधातुग्रहणात्तु भवति । तस्य ह्येतत्प्रयोजनमवस्थान्तरेऽपि यस्याधातुत्वं दृष्टं तस्य संप्रतिधातुत्वेऽपि नुम्यथा स्यादिति । अथात्र कथं दीर्घत्वम् । यावताऽत्वसन्तस्य चाधातोरित्यधातोस्तद्विधीयते । उच्यते । आधातोरिति तत्र योगविभागः क्रियते । तत्र चासन्तस्येत्यनुवृत्त्याऽत्वन्तस्य पर्युदासाभावः ।

**नपुंसकस्य** । **गोमन्तीति** । परत्वाज्झल्लक्षणे नुमि कृते पुनःप्रसङ्गविज्ञानादुगिल्लक्षणः प्राप्नोतीति तस्य प्रतिषेधो वक्तव्यः । **ननु चेति** । व्यक्तौ पदार्थे सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेवेति भावः । इतर आकृतिपक्षमाश्रित्याऽऽह—**कथमन्यस्येति** । उभयोर्नुमोः प्रसङ्गे परस्य प्रतिबन्धादप्रतिपत्तौ प्राप्तायां विप्रतिषेधे परं कार्यमिति वचनेन परो नुम्विधीयमान उत्तरकालप्राप्तनिमित्तवन्तं पूर्वनुमं नैव

---

उ०—प्रामाण्येनाचामित्यस्याऽऽवृत्त्या तस्यापि सुलभत्वात् । अत एवास्य परनिपातः । अत एव च नलोपेन निर्देशोऽकारलोपाकरणं चेति बोध्यम् । ननु क्विबन्तस्य प्रातिपदिकत्वं न धातुत्वमत आह—**क्विबन्ता इति** । अत एवात्वसन्तस्येत्यत्राधातुग्रहणं चरितार्थम् । न चौपदेशिकस्योगितो धातोश्चेदञ्चतेरेवेति नियमेन सिद्धेऽधातुग्रहणं व्यर्थमेवेति वाच्यम् । सामान्यापेक्षनियमार्थत्वात् । तत्फलं नामधातूनामुगितश्चेति ङीबभाव इत्याहुः । तत्र चासन्तस्येति योगविभागसामर्थ्यादेकदेशानुवृत्तिः । तेन पिण्डग्र इत्यादौ दीर्घाभावः ।

**नपुंसकस्य०** । **परत्वादिति** । झलन्तलक्षणावकाशः—सर्पींषि । उगिल्लक्षणस्य गोमानिति पुंसि । यौगपद्यासंभवरूपो विरोधोऽत्र । उभयोरन्त्यादचः परत्वासंभवात् । सावकाशत्वेनापवादत्वासंभवादाह—**व्यक्ताविति** । इदमुपलक्षणम् । विप्रतिषेधसूत्रभाष्योक्तस्य तन्न्या-

---

\+ ७. १. ७०.

स्योच्यमानमन्यस्य बाधकं स्यात् । असति खल्वपि संभवे बाधनं भवत्यस्ति च संभवो यदुभयं स्यात् । किंच स्याद्यद्यत्रोगिल्लक्षणोऽपि स्यात् । द्वयोर्नकारयोः श्रवणं प्रसज्येत । न व्यञ्जनपरस्यकस्य वाऽनेकस्य वा श्रवणं प्रति विशेषोऽस्ति । ननु च प्रतिज्ञाभेदो भवति । श्रुतिभेदेऽसति किं प्रतिज्ञाभेदः करिष्यति । ननु च श्रुतिकृतोऽपि भेदोऽस्ति । इह तावच्छ्रेयांसि भूयांसीति परस्यानुस्वारे× कृते पूर्वस्य श्रवणं प्राप्नोति । तथा कुर्वन्ति

---

प्र०—शक्नोति बाधितुं तथा चोच्यते पुनःप्रसङ्गविज्ञानात्सिद्धमिति । **अन्यस्येति** । अनुमः । **अन्यस्येति** । सनुम इत्यर्थः । स्यादेतदन्यस्याप्युच्यमानं कार्यमन्यस्य बाधकं भवति । यथोक्तमग्नेरीत्त्वाद्वरुणस्य वृद्धिर्विप्रतिषेधेनेत्यत आह—**असति खल्वपीति** । क्रमेण च नुमो विधानादन्त्यादचः परत्वं संभवति । यथा पचतीति धात्वपेक्षं लट्शपोः । **प्रतिज्ञाभेद इति** । एकस्य प्रतिज्ञैको नकार इत्यपरस्य द्वौ नकाराविति । **श्रुतिभेदेऽसतीति** । कथं पुनः श्रुतिभेदाभावो यावताऽनेकहलुच्चारणेनाधिकः कालो व्याप्यत एकहलुच्चारणे चाल्पः । उच्यते । अच्कालव्यतिरेकेण व्यञ्जनानि कालान्तरं नाऽऽक्षिपन्तीति दर्शनाश्रयेणैतदुक्तम् । यत्तु शास्त्रे व्यञ्जनानां कालः परिगण्यते तद्गुरुलाघवनिरूपणायानेकोच्चारणे हि प्रयत्नस्य गौरवं भवति लौकिके तु प्रयोगे गुरुलाघवानादराच्छ्रुत्यभेद उच्यते । अन्ये तु व्यञ्जनानां कालभेदमिच्छन्त्येव । **परस्यानुस्वार इति** । अयोगवाहनामट्सूपदेशाज्झल्त्वाभावात्पूर्वस्य नकारस्यानुस्वारो नास्ति । ननु च वर्णग्रहणे जातिग्रहणाद्द्वयोर्नकारयोरेकोऽनुस्वार आदेशो विधास्यते । नैतदस्ति । स्थानिभेदादनुस्वारादेशद्वयप्रसङ्गात् । न इति वा गुणत्वादेकत्वसंख्याया विवक्षितत्वादेकस्यैव नकारस्यानुस्वारः स्यान्नतु द्वयोः ।

---

उ०—यमूलभूतस्य दृष्टान्तस्यापि । नन्वङ्गस्यैकत्वादन्यस्येत्ययुक्तमत आह—**अनुम इति** । **अग्नेरिति** । तत्र वृद्धौ नास्ति संभव ईत्वस्य, इद्वृद्धावित्यनेन बाधादिति भावः । नन्वेकस्मादन्त्यादचः परत्वं द्वयोर्नुभोर्न संभवतीत्यस्ति च संभव इत्ययुक्तमत आह—**क्रमेण चेति** । यद्यपि प्रयोगे न संभवति विधानकाले तु संभवतीति भावः । भाष्ये—**व्यञ्जनपरस्येति** । व्यञ्जनं परमस्येति बहुव्रीहिः । **अधिकः काल इति** । द्वयोर्व्यञ्जनयोर्मात्रा कालः । एकस्य त्वर्धमात्रा काल इति भावः । **दर्शनाश्रयेणेति** । व्यञ्जनानामकालत्वमिति यच्छिक्षाकृतां मतं तन्मतेनेदमुक्तमिति भावः । **यत्तु शास्त्र इति** । ऐ औच् हयवरट् सूत्रादौ । **गुरुलाघवनिरूपणायेति** । प्रयत्नगौरवेण कल्पितकालभेदेनेत्यर्थः । **अन्ये त्विति** । अत एव हलो यमामित्यादि चरितार्थम् । ननु परस्यानुस्वारे कृते तमेव झलमाश्रित्य पूर्वस्यापि भवत्वित्यत आह—**अयोगेति** । शर्षु पाठमनाश्रित्येदम् । **स्थानिभेदादिति** । तस्योच्चारणप्रसङ्ग इत्यर्थेन जातेस्तत्प्रसङ्गाभावाज्जातिग्रहणमशक्यमिति भावः । **न इति वेति** । इदं चिन्त्यम् । अनु-

---

× ८. ३. २४.

कृषन्तीति परस्यानुस्वारपरसवर्णयोः÷ कृतयोः पूर्वस्य णत्वं× प्राप्नोति। अथैकस्मिन्नपि नुमि णत्वं कस्मान्न भवति। अनुस्वारीभूतो णत्वमतिक्रामति। कृते तर्हि परसवर्णे कस्मान्न भवति। असिद्धे च परसवर्णः।

**विप्रतिषेधात्सिद्धम्॥ २॥**

विप्रतिषेधात्सिद्धमेतत्। झल्लक्षणः क्रियतामुगिल्लक्षण इति झल्लक्षणो भविष्यति विप्रतिषेधेन। झल्लक्षणस्यावकाशः। सर्पींषि धनूंषि। उगिल्लक्षणस्यावकाशः। गोमान् यवमान्। इहोभयं प्राप्नोति। गोमन्ति ब्राह्मणकुलानि। यवमन्ति ब्राह्मणकुलानि। श्रेयांसि भूयांसीति। झल्लक्षणो भविष्यति विप्रतिषेधेन। ननु च पुनःप्रसङ्गविज्ञानादुगिल्लक्षणः प्राप्नोति।

**पुनःप्रसङ्ग इति चेदमादिभिस्तुल्यम्॥ ३॥**

पुनःप्रसङ्ग इति चेदमादिभिस्तुल्यमेतद्भवति+। तद्यथा। युष्मदस्मदोरमादिषु कृतेषु पुनःप्रसङ्गाच्छिशीलुग्नुमो न भवन्ति। एवं झल्लक्षणे कृते पुनःप्रसङ्गादुगिल्लक्षणो न भविष्यति। यदप्युच्यतेऽसति खल्वपि संभवे बाधनं भवत्यस्ति च संभवो यदुभयं स्यादिति सत्यपि संभवे बाधनं भवति। तद्यथा। दधि ब्राह्मणेभ्यो दीयतां तक्रं कौण्डिन्यायेति सत्यपि संभवे दधिदानस्य तक्रदानं निवर्तकं भवति। एवमिहापि सत्यपि संभवे झल्लक्षण उगिल्लक्षणं बाधिष्यते। अथवाऽस्त्वत्रोगिल्लक्षणोऽपि। ननु चोक्तं द्वयोर्नकारयोः श्रवणं प्रसज्येतेति। परिहृतमेतन्न व्यञ्जनपरस्यैकस्य वाऽनेकस्य वा श्रवणं प्रति विशेषोऽस्ति। ननु चोक्तं प्रतिज्ञाभेदो भवतीति श्रुतिभेदेऽसति प्रतिज्ञाभेदः किं करिष्यति। ननु च श्रुतिकृतोऽपि भेद उक्त इह तावच्छ्रेयांसि भूयांसीति परस्यानुस्वारे कृते पूर्वस्य श्रवणं प्रसज्येत कुर्वन्ति कृषन्तीति परस्यानुस्वारपरसवर्णयोः

---

प्र०—णत्वमतिक्रामतीति। न प्राप्नोतीत्यर्थः। अनुस्वारे कर्तव्ये पूर्वत्रासिद्धमिति णत्वस्यासिद्धत्वादनुस्वारो नकारस्य भवति न तु णत्वम्। णत्वे च कर्तव्येऽसिद्ध एवानुस्वार इति णत्वाभावः। **असिद्धे च परसवर्ण इति**। असिद्धप्रकरणे परसवर्णस्य विधानाण्णत्वे कर्तव्ये तस्यासिद्धत्वाण्णत्वाभावः। **विप्रतिषेधादिति**। व्यक्तिपदार्थाश्रयसाहितात्। **तद्यथा दधीति**। यद्यपि दृष्टान्ते सामान्यविशेषभावो बाधहेतुर्दार्ष्टान्तिके तु विप्रतिषेधे परमेवेति नियमस्तथाऽपि विनाऽपि विरोधेन दृष्टं बाधकत्वमिति प्रदर्शनाय दृष्टान्तोपन्यासः। **परस्येति**। अयोगवाहानामविशेषेणो-

---

उ०—वादे संख्याया अविवक्षणात्। अन्यथा नकारान्तरे न स्यात्। ननु विप्रतिषेधाश्रयपूर्वपक्षे तेनैव सिद्धान्तोऽयुक्तोऽत आह—**व्यक्तीति**। सकृद्गतिन्यायाश्रयणादित्यर्थः। **विनाऽपि विरोधेनेति**। असंभवरूपेणेत्यर्थः। भाष्ये—**परस्यानुस्वारपरसवर्णयोः कृतयोरिति**।

---

÷ ८. ३. २४; ८. ४. ५८. × ८. ४. २. + ७. १. २६.

कृतयोः पूर्वस्य णत्वं प्राप्नोतीति । नैष दोषः । अयोगवाहानामविशेषेणोपदेशश्चोदितः+ । तत्रेह तावच्छ्रेयांसि भूयांसीति परस्यानुस्वारे कृते तस्य झल्ग्रहणेन ग्रहणात्पूर्वस्यानुस्वारो भविष्यति कुर्वन्ति कृषन्तीति परस्यानुस्वारपरसवर्णयोः कृतयोस्तस्य झल्ग्रहणेन ग्रहणात्पूर्वस्यानुस्वारपरसवर्णौ भविष्यतः ।

नैव वा पुनरत्रेगिल्लक्षणः प्राप्नोति । किं कारणम् । मिदचोऽन्त्यात्परः [ १. १. ४७ ] इत्युच्यते न च द्वयोर्मितोरचामन्त्यात्परत्वे संभवोऽस्ति । कथं तर्हीमौ द्वौ मितावचामन्त्यात्परौ स्तः । बह्वनड्वांहि* ब्राह्मणकुलानीति । विनिमित्तावेतौ ।

**तत्र बहूर्जि प्रतिषेधः ॥ ४ ॥**

बहूर्जि प्रतिषेधो वक्तव्यः । बहूर्जि ब्राह्मणकुलानीति ।

**अन्त्यात्पूर्वं नुममेके ॥ ५ ॥**

अन्त्यात्पूर्वं नुममेक इच्छन्ति । किमविशेषेणाऽऽहोस्विद्बहूर्जावेव । किंचातः । यद्यविशेषेण काष्ठतक्षीति भवितव्यम् । अथ बहूर्जावेव काष्ठतङ्क्षीति भवितव्यम् । एवं तर्हि बहूर्जावेव । बहूर्ञ्जि ।

प्र०—पदेशाश्रयणादनुस्वारस्य झल्त्वात्पूर्वस्याप्यनुस्वारो भवति । ततो द्वयोरनुस्वारयोः श्रुतिं प्रति विशेषाभावः । कुर्वन्तीत्यत्रापि पूर्वस्य नकारस्यानुस्वारपरसवर्णयोः कृतयोः परसवर्णस्यासिद्धत्वाण्णत्वस्यातिक्रमः । **न च द्वयोरिति**। ननु च यद्यपि प्रयोगे पूर्वेण नुमा परस्य नुमोऽन्त्याजपेक्षमानन्तर्यं विहन्यते तथाऽपि क्रमेण विधाने द्वयोः संभवत्येव परत्वमित्युक्तम् । नैष दोषः । प्रयोगाश्रयेणैतदुक्तम् । प्राधान्यात्प्रयोगस्यान्त्यादचः परो मित्प्रयोक्तव्य इत्यानन्तर्यमेवात्र संश्रितम् । न च द्वयोर्नुमोरेकाजपेक्षमानन्तर्यं संभवति । पचतीत्यत्र तु सार्वधातुके परतः शब्विधानाद्विकरणव्यवधानमाश्रितमेव । **विनिमित्ताविति** । भिन्नक्रमावित्यर्थः । उकारात्पर आमामः परो नुम् । **तत्रेति** । झलच इति द्वंद्वाश्रयणे दोषः । बहव ऊर्जो येषामिति बहुव्रीहिः । **यद्यविशेषेणेति** । काष्ठं तक्ष्णुवन्तीति क्विपि कृते जसः शिभावे च ककारष-

उ०—कृतयोरपीत्यर्थः । इदं पराभ्युपगमरीत्या । वस्तुतः परसवर्णस्यासिद्धत्वात्ततः पूर्वमेवानुस्वारः । **विनाऽपि विरोधेनेति** । प्रयोगेऽसंभवरूपविरोधेन विनाऽपीत्यर्थः । विधानकाले यौगपद्यासंभवरूपो विरोधोऽस्त्येवेति बोध्यम् । **णत्वस्यातिक्रम इति** । अप्राप्तिरित्यर्थः । **आनन्तर्यमेवेति** । प्रयोगकालिकमेवाऽऽश्रितं नतु विधानकालिकमित्यर्थः । **उकारात्पर इति** । आम्नुमोः प्राप्तयोः पूर्वं परत्वादुकारात्पर आम् ततः पुनःप्रसङ्गविज्ञानादामः परो नुमित्यर्थः । अचः परस्य झल इत्यर्थे दोषाभावादाह—**द्वंद्वेति** । **ककारषकारयोरिति** ।

+ शिवसू° ५X. * ७. १. ९८; ७२.

१ ख. °विनिमित्तावि° ।

स तर्हि प्रतिषेधो वक्तव्यः । न वक्तव्यः । अच इत्येषा पञ्चमी । अच उत्तरो यो झल्तदन्तस्य नपुंसकस्य नुमा भवितव्यं यश्चात्राच उत्तरो नासौ झल्नापि तदन्तं नपुंसकं यदन्तं च नपुंसकं नासावच उत्तरः । इहापि तर्हि न प्राप्नोति । काष्ठतक्ष्णीति । अत्र योऽच उत्तरो झल्न तदन्तं नपुंसकं यदन्तं च नपुंसकं नासावच उत्तरः । नैतदस्ति । झल्जातिः प्रतिनिर्दिश्यते । अच उत्तरा या झल्जातिरिति । यदि पञ्चमी कुण्डानि वनानीत्यत्र न प्राप्नोति । एवं तर्हीकोऽचि विभक्तौ [ ७. १. ७३ ] इत्यत्राचः सर्वनामस्थान इत्येतदनुवर्तिष्यते । एवमपि षष्ठ्यभावान्न प्राप्नोति । सर्वनामस्थान इत्येषा सप्तम्यच इति पञ्चम्याः षष्ठीं प्रकल्पयिष्यति तस्मिन्निति निर्दिष्टे पूर्वस्य [१. १. ६६] इति ।

इकोऽचि विभक्तौ ॥ ७ । १ । ७३ ॥

अज्ग्रहणं किमर्थम् ।

**इकोऽचि व्यञ्जने मा भूत् ।**

इकोऽचीत्युच्यते व्यञ्जनादौ मा भूत् । त्रपुभ्याम् त्रपुभिः ।

**अस्तु लोपः**

अस्त्वत्र नुम् । नलोपः प्रातिपदिकान्तस्य [ ८. २. ७ ] इति नलोपो भविष्यति ।

**स्वरः कथम् ।**

पञ्चत्रपुभ्याम् पञ्चत्रपुभ्यः । इगन्ते द्विगावित्येष स्वरो* न प्राप्नोति ।

**स्वरो वै श्रूयमाणेऽपि**

प्र०—कारयोर्मध्ये नुम्प्राप्नोति तस्य झल्परत्वादनुस्वारप्रसङ्गः । **अच इत्येषेति** । झलच इति न द्वंद्वः, किं तर्हि झलिति लुप्तषष्ठीकं पदमच इति तु पञ्चम्यन्तम् । **कुण्डानीति** । इगन्तस्योत्तरसूत्रेण सिध्यतीत्यकारान्तस्यैव नुमोऽप्राप्तिरुच्यते । **एवं तर्हीति** । वाक्यभेदेनाजन्तस्य सर्वनामस्थाने नुम्विधीयते । **सर्वनामस्थान इत्येषेति** । ननु पञ्चमीसप्तम्योर्द्वयोरपि सावकाशत्वात्परत्वात्पञ्चम्यैव प्रकल्पिकया भाव्यम् । एवं तर्हीष्टवाचित्वात्परशब्दस्य सप्तम्यपि क्वचित्प्रकल्पिका भवतीत्यदोषः ।

**इकोऽचि विभक्तौ** । **अज्ग्रहणमिति** । हलादौ नुमो लोपविधानात्तन्निवृत्त्यर्थमज्ग्रहणं नोपयुज्यत इति प्रश्नः । **स्वरो न प्राप्नोतीति** । नुमेगन्तताया विघातात् ।

उ०—ककारात्पूर्वस्त्विष्यत इति भावः । **एवं तर्हीति** । अनुवृत्तिसामर्थ्यादिक इति साहचर्याच्चेति भावः ।

**इकोऽचि वि०** । लुते किं नेत्यनेन कैमुतिकन्यायः प्रदर्श्यत इत्याह—**स्वर इति** ।

* ६. २. २९.

श्रूयमाणेऽपि नुमि स्वरो भवति । पञ्चत्रपुणा पञ्चत्रपुण इति ।

लुप्ते किं न भविष्यति ।

लुप्त इदानीं किं न भविष्यति । किं पुनः कारणं श्रूयमाणेऽपि नुमि स्वरो भवति । संघातभक्तोऽसौ नोत्सहतेऽवयवस्येगन्ततां विहन्तुमिति कृत्वा ततः श्रूयमाणेऽपि नुमि स्वरो भवति । इदं तर्हि । अतिराभ्याम् अतिराभिः । नुमि कृते रायो हलि [ ७. २. ८५ ] इत्यात्वं न प्राप्नोति । इदमिह संप्रधार्यम् । नुम्क्रियतामात्वमिति किमत्र कर्तव्यम् । परत्वादात्वम् । इह तर्हि प्रियतिसृभ्याम् प्रियतिसृभिः नुमि कृते तिसृभावो+ न प्राप्नोति । इदमिह संप्रधार्यम् । नुम्क्रियतां तिसृभाव इति । किमत्र कर्तव्यम् । परत्वात्तिसृभावः । अथेदानीं तिसृभावे कृते पुनःप्रसङ्गान्नुम्कस्मान्न भवति । सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेवेति । अत उत्तरं पठति ।

**इकोऽचि विभक्तावज्ग्रहणं नुम्नुटोर्विप्रतिषेधार्थम् ॥ १ ॥**

---

**प्र०—लुप्ते किं नेति** । स्वरे कर्तव्ये नलोपस्य शास्त्रेणैवासिद्धत्वं प्रतिपाद्यते नतु प्रयोगे नकारस्य सद्भावः । ततश्च नुमः सद्भावेऽपि यत्र स्वरो भवति तत्रासद्भावे कथं न स्यादित्यर्थः । **संघातभक्त इति** । अङ्गस्य विधानाद्बहिरङ्गत्वाच्च नुमोऽन्तरङ्गः स्वरः पूर्वमेव प्रवर्तते । **अतिराभ्यामिति** । अतिरिभ्यामिति स्थिते नुमि कृते तेन व्यवधानाद्रैशब्दस्याऽऽत्वं न प्राप्नोति । सुब्विधौ नलोपस्यासिद्धत्वाच्च । अथापि पदाङ्गाधिकारे तस्य च ग्रहणं भवति तदुत्तरपदस्य चेति रैशब्दान्तस्याङ्गस्याऽऽत्वं विधीयत इति नास्ति नुमाऽङ्गस्य व्यवधानम् । तथाऽपि नकारस्याऽऽत्वं प्राप्नोति तस्मिन्पूर्वस्य यणि सत्यतिर्याभ्यामिति प्राप्नोति । **परत्वादात्वमिति** । आत्वमनित्यं नुमि कृते तेन व्यवधानादप्रसङ्गादथवा शब्दान्तरप्राप्त्या नुमि कृते नकारस्य प्रसङ्गात् । अकृते त्विकारस्य नुमप्यनित्यः । कृत आत्वे प्राप्त्यभावात् । **परत्वात्तिसृभाव इति** । शब्दान्तरप्राप्त्या नुमनित्यः । तिसृभावस्तु नुमि कृते तेन व्यवधानान्न प्राप्नोतीत्यनित्यः । स हि यद्यपि त्रिशब्दान्तस्याङ्गस्य विधीयते तद्भक्तत्वाच्च नुमव्यवधायकस्तथाऽपि निर्दिश्यमानस्याऽऽदेशा भवन्तीति त्रेरेव तिसृभावेन भाव्यम् ।

---

उ०—हेत्वन्तरमप्याह—**बहिरङ्गत्वाच्चेति** । विभक्तिनिमित्तकत्वादिति भावः । विभक्तिविषये नुमिति भाष्याशय इत्यन्ये । **तेन व्यवधानादिति** । समुदायभक्तस्यावयवं प्रति व्यवधायकत्वादिति भावः । नलोपे कृतेऽपि दोष एवेत्याह—**नलोपस्येति** । **तथाऽपि नकारस्येति** । वस्तुतो नुमि कृते रैशब्दान्ताङ्गाभावादात्वं न स्यादित्येव वक्तुं युक्तम् । भाष्ये **परत्वादात्वमिति** । न चाऽऽकारस्य वृद्धितया वृद्ध्यौत्वेति पूर्वविप्रतिषेधान्नुमेव स्यात् । तत्र वृद्धिशब्दविहितवृद्धेरेव ग्रहणात् । अत्र चेदमेव भाष्यं मानम् । रैशब्दस्याऽऽत्वमिति पक्षेऽप्याह—**अथवा शब्दान्तरेति** ।

---

+ ७. २, ९९,

इकोऽचि विभक्तावज्ग्रहणं क्रियते नुमो नुड्विप्रतिषेधेन यथा स्यात्+। त्रपूणाम् जतूनाम्।

इतरथा हि नुमो नित्यनिमित्तत्वान्नुडभावः ॥ २ ॥

अक्रियमाणे ह्यज्ग्रहणे नित्यनिमित्तो नुम्। कृतेऽपि नुटि प्राप्नोत्यकृतेऽपि। नित्यनिमित्तत्वान्नुमि कृते नुटोऽभावः स्यात्। एतदपि नास्ति प्रयोजनम्। क्रियमाणेऽपि वा अज्ग्रहणेऽवश्यमत्र नुडर्थो यत्नः कर्तव्यः। पूर्वविप्रतिषेधो वक्तव्यः×। इदं तर्हि प्रयोजनं नुटि कृते नुम्मा भूदिति। किं च स्यात्। त्रपूणाम् जतूनाम्। नामि [ ६. ४. ३ ] इति दीर्घत्वं न स्यात्। मा भूदेवम्। नोपधायाः [ ६. ४. ७ ] इत्येवं भविष्यति। इह तर्हि शुचीनाम् इन्हन्पूषार्यम्णां शौ सौ च [ ६. ४. १२; १३ ] इत्यस्मान्नियमान्न प्राप्नोति दीर्घत्वम्। अर्थवद्ग्रहणे नानर्थकस्येत्येवं न भविष्यति। नैषा परिभाषेह शक्या विज्ञातुम्। इह हि दोषः स्यात्। वाग्मीति। एवं तर्हि लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेति।

---

प्र०—स च नुमा व्यवहित इति तिसृभावस्याप्राप्तिस्तदेवमुभयोरनित्ययोः परत्वात्तिसृभावः। **त्रपूणामिति**। सत्यज्ग्रहणे द्वयोरपि नुम्नुटोरनित्यत्वाद्विप्रतिषेधे सति नुमचिरतृज्वद्भावेभ्यो नुडिति पूर्वविप्रतिषेधान्नुड् भवति। तस्मिंश्च नामीति दीर्घत्वमसति त्वज्ग्रहणे कृताकृतप्रसङ्गित्वान्नित्यत्वान्नुमेव स्यात्। **नुडर्थो यत्न इति**। अज्ग्रहणं च कर्तव्यं पूर्वविप्रतिषेधश्च वक्तव्य इति यत्नद्वयमाश्रयणीयम्। तत्राज्ग्रहणमकृत्वैक एव नुडर्थो यत्नः कर्तव्य इत्यर्थः। **नुटि कृत इति**। यत्नान्तरेण नुटि कृते नुम्प्राप्नोतीत्यर्थः। **किंच स्यादिति**। न लोपे कृते दोषाभावं मन्यते। **नामीति**। नलोपस्य सुब्विधावसिद्धत्वादजन्तत्वाभावात्। **इह तर्हीति**। इन्हन्निति नियमः सर्वस्योपधालक्षणस्य दीर्घस्येति व्याख्यातम्। **नैषेति**। अनि-

---

उ०—इदमप्युक्तरीत्या चिन्त्यम्। **स च नुमेति**। विभक्तावित्यस्याङ्गविशेषणत्वमेव न्याय्यमितीदं चिन्त्यम्। त्रिशब्दान्ताङ्गाभावात्तिस्रप्राप्तिरिति वक्तुं युक्तम्। विप्रतिषेधस्याज्ग्रहणसाध्यत्वं दर्शयति—**सत्यज्ग्रहण इति**। **पूर्वविप्रतिषेधादिति**। नुटोऽवकाशोऽग्नीनाम्। नुमोऽवकाशस्त्रपुणे। नुम्नुटोर्विशेषं दर्शयति—**तस्मिंश्चेति**। **यत्नः कर्तव्य इति**। नित्यमपि बाधित्वा पूर्वविप्रतिषेधवचनसामर्थ्यान्नुडित्यर्थः। **यत्नान्तरेणेति**। पूर्वविप्रतिषेधरूपेणेत्यर्थः। सकृद्गतिन्यायमनाश्रित्येदम्। ननु नलोपः प्रातिपदिकान्तस्येति नलोपे कृते नामीति दीर्घः सिध्यतीत्यत्राऽऽह—**नलोपस्येति**। ननु स नियमोऽनन्तरत्वात्सर्वनामस्थाने चेति दीर्घस्यैवेत्यत आह—**सर्वस्येति**। अत एवानुनासिकस्य क्वीति दीर्घ-

---

+ ७. १. ५४. × ७. १ ९५.

उत्तरार्थं च ॥ ३ ॥

उत्तरार्थं तर्ह्यज्ग्रहणं कर्तव्यम् । अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः [ ७.१.७५ ] अजादौ यथा स्यात् । इह मा भूत् । अस्थिभ्याम् अस्थिभिरिति । [illegible] तत्रैवायमज्ग्रहणं कुर्वीत । इह क्रियमाणे यदि किंचित्प्रयोजनमस्ति तदुच्यताम् । इहापि क्रियमाणे प्रयोजनमस्ति । किम् । अजादौ यथा स्यात् । इह मा भूत् । त्रपु जतु । एतदपि नास्ति प्रयोजनम् । विभक्तावित्युच्यते न चात्र विभक्तिं पश्यामः* । प्रत्ययलक्षणेन× । न लुमताऽङ्गस्य [ १.१.६३ ] इति प्रत्ययलक्षणस्य प्रतिषेधः । एवं तर्हि सिद्धे सति यदज्ग्रहणं करोति तज्ज्ञापयत्याचार्यो भवतीह कश्चिदन्योऽपि प्रकारः प्रत्ययलक्षणं नामेति । किमेतस्य ज्ञापने प्रयोजनम् । हे त्रपु । हे त्रपो । अत्र गुणः÷ सिद्धो भवतीति ।

इकोऽचि व्यञ्जने मा भूदस्तु लोपः स्वरः कथम् ।
स्वरो वै श्रूयमाणेऽपि लुप्ते किं न भविष्यति ॥ १ ॥
रायात्वं तिसृभावश्च व्यवधानान्नुमा अपि ।
नुड्वाच्य उत्तरार्थं तु इह किंचित्त्रपो इति ॥ २ ॥

प्र०—[illegible]ग्रहणान्यर्थवता चानर्थकेनेति वचनात् । तथा च वाग्मिन इत्यादावपि नियमाद्दीर्घाभावः । तत्रैवायामिति । एवं हि स्वरितत्वं न प्रतिज्ञेयं भवति । प्रत्यक्षश्रुतिसंभवे चानुमानं नाऽऽश्रयितव्यं भवति । हे त्रपु हे त्रपो इति । हे त्रपु इति प्राप्ते हे त्रपो इति भवतीत्यर्थः । केचित्तु रूपद्वयमिष्यत इत्याहुः । क्वचित्प्रत्ययलक्षणं लुमता लुप्तायामपि संबुद्धौ भवतीत्येतदज्ग्रहणेन ज्ञाप्यते नतु सर्वत्रेति वदन्ति ।

उ०—[illegible]स्यापि नियमः । तत्रात्र वा करणे विशेषं दर्शयति—एवं हीति । अनुमानमिति । स्वरितत्वाल्लिङ्गादुत्तरत्र शब्दोऽनुमीयते । सूक्ष्मं शब्दोच्चारणमेवात्रानुमानम् । ननु प्रत्ययलक्षणप्रतिषेधाभावस्य ज्ञापितत्वाद्धे त्रप्वित्ययुक्तमत आह—इति प्राप्त इति । केचित्त्विति । [illegible]वादिति सूत्रस्थं भाष्यं मानम् । प्रकृतभाष्ये कश्चिदन्योऽपि प्रकार इत्यपि[illegible] । अपिर्हि प्रत्ययलक्षणाभावं समुच्चिनोति । तदुपपत्तिं दर्शयति—क्वचिदिति । प्रत्ययलक्षणप्रतिषेधस्यानित्यत्वमनेन ज्ञाप्यत इति तदाशयः । सर्वत्रेत्यस्य काल इति शेषः । भाष्यश्लोके—व्यवधानादिति । नुमा व्यवधानाद्रायात्वं तिसृभावश्च न प्राप्नुत [illegible] न । [illegible]रिति शेषः । संहिताया अविवक्षणान्नुमा अपीति दीर्घाभावः । पूर्वविप्रतिषेधसिद्ध्यर्थमज्ग्रहणमित्यस्योत्तरं नुड् वाच्य इति । तु इहेत्यत्रेकोऽसवर्ण इति प्रकृतिभावः । त्रपो इतीत्यत्र संबुद्धौ शाकल्यस्येति प्रगृह्यत्वम् ।

* ७.१.२३. × १.१.६२. ÷ ७.३.१०८.

१ ख. 'स्वमात्रम' ।

तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य ॥ ७ । १ । ७४ ॥

किमिह पुंवद्भावेनातिदिश्यते । नुम्प्रतिषेधः । कथं पुनः पुंवदित्यनेन नुम्प्रतिषेधः शक्यो विज्ञातुम् । वतिनिर्देशोऽयं कामचारश्च वतिनिर्देशे वाक्यशेषं समर्थयितुम् । तद्यथा । उशीनरवन्मद्रेषु यवाः । सन्ति न सन्तीति । मातृवदस्याः कलाः । सन्ति न सन्तीति । एवमिहापि पुंवद्भवति पुंवन्न भवतीति वाक्यशेषं समर्थयिष्यामहे । यथा पुंसो न नुम्भवत्येवं तृतीयादिषु भाषितपुंस्कस्यापि न भवतीति । किमुच्यते नुम्प्रतिषेध इति न पुनरन्यदपि पुंसः प्रतिपदं कार्यमुच्यते यत्तृतीयादिषु विभक्तिष्वजादिषु भाषितपुंस्कस्यातिदिश्येत । अनारम्भात्पुंसि । न हि किंचित्पुंसः प्रतिपदं कार्यमुच्यते यत्तृतीयादिष्वजादिषु भाषितपुंस्कस्यातिदिश्येत । नुम्प्रकृतस्तत्र किमन्यच्छक्यं विज्ञातुमन्यदतो नुम्प्रतिषेधात् ।

पुंवदिति नुम्प्रतिषेधश्चेद्गुणनाभावनुडौत्त्वप्रतिषेधः ॥ १ ॥

---

प्र०— तृतीयादिषु० । किमिहेति । अन्यत्र पराश्रयाणि कार्याण्यतिदिश्यन्ते न तु स्वाश्रयकार्याभावः । इह तु विपर्ययो दृश्यत इति मत्वा प्रश्नः । कथं पुनरिति । पुंवादित्यनेन नुम्प्रतिषेधोऽशक्योऽतिदेष्टुम् । नहि पुंसि नुम्प्रतिषेधो विहितः । कामचारश्चेति । यत्र क्रिया शब्देन नोपात्ता तत्र कामचारः । ननु ब्राह्मणवत्क्षत्त्रिये वर्तितव्यमित्यादावुपात्तक्रियेऽतिदेशे । प्रतिपत्ता चोपमाने भावाभावयोरन्यतरमवगत्य वाक्यशेषं कल्पयति । तत्र पुंसि नुमभावदर्शनान्नपुंसके पुंवदतिदेशान्नुमभावः प्रतीयते । तत्रेह शास्त्रे यथालक्ष्यं क्वचिद्भवतीत्यस्याध्याहारः । क्वचिन्न भवतीत्यस्य । क्वचिदुभयस्य । यथा स्थानिवदतिदेशे । तथा च वाय्वोरित्यादौ स्वाश्रयलोपाभावः । नहि किंचिदिति । तस्माच्छसो नः पुंसीति नत्वातिदेशस्तृतीयादिषु पुंवद्भावातिदेशात्पूर्वसवर्णदीर्घाभावाच्चेह न संभवति । नुम्प्रकृत

---

उ०— तृतीयादिषु भा० । अन्यत्रेति । गोतो णिदित्यादौ । तत्र हि णिदाश्रयवृद्ध्याद्यतिदिश्यते । स्वाश्रयाभावस्तु नातिदिश्यते । नैवमिह । यतः स्वाश्रययोर्नुम्ह्रस्वयोरभावो दृश्यते । नुम्ह्रस्वाभावादिकं तु न दृश्यत इत्यर्थः । नहि पुंसीति । पुंसि यद्विहितं तन्नपुंसकेऽपि भवतीति हि पुंवदित्यस्यार्थ इति भावः । ननु कश्चिन्नियमदर्शनात्कथं कामचारोक्तिरत आह—यत्र क्रियेति । कथं पुनः कदाचिद्भावस्य प्रतीतिः कदाचिदभावस्येति विभागोऽत आह—प्रतिपत्ता चेति । शास्त्रे च लक्ष्यानुसाराद्व्यवस्थेत्याह—यथालक्ष्यमिति । यथा स्थानिवदिति । अचः परस्मिन्नित्यत्र तन्त्रादिन्यायेन वाक्यभेदाश्रयणादिति भावः । न संभवतीति । एवं च नत्वस्येह विषयेऽसंभवान्नहि

पुंवदिति नुम्प्रतिषेधश्चेद्गुणनाभावनुडौत्त्वानां* प्रतिषेधो वक्तव्यः। गुण। ग्रामण्ये ब्राह्मणकुलाय। गुण। नाभाव। ग्रामण्या ब्राह्मणकुलेन। नाभाव। नुट्। ग्रामण्यां ब्राह्मणकुलानाम्। नुट्। औत्त्वम्। ग्रामण्यां ब्राह्मणकुले ह्रस्वत्वमप्रतिषिद्धं ह्रस्वाश्रयाश्चैते विधयः प्राप्नुवन्ति।

**ह्रस्वाभावार्थं च ॥ २ ॥**

किंच। नुम्प्रतिषेधार्थं च। कथं पुनरत्राप्रकृतस्यासंशब्दितस्य ह्रस्वत्वस्य प्रतिषेधः शक्यो विज्ञातुम्।

**अर्थातिदेशात्सिद्धम् ॥ ३ ॥**

नैवं विज्ञायते भाष्यते पुमाननेन शब्देन सोऽयं भाषितपुंस्कः भाषितपुंस्कस्य शब्दस्य पुंशब्दो भवतीति। कथं तर्हि। भाष्यते पुमानस्मिन्नर्थे सोऽयं भाषितपुंस्कः भाषितपुंस्कस्यार्थस्य पुंवदर्थो भवतीति।

---

प्र०—**इति**। अनेन प्रत्यासत्तिमाश्रयति। **ह्रस्वत्वमप्रतिषिद्धमिति**। तस्याप्रकृतत्वात्। **अर्थातिदेशात्सिद्धमिति**। यद्यपि प्रकरणमनपेक्ष्य व्याप्त्याश्रयेणापि ह्रस्वाभावः सिध्यति तथाऽपि संभवात्परिहारान्तरमाश्रितम्। यदि कार्यातिदेशः स्यात्तदा प्रकृतत्वाप्रकृतत्वलक्षणो भेदः स्यादर्थे त्वतिदिश्यमाने नास्त्ययं भेदः। **नैवं विज्ञायत इति**। यदा शब्देऽन्यपदार्थे कार्यातिदेशः स्यात्तदा प्रकृतत्वात्तस्यैव नुमः प्रतिषेधः स्यान्न ह्रस्वस्य। **भाष्यते पुमानस्मिन्नर्थ इति**। अर्थोऽन्यपदार्थ आश्रीयते स चार्थो नपुंसकलक्षणो विरोधान्नाऽऽश्रीयते। नहि नपुंसकेऽर्थे पुंसो भाषणमुपपद्यते। तस्माच्छब्दप्रवृत्तिनिमित्तलक्षणोऽर्थोऽन्यपदार्थत्वेनाऽऽश्रीयते। तद्योगाच्चाभिधेयं नपुंसकं तदपि भाषितपुंस्कमुच्यते। तस्यार्थस्य पुंस्त्वातिदेशाद्द्वावपि नुम्ह्रस्वौ न भवतः। पुंसि द्वयोरप्यभावात्। अर्थस्य चापौरुषेयत्वादतिदेशासंभवात्तद-

---

उ०—किंचिदित्युक्तमिति भावः। भाष्ये-**ग्रामण्यां कुल इति**। पुंवत्त्वाभावे तु नुमि ग्रामणिनीत्येव। **संभवादिति**। व्यापित्वाच्चेत्यपि द्रष्टव्यम्। भाष्ये पुंशब्दो भवतीत्यस्य पुंशब्दवत्कार्यं भवतीत्यर्थः। भाष्येऽ**स्मिन्नर्थ इति**। यत्रार्थे प्रवृत्तिनिमित्तलक्षणे बुद्धिस्थे सतीत्यर्थः। **नपुंसकलक्षण इति**। व्यक्तिरूप इत्यर्थः। **प्रवृत्तिनिमित्तेति**। यथा ग्रामण्यादिशब्दानां ग्रामनयनादि। ननु प्रवृत्तिनिमित्तस्य पुंवत्त्वेऽपि तदाश्रयस्य क्लीबत्वसत्त्वेन नुम्ह्रस्वौ दुर्वारावत आह—**तद्योगाच्चेति**। यदप्यभिधेयं नपुंसकं तदपि भाषितपुंस्कमुच्यत इत्यन्वयः। अत्रापि पक्षे फलतः कार्यातिदेशः संपद्यत इत्याह—**तस्यार्थस्येति**। अभिधेयस्य क्लीबरूपार्थस्येत्यर्थः। नन्विदमसंगतम्। अर्थस्याजादितृतीयादिविभक्तिपरत्वासंभवात्। तदुक्तं स्त्रियाः पुंवदिति सूत्रे भाष्ये। न ह्यर्थेन पौर्वापर्यं संभवतीति चेत्। न। अर्थातिदेशादित्यस्यार्थविशिष्टशब्दरूपातिदेशात्सिद्धमित्यर्थेनादोषात्। भाषितपुंस्कक्लीबत्व-

---

* ७. ३. १११; १२०; ७. १. ५४; ७. ३. ११९.

**तद्धितलुकप्रतिषेधश्च ॥ ४ ॥**

तद्धितलुकश्च प्रतिषेधो वक्तव्यः । पीलुर्वृक्षः । पीलु फलम्* । पीलुना पीलुन इति ।

**न वा समानायामाकृतौ भाषितपुंस्कविज्ञानात् ॥ ५ ॥**

न वा वक्तव्यम् । किं कारणम् । समानायामाकृतौ भाषितपुंस्कविज्ञानात् । समानायामाकृतौ यद्भाषितपुंस्कमाकृत्यन्तरे चैतद्भाषितपुंस्कम् । किं वक्तव्यमेतत् । न हि । कथमनुच्यमानं गंस्यते । एतदप्यर्थनिर्देशान्सिद्धम् ।

**ई च द्विवचने ॥ ७ । १ । ७७ ॥**

किमुदाहरणम् । अक्षी ते इन्द्र पिङ्गले । नैतदस्ति । पूर्वसवर्णनाप्येतत्सिद्धम्× । इदं तर्हि । अक्षीभ्यां ते नासिकाभ्याम् । इदं चाप्युदाहरणम् । अक्षी

प्र०—तिदेशद्वारेणानेककार्यातिदेश एवायं संपद्यते । तत्र यद्यप्यन्तरङ्गो ह्रस्वस्तथाऽप्यपवादविषयं प्रकल्प्योत्सर्गाणां प्रवर्तनान्नात्र प्रवर्तते । ह्रस्वाभावाच्च गुणादीनां निमित्ताभावादप्रवृत्तिः सिद्धा । **तद्धितलुगिति** । अर्थातिदेशस्यैव प्रयोजनान्तरं चोद्यमुखेनोपन्यस्यते । फले लुगित्योरन्त्रो लुकि कृते पीलुशब्दो वृक्षाकृतौ पुंलिङ्गः । फलाकृतौ नपुंसकलिङ्ग इति पुंवद्भावानुमोऽप्रसङ्गः । **नवेति** । नन्वाकृतिरेवान्यपदार्थत्वेनाऽऽश्रिता भाषितपुंस्कशब्दस्य तु भाषितपुंस्कव्यपदेशो नैवाऽऽश्रितः । सत्यम् । साक्षाच्छब्दस्य भाषितपुंस्कव्यपदेशो नास्ति । अभिधेयद्वारकस्तु केन निवार्यते । तत्र पीलुशब्दो वृक्षाकृतौ पुंलिङ्गः । फलाकृतौ नपुंसकलिङ्ग इति पुंवद्भावप्रसङ्गः ।

**ई च द्विवचने** । **पूर्वसवर्णेनेति** । अक्षि औ इति स्थिते छान्दसात्पुं-

उ०—विशिष्टार्थवाचकशब्दस्य पुंस्त्वविशिष्टार्थवाचकशब्दरूपातिदेशात्क्लीबत्वस्य निवृत्त्या तत्प्रयुक्तकार्याप्राप्तिरित्याशयात् । अर्थातिदेशद्वारा कार्यातिदेशाश्रयणे फलं दर्शयति—**अनेककार्येति** । असिद्धत्वातिदेश इति पुंस्त्वस्यायमाहार्यादेशस्तत्फलमनेककार्यातिदेश इत्यन्ये । **प्रकल्प्येति** । अपवादशास्त्रवैयर्थ्यमेतन्मूलम् । अत्राप्यर्थघटितातिदेशाश्रयणवैयर्थ्यम् । नन्वर्थस्यान्यपदार्थत्वात्तद्धितलुक्याकृतिभेदात्प्रतिषेधोऽनर्थक इत्यत आह—**अर्थातिदेशस्यैवेति** । वार्तिके तद्धितलुकः प्रतिषेध इति समासः । तद्धितलुगन्तस्येत्यर्थः । ननु समानायामाकृतौ भाषितपुंस्केत्युक्त्या शब्दस्यान्यपदार्थत्वं भाति तदयुक्तमिति शङ्कते—**नन्विति** । **साक्षादिति** । भाष्यं तु फलितार्थकथनपरमिति भावः । अनेन पूर्वभाष्यस्य मदुक्तरीत्या व्याख्यानं सूचितम् । **वृक्षाकृतौ** । वृक्षत्वव्याप्यजातौ । एवं फलाकृतावित्यपि । पीलोः फलमिति व्युत्पत्तावपि फलत्वावान्तरजातिरेव प्रवृत्तिनिमित्तमिति भावः ।

**ई च द्वि०** । ननु परत्वान्नुमि तेन व्यवधानात्पूर्व सवर्णदीर्घेण न भाव्यम् । न च पुंवद्भावः । अभाषितपुंस्कत्वादत आह—**छान्दसादिति** । ननु नुमः पूर्वं दीर्घोऽस्त्वत

* ४. ३. १६३. × ६. १. १०२.

ते इन्द्र पिङ्गले । ननु चोक्तं पूर्वसवर्णेनाप्येतत्सिद्धमिति । न सिध्यति । नुमा* व्यवहितत्वात्पूर्वसवर्णो न प्राप्नोति । छन्दसि नपुंसकस्य पुंवद्भावो वक्तव्यो मधोर्गृभ्णामि मधोस्तृप्ता इवाऽऽसत इत्येवमर्थम् । पुंवद्भावेन नुमो निवृत्तिर्नुमि निवृत्ते पूर्वसवर्णेनैव सिद्धम् । स्वरार्थस्तर्हीकारो वक्तव्यः× । उदात्तस्वरो यथा स्यान्नपुंसकस्वरो मा भूदिति । ननु च पुंवद्भावातिदेशादेव स्वरो भविष्यति । अशक्यः पुंवद्भावातिदेशः स्वरे तन्त्रं श्रयितुम् । इह हि दोषः स्यात् । मध्वस्मिन्नस्ति मधुर्मास इति+ । स तर्हि पुंवद्भावो वक्तव्यः । न वक्तव्यः । प्रकृतं÷ पुंवदिति वर्तते

---

**प्र०**—वद्भावाच्छीभावे नुमि चासति प्रथमयोः पूर्वसवर्ण इत्यनेन । **नुमा व्यव**हितत्वा**दिति** । प्रथमयोः पूर्वसवर्ण इत्यत्राक इति वर्तते । तेनागचोः स्थाने पूर्वसवर्णदीर्घ उच्यमानो नुम्व्यवधाने नास्तीत्यक्षिणी इति प्राप्नोति परत्वाच्च नुम्प्राप्नोति । ईकारस्तु विधीयमानः परत्वान्नुमं बाधते । तेन शीभावे कृते पूर्वसवर्णेनाक्षी इति सिध्यति । **नुमि निवृत्त इति** । अप्रवृत्तिरेव निवृत्तिः । शीभावोऽपि पुंवद्भावान्न भवति । **स्वरार्थ इति** । उदात्तग्रहणानुवर्तनादीकार उदात्तः । **नपुंसकस्वर इति** । नब्वि-षयस्यानिसन्तस्येत्याद्युदात्तत्वम् । **ननु चेति** । अव्युत्पत्तिपक्षे चोद्यते । व्युत्पत्ति-पक्षे त्वशेर्निदिति नित्त्वादाद्युदात्तत्वेन भाव्यम् । **मधुर्मास इति** । मत्वर्थे मास-तन्वोर्मधोर्ञ्चेति यत उत्पन्नस्य लुगकारेकाररेफाश्च वक्तव्या इति लुकि कृते मासे पुंसि मधुशब्दो वर्तत इत्याद्युदात्तत्वं न स्यात् । तस्माद्यस्यान्यत्र नपुंसकत्वं दृष्टं तस्यासत्यपि नपुंसकत्व आद्युदात्तत्वमिष्यत इति पुंवद्भावेऽपि [illegible]-मीकारो विधेयः । **स तर्हीति** । मधोर्गृह्णातीत्येवमाद्यर्थः । **प्रकृतमिति** । वाक्य-

---

**उ०**—आह—**परत्वाच्चेति** । एतत्सूत्रसत्त्वे यथा सिध्यति तथा दर्शयति—**ईकारास्त्विति** । इतरः प्रकारान्तरेणैतत्सूत्रं विनाऽपि नुमो निवृत्तिं दर्शयति—**छन्दसि नपुंसकस्येति** । भाष्ये मधोस्तृप्ता इत्यादौ क्षीरवाची नित्यनपुंसको मधुशब्दः । नन्वीकारविधावपि कथं तस्या-न्तोदात्तत्वमत आह—**उदात्तेति** । **नब्विषयस्येति** । नपुंसकविषयस्येत्यर्थः । **अव्युत्प-त्तीति** । अत्र पक्षे पुंवत्त्वेन नपुंसकत्वाभावान्नब्विषयस्येत्यस्याप्रवृत्तौ प्रातिपदिकस्वरेणा-न्तोदात्तत्वमिति भावः । **व्युत्पत्तीति** । अत्र पक्षे सत्यपि पुंवत्त्व आद्युदात्तत्वमेवेती-कारो न वक्तव्य एवेति भावः । **तस्माद्यस्यान्यत्रेति** । नब्विषयस्येत्यत्र [illegible]शब्दो न नित्यनपुंसकपरः । मध्वस्मिन्नित्यत्र मधुशब्दस्य माक्षिकमद्यमकरन्दान्यतमवाचकस्य शाश्व-तकोशसंमतोभयलिङ्गस्य भाष्यसंमतस्वरानापत्तेः । मकरन्दस्य मद्यस्य माक्षिक-स्यापि वाचकः । अर्धर्चादिगणे पाठात्पुंनपुंसकयोर्मधुः ॥ इति शाश्वतः । अत्र सूत्रेऽनु-

---

* ७, १. ७३. × ७, १, ७५. + ४, ४, १२८, ÷ ७. १. ७४.

**नाभ्यस्ताच्छतुः ॥ ७ । १ । ७८ ॥**

कस्यायं प्रतिषेधः । नुम इत्याह । तन्नुमो ग्रहणं कर्तव्यम् । न कर्तव्यम् । प्रकृतमनुवर्तते । क्व प्रकृतम् । इदितो नुम्धातोः [ ७. १. ५८ ] इति । तद्वा अनेकग्रहणेन व्यवच्छिन्नमशक्यमनुवर्तयितुम् । एवं तर्हि सर्वनामस्थान इति÷ वर्तते सर्वनामस्थाने यत्प्राप्नोति तस्य प्रतिषेधः । तद्वै बहुतरकेण व्यवच्छिन्नमशक्यमनुवर्तयितुम् । अथेदानीं व्यवहितमपि शक्यतेऽनुवर्तयितुं नुमेवानुवर्त्य इहार्थमुत्तरार्थं च । इह चैव प्रतिषेधः सिद्धो भवतीह चाऽऽच्छीनद्योर्नुम् [८०] इति नुम्ग्रहणं न कर्तव्यं भवति ।

**आच्छीनद्योर्नुम् ॥ ७ । १ । ८० ॥**

इह कस्मान्न भवति । अदती घ्नती लुनती पुनती । लोपे× कृतेऽवर्णाभा-

---

प्र०—भेदेन संबन्धः क्रियते । छन्दसि नपुंसकं पुंवदित्येकम् । अस्थ्यादीनां छन्दसि द्विवचन ईकारो भवतीति द्वितीयं वाक्यम् ।

**नाभ्यस्ताच्छतुः** । **कस्यायमिति** । आच्छीनद्योर्नुमिति नुम्ग्रहणाद्व्यवहितानुवृत्तिर्नाऽऽश्रिता । नचानन्तरः प्रतिषेधार्ह इति प्रश्नः । **एवं तर्हीति** । उगिदचां सर्वनामस्थाने धातोरित्यतः सर्वनामस्थानं निषेध्यलक्षणार्थं विज्ञायते । सर्वनामस्थाने यत्प्राप्नोति तदभ्यस्ताच्छतुर्न भवतीति नुम एव प्रतिषेधः संबध्यते । **बहुतरकेणेति** । नुमागमश्चतुर्भिर्योगैर्विच्छिन्नः सर्वनामस्थानं तु पञ्चभिरिति प्रकर्षप्रत्ययनिर्देशः ।

**आच्छीनद्योर्नुम्** । **इह कस्मादिति** । सर्वत्रैवावर्णस्य निवृत्त्या भाव्यम् । क्वचिल्लुका क्वचिच्छ्लुना क्वचिदेकादेशेन क्वचिच्छ्नाभ्यस्तयोरात इति लोपेन । तत्रावश्यं भूतपूर्वगतिराश्रयितव्या । अवर्णनिवृत्तिशास्त्रस्य वा नुमागमविधानात्पूर्वं विप्रतिषेधादप्रवृत्तिस्ततश्चात्रापि प्रसङ्ग इति भावः । **लोपे कृत इति** । नित्यत्वाद-

---

उ०—वृत्तावक्ष्यादीनामेव द्विवचन एव पुंवत्त्वं स्यान्नतु मधोरित्यादावत आह—**वाक्यभेदेनेति** ।

**नाभ्यस्ता०** । नन्वनन्तरस्यायोग्यत्वाद्व्यवहितस्यैव प्रतिषेधो भविष्यतीति प्रश्नानुपपत्तिरत आह—**आच्छीति** । यद्यत्र नुमोऽनुवृत्तिस्तर्हि तत्र तदुपादानं व्यर्थमिति स्पष्टमेवेत्यर्थः । **न चानन्तर इति** । शत्रन्ताद्विधानाभावादित्यर्थः । **निषेध्यलक्षणार्थमिति** । निषेध्योपलक्षणार्थमित्यर्थः ।

**आच्छीनद्योः** । **क्वचिदित्यादि** । अदतीत्यादौ लुका । जुह्वतीत्यादौ श्लुना । तुदतीत्यादावेकादेशेन । लुनतीत्यादौ श्नाभ्यस्तयोरिति । **तत्रावश्यमिति** । सांप्रतिकावर्णान्तादुत्तरस्य शतुरसंभवात् । **विप्रतिषेधादिति** । परत्वान्नुम एव प्रवृत्त्या ततः पूर्वं लुगादीनामप्रवृत्तिरित्यभिमानः । क्वचित्तु पाठः प्रतिबन्धादिति । नुम्विधेरनवकाशत्वप्रसङ्गेन प्रतिबन्धात्पूर्वमप्रवृत्तिरित्यर्थः । अयमेव युक्तः पाठः । ननु

---

÷ ७. १. ७०. × २. ४. ७२; ६. ४. ११२.

---

१ क. ख. ग. 'र्वं प्रतिबन्धाद' ।

वात् । किं तर्ह्यस्मिन्योग उदाहरणम् । याती यान्ती । अत्राप्येकादेशे+ कृते व्यपवर्गाभावान्न प्राप्नोति । अन्तादिवद्भावेन व्यपवर्गः । उभयत आश्रये नान्तादिवत् । नोभयत आश्रयः करिष्यते । नैवं विज्ञायतेऽवर्णान्ताच्छतुर्नुम्भवतीति । कथं तर्हि । अवर्णान्नुम्भवति । तच्चेदवर्णं शतुरनन्तरमिति ।

**शप्श्यनोर्नित्यम् ॥ ७ । १ । ८१ ॥**

नित्यग्रहणं किमर्थम् । विभाषा मा भूदिति । नैतदस्ति प्रयोजनम् । सिद्धोऽत्र पूर्वेणैव× । तत्राऽऽरम्भसामर्थ्यान्नित्यो विधिर्भविष्यति । तदेतन्नित्यग्रहणं सांन्यासिकं तिष्ठतु तावत् ।

**सावनडुहः ॥ ७ । १ । ८२ ॥**

**अनडुहः सावाम्प्रतिषेधो नुमोऽनवकाशत्वात् ॥ १ ॥**

अनडुहः सावाम्प्रतिषेधः प्राप्नोति । किं कारणम् । नुमोऽनवकाशत्वात् । अनवकाशो नुमामं* बाधते ।

**न वाऽवर्णोपधस्य नुम्वचनात् ॥ २ ॥**

न वैष दोषः । किं कारणम् । अवर्णोपधस्य नुम्वचनात् । अवर्णोपधस्य नुमं वक्ष्यामि । तदवर्णग्रहणं कर्तव्यम् । न कर्तव्यम् । प्रकृतमनुवर्तते । क्व

प्र०—न्तरङ्गत्वाच्च । पूर्वोक्तेनैवाभिप्रायेण चोदयति—**किं तर्हीति** । इतरः सांप्रतिकमवर्णान्तं दर्शयितुमाह—**यातीति** । **नैवं विज्ञायत इति** । एवं हि विज्ञायमानेऽवर्णे शता चोभयमाश्रितं स्यात् । **अवर्णान्नुम्भवतीति** । अवर्णात्पर इत्यर्थः । **शत्रवयवव्यतिरिक्तश्चावर्णो** गृह्यते । आदित्युपादानसामर्थ्यात् । **तच्चेदवर्णमिति** । शत्रवयवस्तकारः शतृशब्देनोच्यते । नह्यन्यथैकादेशे कृते शतुरनन्तरमवर्णं भवति । उभयत आश्रये च नान्तादिवदित्युक्तम् । तस्माच्छत्रवयवस्तकारः शतृशब्देनोच्यते । शत्रवयवाकारव्यतिरिक्तं चावर्णमेकादेशात्मकमाश्रीयत इति न कश्चिद्दोषः ।

**सावनडुहः** । आमागमः सर्वनामस्थानमात्रे विधीयमानः सोरन्यत्र सावकाशो निरवकाशेन नुमा बाध्येतेति मत्वाऽऽह—**अनडुहः साविति** । **अवर्णोपधस्येति** । न चाऽऽमा विनाऽवर्णोपधत्वसंभव इति निमित्तमेव नुम आमिति बाध्यबाधकभावाभावः ।

उ०—विप्रतिषेधान्निरवकाशत्वाद्वा पूर्वं नुमो लोपलुकोरप्रवृत्तिरित आह—**नित्यत्वादिति** । **पूर्वोक्तेनेति** । निरवकाशत्वरूपेणेत्यर्थः । **व्यतिरिक्तश्चेति** । तदवयवग्रहणे तु व्यभिचाराभाव इति भावः । एकादेशेऽवर्णे शत्रनन्तरत्वं न संभवतीत्यत आह—**शत्रवयव इति** ।

**शप्श्यनो०** । **सांन्यासिकमिति** । पूर्वसूत्रे वाग्रहणानुवृत्तौ तात्पर्यग्रहार्थं तदावश्यकमिति भावः । अन्यथा सामर्थ्येनास्यैव वैकल्पिकत्वं स्यादिति बोध्यम् ।

**सावनडुहः** । वार्तिके प्रतिषेधशब्देनाभाव उच्यते । **निमित्तमेवेति** । तथा चोपजी-

+ ६. १. १०१. × ७. १. ८०. * ७. १. ९८.

प्रकृतम् । आच्छीनद्योर्नुम् [ ७, १. ८० ] इति । यदि तदनुवर्ततेऽनडुहि यावन्त्यवर्णानि सर्वेभ्यः परो नुम्प्राप्नोति । नैष दोषः । मिदचोऽन्त्यात्परः [ १, १. ४७ ] इत्यनेन यत्सर्वान्त्यमवर्णं तस्मात्परो भविष्यति ।

पुनःप्रसङ्गविज्ञानाद्वा सिद्धम् ।

अथवा पुनःप्रसङ्गान्नुमि कृत आम्भविष्यति ।

यथाऽऽत्त्वादिषु द्विर्वचनम् ॥ ३ ॥

तद्यथा—जग्ले मम्ले ईजतुः ईजुरित्यात्त्वादिषु* कृतेषु पुनःप्रसङ्गाद्द्विर्वचनं भवत्येवमत्रापि नुमि कृत आम्भविष्यति । नैष युक्तः परिहारः । विप्रतिषेधे पुनःप्रसङ्गो विप्रतिषेधश्च द्वयोः सावकाशयोर्भवति । इह पुनरनवकाशो नुमामं बाधते । एवं तर्हि वृत्तान्तादेष परिहारः प्रस्थितः । कस्माद्वृत्तान्तात् । इदमयं चोद्यो भवत्यनडुहः सावाम्प्रतिषेधो नुमोऽनवकाशत्वादिति । तस्य परिहारो न वाऽवर्णोपधस्य नुम्वचनादिति । ततोऽयं चोद्यो भवति यत्र तर्ह्यवर्णप्रकरणं नास्ति तत्र त आमा नुमो बाधनं प्राप्नोति बह्वनड्वांहि÷ ब्राह्मणकुलानीति । तत उत्तरकालमिदं पठितं पुनःप्रसङ्गविज्ञानाद्वा सिद्धमिति ।

---

प्र०—**अनडुहि यावन्तीति** । अनडुहोऽकारान्तत्वासंभवादनडुहाऽवर्णं विशेष्यते न त्ववर्णेनानडुच्छब्दस्ततः सर्वावर्णानां नुम्प्रसङ्गः । यद्येवं सत्यामप्यादित्यस्यानुवृत्तौ यदेव संनिहितमवर्णं तस्यैव नुम्स्यात्तथा च नुमाऽऽम् बाध्येत । **नैष दोषः** । आगमिभेदात् । आमनडुहो नुम्त्ववर्णस्य । तस्मात्सर्वावर्णान्नुम्प्रसङ्ग एव दोषः । **मिदचोऽन्त्यादिति** । मित्त्वलिङ्गाच्च मित्परिभाषोपतिष्ठते । तदुपस्थानादुकारात्परो नुम्प्रसक्त आदित्यधिकारादवर्णादन्त्यात्परः क्रियते । न चाऽऽम्यकृतेऽवर्णोऽन्त्यो भवतीति सामर्थ्यादामि कृते नुम्विधीयते । अथवोकारात्पर एव विधीयते । तत्राऽऽदित्यधिकारादयमर्थो भवति । यथाऽवर्णात्परो नुम्भवति तथा कर्तव्यमेवं चावर्णात्परो भवति । यदि कृते नुम्याम्क्रियते । एवं च सत्यादित्यधिकारोऽनुगृहीतो भवति । परिभाषा च न त्यक्ता भवति । **पुनःप्रसङ्गविज्ञा-**

---

उ०—व्यविरोधान्न नुम् बाधके इत्यर्थः । **यद्येवमिति** । तावतैवाऽऽदित्यनुवृत्तिः कृतार्थेति भावः । **आगमिभेदादिति** । तद्भेदेऽपि नुमनुटोर्बाध्यबाधकभावस्य दृष्टत्वात्संभवेऽपि बाधाच्चेदं चिन्त्यम् । तस्मान्नुमाऽऽम्बाध्येतेति पूर्वपक्ष एव भाष्यतात्पर्यमुचितम् । नत्वाम्नुमोर्बाध्यबाधकभावाभावे । ननु परिभाषाधिकारयोः परस्परप्रतिबन्धादुभयोरप्यप्रवृत्तिः स्यादत आह—**मित्त्वलिङ्गेति** । **अथवेति** । अत्र पक्षे वाक्यभेदः क्रियते—अनडुहोऽन्त्यादचः परो नुमित्येकम् । स चावर्णात्पर इत्यादि द्वितीयम् । तेनाऽऽमः प्रवृत्तिरनुज्ञाता भवति तदाह—**एवं चेति** । **न त्यक्ता भवतीति** । आमश्च बाधो न भवतीत्यपि बोध्यम् ।

---

*६. १. ४५; १५;—८. ÷ ७. १. ७२; ९८,

**दिव औत् ॥ ७ । १ । ८४ ॥**

**दिव औत्त्वे धातुप्रतिषेधः ॥ १ ॥**

दिव औत्त्वे धातोः प्रतिषेधो वक्तव्यः । अक्षद्यूरिति । अधात्वधिकारात्सिद्धम् । अधातोरिति वर्तते । क्व प्रकृतम् । उगिदचां सर्वनामस्थानेऽधातोः [ ७. १. ७० ] इति ।

**अधात्वधिकारात्सिद्धमिति चेन्नपुंसके दोषः ॥ २ ॥**

अधात्वधिकारात्सिद्धमिति चेन्नपुंसके दोषो भवति । काष्ठतङ्क्षि कूटतङ्क्षि । नपुंसकस्य झलचः [ ७२ ] अधातोरिति प्रतिषेधः प्राप्नोति ।

**उक्तं वा ॥ ३ ॥**

किमुक्तम् । अननुबन्धकग्रहणे हि न सानुबन्धकस्येति× । अथवा संबन्धमनुवर्तिष्यते ।

**इतोऽत्सर्वनामस्थाने ॥ ७ । १ । ८६ ॥**

**इतोऽद्वचनमनर्थकमाकारप्रकरणात् ॥ १ ॥**

---

**प्र०—नाड्वेति** । चार्थे वाशब्दः । बहूवनड्वांहीत्यत्र परत्वादामि कृते पुनःप्रसङ्गविज्ञानान्नपुंसकस्य झलच इति नुम्क्रियत इति वाक्यार्थः । भाष्यकारस्तु न्यायव्युत्पादनार्थं विकल्पार्थं वाशब्दं व्याख्याय दूषयित्वा समुच्चयार्थमेव व्याचष्टे—**वृत्तान्तादिति** । प्रसङ्गो वृत्तान्तश्चोद्यप्रसङ्गादित्यर्थः । अथवा वृत्तोऽतिक्रान्तोऽयं प्रबन्धश्चोद्यसमाधानलक्षणस्तदन्ते व्यवस्थितं यच्चोद्यं तदुपचाराद्वृत्तान्तशब्दवाच्यं तस्मादित्यर्थः ।

**दिव औत् । दिव औत्व इति** । विशेषानुपादानाद्धातोरपि प्राप्नोति । **अक्षद्यूरिति** । ऊठि कृत एकदेशविकृतस्यानन्यत्वादौत्वप्रसङ्गः । **अननुबन्धकग्रहण इति** । अव्युत्पन्नं दिविति प्रातिपदिकमननुबन्धकम् । व्युत्पत्तिपक्षेऽप्यवयवानां प्रत्ययादीनां सानुबन्धकत्वं न प्रातिपदिकस्य । **संबन्धमिति** । उगिदचामित्यनेन । दिव औदित्यत्र त्वधातोरिति वर्तत उगिदचामिति निवृत्तम् ।

**इतोऽत्सर्वनामस्थाने** । **इतोऽद्वचनमिति** । क्वचिदेकादेशविधानात्क्वचिद्दीर्घविधा-

---

**उ०—चार्थ इति** । प्रकृतदोषस्य नेदं परिहारान्तरं किंतु दोषान्तरस्यैव परिहार इत्यर्थः । **परत्वादिति** । आमनड्वानित्यत्र सावकाशो नुम् श्रेयांसीत्यादौ । **न्यायेति** । प्रकृतदोषपरिहारत्वासंभवरूपेत्यर्थः । **तदन्त इति** । प्रकृतचोद्यपरिहारे कृते बहूवनड्वांहीत्यत्र कथमिति यच्चोद्यं तस्माद्धेतोरयं परिहार इत्यर्थः ।

**दिव औत्** । ननूठि दिव्रूपाभावोऽत आह—**ऊठीति** । **व्युत्पत्तीति** । दिवेर्डिविरितीति भावः । दिव आचारक्विप् नास्त्येवेति न तत्र पक्षयोः फलभेदः ।

**इतोत्स०** । क्वचित्पन्था इत्यादौ । क्वचित्पन्थानावित्यादौ ।

---

× ४. १. १५.

इतोऽद्वचनमनर्थकम्। किं कारणम् । आकारप्रकरणात् । आदिति+ वर्तते ।

**षपूर्वार्थं तु ॥ २ ॥**

षपूर्वार्थं तर्ह्यद्वक्तव्यः। ऋभुक्षाणमिन्द्रम्। ऋभुक्षणमिन्द्रम्* ।

**पुंसोऽसुङ् ॥ ७ । १ । ८९॥**

**असुङ्युपदेशिवद्वचनं स्वरसिद्ध्यर्थं बहिरङ्गलक्षणत्वात् ॥ १ ॥**

असुङ्युपदेशिवद्भावो वक्तव्यः। उपदेशावस्थायामेवासुङ् भवतीति वक्तव्यम्। किं प्रयोजनम्। स्वरसिद्ध्यर्थम्। उपदेशावस्थायामसुङि कृत इष्टः स्वरो यथा स्यात्। परमपुमानिति। अक्रियमाणे ह्युपदेशिवद्भावे समासान्तोदात्तत्वे×ऽसुङान्तर्यतोऽस्वरकस्यास्वरकः स्यात्। किं पुनः कारणं समासान्तोदात्तत्वं तावद्भवति न पुनरसुङ्। न परत्वादसुङा भवितव्यम्। बहिरङ्गलक्षणत्वात्। बाहिरङ्गलक्षणोऽसुङ्। अन्तरङ्गः स्वरः। असिद्धं बहिरङ्गमन्त-

प्र०—नाच्च ह्रस्वस्य श्रवणेन भाव्यमित्याकार एव प्रकृत इतो विधेय इत्यर्थः । **षपूर्वार्थमिति** । वा षपूर्वस्य निगम इति दीर्घविकल्पेन रूपद्वयसिद्धिराकारविधौ त्वेकमेव रूपं स्याद्दीर्घविकल्पस्तु तक्षणमित्याद्यर्थं स्यात् ।

**पुंसोऽसुङ्** । **असुङीति** । पातेर्डुम्सुनित्याद्युदात्तस्य पुंसः सकारस्याविद्यमानोदात्तत्वादनुदात्तस्य स्थानेऽसुङि क्रियमाण आन्तरतम्यादनुदात्तं पदमेकवर्जमिति वचनाद्वाऽनुदात्त एव भवतीति पुमानित्यादौ दोषाभावः । परमपुमानित्यत्र त्वन्तरङ्गत्वात्समासान्तोदात्तत्वे कृते सर्वनामस्थान उत्पन्नेऽसुङ् क्रियमाणोऽनुदात्तः प्राप्नोति । उदात्तश्चेष्यते । ननु चोकारस्य कृतमपि समासान्तोदात्तत्वमसुङि कृतेऽनन्त्यत्वान्न व्यवतिष्ठते । नैतदस्ति । अन्तरङ्गे स्वरे कर्तव्ये बहिरङ्गस्यासुङोऽसिद्धत्वान्निर्वृत्तस्य चानिवर्तनादुपदेशिवद्वचनात्तु पूर्वमसुङ् भवति । पश्चात्समासान्तोदात्तत्वम् । **अस्वरकः स्यादिति** । प्रवृत्तिकाले स्वरविशेषस्यानुपादानादनभिमतानुदात्तत्वप्रसङ्गाच्चास्वरक इत्युच्यते । न ह्यस्वरकस्याच उच्चारणं संभवति । अथवोदात्तत्वाभावाद-

उ०— **पुंसोऽसु०** । समस्तोदाहरणदाने बीजमाह—**पातेरिति** । डुम्सुन उगित्त्वं बहुपुंसीत्यादौ ङीबर्थम् । सूतेः सस्य पोऽन्त्यस्य ह्रस्वोऽम्सुन्प्रत्यय इति स्त्रियामितिसूत्रे भाष्ये स्पष्टम्। **दोषाभाव इति** । सर्वथाऽप्यनुदात्तस्यैवेष्टत्वादिति भावः । **अन्तरङ्गत्वादिति** । विभक्त्यनपेक्षत्वेनेति भावः । **अनन्त्यत्वादिति** । असुङस्त्वन्त्यत्वात्प्रवर्तयिष्यत इत्यर्थः । **अनभिमतेति** । एवं चास्वरक इत्यस्यानभिमतस्वरक इत्यर्थ इति भावः । अकृतव्यूहपरिभाषा तु नास्त्येवेति भावः । **अथवेति** । अत्र पक्ष इष्टमुदात्तत्वं स्वरशब्देन विवक्षितमिति भावः । उभयं कर्तव्यमिति भाष्यार्थो न ग्राह्य

+ ७. १. ८५+ * ६. ४. ९. × ६. १. २२३.

रङ्गे। स तर्ह्युपदेशिवद्भावो वक्तव्यः। न वक्तव्यः। आद्युदात्तनिपातनं करिष्यते। स निपातनस्वरः समासस्वरस्य बाधको भविष्यति। एवमप्युपदेशिवद्भावो वक्तव्यः। स यथैव हि निपातनस्वरः समासस्वरं बाधत एवं प्रकृतिस्वरमपि बाधेत। पुमान्। तस्मात्सुष्ठूच्यतेऽसुङ्युपदेशिवद्वचनं स्वरसिद्ध्यर्थं बहिरङ्गलक्षणत्वादिति।

**गोतो णित्॥ ७। १। ९०॥**

किमिदं गोतः परस्य सर्वनामस्थानस्य णित्त्वमुच्यत आहोस्वित्सर्वनामस्थाने परतो णित्कार्यमतिदिश्यते। कश्चात्र विशेषः।

---

प्र०—स्वरक इत्युच्यते। **एवमपीति**। यस्मादुदात्तनिपातने दोषस्तस्मात्तत्परित्यागेनेत्यर्थः। **प्रकृतिस्वरमिति**। पुमानित्यादावाद्युदात्तत्वमित्यर्थः। प्रकृतिस्वरस्य कोऽवकाश इति चेत्पर्यायः स्यात्।

**गोतो णित्**। गाङ्कुटादिसूत्रे यावन्तः पक्षा उक्तास्ते सर्वे इह संभवन्ति। तत्र णकारस्येतः सर्वनामस्थानेऽभावाद्भावे वा तदनुवादे प्रयोजनाभावाण्णित्त्वव्यपदेशाभावः। संज्ञाकरणेऽपि ञ्णिद्ग्रहणे संज्ञिनोऽसंप्रत्ययः। शब्दभेदाद्भावनापक्षे णकार आदेशः प्राप्नोति। ण्वुलादि वा प्रसिद्धणित्त्वं प्राप्नोति तद्वदतिदेशस्तु निर्दोषत्वादाश्रीयते। भाष्ये तु भावना पक्ष एवाऽऽशङ्क्य निराकृतः परस्तात्स्थापितश्च। **किमिदमिति**। **ण्** इद्यस्य तण्णित्तस्य भावो णित्त्वम्। तेनायमर्थः—अणितः सर्वनामस्थानस्य स्थाने णित्सर्वनाम-

---

उ०—इत्याह—**यस्मादिति**। **प्रकृतिस्वरस्य**। नित्यत्वप्रयुक्ताद्युदात्तत्वस्य। **पर्याय इति**। कदाचिदाद्युदात्तत्वं कदाचिदन्तोदात्तत्वमित्यर्थः। वस्तुतस्तूपदेशिवद्वचनेन सर्वनामस्थान इति विषयसप्तमी व्याख्येयेति बोध्यत इति। तन्न। एवमप्यन्तरङ्गत्वेन पूर्वं स्वरस्य दुर्वारत्वात्।

**गोतो णित्**। **यावन्त इति**। ङित्त्वादिसंबन्धप्रतिपादनम्। भावनम्। संज्ञाकरणम्। अतिदेशश्चेति चत्वार इत्यर्थः। तत्राऽऽद्यः संभवन्नपि दोषसत्त्वान्नाऽऽश्रित इत्याऽऽह—**तत्र णकारस्येति**। अत्र पक्षे गोतः परं सर्वनामस्थानमित्संज्ञकणकारसंबन्धवदित्यर्थः। तत्रासतः संबन्धप्रतिपादनं न युक्तम्। सत्त्वेऽपि दोष एवेत्याह—**भावे वेति**। तृतीयोऽपि नेत्याह—**संज्ञाकरणेऽपीति**। **शब्दभेदादिति**। णिदिति हि संज्ञा नतु ञ्णिदितीति भावः। कृत्रिमाकृत्रिमन्यायेनाणादीनां ग्रहणं न स्यादिति तु तत्त्वदूषणम्। द्वितीये भाष्याभिसंहितं दोषमाह—**भावनेति**। अत्र पक्षे गोतः परस्य सर्वनामस्थानस्य णिदित्यर्थः। तत्र कर्मधारयाश्रयण आह—**णकार इति**। बहुव्रीहावाह—**ण्वुलादि वेति**। सूत्रे णिच्छब्देन णित्त्वयुक्तसर्वनामस्थानं लक्ष्यत इत्याशयेनाऽऽह—**तेनायमिति**। **णित्सर्वनामस्थानमिति**। अर्थत आन्तर्यादिति भावः।

**गोतः सर्वनामस्थाने णित्कार्यातिदेशः ॥ १ ॥**

गोतः सर्वनामस्थाने णित्कार्यमतिदिश्यते ।

**सर्वनामस्थाने णित्त्ववचने ह्यसंप्रत्ययः षष्ठ्यनिर्देशात् ॥ २ ॥**

सर्वनामस्थानस्य णिद्वचने ह्यसंप्रत्ययः स्यात् । किं कारणम् । षष्ठ्यभावात् । षष्ठीनिर्दिष्टस्याऽऽदेशा उच्यन्ते* न चात्र षष्ठीं पश्यामः। एवं तर्हि वतिनिर्देशोऽयम् । गोतो णिद्वद्भवतीति । स तर्हि वतिनिर्देशः कर्तव्यो न ह्यन्तरेण वतिमतिदेशो गम्यते । अन्तरेणापि वतिमतिदेशो गम्यते । तद्यथा । एष ब्रह्मदत्तः । अब्रह्मदत्तं ब्रह्मदत्त इत्याह ते मन्यामहे ब्रह्मदत्तवदयं भवतीति । एवमिहाप्यणितं णिदित्याह णिद्वदिति गम्यते । अथवा पुनरस्तु गोतः परस्य सर्वनामस्थानस्य णित्त्वम् । ननु चोक्तं सर्वनामस्थाने णित्त्ववचने ह्यसंप्रत्ययः षष्ठ्यनिर्देशादिति । नैष दोषः । गोत इत्येषा पञ्चमी सर्वनामस्थान इति सप्तम्याः षष्ठीं प्रकल्पयिष्यति तस्मादित्युत्तरस्य [ १. १. ६७ ] इति ।

अथ तपरकरणं किमर्थम् । इह मा भूत् । चित्रगुः शबलगुरिति । नैतदस्ति । ह्रस्वत्वे÷ कृते न भविष्यति । स्थानिवद्भावात्प्राप्नोति । अत उत्तरं पठति ।

**तपरकरणमनर्थकं स्थानिवत्प्रतिषेधात् ॥ ३ ॥**

तपरकरणमनर्थकम् । किं कारणम् । स्थानिवत्प्रतिषेधात् । प्रतिषिध्यतेऽत्र स्थानिवद्भावो गोः पूर्वणित्त्वात्वस्वरेषु स्थानिवद्भावो न भवतीति+ । स चा-

प्र०—स्थानमादेशो भवति । ण्वुलादयस्तु तदर्थाभिधानेऽसमर्थत्वान्न भवन्ति । एतन्न्यायाश्रयेण गाङ्कुटादिसूत्रेऽपि भावनापक्षे न कश्चिद्दोषः । **गोत इत्येषेति** । भावनापक्षे गोत इति पञ्चमी तद्वदतिदेशपक्षे तु षष्ठी । **तपरकरणमिति** । स्थानिवत्त्वनिषेधादानर्थक्यमिति प्रश्नः । **चित्रगुरिति** । तपरस्तत्कालस्येत्यत्राणिति नानु-

उ०—भाष्ये णित्त्वमित्यस्येत्संज्ञकणकारसंबन्धस्तद्वत्संबन्ध इति वाऽर्थः । भाष्येऽन्त्ये विशेषमाह—**गोत इति** । कार्यातिदेश इत्येतावद्वक्तव्यमत्र पक्ष इत्यर्थः । आद्ये विशेषमाह—**सर्वनामस्थाने णिद्वचने हीति** । तथा च सर्वनामस्थानस्येति वक्तव्यमित्यर्थः । हिशब्दोऽप्यर्थे । **तद्वदतिदेशपक्षे त्विति** । गोशब्दस्य सर्वनामस्थाने णितीव कार्यं भवतीत्यर्थादिति भावः । ननु चित्रगुरित्यत्र ह्रस्वत्वेऽङ्गाधिकारे तदन्तविधिसत्त्वेन स्थानिवत्त्वाद्गोशब्दान्तत्वेन प्राप्तणिद्वत्त्वस्य निवृत्तये तपरत्वमावश्यकमत आह—**स्थानिवत्त्वेति** । गोः पूर्वणित्त्वात्वेत्यादिनेति भावः । ननु गोशब्दस्याणत्वात्कथं तत्कालग्रहणमत आह—**तपर इति** । **उत्पत्तीति** । तत्पक्षेऽपि तदपेक्ष-

* १. १. ४९. ÷ १. २. ४८. + १. १. ५६*.

वश्यं प्रतिषेध आश्रयितव्यः ।

**इतरथा हि संबुद्धिजसोः प्रतिषेधः ॥ ४ ॥**

यो हि मन्यते तपरकरणसामर्थ्यादिह न भविष्यतीति संबुद्धिजसोस्तेन प्रतिषेधो वक्तव्यः स्यात् । हे चित्रगो चित्रगव इति× । अथेदानीं सत्यपि स्थानिवद्भावप्रतिषेधे गुणे कृते कस्मादेवात्र न भवति । लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेति । ननु चेदानीमसत्यपि स्थानिवद्भावप्रतिषेध एतया परिभाषया शक्यमुपस्थातुम् । नेत्याह न हीदानीं क्वचिदपि स्थानिवत्स्यात् ।

**तृज्वत्क्रोष्टुः ॥ ७ । १ । ९५ ॥**

**स्त्रियां च ॥ ७ । १ । ९६ ॥**

अथात्र विभक्तावित्यनुवर्तत उताहो न+ । किं चातः ।

**तृज्वत्स्त्रियां विभक्तौ चेत्क्रोष्ट्रीभक्तिर्न सिध्यति ।**

---

प्र०—वर्तत इत्यनणोऽपि तत्कालस्य ग्रहणम् । **इतरथा हीति** । यदि स्थानिवत्त्वनिषेधो नाऽऽश्रीयते तदा सत्यपि तपरकरणे संबुद्धौ जसि च गुणे कृते स्थानिवत्त्वात्तत्कालत्वाच्च णित्वं स्यादित्यर्थः । प्रतिषिद्धे तु स्थानिवत्त्वे गुणे कृते गोरूपस्य लाक्षणिकत्वाण्णित्त्वाप्रसङ्गः । अव्युत्पत्तिपक्षाश्रयेणैतदुच्यते । व्युत्पत्तिपक्षे तु सर्व एव लाक्षणिकः । **नहीदानीमिति** । स्वाश्रया या प्राप्तिः सा लक्षणप्रतिपदोक्तपरिभाषावशान्मा भूत्स्थानिवत्त्वनिमित्तत्वात्तु स्यादेव प्राप्तिः । नहि सा पूर्वोक्तया परिभाषया निवार्यते । स्थानिवत्त्वस्य निर्विषयत्वप्रसङ्गात् ।

**तृज्वत्क्रोष्टुः** । **अथात्र विभक्ताविति** । तज्वत्क्रोष्टुरित्यत्र सर्वनामस्थानाधिकाराद्विभक्त्यधिकारस्य न दोषो न प्रयोजनम् । विभाषा तृतीयादिष्वचीत्यत्राप्यादिशब्दस्य व्यवस्थावाचित्वाद्विभक्तय एव गृह्यन्त इति तत्रापि न विचार इति स्त्रियां चेत्यत्रैवायं विचारः क्रियते । इष्टतोऽधिकाराणां प्रवृत्तिनिवृत्तिभावात् । **क्रोष्ट्रीभक्तिरिति** । क्रोष्ट्री भक्तिरस्येति बहुव्रीहिः । भक्तिशब्दस्य प्रिया-

---

उ०—याऽस्य विलम्बोपस्थितिकत्वाच्चिन्त्यमिदम् ।+ केचित्तु तपरकरणमोकारान्तोपलक्षणार्थम् । वर्णनिर्देशेषु तपरत्वस्य प्रसिद्धत्वात् । तेन द्यौर्द्यावाविति सिद्धम् । विहितविशेषणाच्च चित्रगवित्यादौ न दोषः । वर्णग्रहणेऽपि क्वचिल्लक्षणप्रतिपदोक्तपरिभाषाङ्गीकाराद्वेत्याहुः ।

**तृज्वत्क्रोष्टुः** । भाष्ये सूत्रद्वयोपादानात्सूत्रद्वयविषयोऽयं विचार इति भ्रमं निवर्तयति—**तृज्वदिति** । **विभक्त्यधिकारस्येति** । इकोऽचीत्यतः । **न प्रयोजनमिति** । सर्वनामस्थानस्य विभक्तित्वाव्यभिचारादिति भावः । **तत्रापीति** । अत एव तदत्र नोपात्तम् । यद्यपि बहुयोगव्यवच्छिन्नत्वादननुवृत्तिरेवोचिता तथाऽपि कृत्वाचिन्तयाऽयं विचार इत्याह—**इष्टत इति** । **बहुव्रीहिरिति** । क्रोष्ट्री सेव्याऽस्येत्यर्थः । **प्रियादिष्विति** । जाते-

---

× ७. ३. १०८; १०९. + ७ १. ७३.

---

+ केचित्त्वित्यारभ्य आहुरित्यन्तो ग्रन्थः ख. पुस्तके न दृश्यते ।

तृज्वत्स्त्रियां विभक्तौ चेत्क्रोष्ट्रीभक्तिरिति+ न सिध्यति । एवं तर्हीकार एव तृज्वद्भावं वक्ष्यामि । तदीकारग्रहणं कर्तव्यम् । न कर्तव्यम् । क्रियते न्यास एव । प्रश्लिष्टनिर्देशोऽयम् । स्त्री ई स्त्री स्त्रियामिति ।

ईकारे तन्निमित्तः सः

ईकारे चेत्तन्न । किं कारणम् । तन्निमित्तः सः । तृज्वद्भावनिमित्तः स ईकारः । नाकृते तृज्वद्भाव ईकारः प्राप्नोति । किं कारणम् । ऋन्नेभ्यो ङीप् [ ४ . १. ५ ] इत्युच्यत ईकारे च तृज्वद्भावः । तदिदमितरेतराश्रयं भवति । इतरेतराश्रयाणि च न प्रकल्पन्ते । एवं तर्हि गौरादिषु* पाठादीकारो भविष्यति ।

गौरादिषु न पठ्यते ॥

न हि किंचित्तुनन्तं गौरादिषु पठ्यते । एवं तर्ह्येतज्ज्ञापयत्याचार्यो भवत्यत्रेकार इति यदयमीकारे तृज्वद्भावं शास्ति ।

---

प्र०–दिषु पाठात्पुंवद्भावाभावः । अत्रान्तरङ्गानपि विधीन्बहिरङ्गो लुग्बाधत इति लुकि कृते विभक्त्यभावान्न लुमताऽङ्गस्येति प्रत्ययलक्षणप्रतिषेधाच्च तृज्वद्भावो न प्राप्नोति तदभावादृकारान्तत्वनिमित्तो ङीबपि न प्राप्नोति । **एवं तर्हीति** । विभक्तिर्निमित्तत्वेन नाऽऽश्रीयते किं तर्हीकारः । **स्त्री ई स्त्रीति** । स्त्रिया ई स्त्रीत्वस्य द्योतक ईकार इत्यर्थः । षष्ठीसमासः । अर्थगतं च स्त्रीत्वमीकार आरोप्य नदीसंज्ञानिमित्तावामाटौ क्रियेते । **गौरादिषु पाठादिति** । पृथिवी क्रोष्टु पिप्पल्यादयश्चेति च्छेदाध्यायिनः पठन्ति । **न हि किंचिदिति** । संहिताध्यायिनो न पठन्ति । सर्वा-

---

उ०–श्चेत्यस्याप्युपलक्षणमिदम् । पूर्वनिपातप्रकरणानित्यत्वादाहिताग्न्यादित्वाद्राजदन्तादित्वाद्वा भक्तिशब्दस्य न पूर्वनिपातः । केचित्तु क्रोष्टुशब्दस्य तस्येयमिति पुंयोगात्स्त्रियां वृत्तिः । एतेन भक्तिशब्दस्य पूर्वनिपातापत्तिः । किंच जातिवाचकत्वाज्जातेश्चेत्येवं निषेधः सिद्ध इत्यपास्तमिति । तन्न । दाम्पत्यरूपपुंयोग एव तत्प्रवृत्तेः । त्वदुक्तपुंयोगे तस्येदमित्यणापत्तेस्तत्रैव भाष्य उक्तत्वाच्च । ईकार एवेत्येवकारार्थं दर्शयति–**विभक्तिरिति** । स्त्रीशब्देन स्त्रीत्वमुच्यते । द्योतकत्वसंबन्धः षष्ठ्यर्थ इत्याह—**स्त्रीत्वस्येति** । ननु स्त्र्याख्यत्वाभावान्नदीत्वाभावे कथमामाटावत आह–**अर्थगतं चेति** । स्त्रीत्वरूपार्थगतमित्यर्थः । तस्यापि स्त्रीशब्देनाभिधाने स्त्रीत्वात् । आचार्याणां मतभेदेन क्रोष्टुशब्दपाठापाठावुक्तावित्याह—**छेदाध्यायिन इति** । सर्वात्मना अपाठमिति च्छेदः । गौरादिषु न पठ्यते । ईदृशं तुन्नन्तं न किंचिदिति भाष्याक्षरार्थं इति भावः । सर्वथा पाठोऽप्रामाणिक इति तात्पर्यम् । ननु ङीप्ङीषोरनुदात्तत्वादात्त-

---

+ ३. ४. ७१; १. १. ६३. * ४. १. ४१.

तेनैव भावनं चेत्स्यादनिष्टोऽपि प्रसज्यते ।

यद्यपि नास्ति विशेषो ङीपो* वा ङीषो वा ङीनपि तु प्राप्नोति× । इह च न प्राप्नोति । पञ्चभिः क्रोष्ट्रीभिः क्रीतैः रथैः पञ्चक्रोष्टुभी+ रथैरिति । एवं तर्हि ।

न चापरं निमित्तं संज्ञा च प्रत्ययलक्षणेन ।

प्र०—त्मनाऽपाठं प्रतिपादयितुमेतदुच्यते । **ङीपो ङीषो वेति** । उदात्तयणो हल्पूर्वादिति ङीप उदात्तविधानात् । **ङीनपीति** । ततश्चाऽऽद्युदात्तत्वप्रसङ्गः । नन्वीकारे तृज्वद्भावविधानात्सतिशिष्टश्चित्स्वरो नित्स्वरं बाधिष्यते । ततश्चोदात्तयणो हल्पूर्वादित्युदात्तविधानान्नास्ति विशेषः । **नैतदस्ति** । क्रोष्टुशब्द आद्युदात्त एव तत्र ङीनि कृते प्रयोजनाभावादकृते तृज्वद्भावे नित्स्वरो न प्रवर्तेत इति पूर्वं तृज्वद्भावः परत्वाद्वा । अत्र कृते नित्स्वरः सतिशिष्टश्चित्स्वरं बाधेत । यदि तु ज्ञापकेन पिप्पल्याद्यन्तर्भावः क्रोष्टुशब्दस्यानुमीयते तदा न कश्चिद्दोषः । अपूर्वस्य त्वीकारस्यानुमानमाश्रित्य श्लोकवार्तिककारेण दोष उपात्तः । शार्ङ्गरवाद्यन्तर्भावानुमानमपि स्यादिति तस्याऽऽशयः । **पञ्चभिरिति** । तद्धितार्थेति समासः । आर्हादिति ठक् उत्पन्नस्याध्यर्धपूर्वेति लुक् । लुक् तद्धितलुकीति स्त्रीप्रत्ययस्य लुकि कृते न लुमताऽङ्गस्येति प्रत्ययलक्षणप्रतिषेधादीकारनिमित्तस्तृज्वद्भावो न प्राप्नोति । अन्तरङ्गाणां च विधीनां लुका बाधनात्पूर्वमेव तृज्वद्भावो न लभ्यते । तत्राऽऽद्येन सर्वनामस्थाने तृज्वद्भावोऽन्त्येन त्वजादिषु तृतीयादिषु विकल्पनेति हलादौ मध्यमेनाप्राप्तिरुच्यते । **पञ्चक्रोष्ट्रीभिरिति** । केचिदाहुः । भस्याढ इति ठक्छसोश्चेति वा प्राप्तः पुंवद्भावो जातेश्चेति निषिध्यते । तदयुक्तम् । भत्वाभावाच्छस्सहचरितस्य ठको ग्रहणात्प्राप्ति-

उ०—त्वकृतो विशेषोऽस्तीत्यत आह—**उदात्तयण इति** । **आद्युदात्त एवेति** । तुन्नन्तत्वादिति भावः । उक्तयुक्तेर्नहि प्रयोजनानुवर्तिप्रमाणमिति न्यायविरुद्धत्वादाह—**परत्वादिति** । तृज्वत्त्वनित्स्वरयोर्युगपत्प्राप्तावाद्युदात्तत्वान्तोदात्तत्वयोर्यौगपद्यासंभवेन परत्वात्तृज्वद्भावः । **सतिशिष्ट इति** । तृज्वदतिदेशेन स्वरविशिष्टस्यैव रूपस्यातिदेशान्नित्स्वरः पश्चात्प्रवर्तमानः सतिशिष्ट इति भावः । वस्तुतोऽस्त्येव दोष इत्याह—**शार्ङ्गरवाद्यन्तरिति** । भाष्ये दोषान्तरमाह—**पञ्चभिरिति** । **बाधनादिति** । अन्तरङ्गानपीति परिभाषणादिति भावः । नन्वत्र पुंवद्भावेन सिद्धान्तेऽपि तृज्वद्भावो दुर्लभोऽत आह—**केचिदित्यादि** । आद्याप्राप्तौ हेतुर्भत्वाभावादिति । लुकि प्रत्ययलक्षणाभावेनैकादेशात्पूर्वमेव ठको लुका च तत्त्वाभाव इति भावः । अन्त्याप्राप्तौ हेत्वन्तरमप्याह—**छस्सहचरितस्येति** । एवं तदुक्तपुंवद्भावप्राप्तिं दूषयित्वा तदुक्त-

* ६. १. १७४. × ६. १. १९७. + २. १. ५१; ५. १. १९; २८; १. २. ४९; १. १. ६३.

न चापरं निमित्तमाश्रीयते। अस्मिन्परतः क्रोष्टुस्तृज्वद्भवतीति। किं तर्हि। अङ्गस्य क्रोष्टुस्तृज्वद्भवति। अङ्गसंज्ञा च भवति प्रत्ययलक्षणेन।

किं पुनरयं शास्त्रातिदेशः। तृचो यच्छास्त्रं तदतिदिश्यते। आहोस्विद्रूपातिदेशः। तृचो यद्रूपं तदतिदिश्यत इति। कश्चात्र विशेषः।

**तृज्वदिति शास्त्रातिदेशश्चेद्यथा चिणि तद्वत् ॥ १ ॥**

तृज्वदिति शास्त्रातिदेशश्चेद्यथा चिणि तद्वत्प्राप्नोति। कथं च चिणि। उक्तमङ्गस्येति तु प्रकरणादाङ्गशास्त्रातिदेशात्सिद्धमिति* । आङ्गं यत्कार्यं

प्र०—रेव पुंवद्भावस्य नास्ति। जातेश्चेति प्रतिषेध औपसंख्यानिकस्य पुंवद्भावस्य नास्त्येव। यथा हस्तिनीनां समूहो हास्तिकमिति। **अङ्गसंज्ञा चेति**। लब्धाङ्गसंज्ञकस्य यत्कार्यं प्रत्ययलक्षणं तन्न लुमताऽङ्गस्येत्यनेन निषिध्यते। न चाङ्गसंज्ञाऽङ्गस्य कार्यमिति प्रत्ययलक्षणेन भवत्येव। तत्र स्त्रियां वर्तमानस्य क्रोष्टुशब्दस्य लब्धाङ्गसंज्ञकस्य तृज्वद्भावे सति ङीप्प्रत्ययः कार्यः। कार्यकालत्वे तु संज्ञापरिभाषस्याङ्ग आश्रिते प्रत्ययोऽप्याश्रितो भवति। यथा वव्रश्चेति। तदाऽङ्गस्येत्येतदत्र नापेक्ष्यम्। **किं पुनरिति**। शास्त्रस्य शास्त्रं प्रत्यासन्नमिति प्रत्यासत्त्या शास्त्रातिदेशः प्राप्नोति। प्राधान्यात्तु रूपातिदेशप्रसङ्गः। रूपार्थत्वाच्छास्त्रप्रवृत्तेः। कार्यातिदेशस्तु शास्त्रातिदेशादभिन्नत्वात्पृथङ् नोपन्यस्तः। तृज्वदित्यादिरूपेऽतिदिश्यमाने सूत्रसंनिवेशस्यानपेक्षणात्प्रकरणकृतव्यवस्थाभावः। शास्त्रातिदेशे तु प्रत्यासत्त्याऽङ्गप्रकरणसंनिकृष्टस्यैव शास्त्रस्या-

उ०—माधानासंगतिमप्याह—**जातेश्चेतीति**। **यथेति**। यस्येति लोपे तु तस्य स्थानिवत्त्वान्नस्तद्धित इति टिलोपानापत्तिरिति भावः। भाष्ये—**न चापरमिति**। विभक्ताविन्यस्य विच्छिन्नत्वात्सर्वनामस्थान इत्यस्य लक्ष्यानुरोधाच्च नानुवृत्तिरिति भावः। प्रत्ययलक्षणं प्रत्ययनिमित्तम्। नन्वीकारे परतो विधानान्न चापरमित्यनुपपन्नमत आह—**तत्र स्त्रियां वर्तमानस्येति**। प्रश्लेषो नाऽऽश्रीयत इति भावः। इदं च यथोद्देशपक्षाश्रयणेनेत्याह—**कार्यकाले त्विति**। अत्रापि गतिमाह—**तदाऽङ्गस्येति**। अपेक्षालक्षणत्वादधिकारस्येत्यर्थः। वस्तुतस्तु कार्यकालपक्षेऽपि क्रोष्टुशब्दः प्रत्ययेऽङ्गसंज्ञो भवति। अङ्गसंज्ञकस्य च तृज्वद्भाव इत्यर्थात्तृज्वत्त्वमनैमित्तिकमेव। उरदित्यादौ तु लक्ष्यानुसारादावृत्त्याऽत्वं प्रति निमित्तत्वेनाप्यन्वयः। प्रकृते तु तत एव नेति बोध्यम्। निरूपितं चेदं ष्यङ इति सूत्रे। न लुमतेत्यस्य चानित्यत्वादङ्गसंज्ञाविषयेऽप्राप्तिः। अत एव न लुमता तस्मिन्निति न्यासे न दोष इति भाष्याशयः। अत एव गुणो [illegible]ादीनामङ्गाधिकारे पाठः संगच्छते। **कार्यातिदेशस्त्विति**। शास्त्रातिदेशस्य कार्यफलकत्वादिति भावः। रूपातिदेशे तु नायं दोष इत्याह—**रूप इति**।

* ६. ४. ६२.

तदतिदिश्यते । एवमिहाप्यनङ्गुणदीर्घत्वान्यतिदिष्टानि* रपरत्वमनतिदिष्टम्+ । तत्र को दोषः ।

**तत्र रपरवचनम् ॥ २ ॥**

तत्र रपरत्वं न सिध्यति तद्वक्तव्यम् । नैष दोषः । गुणेऽतिदिष्टे रपरत्वमप्यतिदिष्टं भवति । कथम् । कार्यकालं संज्ञापरिभाषं यत्र कार्यं तत्र द्रष्टव्यम् । ऋतो ङिसर्वनामस्थानयोर्गुणो भवति× । उपस्थितमिदं भवत्युरण्रपरः [ १. १. ५१. ] इति ।

एवं तर्ह्ययमन्यो दोषो जायते । आहत्य तृचो यच्छास्त्रं तदतिदिश्येतानाहत्य वेति । किंचातः । यद्याहत्य दीर्घत्वमतिदिष्टमनङ्गुणरपरत्वान्यनतिदिष्टानि÷ । अथानाहत्यानङ्गुणरपरत्वान्यतिदिष्टानि दीर्घत्वमनतिदिष्टम् । अस्त्वा-

---

प्र०—तिदेशः स्यान्न विप्रकृष्टस्य । यथा चिण्वद्भावेन । वृद्ध्यादीन्येव भवन्ति न हनिणिङादेशाः । **रपरत्वमिति** । यथोद्देशपक्षे प्रकरणान्तरे संनिवेशादिति भावः । **कार्यकालमिति** । प्रधानदेशत्वाद्गुणानामङ्गाधिकार एव परिभाषायाः संनिधानादित्यर्थः । **आहत्येति** । उच्चार्योद्घोष्येत्यर्थः । शास्त्रशब्दे या शासनक्रिया शास्त्रकरणिका तदपेक्ष्य पौर्वकाल्याश्रयः क्त्वाप्रत्ययः । तत्र यदि तृच्छब्दवच्छास्त्रमतिदिश्यते तदाऽऽहत्य यच्छास्त्रमिति पक्षोऽथ ऋकार एव तृच्छब्दे[१] विवक्ष्यते चकारः स्वरार्थस्तकारस्त्वप्रसिद्धशङ्कानिवृत्त्यर्थः । ऋज्वदित्युच्यमानेऽप्रसिद्धातिदेशः संभाव्येत । ऋच्छब्दनिबन्धनसमासान्तशास्त्रादेशविषयः संदेहो वा स्यात् । तस्मादृकारमात्रप्रतिबद्धशास्त्रातिदेशेऽनाहत्यैष पक्ष उद्भवति । **अनङ्गुणरपरत्वानीति** । ऋदुशनस्पुरुदंसोनेहसां चेत्यनङ् । ऋतो ङिसर्वनामस्थानयोरिति गुणः । उरण्रपर इति रपरत्वम् । **दीर्घत्वमनतिदिष्टमिति** । नहि तद्दृत इत्युच्यते । किं तर्ह्यप्तृन्तृजिति तृच्छब्दोच्चा-

---

उ०—शास्त्रातिदेशे[१] तस्याष्टाध्यायीस्थत्वात्सूत्रसंनिवेशरूपतदपेक्षणेन प्रत्यासत्तिन्यायावसर इति भावः । **प्रधानदेशत्वादिति** । उरण् रपर इति परिभाषा कार्यकालपक्ष एव च युक्ततर इति भावः । तत्तद्विध्येकवाक्यतापन्न आङ्गत्वबुद्धिरप्यस्तीति तात्पर्यम् । नन्वमूर्तशब्दरूपशास्त्रस्याऽऽहननमयुक्तमत आह—**उच्चार्येति** । तृच्शब्दमुच्चार्येति भावः । ननूत्तरकालक्रियाया अश्रवणात्क्त्वानुपपत्तिरत आह—**शास्त्रशब्द इति** । शास्यतेऽनेनेति शास्त्रमिति व्युत्पादनादिति भावः । शासनमत्र विधानम् । भाष्ये तृच इति शेषषष्ठी बोध्या । **अप्रसिद्धाशङ्केति** । अप्रसिद्धत्वाशङ्केत्यर्थः । **ऋज्वदिति** । कुत्वं तु सौत्रत्वान्न । **अप्रसिद्धातिदेश इति**[२] । ऋच्छब्दयुक्तशास्त्रादर्शनात्किमत्रातिदिश्यत इत्यप्रतिपत्तिः स्यादित्यर्थः । **समासान्तशास्त्रेति** । ऋक्पूरब्धूरितीत्यर्थः । **संदेह**

---

*७. १. ९४; ७. ३ ११०; ६. ४. ११. +१. १. ५१. ×७ ३. ११०. ÷६. ४. ११; ७. १. ९४; ७. ३ ११०; १. १. ५१.

---

१ क. °शे कार्यातिदेशे च शास्त्रकार्ययोरष्टा° । २ ख. °ति । अप्रसिद्धप्रतियोगिकातिदेशसंभावनया किम° ।

हृत्य । ननु चोक्तं दीर्घत्वमतिदिष्टमनङ्गुणपरत्वान्यमतिदिष्टानीति । नैष दोषः। दीर्घत्वेऽतिदिष्टेऽनङ्गुणरपरत्वान्यप्यतिदिष्टानि भवन्ति । कथम् । उपधाया इति वर्तते* न चाकृतेष्वेतेषु दीर्घभाविन्युपधा भवति । कुतो नु खल्वेतदेतेषु विधिषु कृतेषु योपधा तस्या दीर्घत्वं भविष्यति न पुनः क्रोष्टोर्योऽन्तरतमो गुणस्तस्मिन्कृ+तेऽवादेशे च योपधा तस्या दीर्घत्वं भविष्यति । नैकमुदाहरणं योगारम्भं प्रयोजयतीति । तत्र तुज्वद्वचनसामर्थ्यादेतेषु विधिषु कृतेषु योपधा तस्या दीर्घत्वं भविष्यति । अथवा किं न एतेनाहृत्यानाहृत्य वेति । आहृत्यानाहृत्य च तृचो यच्छास्त्रं तदतिदिश्यते ।

---

प्र०—रणेन । न चावयवसमुदाययोर्युगपद्विवक्षा यतस्तृच्प्रतिबद्धं ऋकारप्रतिबद्धं च शास्त्रमतिदिश्येत । **न चाकृतेष्विति** । अचो दीर्घेण भाव्यं न च क्रोष्टुशब्दस्योकारान्तस्याजुपधा संभवति । तत्र क्रोष्टेत्यत्रानङि कृतेऽजुपधा भवति । क्रोष्टारावित्यादौ तु गुणरपरत्वयोः कृतयोः । **न पुनरिति** । क्रोष्टुशब्दस्य जसि चेत्युकारस्य गुणोऽस्त्येव तस्यावादेशे कृतेऽकारस्य दीर्घः स्यात् । ततश्च क्रोष्टाव इति स्यात् । **नैकमिति** । अन्यथा दीर्घविधावेव क्रोष्टुशब्दं निर्दिशेत् । ननु दीर्घविधौ क्रोष्टुशब्द उपादीयमाने स्त्रियां च विभाषा तृतीयादिष्वचीत्येवमर्थं तृज्वत्क्रोष्टुरिति वक्तव्यमिति गौरवं स्यात् । नैष दोषः । अचि र ऋत इति रादेशे प्रकृते क्रोष्टोः स्त्रियां च विभाषा तृतीयादिष्वचीत्येवं रादेशविधानाद्गौरवाभावात् । ननु रादेशे क्रोष्टुः क्रोष्टरीति न सिध्यति । नाप्युदात्तयणो हल्पूर्वादिति स्वरः । एवं तर्हि द्विः क्रोष्टुग्रहणं योगविभागाल्लघु । तदुक्तम्—अक्षराधिक्यादपि योगविभागो गरीयानिति । तदेवं तृज्वद्भावविधानसामर्थ्याद्याहृशी तृच उपधा याहृशान्यनिमित्ता ताहृश्या एव ताहृशान्यनिमित्तायाः क्रोष्टुशब्दस्योपधाया दीर्घो भवतीत्यनङ्गुणरपरत्वेषु कृतेषु दीर्घो भवति। अस्मिन्परिहारे पूर्वोक्तगौरवप्रसङ्गादसमाश्वसन्परिहारान्तरमाह—**अथवेति** । तृज्वदिति

---

उ०—**इति** । तद्वा ऋकारमात्रप्रतिबद्धं शास्त्रं वेति संदेहः स्यादित्यर्थः । ननु तृज्वदिति समुदायनिबन्धनशास्त्रस्याप्यतिदेशोऽस्त्वत आह—**न चेति** । वाक्यभेदप्रसङ्गादिति भावः । नन्वेकोदाहरणफलकमपि मुद्गादणित्यादि शास्त्रं दृश्यतेऽत आह—**अन्यथेति** । यदि क्रोष्टाव इत्येव फलं स्यात्तर्ह्यप्तृन्नित्यत्रैव क्रोष्टुग्रहणं कुर्यात् । अतोऽतिदेशसामर्थ्यात्कृतेष्वनङादिषु योपधा तस्या दीर्घत्वमिति भावः । **मिति गौरवमिति** । तत्र तु सामर्थ्याद्रूपातिदेश एवेति भावः । **नापीति** । क्रोष्ट्रेत्यादौ । क्रोष्टुशब्दस्य तुन्नन्तत्वेनाऽऽद्युदात्तत्वात् । तृज्वत्त्वे तु चित्त्वादन्तोदात्तत्वेन स्वरसिद्धिरिति भावः । **गौरवप्रसङ्गादिति** । योगविभागादक्षराधिक्यं गुर्वेवेति भावः । कथं पुनरेकेन वाक्येन

---

* ६. ४. ७; ११. + ७. ३. १०९.

अथवा पुनरस्तु रूपातिदेशः । अथैतस्मिन्रूपातिदेशे सति किं प्रागादेशेभ्यो यद्रूपं तदतिदिश्यत आहोस्वित्कृतेष्वादेशेषु । किं चातः । यदि प्रागादेशेभ्यो यद्रूपं तदतिदिश्यत ऋकार एकोऽतिदिष्टोऽनङ्गुणरपरत्वदीर्घत्वान्यनति-

---

प्र०—समुदाय एवाऽऽश्रीयते । तत्र व्याप्तिन्यायाश्रयाद्यत्किंचित्तृचो दृष्टं शास्त्रं तत्सर्वमतिदिश्यते । एवं भूयो लक्ष्यं लक्षणं चानुगृहीतं भवति । नन्वङ्गप्रकरणोपात्त एव शास्त्रेऽतिदिश्यमाने क्रोष्ट्रीति यणादेशशास्त्रस्यानाङ्गत्वादितिदेशो न स्यात् । एवं तर्हि स्त्रियामाङ्गशास्त्रातिदेशासंभवादनाङ्गस्याप्यतिदेशः । विभाषा तृतीयादिष्वचीत्यत्र तर्हि क्रोष्टरित्यत्र गुणविधावतिदेशस्य चरितार्थत्वात्क्रोष्ट्रा क्रोष्ट्रोरिति यणादेशाप्रसङ्गः । क्रोष्टुरित्यत्र ऋत उदिति शास्त्रं च न प्रवर्तेत । तत्रापि तृतीयादिग्रहणसामर्थ्यादनाङ्गस्याप्यतिदेशोऽन्यथा विभाषाङ्गावित्येव ब्रूयात् । स्यादेतदभावातिदेशार्थं तृतीयादिग्रहणं स्यात् । ततश्च घिलक्षणौ गुणनाभावौ न स्याताम् । क्रोष्टवे क्रोष्टुनेति । तत्र वक्त्रधीने वाक्यशेषेऽभावातिदेशस्यैवाऽऽश्रयणात् । एवं तर्हि क्रोष्ट्रीति स्त्रियामीकारो न प्राप्नोति । अनाङ्गमपीकारशास्त्रमतिदेशसामर्थ्यादतिदेक्ष्यत इत्येषोऽप्यदोषः । अथवोत्तरयोर्योगयोरारम्भसामर्थ्याद्रूपातिदेश एवाऽऽश्रीयते । पूर्वसूत्रे तु पक्षभेदविचारः। **अथवेति** । सूत्रत्रय एकरसप्रवृत्तिर्भवति सर्वरूपसंग्रहश्चेति भावः । **प्रागादेशेभ्य इति** । क्रोष्टृ इत्येतदृकारान्तम् । **कृतेष्विति** । क्रोष्टाराविति रेफाद्यन्तम् । तत्र प्रागादेशेभ्यो यद्रूपं तत्प्रत्यक्षम् । तृज्वदित्युच्चारणात् । व्यापकं लघु च । तस्मिन्नतिदिष्टे तन्निमित्तानामनङादीनां सर्वेषां स्वशास्त्रेण प्रवर्तनात्कृतेषु चाऽऽदेशेषु यद्रूपं लौकिकं तत्प्रधानं तदर्थत्वादितरस्य । प्रक्रियालाघवं च भवतीति पक्षद्वयसंभवः। **ऋकार एक इति** ।

---

उ०—पक्षद्वयलाभोऽत आह—**समुदाय एवेति** । **भूय इति** । अनङ्गुणयणादिसंबन्धि भूयो लक्षणं तद्विषयं भूयो लक्ष्यं चेत्यर्थः । **आङ्गशास्त्रातिदेशासंभवादिति** । न च पञ्चभिः कर्त्रीभिः क्रीतो रथः पञ्चकर्ता रथः । हे पञ्चकर्तः, पञ्चकर्तरीति स्त्रीलिङ्गदृष्टस्य ङिसंबुध्योर्गुणस्यातिदेशेन तच्चरितार्थम् । स्त्रियामित्युक्त्या प्रत्यासत्तिन्यायेन स्त्रीत्वनिमित्तकस्य तन्निमित्तनिमित्तकस्य वाऽतिदेशेन तादृशस्याऽऽङ्गस्यासंभवादिति भावः । **न स्यातामिति** । तृजन्ते तयोरभावदर्शनेन तुन्नन्तेऽप्यभावातिदेशादित्यर्थः । **रूपातिदेश एवेति** । अत एव पञ्चक्रोष्टुभिरिति सिध्यति । तदेव ध्वनयन्नाह—**भाष्येऽथवेति** । उत्तरसाहचर्यादिति भावः । तत्राऽऽद्य उपपत्तिमाह—**तत्रेति** । प्रत्यक्षत्वे हेतुस्तृज्वदित्युच्चारणादिति । व्यापकत्वलघुत्वयोर्हेतुमाह—**तस्मिन्निति** । द्वितीयपक्ष उपपत्तिमाह—**कृतेषु चेति** । प्राधान्ये हेतुमाह—**तदर्थत्वादिति** । आदेशात्प्राग्रूपस्येत्यर्थः । **प्रक्रियालाघवं चेति** । पक्षान्तरे त्वनेन क्रोष्टृ इति रूपम् । ततोऽनङादिप्रवृत्तिरिति प्रक्रियागौरवमित्यर्थः । ननु ऋकारातिदेशे तत्तच्छास्त्रैरेव तेषां

दिष्टानि । अथ कृतेष्वादेशेष्वृकारोऽनतिदिष्टोऽनङ्गुणरपरत्वदीर्घत्वान्यतिदिष्टानि । उभयथा च स्वरोऽनातिदिष्टो न हि स्वरो रूपवान् । अस्तु प्रागादेशेभ्यो यद्रूपं तदतिदिश्यते । ननु चोक्तमृकारोऽतिदिष्टोऽनङ्गुणरपरत्वदीर्घत्वान्य-

---

प्र०—तदतिदेशसामर्थ्याच्च कार्यान्तराणामप्रसङ्गः स्यादिति मन्यते । ऋकारोऽनतिदिष्ट इति । किं पुनर्ऋकारातिदेशस्य प्रयोजनम् । प्रयोगसमवायिरूपातिदेशेन गतत्वात् । अत्र केचिदाहुः—यत्र ऋकारस्य विकाराभावः पञ्चक्रोष्ट्रभी रथैरिति तत्र ऋकारोऽनतिदिष्टः स्यादिति । तदयुक्तम् । नहीदं वचनं कृतेष्वादेशेष्विति । लौकिकप्रयोगरूपोपलक्षणं त्वेतद्यथा च क्वचित्कृतेष्वादेशेषु लौकिकं रूपं तथा क्वचिदकृतेष्विति नास्ति विशेषः । अत्रोच्यते । यदि ऋकारमनतिदिश्य कृतेष्वादेशेषु यद्रूपं तदतिदिश्यते तदा क्रोष्ट्रेत्यादावुदात्तयणो हल्पूर्वादिति स्वरो न स्यात् । उदात्तयणोऽभावात् । सति तु ऋकारातिदेशे तत्स्थानिकस्य यण उदात्तत्वात्स्वरः सिध्यति । ननु स्वरदोषमनन्तरमेव वक्ष्यति तत्किमर्थमत्राभिधीयते । अत्रैकतरपक्षाश्रयेण स्वरदोष उच्यते । परस्तात्तु पक्षद्वयेऽपि वक्ष्यते । नहि स्वरो रूपवानिति । ननु शब्दस्य श्रोत्रेन्द्रियग्राह्यस्वभावो रूपम् । स्वरोऽपि श्रोत्रेन्द्रियग्राह्यत्वाद्रूपमेवाथास्य व्यतिरिक्तं रूपं नास्तीति नहि स्वरो रूपवानित्युच्यते । तदा तृज्रूपस्यापि रूपं नास्तीति तदपि न रूपवदिति नातिदिश्येत । रूपातिदेशश्च प्रक्रान्तो न रूपवदतिदेशः । अत्रोच्यते । प्रागादेशेभ्यो यद्रूपमित्यत्र तावत्पक्षे स्वरोऽशक्योऽतिदेष्टुम् । तद्धि रूपं शास्त्रीयम् । न च स्वरो रूपत्वेनाऽऽश्रितः शास्त्रे । ण्वुल्तृचावित्यस्मिन्नुच्चारणे स्वरस्य भेदहेतुत्वेनानाश्रयणात् । लुङ्लङ्लृङ्क्ष्वडुदात्त इत्यादावुदात्तादिग्रहणात् । याऽपि चितोऽन्त उदात्त इति स्वरप्रतिपत्तिरसावप्यनुमानान्नतूच्चारणात् । कृतेष्वादेशेष्वित्यत्र तु पक्षे यद्यप्युच्चारण उदात्तादिगुणानामभेदकत्वं ज्ञापितं तथाऽपि

---

उ०—सिद्धेस्तान्यनतिदिष्टानीत्ययुक्तमत आह—तदतिदेशेति । पञ्चक्रोष्ट्रभिरिति । पञ्चभिः क्रोष्ट्रीभिः क्रीतै रथैरित्यर्थः । यण उदात्तत्वादिति । उदात्तस्थानिकत्वात्तृज्वद्भावे चित्स्वरेण ऋकारस्योदात्तत्वादित्यर्थः । एकतरेति । लौकिकरूपातिदेशे स्वरदोषः पर्यवस्यतीतीहोच्यते । उत्तरत्र पक्षद्वयसाधारणं स्वरदोषं वक्ष्यतीत्यपौनरुक्त्यमिति भावः । ननु शब्दस्येति । यत्तु पृथिव्यादिवृत्ति गुणभूतं रूपं तस्य शब्देऽसंभवः । अन्यादृशो रूपव्यवहारस्तु स्वरेऽपि समान इत्यर्थः । अथास्येति । मतुप उपादानादिति भावः । अयुक्तश्च भाष्ये मतुप्प्रयोग इत्याह—रूपातिदेशश्चेति । अत्र भगवतो गूढाभिप्रायमाह—प्रागादेशेभ्य इति । रूपत्वेनेति । शास्त्रीयस्य तृजादेर्भेदकत्वेनेत्यर्थः । अस्मिन्नुच्चारण इति । उच्चारणविषय इत्यर्थः । भेदहेतुत्वेनानाश्रयणे हेतुर्लुङ्लङिति । अनुमानादिति । उदात्तगुणबोधकशास्त्ररूपादित्यर्थः । एवं

नातिदिष्टानीति । नैष दोषः । ऋकारेऽतिदिष्टे स्वाश्रया अत्रैते विधयो भविष्यन्ति । यदप्युच्यत उभयथा च स्वरोऽनतिदिष्टो न हि स्वरो रूपवानिति स चकारग्रहणसामर्थ्यात्स्वरो भविष्यति+ ।

**रूपातिदेश इति चेत्सर्वादेशप्रसङ्गः ॥ ३ ॥**

रूपातिदेश इति चेत्सर्वादेशः प्राप्नोति । सर्वस्य तुनन्तस्य तृशब्द आदेशः प्राप्नोति÷ ।

---

प्र०—यथाऽऽन्तरतम्यात्स्वर आश्रीयमाणो भेदकस्तथाऽतिदेशादपि किंतूदात्तयण्व्यपदेशाभावात्स्वरासिद्धिः । यद्येवं रूपवानिति किमुच्यते रूपमिति हि वक्तव्यम् । तत्र केचिदाहुः । भाष्यकारवचनात्स्वार्थिको मतुबथवा स्वरवानेव स्वरः । अर्शआदित्वादच् । नहि स्वरवानृकार उदात्तादिना रूपेण रूपवाञ्शास्त्र आश्रीयते । तस्याभेदकत्वात् । **ऋकारेऽतिदिष्ट इति** । तदर्थत्वाद्दृकारातिदेशस्येति भावः । **स्वाश्रया इति** । स्वं निमित्तं शास्त्रं वाऽऽश्रयो येषामिति समासः । **स चकारेति** । अन्यथा तृवदिति ब्रूयात् । न च तृंस्तृज्भ्यामन्योऽर्थवांस्तृशब्दोऽस्ति यस्य ग्रहणे दोषः स्यात्तस्मादनुमेयोऽपि स्वर उच्चारणेऽनाश्रीयमाणोऽपि चकारोच्चारणाद्भवति । **सर्वादेशप्रसङ्ग इति** । रूपातिदेशशब्दात्स्थान्यादेशभावोऽभ्युपगतो भवतीत्यनेकाल्त्वात्सर्वादेशस्तृशब्दः प्राप्नोति ।

---

उ०—चातिदेशकाले स्वराप्रतिपत्तेस्तदातिदेशोऽशक्यक्रिय इत्यस्वरकस्यैव ऋकारस्यातिदेशात्तत्स्थानिकयण उदात्तस्थानिकत्वाभावात्क्रोष्ट्रेत्यादौ स्वरासिद्धिः । क्रोष्टा क्रोष्टारावित्यादौ च स्वरासिद्धिरिति भावः । तत्राऽऽद्य पक्ष एव नहि स्वरो रूपवानिति हेतुर्भाष्य उक्तः । अन्त्ये तु स्फुट एव हेतुरिति नोक्तः । **भेदक इति** । तेन क्रोष्ट्रेत्यादौ स्वरसिद्धिरिति भावः । क्रोष्ट्रेत्यादौ तु तदसिद्धिरित्याह—**किंत्विति** । परे तु तृजन्तरूपस्यातिदेशः । रूपशब्देन वर्णरूपावयवसंस्थानं तद्वदेव च शब्दस्य रूपमित्युच्यते । स्वरस्तु न तद्वानिति शब्दत्वादिवन्न शब्दस्य रूपम् । तदुक्तम्—स्वरो न रूपवानिति यथाश्रुतमेव भाष्यं योजयन्ति । **तदर्थत्वादिति** । यस्य तु विधेर्निमित्तमेव नासौ बाध्यत इति न्यायादिति भावः । अप्रधानत्वादृकारस्य स्वशब्देन परामर्शासंभवो दीर्घस्य ऋत्कारानाश्रयत्वं चात आह—**स्वं निमित्तमिति** । ऋकारान्तस्यानङादिविधानादिति भावः । बुद्धिस्थपरामर्शकः स इति तात्पर्यम् । **शास्त्रं वेति** । ऋकारेऽतिदिष्टे स्वशास्त्रमाश्रित्यैते विधयः कार्याणि भविष्यन्तीत्यर्थः । ननु तृवदित्युक्ते पितृशब्दस्यतृशब्दस्याप्यतिदेशः स्यादित दीर्घो न स्यादत आह—**न चेति** । अर्थवत्परिभाषयाऽर्थवतस्तृरूपस्यातिदेश इत्यर्थः । उणादीनामव्युत्पन्नत्वात्तत्रत्यतृशब्दोऽनर्थकः । व्युत्पत्तिपक्षेऽप्यनान्तर्यात्क्रोष्टुशब्दस्थाने पितृरूपानतिदेश इति बोध्यम् । **अनुमेयोऽपि** । अतिदेशकालेऽप्रतीतोऽपि । तदेवाऽऽह—उच्चारणेऽनाश्रीयमाण इति । नन्वतिदेशे कथं सर्वादेशप्रसक्तोऽत आह—**रूपेति** । रूपातिदेशद्वारेणाऽऽदेश एव फलतो विधीयत इत्यर्थः ।

+ ६. १. १६३. ÷ १. १. ५५. +

सिद्धं तु रूपातिदेशात् ॥ ४ ॥

सिद्धमेतत् । कथम् । रूपातिदेशात् । रूपातिदेशोऽयम्। ननु चैवमेव कृत्वा चोद्यते रूपातिदेश इति चेत्सर्वादेशप्रसङ्ग इति ।

सिद्धं तु प्रत्ययग्रहणे यस्मात्स तदादितदन्तविज्ञानात् ॥ ५ ॥

सिद्धमेतत् । कथम् । प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदन्तस्य च ग्रहणं भवतीत्येवं तुनन्तस्य तृजन्त आदेशो भविष्यति । एवमपि किंचिदेव तृजन्तं प्राप्नोति । इदमपि प्राप्नोति पक्तेति ।

आन्तरतम्याच्च सिद्धम् ॥ ६ ॥

क्रोष्टोर्यदन्तरतमं तद्भविष्यति । किं पुनस्तत् । क्रुशेर्यस्तृज्विहितस्तदन्तम् ।

तृज्वद्वचनमनर्थकं तृज्विषये तृचो मृगवाचित्वात् ॥ ७ ॥

तृज्विषय एतत्तृजन्तं मृगवाचि । तुनो निवृत्त्यर्थं तर्हीदं वक्तव्यम् । तुनः सर्वनामस्थाने निवृत्तिर्यथा स्यात् ।

तुनो निवृत्त्यर्थमिति चेत्सिद्धं यथाऽन्यत्रापि ॥ ८ ॥

तुनो निवृत्त्यर्थमिति चेत्तदन्तरेण वचनं सिद्धं यथाऽन्यत्राप्यविशेषविहिताः शब्दा नियतविषया दृश्यन्ते । क्वान्यत्र । तद्यथा । घरतिरस्मा अविशेषेणोपदिष्टः स घृतम् घृणा घर्म इत्येवंविषयः। राशिरस्मा अविशेषेणोपदिष्टः स राशिः रश्मिः रशनेत्येवंविषयः। लुशिरस्मा अविशेषेणोपदिष्टः स लोष्ट इत्येवंविषयः। इदं तर्हि प्रयोजनं विभाषां वक्ष्यामीति । विभाषा तृतीयादिष्वचि [ ७. १. ९७ ] इति ।

---

प्र०—सिद्धमिति । तृजन्तरूपातिदेशादित्यर्थः । आन्तरतम्यादिति । अर्थेन स्वरूपेण चेत्यर्थः । तृज्विषय इति । तृज्वद्भावविषय इत्यर्थः । घरतिरिति । गृ घृ सेचन इति भौवादिकः । जिघर्तीत्येतत्तु घृ क्षरणदीप्त्योरित्यस्य बहुलं छन्दसी-त्यभ्यासस्येत्त्वे कृते रूपम् । राशिलुशी अपठितावपि भाष्यकारवचनाद्धातू बोद्धव्यौ । प्रयुक्तानामिदमन्वाख्यानं नत्वस्मादपूर्वशब्दप्रतिपत्तिरिति नियतविषयत्वमुच्यते । अनेनैव न्यायेनास्तेर्भूरित्यादीन्यपि प्रत्याख्येयानि । अबुधबोधनार्थं तु किंचिद्वचनेन प्रतिपा-

---

उ०—एवं च क्रोष्टुशब्दस्थाने तृशब्द आदेशः प्राप्नोतीत्याशयः । ननु रूपातिदेश एवाऽऽपादिते दोषे कथं स एव हेतुरत आह—तृजन्तेति । तृज्वद्भावविषय इति । वार्तिके तृशब्देन तद्युक्तोऽतिदेशो लक्ष्यत इति भावः । धातू बोद्धव्याविति । धातुपाठे पठितावाचार्येणेति बोद्धव्यावित्यर्थः । प्रत्याख्येयानीति । अस्तेः सार्वधातुकमात्रविषयत्वादिति भावः । अबुधबोधनाय सूत्राणि न्यायव्युत्पादनाय तु भगव

**वावचनानर्थक्यं च स्वभावसिद्धत्वात् ॥ ९ ॥**

वावचनं चानर्थकम् । किं कारणम् । स्वभावसिद्धत्वात् । स्वभावत एव तृतीयादिष्वजादिषु विभक्तिषु तृजन्तं तुनन्तं च मृगवाचीति ।

**गुणवृद्ध्यौत्त्वतृज्वद्भावेभ्यो नुम्पूर्वविप्रतिषिद्धम् ॥ १० ॥**

गुणवृद्ध्यौत्त्वतृज्वद्भावेभ्यो नुम्भवति पूर्वविप्रतिषेधेन* । तत्र गुणस्यावकाशः । अग्नये वायवे । नुमोऽवकाशः । त्रपुणी जतुनी । इहोभयं प्राप्नोति । त्रपुणे जतुने । वृद्धेरवकाशः । सखायौ सखायः । नुमः स एव । इहोभयं प्राप्नोति । अतिसखीनि ब्राह्मणकुलानीति । औत्त्वस्यावकाशः । अग्नौ वायौ । नुमः स एव । इहोभयं प्राप्नोति । त्रपुणि जतुनीति । तृज्वद्भावस्यावकाशः । क्रोष्ट्रा क्रोष्टुना । नुमः स एव । इहोभयं प्राप्नोति । कुशक्रोष्टुनेऽरण्याय । हितक्रोष्टुने वृषलकुलाय । नुम्भवति पूर्वविप्रतिषेधेन । स तर्हि पूर्वविप्रतिषेधो वक्तव्यः । न वक्तव्यः । इष्टवाची परशब्दः+ । विप्रतिषेधे परं यदिष्टं तद्भवतीति ।

**नुमचिरतृज्वद्भावेभ्यो नुट् ॥ ११ ॥**

नुमचिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेन वक्तव्यः× । नुमोऽवकाशः । त्रपूणि जतूनि । नुटोऽवकाशः । अग्नीनाम् । वायूनाम् । इहोभयं प्राप्नोति । त्रपूणाम् जतूनाम् । अचि रादेशस्यावकाशः । तिस्रास्तिष्ठन्ति चतस्रास्तिष्ठन्ति । नुटः स एव । इहोभयं प्राप्नोति । तिसृणाम् चतसृणाम् । तृज्वद्भावस्यावकाशः । क्रोष्ट्रा क्रोष्टुना । नुटः स एव । इहोभयं प्राप्नोति । क्रोष्टूनाम् । नुड्भवति पूर्वविप्रतिषेधेन । स तर्हि पूर्वविप्रतिषेधो वक्तव्यः ।

---

प्र०—द्यते । न्यायव्युत्पादनार्थं चाऽऽचार्यः किंचित्प्रत्याचष्टे । न ह्यत्रैकः पन्थाः समाश्रीयते । **अतिसखीनीति** । अतिक्रान्तः सखा यैरिति बहुव्रीहिः । **कुशक्रोष्टुन इति** । क्रोष्टुशब्दः स्त्रीपुंसलिङ्ग इत्यन्यपदार्थस्य नपुंसकत्वं प्रदर्श्यते । **क्रोष्टूनामिति** । तृज्वद्भावः कृते नुटच्यनजादित्वान्न प्राप्नोतीत्यनित्यो नुडागमोऽपि

---

उ०—प्रत्याख्यानमिति तात्पर्यम् । किंच सूत्रेषु कृतेष्वप्यनभिधानमावश्यकमिति ध्वनयन् वार्तिकमाह—**गुणेति** । तत्पुरुषे टचः प्रसङ्गादाह—**बहुव्रीहिरिति** । समासोदाहरणस्योपयोगमाह—**क्रोष्टुशब्द इति** । अन्यथा पुंवद्भावपक्षे कुशक्रोष्ट्रण इत्यपि स्यादिति भाष्याशयः । ननु कुशक्रोष्टु ङे इत्यस्यामवस्थायां नुम्तृज्वत्वयोः प्राप्तयोः परत्वात्तृज्वत्त्वे सकृद्गतिन्यायेन नुमभावे कुशक्रोष्ट्रे इत्येव रूपं तच्चेष्टमेव पुंवत्त्वपक्ष इति पूर्वविप्रतिषेधो व्यर्थः । कुशक्रोष्टुन इति तृज्वत्त्वाभावपक्षे साधु । नच पुनःप्रसङ्गविज्ञानपक्षे तत्प्राप्त्या चारितार्थ्यम् । तत्पक्षाश्रयेण वचनकरणापेक्षया सकृद्गतिन्याया-

---

* ७. ३. १११; ७. १. ९२ (७. २. ११५); ७. ३.११९; ७. १. ९८; ७. १. ७३. + १. ४.२. × ७. १. ७२; ७. २, १००; ७. १, ९७; ७. १. ५४.

**न वा नुड्विषये रप्रतिषेधात् ॥ १२ ॥**

न वैतद्विप्रतिषेधेनापि सिध्यति तिसृणाम् चतसृणामिति । कथं तर्हि सिध्यति। नुड्विषये रप्रतिषेधात् । नुड्विषये रप्रतिषेधो वक्तव्यः ।

**इतरथा हि सर्वापवादः ॥ १३ ॥**

इतरथा हि सर्वापवादो रादेशः । स यथैव गुणपूर्वसवर्णौ* बाधत एवं नुटमपि बाधेत ।

**तस्मान्नुड्विषये रप्रतिषेधः ॥ १४ ॥**

तस्मान्नुड्विषये रादेशस्य प्रतिषेधो वक्तव्यः । न वक्तव्यः। आचार्यप्रवृत्तिर्ज्ञापयति न रादेशो नुटं बाधत इति यदयं न तिसृचतसृ [ ६, ४, ४ ] इति प्रतिषेधं शास्ति नामि दीर्घत्वस्य ।

**चतुरनडुहोरामुदात्तः ॥ ७ । १ । ९८ ॥**

**आमनडुहः स्त्रियां वा ॥ १ ॥**

आमनडुहः स्त्रियां वेति वक्तव्यम् । अनडुही अनड्वाही ।

---

प्र०—कृते तृज्वद्भावे संनिपातपरिभाषयां न प्राप्नोतीत्यनित्यः । **नवेति** । नुड्रेफयोर्यो विप्रतिषेध उक्तः स नेत्यर्थः । **स यथैवेति** । मध्येऽपवादा इत्येतदनाश्रित्यैतदुक्तम् । तत्र ह्याश्रीयमाणे गुणं न बाधेत । गुणपूर्वसवर्णग्रहणमुपलक्षणम्भूत उदित्युत्वस्यापि बाधनात्प्रियतिस्रः स्वमित्यादौ । **यदयमिति** । नहि रादेशे कृते दीर्घस्य प्राप्तिः । अनजन्तत्वान्नुडभावाच्च । एवं च विप्रतिषेधोऽपि न वक्तव्यः । ज्ञापकादेव नुडभावात् ।

**चतुरनडुहोरामुदात्तः** । गौरादिष्वनडुही अनड्वाहीति पाठोऽपौराणिकः । अनडुहशब्द एव ङीषर्थः पठित इति मत्वा वार्तिकमारब्धम् । **अनडुहः स्त्रियां वेति** ।

---

उ०—श्रयणेन वचनानारम्भे लाघवादिति चेन्न । एतद्भाष्यप्रामाण्यात्पुंवत्त्वविषयेऽनभिधानेन तृज्वत्त्वाप्रवृत्तेः । तेन कृशक्रोष्ट्र इत्याद्यसाध्वेवेति सुधियो विभावयन्तु । **संनिपातपरिभाषयेति** । अजादिप्रत्ययसंनिपातलक्षणत्वात्तृज्वद्भावस्येत्यर्थः । भाष्ये विप्रतिषेशब्दस्य न सामान्यपरत्वमित्याह—**नुड्रेफयोरिति** । अत्रत्यनुड्रेफयोर्बाध्यबाधकभावपरभाष्यविरोधाच्छ्वोरिति सूत्रस्थो भिन्नफलकस्याबाधकत्वपरः कैयटश्चिन्त्यः । **गुणमिति** । जसि चेति गुणस्य रादेशात्परत्वादिति भावः । तस्माद्रादेशो बाध्यसामान्यचिन्तया सर्वबाधक इत्यवश्यमुपेयमिति तात्पर्यम् । **अनजन्तत्वादिति** । मध्यमणिन्यायेनोभयान्वयि ।

**चतुरन०** । अपौराणिक इति । विनयादित्वाट्ठक् । अपुराणो नवीन इत्यर्थः ।

---

* ७, ३, ११ ; ६ १, १०८,

ऋत इद्धातोः ॥ ७ । १ । १०० ॥
उपधायाश्च ॥ ७ । १ । १०१ ॥
उदोष्ठ्यपूर्वस्य ॥ ७ । १ । १०२ ॥

इत्त्वोत्त्वाभ्यां गुणवृद्धी भवतो विप्रतिषेधेन। इत्त्वोत्त्वयोरवकाशः। आस्तीर्णम् निपूर्ताः पिण्डाः। गुणवृद्ध्योरवकाशः× । चयनम् चायकः । लवनम् लावकः। इहोभयं प्राप्नोति। आस्तरणम् आस्तारकः। निपरणम् निपारकः। गुणवृद्धी भवतो विप्रतिषेधेन। अयुक्तोऽयं विप्रतिषेधो योऽयं गुणस्येत्त्वोत्त्वयोश्च। कथम्। नित्यो गुणः।

इति श्रीभगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये सप्तमस्याध्यायस्य प्रथमे पादे द्वितीयमाह्निकम्। पादश्च समाप्तः।

सिचि वृद्धिः परस्मैपदेषु ॥ ७ । २ । १ ॥
सिचि वृद्धावोकारप्रतिषेधः ॥ १ ॥

सिचि वृद्धावोकारस्य प्रतिषेधो वक्तव्यः*। उदवोढाम् उदवोढम् । उद-

प्र०— ऋत इद्धातोः। नित्यो गुण इति । कृताकृतप्रसङ्गित्वाल्लक्षणान्तरेण प्राप्नुवन्विधिरनित्य इत्यनाश्रित्य कार्यप्राप्तिमात्रमङ्गीकृत्येदमुक्तम्। लक्षणभेदापेक्षायां तु लक्षणान्तरस्य प्रवृत्तावपि विप्रतिषेधविषयस्य लक्षणस्याप्रवृत्त्याऽनित्यत्वमेव ।

इत्युपाध्यायजैयटपुत्रकैयटकृते महाभाष्यप्रदीपे सप्तमस्याध्यायस्य प्रथमे पादे द्वितीयमाह्निकम्। पादश्च प्रथमः।

सिचि वृद्धिः परस्मैपदेषु । सिचि वृद्धाविति । इहानिर्दिष्टस्थानिकत्वादिक्परिभाषोपस्थानादोकारस्य नास्ति प्राप्तिः । वदव्रजेत्यत्र त्वच इति स्थानिनिर्देशादिक्परिभाषानुपस्थानादोकारस्य वृद्धिप्रसङ्गे वचनम्। तत्र सिचि वृद्धावित्यनेन प्रकरणं प्रदर्श्यते। अथवा सिचि या वृद्धिर्वदव्रजेत्यनेन तस्यामित्यर्थः। ननु च वृद्धौ कर्तव्यायां पूर्वत्रासिद्धमिति सिज्लोपादीनामसिद्धत्वात्पूर्वं वृद्ध्या भाव्यं ततः सिज्लोपेन ततो ढत्वधत्वष्टुत्वढलोपेषु कृतेष्वोत्त्वेनेति वृद्धिविधानकाल ओकारस्या-

उ०— ऋत इद्धातोः। नन्वकृते सार्वधातुक इति गुणः, कृते पुगन्तेति कथं नित्यत्वं लक्षणभेदादत आह—लक्षणान्तरेणेति। गुणाख्यकार्यस्य कृताकृतप्रसङ्गित्वमात्रमाश्रित्येदमुक्तमित्यर्थः। अनित्यत्वमेवेति। तथा चात्रत्यविप्रतिषेधखण्डनमेकदेशिन इति भावः।

इति श्रीशिवभट्टसुतसतीगर्भजनागोजीभट्टकृते भाष्यप्रदीपोद्द्योते सप्तमस्याध्यायस्य प्रथमे पादे द्वितीयमाह्निकं पादश्च ।

सिचि वृद्धिः प० । ओकारे प्रकृतसूत्राप्राप्तेराह—इहेति । उच्यत इति ।

× ७, ३, ८४; ७, २, ११५. * ७, २. ३; ६. ३, ११२.

वोढेति । स तर्हि प्रतिषेधो वक्तव्यः । न वक्तव्यः । ओकाराद्वृद्धिर्विप्रतिषेधेन । ओत्त्वं क्रियतां वृद्धिरिति वृद्धिर्भविष्यति विप्रतिषेधेन ।

**ओकाराद्वृद्धिर्विप्रतिषेधेनेति चेदोत्त्वाभावः ॥ २ ॥**

ओकाराद्वृद्धिर्विप्रतिषेधेनेति चेदोत्त्वस्याभावः । उदवोढाम् उदवोढम् उदवोढेति । नैष दोषः । उक्तं तत्र + वर्णग्रहणस्य प्रयोजनं वृद्धावपि कृतायामोत्त्वं यथा स्यात् ।

**पुनःप्रसङ्गविज्ञानाद्वा सिद्धम् ।**

अथवा पुनःप्रसङ्गादत्र वृद्धौ कृतायामोत्त्वं भविष्यति ।

**यथा प्रसारणादिषु द्विर्वचनम् ॥ ३ ॥**

तद्यथा । जग्ले मम्ले ईजतुः ईजुरिति प्रसारणादिषु पुनःप्रसङ्गविज्ञानाद्द्विर्वचनं भवति* । इहापि तर्हि पुनःप्रसङ्गविज्ञानादोत्त्वं स्यात् सौढामित्रिरिति ।

प्र०—भावान्नार्थः प्रतिषेधेन । उच्यते । वृद्धिरङ्गापेक्षित्वात्प्रत्ययविशेषापेक्षित्वाच्च बहिरङ्गा सिज्लोपादयस्तु वर्णनिमित्तत्वादन्तरङ्गा इत्यसिद्धं बहिरङ्गमन्तरङ्ग इति वृद्धेरसिद्धत्वात्पूर्वत्रेति निर्दिष्टस्यासिद्धविषयस्याभावात्सलोपादीनामसिद्धत्वं नास्ति । पूर्वत्रासिद्धमित्यनेन सलोपादीनामसिद्धत्वादन्तरङ्गलक्षणस्य विषयस्याभावात्तदपेक्षबहिरङ्गत्वस्यापि बहिरङ्गस्याभावादसिद्धं बहिरङ्गमन्तरङ्ग इत्येषा परिभाषा न प्रवर्तते । तदेवं परस्परप्रतिबद्धस्य परिभाषाद्वयस्याप्रवृत्तौ परत्वात्सलोपादीन्कृत्वाऽन्तरङ्गत्वात्पूर्वमोत्त्वप्रवृत्तिमभ्युपगम्य चोदयति । वदव्रजेत्यत्र चान्तरेणान्तग्रहणं तदन्तविधौ सिद्धेऽन्तग्रहणमौपदेशिकहलन्तप्रतिपत्त्यर्थं मन्यते । प्रत्ययलक्षणेन च सिच्परत्वम् । ओकारादिति । नचान्तरङ्ग ओकारः । बह्वपेक्षत्वात् । उक्तं तत्रेति । ओदस्येत्युच्यमाने तादपि परस्तपर इत्यकारस्य तपरत्वाद्भिन्नकालस्य ग्रहणं न स्यादिति तस्यापि ग्रहणार्थं वर्णग्रहणं कृतमिति तत्सामर्थ्यात्कृतायामपि वृद्धावोत्त्वं प्रवर्तते । प्रवृत्तत्वाच्च लक्षणस्य पुनर्वृद्धेः प्रवृत्तिर्न भवति । सौढामित्रिरिति । सोढा अमित्रा येनेति बहु-

उ०—केचित्तु तत्र ढलोप इति विषयसप्तमीति वार्तिकाशयमाहुः । प्रत्ययविशेषेति । परस्मैपदपरसिज्रूपेत्यर्थः । अन्तरङ्गत्वादिति । वृद्धेर्बह्वपेक्षत्वाद्बहिरङ्गत्वं मन्यते । नन्वसिद्धत्वाप्रवृत्ताविदानीं हलन्तत्वाभावात्कथं वृद्धिप्राप्तिरत आह—प्रत्ययेति । बह्वपेक्षत्वादिति । ढलोप इत्यस्य बहुव्रीहित्वात्परसप्तमीत्वाच्चेत्यभिमानः । बहिर्भूतपरस्मैपदापेक्षत्वेन[1] वृद्धेरोत्त्वस्यान्तरङ्गत्वमेवेति चिन्त्यमिदम् । यदि त्ववर्णग्रहणप्रत्याख्यानभाष्यव्याख्यावसरीयास्मदुक्तरीत्या ढलोप इत्यस्य विषयसप्तमीत्वमङ्गी क्रियते तदाऽत्रापि विषयसप्तमीति भाष्याशय इत्याहुः । प्रवृत्तत्वाच्चेति । विकारान्यानुपूर्व्या एकत्वेन

+ ६. ३ ११२. * ६. १. १५; ४५; ८.

१. छ. 'बहिर्भूतपरस्मैपदापे' ।

सौढामित्रौ बहिरङ्गलक्षणत्वात्सिद्धम् ॥ ४ ॥

बहिरङ्गलक्षणा वृद्धिः×। अन्तरङ्गमोत्त्वम्। असिद्धं बहिरङ्गमन्तरङ्गे।

## अतो र्लान्तस्य ॥ ७ । २ । २ ॥

अन्तग्रहणं किमर्थं नातो र्लः इत्येवोच्येत। केनेदानीं तदन्तस्य भविष्यति। तदन्तविधिना+। इदं तर्हि प्रयोजनम्। अयमन्तशब्दोऽस्त्येवावयववाची। तद्यथा। वस्त्रान्तः वसनान्तः। अस्ति सामीप्ये वर्तते। तद्यथा। उदकान्तं गतः। उदकसमीपं गत इति गम्यते। तद्यः सामीप्ये वर्तते तस्येदं ग्रहणं यथा विज्ञायेत। अङ्गान्तौ यौ रेफलकारौ तयोः समीपे योऽकारस्तस्य यथा स्यात्। इह मा भूत्। अश्वल्हीत् अवभ्रीत्।

---

प्र०—व्रीहिः। विभज्यान्वाख्याने सढ अमित्र इ इति स्थिते परत्वाद्वृद्धिं मन्यते। **बहिरङ्गलक्षणत्वादिति**। यत्र विप्रतिषेधस्तत्र पुनःप्रसङ्गविज्ञानमिह तु वृद्धिनिमित्ते तद्धितेऽनुपजात एवान्तरङ्गमोत्त्वं प्रवर्तते। ततोऽर्थान्तराश्रयतद्धितानिमित्ता वृद्धिः।

**अतो०**। **अन्तग्रहणमिति**। अवयववचनोऽन्तशब्दस्तदन्तविधिनैव च तदर्थो लब्ध इति मत्वा प्रश्नः। **तद्यः सामीप्य इति**। अन्तशब्दोपादानादेव सामीप्यार्थस्य ग्रहणम्। **अङ्गान्ताविति**। रश्च लश्च र्लम्। ततः षष्ठ्याः सुपां सुलुगिति लुक्। तत्र र्लेणाङ्गस्य विशेषणात्तदन्तविधौ र्लान्तस्याङ्गस्य योऽकारस्तस्य वृद्धिर्भवति ततोऽन्तस्येत्यकारो विशेष्यते। संनिधानाच्च र्लापेक्षं सामीप्यमकारस्य विज्ञायत इति सामर्थ्यादङ्गान्तरेफलकारसमीपस्याकारस्य वृद्धिरित्यर्थः संपद्यते। **अश्वल्हीत् अवभ्रीदिति**। अत्राङ्गान्त्ययो रेफलकारयोः समीपेऽकारो नेत्यनेन वृद्धिर्न भवति। हलन्तलक्षणा नेटीति प्रतिषिद्धा।

---

उ०—लक्ष्यैक्यम्। नन्विह युगपत्प्राप्त्यभावात्कथं विप्रतिषेधोऽत आह—**विभज्येति**। **वृद्धिं मन्यत इति**। पुनस्तु न वृद्धिः कृतत्वादिति भावः। **अनुपजात एवेति**। कुत्सित इति सूत्रभाष्योक्तरीत्या क्रमेणान्वाख्यानमेवोचितमिति भावः। विभज्यान्वाख्यानेऽपि बहिर्भूतनिमित्तकवृद्धेरसिद्धत्वादन्तरङ्गनिमित्तमोत्त्वमिति बोध्यम्। एवमेव भाष्यव्याख्योचिता।

**अतो र्लान्तस्य**। **तदन्तविधिनैवेति**। सूत्रे च र्लान्तस्येति बहुव्रीहिरङ्गं चान्यपदार्थः। स चार्थोऽन्तग्रहणं विनाऽपि सिद्ध इत्यर्थः। अप्रसिद्धार्थोपादाने बीजमाह—**अन्तशब्देति**। अङ्गान्तावित्यर्थलाभः कथमत आह—**रश्च लश्चेति**। फलितार्थकथनं तदिति भावः। अत्रैतत्कैयटपाठस्वरसादङ्गान्तौ रेफलकाराविति भाष्यस्वरसाच्च ‘अतो र्लान्तस्य’ इति पाठ इति लभ्यते। **अत्राङ्गान्त्ययोरिति**।

---

× ४. १, ९५; ७. २. ११७, + १. १, ७२.

वदव्रजहलन्तस्याचः ॥ ७ । २ । ३ ॥

हल्ग्रहणं किमर्थम् । समुच्चयो यथा विज्ञायेत । वदिव्रज्योश्च हलन्तस्य चाच इति । नैतदस्ति प्रयोजनम् । अज्ग्रहणादेवात्र समुच्चयो भविष्यति । वदिव्रज्योश्चाचश्चेति । अस्त्यन्यदज्ग्रहणे प्रयोजनं वदिव्रजिविशेषणं यथा विज्ञायेत । वदिव्रज्योरच इति । यद्येतावत्प्रयोजनं स्याद्वदिव्रज्योरत इत्येवं ब्रूयात् । अथवैतदपि न ब्रूयात् । अत इति* वर्तते । इदं तर्हि प्रयोजनं हलन्तस्य यथा स्यादजन्तस्य मा भूत् । कस्य पुनरजन्तस्य प्राप्नोति । अकारस्य । अचिकीर्षीत् अजिहीर्षीत् । लोपोऽत्र बाधको भविष्यति । आकारस्य तर्हि प्राप्नोति । अयासीत् । अवासीत् । नास्त्यत्र विशेषः । सत्यां वा वृद्धावसत्यां वा । संध्यक्षरस्य तर्हि प्राप्नोति । न वै संध्यक्षरमन्त्यमस्ति । ननु चेदमस्ति ढलोपे कृत

---

प्र०– वदव्रज० । हल्ग्रहणं किमर्थमिति । अज्ग्रहणादेव हलन्तस्य सिद्धा वृद्धिरिति प्रश्नः । अङ्गेन चाचो विशेषणाद्यत्र तत्र स्थितस्याचो वृद्धिर्विधीयमाना हलन्तस्य प्रवर्तते । अजन्तस्य मा भूदिति । असति हल्ग्रहणेऽचाऽङ्गस्य तदन्तविधिर्विज्ञायेत । ततश्चाल्लोपादीन्बाधित्वा वृद्धिः स्यात् । लोपोऽत्रेति । विशेषणविशेष्यभावे कामचारादङ्गेनाज्विशेष्यते । तत्रापाक्षीदित्यादौ सावकाशा वृद्धिरतो लोपेन पूर्वविप्रतिषेधेन बाध्यते । ण्यल्लोपावियङ्यण्गुणवृद्धिदीर्घेभ्य इति । अचा त्वङ्गे विशेष्यमाणे वृद्धिरनवकाशाऽतो लोपं बाधेत । आकारस्य तर्हीति । स्थानेऽन्तरतमपरिभाषाया अत्राप्रवृत्तिं मन्यते । तत्प्रवृत्तौ हि प्रधानं वृद्धिविधानं विफलत्वादुपरुध्येत । नास्त्यत्र विशेष इति । विशिष्टविषयव्यवस्थापनं प्रधानस्य गुणेन कर्तव्यमिति प्रवृत्त्यप्रवृत्त्योर्वृद्धेर्विशेषाभावेऽपि नास्ति प्रधानोपरोध इति प्रवर्तत एवान्तरतमपरिभाषेति भावः । संध्यक्षरस्येति । औकार ओकारस्य प्राप्नोतीत्यस्ति

---

उ०–लक्ष्यानुरोधाद्व्यक्तिपक्ष एवाऽऽश्रीयते जातेरन्तावयवत्वासंभवाच्च नाश्वल्लीदित्यत्रापि दोषः । सामीप्यं चाव्यवहित एवेति भावः । नच सिचीत्यकारविशेषणेन येन नाव्यवधानन्यायेन वाऽश्वल्लीदिति व्यावृत्तावन्तग्रहणं व्यर्थम् अङ्गस्य प्रत्ययांश उत्थिताकाङ्क्षत्वेन तद्विशेषणताया एव न्याय्यत्वात् ।

वदव्रज० । कथमज्ग्रहणाद्धलन्तस्य वृद्धिरत आह—अङ्गेन चेति । हल्ग्रहणकरणानुरोधाद्वैयधिकरण्यमाश्रीयत इत्यर्थः । अज्ग्रहणसामर्थ्यादच इत्यावर्तते । तेनातो हलादेरित्येतद्बाधनार्थाभ्यां वदव्रजिभ्यामपि संबन्धोऽङ्गावयवस्याच इत्यर्थश्चेति भावः । वृद्धिरनवकाशेति । अल्लोपादिषु नाप्राप्तेषु वृद्धेरारम्भादिति भावः । स्थानेऽन्तरेति । ततश्चौकारादिर्वृद्धिः स्यादित्यर्थः । अप्रवृत्तौ बीजमाह—तत्प्रवृत्तौ हीति । न हि प्रधानोपरोधिना गुणेन भाव्यमिति भावः । नास्ति प्रधानोपरोध इति । सर्वथाऽप्रवृत्तावेवोपरोधो नतु विशेषाभावेऽपीति भावः । न वै संध्यक्षरमित्येतद्भाष्यप्रामाण्यात्संध्यक्षरान्तेभ्य आचार-

---

* ७. २. २. + ६. ४. ४८.

उद्वोढाम् । उद्वोढम् उद्वोढेति* । असिद्धो ढलोपस्तस्यासिद्धत्वान्नैतदन्त्यं भवति । अत उत्तरं पठति ।

**हल्ग्रहणमिटि प्रतिषेधार्थम् ॥ १ ॥**

हल्ग्रहणं क्रियत इटि प्रतिषेधार्थम् । नेटि [ ७. २. ४ ] इति प्रतिषेधं वक्ष्यति स हलन्तस्य यथा स्यादजन्तस्य मा भूत् । अलावीत् अपावीत्÷ ।

**न वाऽनन्तरप्रतिषेधात् ॥ २ ॥**

न वैतत्प्रयोजनमस्ति । किं कारणम् । अनन्तरस्य प्रतिषेधात् । अनन्तरं यद्वृद्धिविधानं तत्प्रतिषिध्यते । कुत एतत् । अनन्तरस्य विधिर्वा भवति प्रतिषेधो वेति ।

**तच्चानन्त्यार्थम् ॥ ३ ॥**

तच्चानन्तरं वृद्धिविधानमनन्त्यार्थं विज्ञायते । कथं पुनरनन्तरं वृद्धिविधानमनन्त्यार्थं शक्यं विज्ञातुम् ।

**अन्त्यस्य वचनानर्थक्यात् ॥ ४ ॥**

अन्त्यस्य वृद्धिविधाने प्रयोजनं नास्तीति कृत्वाऽनन्तरं वृद्धिविधानमनन्त्यार्थं विज्ञायते ।

---

प्र०—विशेषः । **तस्यासिद्धत्वान्नैतदन्त्यमिति** । ननु मा भूदन्त्यमनन्त्यस्याप्यविशेषविधानात्प्राप्नोति । एवं तर्हि पराभ्युपगमनिवृत्तिपरमेतत् । परेण संध्यक्षरस्यान्त्यत्वमभ्युगतं निवार्यते । अनन्त्यत्वे त्वोकारस्य यथा वृद्धिर्न भवति तथाऽऽद्यसूत्रे प्रतिपादितम् । **हल्ग्रहणमिति** । असतीह हल्ग्रहणे नेटीत्यत्राज्ग्रहणानुवृत्तावपि या काचिदचो वृद्धिः प्रतिषिध्येत । यदि त्वज्ग्रहणानुवृत्तिसामर्थ्यादच इत्येवं विहिता या वृद्धिस्तस्याः प्रतिषेधो विज्ञायेत तदा न स्याद्दोषः । परिहारान्तरसद्भावात्तु नेदमुक्तं तदाह—**नवेति** । **अन्त्यस्य वचनानर्थक्यादिति** । क्वचिदन्त्यो विधिभाङ् न संभ-

---

उ०—क्विबनभिधानान्नेत्याहुः । इको गुणेतिसूत्रस्थोऽग्रिम एतत्सूत्रस्थश्च कैयटस्तु चिन्त्य इति बोध्यम् । **अविशेषविधानादिति** । अङ्गेनाचो विशेषणादिति भावः । अनन्त्यस्य वृद्धिरिति सिद्धान्ते दोषः स्यादेवेत्यत आह—**अनन्त्यत्वे त्विति** । **आद्यसूत्रे** । सिचिरित्यत्र । [illegible] । लक्ष्ये लक्षणस्येति न्यायेनेति भावः । **या काचिदिति** । इडादौ परस्मैपदपरे सिचि परेऽङ्गस्याचो न वृद्धिरित्यर्थेनायावीदित्यादौ सिचि वृद्धेरपि स निषेधः स्यादित्यर्थः । **अनुवृत्तिसामर्थ्यादिति** । इडादौ सिच्यङ्गस्य वृद्धिर्नेत्येव सिद्धेरिति भावः । **परिहारान्तरेति** । अज्ग्रहणासंबन्धेऽप्यनन्तरस्येति न्यायेन तदर्थसिद्धिरूपलघुपरिहारान्तरेत्यर्थः । नन्वनन्तरा वृद्धिर्हलन्तस्य यथा स्यादजन्तस्य मा भूदित्यर्थं तत्स्यादिति शङ्कयामुक्तयुक्तिं स्मारयति भाष्ये **तच्चानन्त्यार्थमिति** । **काचिदिति** । अचिकीर्षीदि-

* ८. ३. १३; ६. ३. ११२. ÷ ७. २. १.

अतो विभाषार्थं तर्हीदं वक्तव्यम् । अतो हलादेर्लघोः [ ७. २. ७ ] इति विभाषा वृद्धिं वक्ष्यति सा हलन्तस्य यथा स्यादजन्तस्य मा भूत् ।आचिकीर्षीत् अजिहीर्षीत् ।

**अतो विभाषार्थमिति चेत्सिद्धं वृद्धेर्लोपबलीयस्त्वात् ॥ ५ ॥**

अतो विभाषार्थमिति चेत्तदन्तरेणापि हल्ग्रहणं सिद्धम् । कथम् । वृद्धेर्लोपबलीयस्त्वात् । वृद्धेर्लोपो* बलीयान्भवतीति । इदमिह संप्रधार्यम् । वृद्धिः क्रियतां लोप इति किमत्र कर्तव्यम् ।परत्वाद्वृद्धिः। नित्यो लोपः। कृतायामपि वृद्धौ प्राप्नोत्यकृतायामपि+ । अनित्यो लोपो न हि कृतायां वृद्धौ प्राप्नोति । परत्वात्सगिड्भ्यां भवितव्यम्× । नात्र सगिटौ प्राप्नुतः । किं कारणम् ।

**एकाचस्तौ वलीति वा ।**

एकाचः सगिटावुच्येते÷ अथवा वलीति तत्रानुवर्तते* । किं पुनः कारणमेकाचस्तौ वलीति वा । दरिद्रातेर्मा भूदिति । दरिद्रातेर्न सगिड्भ्यां भवितव्यम् । उक्तमेतद्दरिद्रातेरार्धधातुके लोपः सिद्धश्च प्रत्ययविधाविति× । यश्चे-

प्र०—वति । अयासीदित्यादौ तु विशेषाभावः । तदेवमिहार्थो हल्ग्रहणस्य नास्तीति मत्वाऽऽह—**अतो विभाषार्थमिति** । असति हल्ग्रहणेऽकणीदकाणीदित्यादौ सावकाशा वृद्धिरचिकीर्षीदित्यादौ परत्वाल्लोपं बाधेत । अथवाऽताऽङ्गस्य विशेषणाच्चदन्तस्यैव स्यान्न त्वकाणीदित्यादौ । **कृतायामपीति** । आतो लोप इटि चेत्यनेनेति भावः । अत्र शब्दान्तरप्राप्तिर्लक्षणान्तरप्राप्तिश्च नाऽऽश्रिता । कृताकृतप्रसङ्गित्वात्तु लोपाख्यस्य कार्यस्यानाश्रितोपाधिभेदस्य नित्यत्वमाश्रितम् । **परत्वादिति** । यस्य लक्षणान्तरेण निमित्तं विहन्यते न तदनित्यमिति नाऽऽश्रितम् । लोपेनात्र वृद्धौ कृतायां न भाव्यमिति तस्यानित्यत्वमित्येतावदाश्रित्योच्यते । वृद्धिरेवापवादनिमित्ततामुपयान्ती लोपं विहन्तीति तदपेक्षया भवत्येव लोपस्यानित्यत्वम् । **एकाचस्तौ वलीति** । एकीयमतमेतत् । तथा च वा चाद्यतन्यामिति यदाऽऽकारलोपो दरिद्रातेर्नास्ति तदाऽदरिद्रासीदिति सगिटावुदाहृतावेव । **सिद्धश्चेति** । आर्धधातुके विष-

उ०—त्यादौ लोपेनापहारादिति भावः । **विशेषाभाव इति** । यद्यप्यत्र यमरमेति सगिड्भ्यां परत्वादपवादत्वाद्वा वृद्धिं बाधित्वा भाव्यं तयोश्च कृतयोराकारान्तत्वं न संभवति तथाऽपि तदभ्युपगमेऽप्यदोष इत्यर्थः । ण्यल्लोपाविति पूर्वविप्रतिषेधसत्त्वादाह—**अथवेति** । कृतायां वृद्धावतो लोप इत्यस्याप्राप्तेराह—**अतो लोप इति** । **उपाधिभेदस्येति** । उपाधिभेदः स्थानिभेदो लक्ष्यभेदश्चेत्यर्थः । **न भाव्यमिति** । बाधकसत्त्वादिति भावः । **एतदिति** । एकाच इत्येतदित्यर्थः । वलीत्येतत्तु रुदादिभ्य इत्यत्र संबन्धावश्यकत्वेन मध्येऽपि संबध्यत एवेति बोध्यम् । अद्यतनीति लुङः पूर्वाचार्यसंज्ञा । **विषयेति** । अत एव दरिद्रातीति

* ६. ४. ४८. + ६. ४. ६४; ४८. × ७. २. ७३. ÷ ७. २. १०. * ७. ३. ३५; ७३.
× ६. ४. ११४.

दानीं प्रत्ययविधौ सिद्धः सिद्धोऽसौ सगिड्विधौ । एवमर्थमेव तर्ह्येकाज्ग्रहण-मनुवर्त्यमत्र सगिटौ मा भूतामिति । स एष नित्यो लोपो वृद्धिं बाधिष्यते । कं पुनर्भवान्वृद्धेरवकाशं मत्वाऽऽह नित्यो लोप इति । अनवकाशा वृद्धिर्लोपं बाधिष्यते । सावकाशा वृद्धिः । कोऽवकाशः । अनन्त्यः । अकणीत् अकाणीत् । कथं पुनः सत्यन्त्येऽनन्त्यस्य वृद्धिः स्यात् । भवेद्योऽताऽङ्गं विशेषयेत्तस्यानन्त्यस्य न स्यात् । वयं तु खल्वङ्गेनाकारं विशेषयिष्यामः । तत्रानन्त्यो वृद्धेरवकाशोऽन्त्यस्य लोपो बाधको भविष्यति । एवं वृद्धेर्लोपबलीयस्त्वात् । अथवाऽऽरभ्यते पूर्वविप्रतिषेधो ण्यल्लोपावियङ्यण्गुणवृद्धिदीर्घत्वेभ्यः पूर्वविप्रतिषिद्धम्× । सा तर्ह्येषाऽनन्त्यार्था वृद्धिर्हलन्तस्य यथा स्यादजन्तस्य मा भूत् । अपिपाठिषीत् । एतदपि नास्ति प्रयोजनम् । कथम् । हलादेरिति नैषा बहुव्रीहेः षष्ठी । हलादिर्यस्य सोऽयं हलादिः हलादेरिति । का तर्हि । कर्मधारयात्पञ्चमी । हलादिर्हलादिः हलादेः परस्येति । यदि कर्मधारयात्पञ्चमी अचकासीत्

---

प्र०—यभूत एव लोपविज्ञानात् । **एवमर्थमिति** । अचिकीर्षीदित्यादौ वृद्धौ कृतायां सगिटौ मा भूतामतो लोपस्य नित्यत्वं यथा स्यादित्येवमर्थम् । तत्र नित्यत्वाल्लो[illegible] [illegible] पारिशेष्याद्धलन्त एव वृद्धेरवस्थानान्नार्थो हल्ग्रहणेन । अताऽङ्गस्य तदन्तविधिं मत्वाऽऽह—**कं पुनरिति** । नित्यादप्यनवकाशं बलवदिति लोपं बाधित्वा वृद्धिः स्यादित्यजन्तनिवृत्त्यर्थं हल्ग्रहणं कर्तव्यम् । इतरस्त्विष्टसिद्धये विशेषणविशेष्यभावे कामचाराल्लघुग्रहणसामर्थ्याच्चाङ्गेनाज्विशेष्यत इति प्रतिपादयितुमाह—**भवेदिति** । अदरिद्रासीत्यादिसिद्धये सगिड्विधावेकाच इति यदा नानुवर्त्यते तदोभयोरनित्ययोः पूर्वविप्रतिषेधेन लोपे कृते हलन्त एव वृद्धिरवतिष्ठते । अथवा लक्षणभेदाच्छब्दान्तरप्राप्त्या वा लोपस्यानित्यत्वं यो मन्यते तं प्रत्युच्यते **अथवाऽऽरभ्यत इति** । **अपिपठिषीदिति** । अल्लोपस्य स्थानिवद्भावादजन्तमेतदङ्गम् । तत्र पशब्दाकारस्य वृद्धिः प्राप्नोति हल्ग्रहणान्न भवति । **अचकासीदिति** । चकाराद्धल आदेः परोऽकारो भव-

---

उ०—दरिद्र इत्यत्राजेव न त्वादन्तलक्षणो णः । भाष्ये—**सिद्धोऽसौ सगिड्विधाविति** । तयोः प्रत्ययोत्पत्त्यनन्तरभावित्वादिति भावः । **एवमर्थमेव तर्हीति** । वलीति संबन्धेनापि सगिटोर्वारणादुपलक्षणमिदम् । **लघुग्रहणसामर्थ्याच्चेति** । आकारान्ते विशेषाभावेन सगिड्भ्यां बाधाच्चात इति तपरकरणाच्च न तद्व्यावृत्त्यर्थं लघुग्रहणमिति भावः । ननु नित्येन कथं पूर्वविप्रतिषेधोऽत आह—**अदरिद्रासीदिति** । एकाच इत्यस्याननुवृत्तावपि वलीत्यस्यानुवृत्तिसत्त्वात्सगिटोरप्राप्तौ लोपो नित्योऽत आह—**अथवेति** । भाष्ये—**सा तर्ह्येषेति** । अतो हलादेरित्येषेत्यर्थः । अत्र पूर्वविप्रतिषेधेनाल्लोपे कथमजन्तत्वमत आह—**अल्लोपस्येति** । **हल्ग्रहणान्न भवतीति** । हल्ग्रहणसामर्थ्यात्सिजुत्पत्तिवेलायां हलन्तो गृह्यत इति भावः ।

---

× ६.४.४८.

अत्र प्राप्नोति । सिचाऽऽनन्तर्यं विशेषयिष्यामः । हलादेः परस्य सिच्यनंन्तरस्येति । यदि सिचाऽऽनन्तर्यं विशेष्यते अकणीत् अकाणीत् अत्र न प्राप्नोति । वचनाद्भविष्यति । इहापि तर्हि वचनात्प्राप्नोति । अचकासीत् । येन नाव्यवधानं तेन व्यवहितेऽपि वचनप्रामाण्यात् । केन च नाव्यवधानम् । वर्णेनैकेन । संघातेन पुनर्व्यवधानं भवति न च भवति । यदि सिचाऽऽनन्तर्यं विशेष्यतेऽस्तु बहुव्रीहेः षष्ठी । कस्मान्न भवति । अपिपठिषीत् । व्यवहितत्वात् ।

एवं तर्ह्यतिदूरमेवेदं हल्ग्रहणमनुसृतम् । हल्ग्रहणमनन्त्यार्थम् । अज्ग्रहणमनिगर्थम् ।

---

प्र०—तीति वृद्धिप्रसङ्गः । बहुव्रीहावप्ययं दोषः । ननु चाटि कृते हल आदित्वं नास्ति । नैष दोषः । सिजन्तस्याङ्गस्याडागमः क्रियमाणस्तस्यैव हलादित्वं निवर्तयति नतु सिचि यदङ्गं तस्य । **येन नाव्यवधानमिति** । ननु वचनादतो लोपो बाध्येत सिचा ह्यानन्तर्य आश्रितेऽनन्त्यो नैव वृद्धेरवकाशः स्यात् । नैतदस्ति । लघुग्रहणमेवमनर्थकं स्याद्व्यवच्छेद्याभावात् । ततश्चानन्त्यस्य वृद्ध्यवकाशत्वादन्त्यस्य नित्यत्वपूर्वविप्रतिषेधाभ्यां लोपाद्व्यवधान एव वृद्ध्या भाव्यमिति निर्दिष्टग्रहणादधिकव्यवधाननिवृत्त्यर्थत्वेन नाव्यवधानमित्याश्रीयते । तदेवमुत्तरार्थं हल्ग्रहणं न कर्तव्यमिति स्थित इदमुच्यते । **एवं तर्हीति** । प्रसक्तानुप्रसक्त्या प्रयोजनकथनप्रसङ्गेन हल्ग्रहणमतिसृतं दूरमपगतमित्यर्थः । क्वचिदनुसृतमिति पाठः । तत्रायमर्थो दूरं यातं सदनुसृतं न परित्यक्तम् । एतदुक्तं भवति । अत्रैव सूत्रे हल्ग्रहणस्य प्रयोजनमस्ति । तद्दर्शयति—**हल्ग्रहणमनन्त्यार्थमिति** । केचिदाहुः । सति हल्ग्रहणे भवत्यगवीदिति । केचित्तु इग्धातोरित्यतो धातुग्रहणानुवृत्त्याऽगवीदित्यत्रातो हलादेर्लघोरिति वृद्धिर्न भवतीत्याहुः । सिचा धातावाक्षिप्ते पुनर्धातुग्रहणाद्यस्य नित्यं धातुत्वं स गृह्यते ।

---

उ०—**सिजन्तस्येति** । अन्तरङ्गत्वादादौ विकरणास्ततोऽडागमस्ततो वृद्धिरिति भावः । **नन्विति** । एवं च येन नाव्यवधानन्यायस्यायमविषय उपसंजातविरोधन्यायेन च न परिभाषाबाधः किंतु लोपस्यैव बाधः **स्यादिति** भावः । ण्यल्लोपाविति पूर्वविप्रतिषेधाच्चिन्त्यमिदम् । **दूरमपगतमिति** । यद्यपीत्यादिः । तथाऽपीति शेषः । यद्यप्यतिदूरं गतं निष्फलतया तथाऽपि प्रकृतसूत्र एवानन्त्यार्थं मनन्त्यहलोऽपि ग्रहणार्थमिति भाष्यार्थः । तेनाराङ्क्षीदित्यादिसिद्धिः । यत्तु केश्चिद्धल्ग्रहणस्य प्रयोजनान्तरमुक्तं तद्दूषयितुमनुवदति—**केचिदिति** । अगवीदित्यत्र हलन्तत्वाभावान्नानेनेगन्तत्वाभावाच्च न पूर्वेण वृद्धिरिति तदाशयः । तद्दूषयति—**केचिदिति** । अतो हलादेरित्यस्याभावाय तदावश्यकतया तेनैवास्या अपि व्यावृत्तिरित्याशयः । धातुग्रहणानुवृत्त्या कथमगवीदित्यत्र वृद्ध्यभावोऽत आह—**सिचा धाताविति** । धातुपाठपठितानामेव नित्यं धातुत्वमिति भावः । आहुरित्यरुचिबीजं

## ह्म्यन्तक्षणश्वसजागृणिश्व्येदिताम् ॥ ७ । २ । ५ ॥

किमर्थं जागर्तेर्वृद्धिप्रतिषेध उच्यते । सिचि वृद्धिर्मा भूदिति+ । नैतदस्ति प्रयोजनम् । जागर्तेर्गुण उच्यते* वृद्धिविषये प्रतिषेधविषये च स बाधको भविष्यति । गुणे तर्हि कृते रपरत्वे च हलन्तलक्षणा वृद्धिः÷ प्राप्नोति । नेटि

प्र०–तस्मादयमर्थो येन नाव्यवधानमित्येकेन हला व्यवधाने सिजचोर्वृद्धिः स्यान्न तु संयोगेनाराङ्क्षीदमाङ्क्षीदित्यादौ । हल्ग्रहणे तु सति वर्णग्रहणे जातिग्रहणात्संयोगान्तस्यापि हल्ग्रहणसामर्थ्याद्भवति । अनन्त्यार्थमित्यस्यायमर्थोऽनन्त्योऽपि हल्कथं नाम गृह्येत । अन्तग्रहणं तु विस्पष्टार्थम् । तदन्तरेणापि तदन्तविधिलाभात् । किंतु हलोऽच इत्युच्यमानेऽज[illegible] हल्स्थाने वृद्धिरित्ययमप्यर्थ आशङ्क्येत । अज्ग्रहणमनिगर्थमिति । अन्यथेक्परिभाषोपस्थानादभैत्सीदित्यादावेव स्यान्नत्वपाक्षीदित्यादौ ।

ह्म्यन्तक्षण० । किमर्थमिति । गुणेन बाधिता वृद्धिर्न प्राप्नोतीति मन्यते । सिचि वृद्धिर्मा भूदिति । अतो लान्तस्येत्यनेनेति भावः । इतरस्तु सिचि वृद्धिरिति [illegible] सा चायुक्तेति मत्वाऽऽह—नैतदिति । वृद्धिप्रतिषेधविषयादन्यत्र सामान्यलक्षणेन गुणस्य सिद्धत्वाज्जाग्रोऽवि[illegible]त्स्विति गुणविधानं वृद्धिप्रतिषेधविषयार्थं संपद्यते । गुणे तर्हीति । अङ्गवृत्त इत्येतत्तु निष्ठितत्वस्य दुर्ज्ञानत्वादनाश्रितम् । यदि तर्हि गुणे रपरत्वे च कृते लक्षणान्तरेण वृद्धिर्भवति तदा जागरक इत्यादावजन्तलक्षणां वृद्धिं बाधित्वा गुणे प्रवृत्ते रपरत्वे चात उपधाया इति वृद्धिः प्राप्नोति । नैष दोषः । चिण्णलोर्गुणप्रतिषेधाल्लिङ्गादुपधालक्षणा वृद्धिर्न भवतीत्यवसीयते । अन्यथा चिण्णलोर्गुणरपरत्वयोः कृतयोरुपधालक्षणया वृद्ध्या सिध्यति रूपमिति प्रतिषेधं न विदध्यात् । यदि च कृते गुणे वृद्धिमात्राप्रवृत्तेर्लिङ्गं

उ०–न वै संध्यक्षरमन्त्यमस्तीति भाष्यप्रामाण्यात्संध्यक्षरान्तेभ्य आचारक्विबभाव इति । अराङ्क्षीदिति । न च सिचाऽङ्गस्य विशेषणात्सिद्धिः । अस्मादेव ज्ञापकादेतत्प्रकरण इत आरभ्य वृद्धिभाज एव सिज्परत्वेन विशेषणात् । अत एव लावस्थायामडागम इति पक्षेऽटो न वृद्धिरचकासीदित्यादौ च न वृद्धिरिति भावः । जातिग्रहणादिति । तज्जात्याश्रय[illegible]दित्यर्थः । तत्रैकस्य गौणमन्त्यत्वं बोध्यम् । स्पष्टार्थत्वमेवोपपादयति—किंतु हल इति ।

ह्म्यन्त० । गुणेनेति । जाग्रोऽवीत्यनेनेति भावः । गुणस्य सिचि वृद्धिरित्येतद्बाधकत्वादाह—अतो ल्रेति । इयं हि गुणोत्तरकालप्राप्तेति भावः । सामान्यलक्षणेन—सार्वधातुकार्धधातुकयोरित्यनेन । दुर्ज्ञानत्वादिति । अगतिकगतिरियमिति भावः । अत उपधाया इति । गुणस्तु जागरित इत्यादौ सावकाश इति भावः । [illegible]मात्रेते । गुणोत्तरभाविवृद्धिमात्रेत्यर्थः । इदं चिन्त्यम् । अत उपधाया वृद्धि-

+ ७. २. १, * ७, ३. ८५. ÷ ७. २, ३.

[ ७. २. ४ ] इति तस्याः प्रतिषेधो भविष्यति। इयं तर्हि प्रतिषेधोत्तरकाला वृद्धिरारभ्यतेऽतो ल्रान्तस्य [ २ ] इति ।

अपर आह । कक्ष्यया कक्ष्या निमातव्या । सिचि वृद्धिश्च प्राप्नोति गुणश्च+ । गुणो भवति । गुणे कृते रपरत्वे च हलन्तलक्षणा वृद्धिः* प्राप्नोति नेटि [ ४ ] इति च तस्याः प्रतिषेधो भवति । प्रतिषेधोत्तरकालमतो हलादेर्लघोः [ ७ ] इति विभाषा वृद्धिः प्राप्नोति न च किंचित् । अतो ल्रान्तस्य [ २ ] इति च वृद्धिः प्राप्नोति न च किंचित् ।

---

प्र०—चिण्णलोः प्रतिषेध आश्रीयते तदा जागृग्रहणं शक्यमकर्तुम् । इयं तर्हीति । आर्थोऽयमुत्सर्गापवादयोः क्रमः । नेटीति प्रतिषेधे प्राप्तेऽतो ल्रान्तस्येति वृद्धेरारम्भात्प्रतिषेधोत्तरकालेत्युच्यते । पाठक्रमेण पूर्वकालाऽपि । अपर आहेति । पूर्वोक्त एवार्थो वाचोयुक्त्यन्तरेणोच्यते । कक्ष्ययेति । कक्ष्यां विशिष्टदेशस्थं तुलासूत्रं वणिजो व्यवहरन्ति । अत्र तु कक्ष्येव कक्ष्या यथा कक्ष्या द्रव्याणां गुरुत्वं परिच्छिनत्ति तथा शास्त्रं कार्याणां सामान्यविशेषावस्थाभावेन बलाबलं व्यवस्थापयति । हर्म्यावस्थावचनो वा कक्ष्याशब्द उपचारादिहावस्थावचनः । तत्र किं कार्यं सामान्यावस्थं किं विशेषावस्थमित्येवं कक्ष्यया कक्ष्या निमातव्येत्यर्थः । बलं वा कक्ष्या यथा तुल्यकक्ष्याविति । तत्र जागृ इ स् ईत् इति स्थिते वार्णादाङ्गो विधिर्बलीयानिति यणादेशं बाधित्वा सार्वधातुकार्धधातुकयोरिति गुणः प्राप्तस्तमपवादत्वाद्बाधित्वा सिचि वृद्धिरिति वृद्धिः प्राप्ता तामपवादत्वाद्बाधित्वा जाग्र इति गुणः प्राप्नोति । भाष्यकारस्तु दुर्बलत्वादुत्सर्गं परिहृत्य वृद्धेरारभ्य गणयति—न च किंचिदिति । तस्याः पाक्षिक्या वृद्धेरपवादभूतं न किंचिद्गुणविधानमस्ति यतो जागृग्रहणमकर्तव्यं

---

उ०—बाधनेन तस्य चरितार्थ्याज्जागरक इत्यस्य सिद्धेश्चानेकशास्त्रबाधे मानाभाव इति भाष्याशयात् । जागृग्रहणमेव च ज्ञापकं ज्ञापकानां सजातीयापेक्षत्वमुचितमिति सूचयति । ननु प्रतिषेधात्पूर्वं पाठादुत्तरकालेत्ययुक्तमत आह—आर्थोऽयमिति । पाठक्रमादार्थः क्रमो बलीयानिति भावः । पौनरुक्त्यं परिहरति—पूर्वोक्तेति । पूर्वं प्रतिज्ञामात्रमिदानीं हेतुप्रदर्शनमिति भेदः । तथा [illegible] । बलवता बाधकेन दुर्बलं बाध्यत्वात्परिच्छेत्तव्यमिति भाष्यार्थ इति भावः । हर्म्यावस्थेति । द्वितीयां तृतीयां च कक्ष्यां प्रविष्ट इति व्यवहारादिति भावः । विशेषवाचिनः सामान्यपरत्वं लक्षणयेत्याह—उपचारादिति । बलं वेति । कस्यचिद्बलेनान्यस्य बलं निमातव्यं दुर्बलमिदमिति ज्ञातव्यमिति भाष्यार्थ इति भावः । दुर्बलत्वादिति । अत्यन्तसामान्यत्वेने-

---

+ ७. २. १; ७. ३. ८५. * ७. २. ३५.

नेड्वशि कृति ॥ ७ । २ । ८ ॥

किमर्थं पुरस्तात्प्रतिषेध उच्यते न विध्युत्तरकालः प्रतिषेधः क्रियेत । तद्यथा । अन्यत्रापि विध्युत्तरकालाः प्रतिषेधा भवन्ति । क्वान्यत्र । कर्तरि कर्मव्यतिहारे न गतिहिंसार्थेभ्यः [ १. ३. १४; १५ ] इति । देवताद्वंद्वे च नेन्द्रस्य परस्य [ ७. ३. २१; २२ ] तत्रायमप्यर्थो द्विरिड्ग्रहणं न कर्तव्यं भवति प्रकृतमनुवर्तते* नैवं शक्यम् । इडर्थं सार्वधातुकग्रहणं लिङः सलोपे संनिहितं तद्विच्छिद्येत ।

यदि पुनर्न वृद्भ्यश्चतुर्भ्यः [ ७. २. ५९ ] इत्यत्रैवोच्येत । किं कृतं भवति । विध्युत्तरकालश्चैव प्रतिषेधः कृतो भवति द्विश्चेड्ग्रहणं न कर्तव्यमिडर्थं च सार्वधातुकग्रहणं लिङः सलोपे संनिहितं भवति । तत्रायमप्यर्थो द्विः प्रतिषेधो न कर्तव्यो भवति । नैवं शक्यम् । इह हि तुष्टोथ दुद्रोथेत्यृतो भारद्वा-

प्र०—स्यात् । गुणो वृद्धिर्गुणो वृद्धिः प्रतिषेधो विकल्पनम् । पुनर्वृद्धिर्निषेधोऽतो यण्पूर्वाः प्राप्तयो नव ॥ इति संग्रहश्लोकः ।

नेड्वशि० । प्राप्तिपूर्वकत्वात्प्रतिषेधस्यार्थात्पूर्वं विधिप्रकरणं पठितव्यं पश्चात्प्रतिषेधप्रकरणं क्रमव्यतिक्रमे प्रयोजनाभावादिति मत्वा पृच्छति—किमर्थमिति । तत्रायमप्यर्थ इति । न्याय्यक्रमाश्रयणादुपचयोऽप्यस्तीत्यर्थः । इडर्थमिति । रुदादिभ्यः सार्वधातुक इत्यत्र यत्सार्वधातुकग्रहणमिड्विधावुपात्तं तदानन्तर्याल्लिङः सलोपोऽनन्त्यस्येत्यत्र शक्यतेऽनुवर्तयितुम् । यदि त्विड्विधेः परस्तादीडजनोर्ध्वे चेत्यस्यानन्तरं नेड्वशि कृतीत्यादि प्रतिषेधप्रकरणं क्रियते तदा तेन विच्छिन्नत्वात्सार्वधातुकग्रहणं सलोपविधौ नानुवर्तेत । तुष्टोथेति । यथा पपिथ ययिथेत्यादावार्धधातुकस्येतीट् प्राप्त एकाच इति प्रतिषिद्धः क्रादिनियमात्पुनः प्राप्तोऽचस्तास्वत्थलीति प्रतिषिद्धस्तत्र सत एव भारद्वाजस्य प्रतिषेधो नान्येभ्य इति नियमात्पक्ष इड् भवति । एवं स्तुद्रुस्रुश्रुभ्योऽपि प्राप्नोतीत्यर्थः । तथा हि—क्रादिनियमस्य बाधकमचस्तास्वदिति प्रतिषेधमृतो भारद्वाजस्येति नियमो बाधते । स कथं क्रादिप्रतिषेधं न बाधेत । ननु च मध्येऽ-

उ०—त्यर्थः । प्राप्तय इति । प्राप्यन्त इति व्युत्पत्त्या कार्याणीत्यर्थः ।

नेड्वशि० । न्यायविरोधमुक्त्वा गौरवमप्यत्र पाठ इत्याह—भाष्ये तत्रायमप्यर्थ इति । प्राङ्निषेधपाठ आर्धधातुकस्येडित्यत्र निषेधासंबन्धाय पुनरिड्ग्रहणं कार्यमित्यर्थः । नियमात्पक्ष इति । नान्येभ्य इत्यत्रापि भारद्वाजस्येत्यस्य संबन्धादिति भावः । ननु भारद्वाजनियमोऽनन्तरत्वादुपदेशेऽत्वतोऽचस्तास्वदिति निषेधस्यैव बाधक इति कथं क्रादिप्रतिषेधबाधस्तेनेत्यत आह—तथा हीति । न बाधेतेति । बाध्यबाध्यस्य सुतरां बाध्यत्वादिति भावः । ननु चेति । भारद्वाजनियमात्परं क्रादिसूत्रपाठमाश्रित्येदम् ।

* ७. २. ७६; ७९.

**त्रस्य [ ७. २. ६३ ] इत्येतस्मान्नियमादिट् प्रसज्येत । कृसृभृवृस्तुद्रुस्रुश्रुवो लिटि [ १३ ] इत्येष योगः प्रतिषेधार्थो भविष्यति । यद्येष योगः प्रतिषेधार्थो य एतस्माद्योगादिट् परिप्राप्यते नियमात्स न सिध्यति। पेचिव पेचिम। शेकिव शेकिम । एवं तर्हि कृसृभृ इत्येतेषां ग्रहणं नियमार्थं भविष्यति स्तुद्रुस्रुश्रुवां प्रतिषेधार्थं वृङ्वृञोर्ज्ञापकार्थम्। एवमपि सामान्यविहितस्यैवेटः+ प्रतिषेधो विज्ञायेत विशेषविहितश्चायं* थलीति ।**

---

प्र०—पवादा इति न्यायाद्भारद्वाजनियमोऽचस्तास्वदिति प्रतिषेधं बाधिष्यते नतु क्रादिप्रतिषेधम् । नैतदस्ति । पाक्षिक एष परिहारो भेदेन लक्षणापेक्षायाम् । कार्यमात्रे तु बाध्यत्वेनापेक्षिते नैष परिहारः । किंच न वृद्भ्यश्चतुर्भ्य इत्यस्मादूर्ध्वमिदं प्रकरणं पठितव्यमिति प्रक्रान्तं न तु ऋतो भारद्वाजस्येत्यस्मात्परमिति । ततो भारद्वाजनियमात्पूर्वमिदं नतु परमिति कुतो मध्येऽपवादा इति न्यायावतारः । व्याप्तिन्यायाश्रये च सर्वप्रतिषेधबाधेन भाव्यम् । **यद्येष इति** । थलि भारद्वाजनियमादिटः प्राप्तस्य प्रतिषेधे विधेये संभवति नियमार्थत्वानुपपत्तिः ।* **एवं तर्हीति** । योगैकदेशः पूर्व योगशब्देनोक्तश्चोदकेन तु समस्त एव योगः प्रतिषेधार्थोऽनेनोक्त इति मत्वा चोदितम्—**यद्येष इति** । तत्र क्रादीनामृकारान्तत्वान्नास्ति भारद्वाजनियमादिट्प्राप्तिरिति तेषां नियमार्थं ग्रहणम् । स्तुद्रुस्रुश्रुवां तु भारद्वाजनियमात्क्रादिनियमाच्च प्राप्तस्येटः प्रतिषेधार्थम् । **वृङ्वृञोरिति** । एकयोगस्था अपि नावश्यमेकधर्माणः । तत्र प्रत्ययाश्रयोऽपीट्प्रतिषेधो नियम्यत इति वृङ्वृञ्ग्रहणेन ज्ञाप्यते। **एवमपीति**। स्तुद्रुस्रुश्रुभ्यः प्रतिषेधो येन नाप्राप्तिन्यायेन क्रादिनियमप्राप्तमेवेटं निवर्तयेत्। नतु भारद्वाजनियमप्राप्तमित्यर्थः। स

---

उ०—**नतु क्रादिप्रतिषेधमिति** । भारद्वाजनियमेनाचस्तास्वदिति प्रतिषेधनिवृत्तावप्राप्ताचस्तास्वदित्यनेन न क्रादिनियमस्य बाधो नापि भारद्वाजनियमेनोत्तरत्वादिति भावः । मध्येऽपवादन्यायाभावेऽप्यनन्तरस्येति न्यायो दुर्वारोऽत आह—**व्याप्तीति** । भाष्ये **प्रतिषेधार्थो भविष्यतीति** । स्तुद्र्वादिग्रहणसामर्थ्याद्भारद्वाजनियमप्रापितस्य निषेध इत्यर्थः । ननु कृसृ इत्यस्य प्रतिषेधनियमोभयार्थत्वान्न दोष इति चेत्तदसंभवमाह—**थलि भारद्वाजेति** । भाष्ये **नियमात्स इति** । नियमार्थाद्योगाद्य इट् परिप्राप्यते स न सिध्यतीत्यन्वयः । ननु कृत्स्नसूत्रस्य प्रतिषेधार्थत्वमुक्त्वेदानीमेकदेशस्य तदर्थत्वकथनं पूर्वापरविरुद्धमत आह—**योगैकदेश इति** । भारद्वाजनियमात् थल्यन्यत्र क्रादिनियमादिति विवेकः । नन्वेकसूत्रोपात्तानामेकरूपतैव युक्तेत्यत आह—**एकयोगस्था अपीति** । यथा तद्धितार्थेत्यादावेकाऽपि सप्तमी विषयभेदाद्भिद्यत इति भावः । **ज्ञाप्यत इति** । एतच्चोत्तरत्र स्फुटी भविष्यति । नन्वविशेषात्सर्वस्यैवेटः

---

+ ७. २. १३. * ७. २. ६३.

पुरस्तात्पुनः प्रतिषेधे सत्यनारभ्यापवादोऽयं भवति तेन यावानिण्नाम तस्य सर्वस्यैव प्रतिषेधः सिद्धो भवति । यदि खल्वप्येषोऽभिप्रायस्तन्न क्रियत इति पुरस्तादपि प्रतिषेधे सति तन्न करिष्यते । कथम् । इदमस्ति नेड्वशि कृतीति । ततो वक्ष्यामि× । आर्धधातुकस्य वलादेरिति । इडित्यनुवर्तते नेति निवृत्तम् ।

अथ कृद्ग्रहणं किमर्थम् । इह मा भूत् । बिभिदिव बिभिदिमेति । नैतदस्ति प्रयोजनम् । कृसृभृवृस्तुद्रुस्रुश्रुवो लिटि [ १३ ] इत्येतस्मान्नियमादत्रेड् भविष्यति । नात्र तेन परिप्रापणं प्राप्नोति । किं कारणम् । प्रकृतिलक्षणस्य* प्रतिषेधस्य स प्रत्यारम्भः । प्रत्ययलक्षणश्चायं प्रतिषेधः । उभयोः स प्रत्यारम्भः । कथं ज्ञायते । वृङ्वृञोर्ग्रहणात् । कथं कृत्वा ज्ञापकम् । इमौ वृङ्वृ-

---

प्र०–हि थल्येव प्राप्तस्ततश्चासौ स्यादेव । **पुरस्तादिति** । इण्मात्रमनाश्रितविषयविशेषमनारभ्याधीतेन प्रतिषेधेन बाध्यत इत्यर्थः । यदि तु भारद्वाजनियमात्परः प्रतिषेधः क्रियेत मध्येऽपवादा इति चाऽऽश्रीयेत तदा विप्रतिषेधेन सिध्येदेव प्रतिषेधः । **अथ कृद्ग्रहणमिति** । अकृति क्रादिनियमादिड् भविष्यतीति मत्वा प्रश्नः । **नात्रेति** । भिन्नजातीयत्वादिति भावः । क्रादिनियमो हि प्रकृत्याश्रयप्रतिषेधविषयमेवेटं प्रापयेत् बिभेदिथेति । नेड्वशीति तु प्रत्ययाश्रयः प्रतिषेधः । तद्विषये क्रादिनियमाभावादिण्न भवेत् । **बिभिदिवेति** । कृद्ग्रहणमकृति प्रतिषेधनिवृत्त्यर्थम् । **वृङ्वृञोर्ग्रहणादिति** । सामान्यग्रहणं विशेषनिष्ठं संपद्यत इति प्रदर्शनार्थं वृङ्वृञोरिति भेदेनोपादानम् । वृग्रहणस्य प्रयोजनं ववृमह इत्यादाविण्मा भूदिति । यदि च क्रादिनियमः प्रकृत्याश्रयमेव प्रतिषेधं बाधेत न प्रत्ययाश्रयं तदा नेड्वशि श्र्युकः कितीति योगद्वयेन यथायोगं सिद्धत्वात्प्रतिषेधस्य नार्थो वृग्रहणेन । तत्क्रियमाणं प्रत्ययाश्रयस्यापि प्रति-

---

उ०–प्रतिषेधेन भाव्यमत आह—**पुरस्तादिति** । भाष्ये सामान्यविहितस्येत्यस्य सामान्यनियमप्राप्तस्येत्यर्थः । **अनारभ्याधीतेनेति** । हेतुगर्भविशेषणम् । **सिध्येदेवेति** । तुष्टोथेत्यादौ भारद्वाजनियमप्रापितेटः कृसृभृ इति निषेधः सिध्यतीत्यर्थः । अस्य तु न भारद्वाजनियमो निवर्तकः, मध्येऽपवादन्यायादिति भावः । किंतु न्यासभेदस्यान्याय्यत्वाद्भगवतैवं नाऽऽश्रितम् । फलान्तराण्यपि स्वरतिसूतीत्यादौ पुरस्तात्प्रतिषेधारम्भस्य भविष्यन्तीति दिक् । भाष्ये **तन्न क्रियत इति** । आर्धधातुकस्येति सूत्र इड्ग्रहणमित्यर्थः । अत्रत्यभाष्यविरोधाद्दीधीवेवीटामितिसूत्रस्थभाष्यमेकदेश्युक्तिः । अत्रेड्ग्रहणं कृत्वा गुरुतरयत्नमाश्रित्य तत्रेड्ग्रहणप्रत्याख्यानस्यानौचित्यादित्याहुः । **भिन्नजातीयत्वादिति** । सजातीयस्य हि नियमेन भाव्यमिति भावः । **प्रकृत्याश्रयेति** । एकाच उपदेश इतीत्यर्थः । अयं हि वाशी कृतीत्युपादानात्प्रत्ययाश्रय इति भावः । ननु वृग्रहणादिति वक्तुमुचितमत आह—**सामान्यग्रहणमिति** । **प्रदर्शनार्थमिति** । सर्वत्रायं न्यायो द्रष्टव्य इति निदर्शनार्थमित्यर्थः । **यथायोगमिति** । ववृष इत्यादौ श्र्युक इति ववृवहे इत्यादौ नेड्वशीत्यस्यापि प्राप्तिसत्त्वात्तद्-

---

× ७. २. ३५. * ७. २. १०.

ञावुदात्तौ तयोः प्रकृतिलक्षणः प्रतिषेधो न प्राप्नोति । पश्यति त्वाचार्य उभयोः स प्रत्यारम्भ इति ततो वृङ्वृञोर्ग्रहणं करोति । न खल्वपि कश्चिदुभयवान्प्रतिषेधः प्रकृतिलक्षणः प्रत्ययलक्षणश्च । ततः किम् । तुल्यजातीयेऽसति यथैव प्रकृतिलक्षणस्य नियामको भवत्येवं प्रत्ययलक्षणस्यापि नियामको भविष्यति । इदं तर्हि प्रयोजनम् । इह मा भूत् । रुदिवः रुदिमः× । एतदपि नास्ति प्रयोजनम् । उपरिष्टाद्योगविभागः करिष्यते* । आर्धधातुकस्य । यदेतदनुक्रान्तमेतदार्धधातुकस्य द्रष्टव्यम् । तत इड्वलादेरिति । तत्र त्वेतावद्द्रष्टव्यं यदि किंचित्तत्रान्यदप्यार्धधातुकग्रहणस्य प्रयोजनमस्ति । अथ न किंचिदिह वा कृद्ग्रहणं क्रियेत तत्र वाऽऽर्धधातुकग्रहणं को न्वत्र विशेषः ।

## नेड्वशि कृति ॥ १ ॥

वशादौ कृतीट्प्रतिषेधं प्रयोजयति । ईशिता ईशितुम् । ईश्वरः । व ।

---

प्र०–षेधस्य निवृत्तिं ज्ञापयति । ननु थलर्थं वृग्रहणं स्यात्तस्य ह्यकित्त्वाद्वशादित्वाच्चेट्प्रतिषेधाप्राप्तिः । नैतदस्ति । ववर्थेति निगम इति निपातनं क्रियमाणं भाषायां ववरिथेतीटमभ्यनुजानाति । स्यादेतत्तुल्यजातीय एव प्रतिषेधो नियमेन बाध्यताम् । एकैकाश्रयस्तु कथं बाध्येत इत्याशङ्क्याऽऽह—**न खल्वपीति** । कृसृभृभ्यो लिटि प्रकृत्याश्रय एवैकाच उपदेशेऽनुदात्तादितीट्प्रतिषेधः प्राप्नोति । केवलायाः प्रकृतेः शब्देनोपादानात् । अथोच्येत चकृष इत्यादौ श्र्युकः कितीतीट्प्रतिषेधः प्राप्नोति । स चोभयवान्प्रकृतिप्रत्ययविशेषाश्रयणादिति । तन्न । अत्राप्यन्तरङ्गत्वात्प्रकृत्याश्रय एव प्रतिषेधः । तस्यैव नियमे विज्ञायमाने वृग्रहणमनर्थकं स्यात् । तस्मात्प्रत्ययाश्रयोऽपि प्रतिषेधो नियम्यत इत्यत्र वृग्रहणं लिङ्गम् । प्रकृतकृसृभ्रपेक्षया च न खल्वपीत्युच्यते नतूभयवान्नास्ति प्रतिषेधः । **रुदिवः, रुदिम इति** । असति कृद्ग्रहणे रुदादिभ्यः सार्वधातुक इत्यस्येटोऽत्र प्रतिषेधः स्यात्तस्य त्ववशादिरवकाशो रोदितीत्यादौ । **यदेतदिति** । प्रतिषेधप्रकरणमित्यर्थः । ततः सार्वधातुक इट्प्रतिषेधाभावः । यद्यन्यार्थमार्धधातुकग्रहणं कर्तव्यं तदा योगविभागेनेष्टं साध्यते । यदा त्वस्यान्यप्रयोजना-

---

उ०–क्तिः । **ननु थलर्थमिति** ।तत्र विध्यर्थमित्यर्थः। **निपातनमिति** । अन्यथाऽनेन निषेधेन सिद्धेस्तद्वैयर्थ्यं स्यात्तथा च तत्सामर्थ्यादत्र वृग्रहणं नियमार्थं सज्ज्ञापनार्थमेवेति भावः । **अत्रान्तरङ्गत्वादिति** । प्रकृतिमात्राश्रयत्वादिति भावः । नन्वेवं श्र्युकः कितीत्यस्योभयवतः सत्त्वेन न खल्वपीति वचोऽयुक्तमत आह—**प्रकृतेति** । कृसृभृविषये न कश्चिदुभयवानस्तीति भाष्यार्थः । यदि किंचित्तत्रेत्यादिभाष्यस्याऽऽशयमाह—**यद्यन्यार्थमिति** तदा योगविभागेनेष्टं साध्यत इति शेषो भाष्ये पूरणीय इत्याशयः । भाष्ये–**अथ न किंचिदिति** । वेदा

---

× ७. २. ७६. * ७. २. ३५.

र । दीपिता दीपितुम् दीपः । र । म । भसिता भसितुम् भस्म । म । न । यतिता यतितुम् यत्नः । अथान्ये ये वशादयस्तत्र कथम् । उणादयोऽव्युत्पन्नानि प्रातिपदिकानि ।

**तितुत्रतथसिसुसरकसेषु च ॥ ७ । २ । ९ ॥**

**तितुत्रेष्वग्रहादीनाम् ॥ १ ॥**

तितुत्रेष्वग्रहादीनामिति वक्तव्यम् । इह मा भूत् । निगृहीतिः उपस्निहितिः निकुचितिः निपाठितिरिति ।

**एकाच उपदेशेऽनुदात्तात् ॥ ७ । २ । १० ॥**

एकाज्ग्रहणं किमर्थम् ।

**एकाज्ग्रहणं जागर्त्यर्थम् ॥ १ ॥**

एकाज्ग्रहणं क्रियते जागर्तेरिट्प्रतिषेधो मा भूदिति । जागरिता जागरितुम् । नैतदस्ति प्रयोजनम् । उपदेशेऽनुदात्तादित्युच्यते जागर्तिश्चोपदेश उदात्तः । न ब्रूम इहार्थं जागर्त्यर्थमेकाज्ग्रहणं कर्तव्यमिति । किं तर्हि । उत्तरार्थम् । श्र्युकः किति [ ११ ] इतीट्प्रतिषेधं वक्ष्यति स जागर्तेर्मा भूदिति । जागरितः जागरितवानिति । एतदपि नास्ति प्रयोजनम् । जागर्तेर्गुण उच्यते+ वृद्धिविषये प्रतिषेधविषये स च बाधको भविष्यति । तत्र गुणे कृते रपरत्वे च कृतेऽनुग-

---

प्र०—भावस्तदा लाघवार्थं कृद्ग्रहणमेव कर्तव्यम् । प्रत्याख्यास्यते च तत्राऽऽर्धधातुकग्रणम् । भस्मेति । नन्वत्रैव वक्ष्यत्युणादय इति । ततश्चाव्युत्पत्त्याश्रयणादेवेण्न भविष्यति । अन्येभ्योऽपि दृश्यत इत्यनेनात्र मनिन्प्रत्यय इत्यदोषः ।

**तितु०** । **निकुचितिरिति** । कुञ्चेः क्तिन्नाबादिभ्य इति क्तिन् । कुच शब्दे तार इत्यस्माद्वा स्त्रियां क्तिन् ।

**एकाच०** । **एकाज्ग्रहणमिति** । एकाचामेवानुदात्तत्वप्रतिज्ञानादनुदात्तग्रहणेनैवातिप्रसङ्गनिवारणात्प्रश्नः । इतर उत्तरार्थत्वमभिप्रेत्याऽऽह—**एकाज्ग्रहणं जागर्त्यर्थमिति** । **स जागर्तेर्मा भूदिति** । जागर्तिरेवोगन्तोऽनेकाच् संभवतीति तन्निवृत्त्यर्थमेकाज्ग्रहणम् । ऊर्णोतेस्तु नुवद्भावात्प्रतिषेधो भवत्येव । चोदकः प्रतिषेधाप्राप्तिकारणमन्यद्दर्शयति—**एतदपीति** । **स बाधक इति** । इट्प्रतिषेधस्येत्यर्थः । **उपदेशाधिका-**

---

उ०—यदि प्रमाणामितिवदसंदेहे संदेहोक्तिः । को न्वत्र विशेष इत्यनेन न साम्यं विवक्षितं किंतु कृद्ग्रहणकर्तव्यत्वमेव तदाह—**लाघवार्थमिति** । भाष्ये—**अथान्य इति** । मन्नादिषु ।

**तितुत्रतथ०** । ननु कुञ्चेः क्तिनं बाधित्वा गुरोश्च हल इत्यकारप्रत्ययः स्यादत आह—**कुञ्चेरिति** ।

**एकाच उ०** । ननु जागर्तेर्गुणस्य वृद्धिप्रतिषेधबाधकत्वेऽपि प्रकृते किमायातमत आह—**इट्प्रतिषेधस्येत्यर्थ इति** । परत्वाद्गुणे रपरत्वे चेट्प्रतिषेधाप्राप्तेरित्यर्थः । **अन्यार्थमिति** ।

---

+ ७. ३. ८५.

न्तत्वादिट्प्रतिषेधो न भविष्यति। ननु चोपदेशाधिकारात्प्राप्नोति। उपदेशग्रहणं निवर्तयिष्यते। यदि निवर्त्यते स्तीर्त्वा पूर्त्वा इत्त्वोत्त्वयोः* कृतयो रपरत्वे चानुगन्तत्वादिट्प्रतिषेधो न प्राप्नोति। नैष दोषः। आनुपूर्व्या सिद्धमेतत्। नात्राकृत इट्प्रतिषेध इत्त्वोत्त्वे प्राप्नुतः। किं कारणम्। न क्त्वा सेट् [ १. २. १८. ] इति किस्त्वप्रतिषेधात्। इदं तर्हि। आतिस्तीर्षति निपुपूर्षति×।

प्र०—रादिति। अन्यार्थमुपदेशग्रहणमनुवर्त्यम्। उपदेशे च जागर्तिरुगन्तो भवतीति प्रतिषेधप्रसङ्गः। इतर उपदेशाधिकारस्य प्रयोजनान्तरमपश्यन्नाह—**उपदेशग्रहणं निवर्तयिष्यत इति**। **स्तीर्त्वा पूर्त्वेति**। इत्त्वादिषु कृतेष्वनुगन्तत्वात्। लूत्वेत्यादौ च सांप्रतिकोगन्तसंभवे भूतपूर्वगत्याश्रयणस्यायुक्तत्वादिट्प्रतिषेधो न स्यात्। उपदेशाधिकारात्तूपदेश उगन्तत्वात्संप्रत्यनुगन्तत्वेऽपि प्रतिषेधः प्रवर्तते। **आनुपूर्व्येति**। स्तॄ त्वा इति स्थिते किस्त्वनिषेधाश्रय इट् इडाश्रयश्च किस्त्वनिषेध इति प्रागेव संनिहितं किस्त्वमाश्रित्येट्प्रतिषेधः प्रवर्तते तत इत्त्वादीनीत्यर्थः। अत्र चोद्यते कृतेष्वित्त्वादिषु प्रतिषेधनिमित्तोगन्तत्वापगमात्पुनरिट् प्राप्नोति। तस्मिंश्च सति न क्त्वा सेडिति किस्त्वप्रतिषेधाद्गुणे सति स्तेरित्वेति प्राप्नोति। नैष दोषः। पूर्वमेव प्रसक्तस्येट उग्लक्षणप्रतिषेधेन बाधितत्वाल्लक्ष्यस्य संस्कृतत्वाद्भ्रष्टावसरत्वात्पुनः प्रवृत्त्यभावात्। **आतिस्तीर्षतीति**। इग्युकः कितीत्यत्र विशिष्टानुबन्धोपलक्षितः प्रत्यय आश्रितः। सनि ग्रहगुहोश्चेत्यत्र तु साक्षादिति विशेषमाश्रित्यास्योपन्यासः। अत्रेत्त्वरपरत्वयोः कृतयोरनुगन्तत्वादिट्प्रतिषेधो न स्यात्। उपदेशाधिकारात्त्वनुगन्तत्वावस्थायामपि भवति। सनि ग्रहगुहोश्चेत्यत्र चशब्देनोगनुकृष्यते। इग्युकः कितीत्यनेन त्वत्र प्रतिषेधो नास्ति।

उ०—स्तीर्णमित्याद्यर्थमिति भावः। **इत्त्वादिषु कृतेष्विति**। अन्तरङ्गत्वादिति भावः। **किस्त्वनिषेधाश्रय इति**। असति किस्त्वनिषेधे प्रतिषेधप्राप्तेरिति भावः। किस्त्वनिषेधो न क्त्वा सेडिति। **तत इत्त्वेति**। सतीट्याकिस्त्वेन बाधकगुणप्रवृत्तेरिति भावः। बाधकविषयपरिहारेण च बाध्यस्य प्रवृत्तिरिति तात्पर्यम्। **गुणे सतीति**। दीर्घस्यासिद्धत्वेन लघूपधत्वात्। **लक्ष्यस्य संस्कृतत्वादिति**। लक्षणबाधेनैव संस्कृतत्वादित्यर्थः। अयं चेदृशे विषये भ्रष्टावसरन्यायाश्रयणे हेतुः। वस्तुतो निमित्तापायपरिभाषाया भाष्येऽनाश्रयणादुगन्तत्वापगमेऽपि प्रतिषेधापगमाभावेन न पुनरिट्प्राप्तिरिति चिन्त्यमिदम्। भ्रष्टावसरन्यायस्यात्र शास्त्रेऽनाश्रयणस्येको गुणवृद्धीति सूत्रे भाष्ये ध्वनितत्वाच्च। नन्वातिस्तीर्षतीत्यत्रापि झलादेरेव सनः किस्त्वादिदमप्यानुपूर्व्या सिद्धमित्याशङ्क्य लक्षणान्तरं तद्गतं च कंचिद्विशेषमाश्रित्य परिहारान्तरकथनायोदाहारीत्याह—**इग्युक इति**। सनि ग्रहेत्यनेनात्रेट्प्रतिषेध इति भावः। नन्वत्रापि पूर्वेणैव सिद्धमिति किमुगनुकर्षणार्थेन चेनेत्यत आह—**इग्युकः किती-**

* ७. १. १००; १०२. × १. २. ९,

इत्त्वोत्त्वयोः कृतयो रपरत्वे चानुगन्तत्वादिट्प्रतिषेधो न प्राप्नोति । मा भूदेवं श्र्युकः किति [११] इति । इट् सनि वा [४१] इत्येवं भविष्यति । इदं तर्हि । आस्तीर्णम् निपूर्ताः पिण्डाः। इत्त्वोत्त्वयोः कृतयो रपरत्वे चानुगन्तत्वादिट्प्रतिषेधो न प्राप्नोति । मा भूदेवम् । इट् सनि वेति सनि विभाषा यस्य-विभाषा [१५] इति प्रतिषेधो भविष्यति ।

---

प्र०—इट्प्रतिषेधाश्रयत्वाज्झलादित्वस्य झलादित्वाश्रयत्वात्कित्त्वस्य कित्त्वाश्रयत्वादिट्प्रतिषेधस्येतीतरेतराश्रयप्रसङ्गात् ।**इट् सनि वेति** । स्तॄ स इति स्थित ऋकारान्तावस्थायामेव पक्ष इडभावः । तथा हीड्विकल्पस्य निरवकाशत्वात्सांप्रतिकाभावे भूतपूर्वगत्याश्रयणान्नित्यत्वाद्वा न तावद्गुणस्य प्रवृत्तिः। तत्रेट्पक्षे वृतो वेति दीर्घविकल्पे रूपद्वयमातिस्तरिषति आतिस्तरीषतीति। इडभावपक्षे त्वातिस्तीर्षतीति । अत्रोच्यते । इडभावपक्षे कित्त्वाद्गुणे निषिद्ध इत्त्वरपरत्वयोः कृतयोः पुनरिट् प्राप्नोति । न चेट् सनि वेति विकल्पविधानमनर्थकम् । ऋकारान्तावस्थायां पक्ष इडभावे कित्त्वे सतीत्त्वरपरत्वयोः कृतयोरिटि सति गुणे च सत्यातिस्तेरिषतीति रूपसंपादनार्थत्वाद्विकल्पस्य । अत्र समाधिः । नित्यमिटि प्राप्ते विकल्पविधानाद्भ्रष्टावसरत्वाल्लक्ष्यस्य सिद्धत्वात्पुनरिड्लक्षणं न प्रवर्तते । **आस्तीर्णमिति** । कृतेऽकृते चेटि किदेव निष्ठेत्यनेन विशेषेणास्योपन्यासः । **यस्य विभाषेति** । ननु ऋकारान्तस्य सनि विकल्पविधानान्नित्यत्वादित्त्वोत्त्वयोः कृतयोरनृकारान्तत्वाद्यस्य विभाषेति प्रतिषेधाप्रसङ्गः । नैष दोषः । सनि विकल्पविधान ऋकारान्तत्वस्यापेक्षणेऽपि यस्य विभाषेत्यत्र यस्य

---

उ०—**त्यनेन त्विति** । सनि ग्रहेत्यत्र तु कितीत्यनपेक्षणान्न दोष इति भावः । भाष्ये श्र्युकः कितीत्यस्येत उक इति वर्तमाने सनि ग्रहेत्यनेनेत्यर्थः । ननु ऋकारान्तावस्थायामेवेट्प्रतिषेधो न पुनरीत्त्वोत्त्वे इति कथं लभ्यतेऽत आह—**तथा हीति** । ऋदन्ते सनि ग्रहेति प्रतिषेधे प्राप्त इट् सनि वेति विधीयमानो विकल्प इत्त्वोत्त्वयोः कृतयोर्ऋत इति निमित्तस्य विहतत्वान्न स्यादिति पूर्वमेव प्रवर्तते । एवं गुणादपि । अथापि भूतपूर्वगत्याश्रयणं तदा नित्यत्वं तस्य । इत्त्वोत्त्वे त्विटि कृतेऽकित्त्वाद्गुणेन बाधिते इत्यनित्ये इति भावः । **न तावद्गुणस्येति** । उपलक्षणमिदमित्त्वोत्त्वयोरपि । इट्पक्षे गुणः । तदभावे सनः कित्त्वात्तदभाव इत्त्वोत्त्वे । **पुनरिट् प्राप्नोतीति** । अनुगन्तत्वेन निषेधाप्राप्तेरिति भावः । **नित्यमिटीति** । अस्य तद्बाधकनिषेधे प्राप्त इति शेषः । भ्रष्टावसरन्यायाश्रयणे हेतुः—**लक्ष्यस्य सिद्धत्वादिति** । संस्कृतत्वादित्यर्थः । एवं च लक्ष्ये लक्षणस्येति न्यायेन पुनरप्रवृत्तिरिति तत्त्वम् । इदमप्युक्तरीत्या चिन्त्यम् । **अनेन विशेषेणेति** । एवं चात्राऽऽनुपूर्व्या न सिद्धिर्नापि निषेधान्तरप्राप्तिरिति भावः । **प्रतिषेधाप्रसङ्ग इति** । आदितश्चेति योगविभागेन ज्ञापकेन यदुपाधेर्विभाषा तदुपाधेर्निषेध

इहार्थमेव तर्हि वध्यर्थमेकाज्ग्रहणं कर्तव्यम् । वध इट्प्रतिषेधो मा भूदिति । वधिषीष्टेति + । एतदपि नास्ति प्रयोजनम् । क्रियमाणेऽपि वा एकाज्ग्रहणे वध इट्प्रतिषेधः प्राप्नोति । वधिषीष्टेति । किं कारणम् ।

**वध इट्प्रतिषेधः संनिपात एकाच्त्वात्प्रकृतेश्चानुदात्तत्वात् ॥२॥**

संनिपाते चैव हि वधिरेकाच्छ्रूयते प्रकृतिश्चास्यानुदात्ता ।

किं पुनः कारणमेवं विज्ञायत उपदेशेऽनुदात्तादेकाचः श्रूयमाणादिति । यङ्लोपार्थम् । यङ्लोपे मा भूदिति । बेभिदिता बेभिदितुम् । चेच्छिदिता चेच्छिदितुम् ।

---

प्र–०क्वचिदिड्विकल्पो दृष्टः स धातुराश्रीयते न तु विकल्पकारणमृकारान्तत्वम् । भवति चेत्त्वोत्त्वयोः कृतयोरपि स एव धातुरिति प्रवर्तते प्रतिषेधः । तदेवमुपदेशग्रहणस्योत्तरत्रानुपयोगादननुवर्तनाज्जागरित इत्यत्र गुणरपरत्वयोः कृतयोरनुगन्तत्वाच्छ्र्युकः कितीति प्रतिषेधाभावादुत्तरार्थमेकाज्ग्रहणं न कर्तव्यम् । **वध्यर्थमिति** । वधशब्दोऽकारान्तोऽनेकाजादेशः । इतर उपदेशग्रहणमनुदात्तस्यैव विशेषणं न त्वेकाच इति मन्यमान आह—**एतदपीति** । **वधिषीष्टेति** । आशिषि लिङ् । कर्मण्यात्मनेपदम् । अतो लोप इत्यकारलोपे कृते वधिरेकाच् । अकारोच्चारणं त्ववधीदित्यादौ हलन्तलक्षणवृद्धिनिवृत्त्यर्थं स्यात् । **प्रकृतेश्चानुदात्तत्वादिति** । यस्मात्प्रकृतिर्हन्तिरनुदात्ता तस्याश्चोपदेशावस्था गृह्यते । सैव चानेन रूपेणावस्थितेति संप्रत्ययः । ततः प्रतिषेधः प्राप्नोति । ततश्च कृतमप्येकाज्ग्रहणमनर्थकम् । **किं पुनरिति** । उभयविशेषणमुपदेशग्रहणमस्तु । ततो वधेरुपदेशेऽनेकाच्त्वात्प्रतिषेधाप्रसङ्गः । **बेभिदितेति** । द्विः प्रयोगे

---

उ०–इति वक्ष्यमाणत्वादिति भावः । **प्रवर्तते प्रतिषेध इति** । यदुपाधेरिति नाऽऽश्रीयत इत्यभिमानः । वस्तुतस्तु दरिद्रित इत्यत्र यस्य विभाषेत्यस्य वारणायोत्तरत्रानुवृत्तिरावश्यक्यैव । भ्रष्टावसरन्यायस्यात्र शास्त्रेऽनाश्रयणात् । इह किंचित्त्रपो इति न्यायेनेहापि फलमावश्यकमित्याशयेनानादराद्भगवता तथा नोक्तम् । **अकारान्त इति** । अन्यथाऽवधीदित्यत्रातो हलादेरिति वृद्धिः स्यात् । अदन्तत्वे त्वल्लोपस्य स्थानिवत्त्वान्न दोषः । एकाज्ग्रहणे कृते तु वध्युपदेशेऽनेकाच्त्वादिट्प्रतिषेधाप्रसङ्ग इति भावः । हन्तेः परस्मैपदित्वादाङ्पूर्वत्वाभावाच्चाऽऽह—**कर्मणीति** । **हलन्तलक्षणेति** । अतो हलादेरिति विकल्पनिवृत्त्यर्थमित्यर्थः । अल्लोपस्य स्थानिवत्त्वेन सिच्पराकाराभावादिति भावः । **प्रकृतिर्हन्तिरिति** । प्रकृतिशब्देन स्थान्युच्यत इति भावः । **तस्याश्चेति** । हन्तेरेव साक्षादुपदेशो वधेस्तु तद्विकारत्वेन प्रत्ययान्न मुख्य उपदेश इत्यर्थः । तदाह—**सैव चेति** । भाष्ये संनिपात इत्यस्य प्रतिषेधप्रवृत्तिकाल इत्यर्थः । **उपदेशेऽनेकाच्त्वादिति** । हनो

---

+ २. ४. ४३.

**एकाच उपदेशेऽनुदात्तादित्युपदेशवचनमनुदात्तविशेषणं चेत्क्रादिभ्यो लिटि नियमानुपपत्तिरप्राप्तत्वात्प्रतिषेधस्य ॥३॥**

एकाच उपदेशेऽनुदात्तादित्युपदेशवचनमनुदात्तविशेषणं चेत्क्रादिभ्यो लिटि* नियमस्यानुपपत्तिः। किं कारणम्। अप्राप्तत्वात्प्रतिषेधस्य। द्विर्वचने कृत उपदेशेऽनुदात्तादेकाचः श्रूयमाणादितीट्प्रतिषेधो न प्राप्नोति। असतीट्प्रतिषेधे नियमो नोपपद्यते। असति नियमे को दोषः।

**तत्र पचादिभ्य इड्वचनम् ॥ ४ ॥**

तत्र पचादिभ्य इड् वक्तव्यः। पेचिम शेकिम।

**सनश्चेट्प्रतिषेधः ॥ ५ ॥**

सनश्चेट्प्रतिषेधो वक्तव्यः। बिभित्सति चिच्छित्सति। द्विर्वचने कृत उपदेशेऽनुदात्तादेकाचः श्रूयमाणादितीट्प्रतिषेधो न प्राप्नोति।

इह च नीत्तः तत्वे कृते+ऽनच्कत्वादिट्प्रतिषेधो न प्राप्नोति।

---

प्र०–द्विर्वचने भवति भिदिरुपदेशेऽनुदात्त उपदेश एकाजित्यतोऽलोपे कृते संप्रत्यनेकाच्त्वेऽपि प्रतिषेधप्रसङ्गः। श्रूयमाणे त्वेकाच्याश्रीयमाण आवृत्तिसंख्ययैकत्वसंख्याया बाधनात्प्रतिषेधाभावः। समुदायस्य चैकाऽङ्गसंज्ञा नतु प्रत्येकमित्येकाचोऽङ्गादित्याश्रयणात्परभिद्रूपाश्रयोऽपि प्रतिषेधो न भवति। **अनुदात्तविशेषणं चेदिति**। उभयविशेषणेऽप्यनुदात्तविशेषणं भवतीति सामर्थ्यादनुदात्तस्यैव यदि विशेषणमित्यवधारणं द्रष्टव्यम्। **असति नियम इति**। क्रादिसूत्रं प्रतिषेधार्थमस्तु। एवमपि चकृष इत्यादि सिध्यति। बिभिदिवेत्यादौ चैकाच्त्वाभावात्प्रतिषेधाभावादिट् सिध्यतीति भावः। **पेचिवेति**। एत्वाभ्यासलोपयोः कृतयोरेकाचः श्रूयमाणादितीट्प्रतिषेधप्रसङ्गः। **नीत्त इति**। ददातेः क्तप्रत्ययेऽच उपसर्गात्त इति तत्वे कृतेऽनच्कत्वादेकाच्त्वाभावादिट्प्रतिषेधाप्रसङ्गः। तत्वस्य द्विपदाश्रयत्वाद्बहिरङ्गत्वादन्तरङ्ग इट्प्रतिषेधेऽसिद्धत्वादिति परिहारः परिहारा-

---

उ०–वधेत्यपि स्वरूपज्ञापनाय मुख्य उपदेश इति भावः। ननु स्थाने द्विर्वचन उपदेश एकाजनुदात्तरूपस्य नष्टत्वात्कथं यङ्लोप इट्प्रतिषेधः। न च स्थानिवत्त्वमल्विधित्वादित्यत आह—**द्विःप्रयोग इति**। ननु यङा व्यवधानात्कथमत्र निषेधप्रसङ्गोऽत आह—**अतोऽलोपेकृत इति**। यलोपस्याप्युपलक्षणमिदम्। अनेन यङ्लुग्विषयत्वमस्य भाष्यस्य नेति दर्शयति। अत एवाग्रे स्थानिवत्त्वेन समाधानपरं भाष्यं संगच्छते। ननु परस्य भिद्रूपस्य संप्रत्येकाच्त्वात्तदाश्रयः प्रतिषेधः स्यादत आह—**समुदायस्य चेति**। यथा चैतत्तथैकाचो द्वे इत्यत्र व्युत्पादितं भाष्ये। **तत्वे कृत इति**। परत्वादिति भावः। **द्विपदेति**। उपसर्गक्तान्तदारूपेत्यर्थः। उत्तरपदाधिकारे बहिरङ्गप-

---

* ७. २. १३. + ७. ४. ४७.

नैष दोषः। आनुपूर्व्या सिद्धमेतत्। नात्राकृत इट्प्रतिषेधे तत्वं प्राप्नोति। किं कारणम्। ति कितीत्युच्यते। यदप्युच्यत एकाच उपदेशेऽनुदात्तादित्युपदेशवचनमनुदात्तविशेषणं चेत्क्रादिभ्यो लिटि नियमानुपपत्तिरप्राप्तत्वात्प्रतिषेधस्येति मा भून्नियमः। ननु चोक्तं तत्र पचादिभ्य इड्वचनमिति। नैष दोषः। उक्तं तत्र*थल्ग्रहणस्य प्रयोजनं समुच्चयो यथा विज्ञायेत थलि च सेटि क्ङिति च सेटीति। यदप्युच्यते सनश्चेट्प्रतिषेध इति।

**उभयविशेषणत्वात्सिद्धम्॥ ६॥**

उभयमुपदेशग्रहणेन विशेषयिष्यामः। उपदेशेऽनुदात्तादुपदेश एकाच इति। यङ्लोपे कथम्।

**यङ्लोपे च तदन्ताद्द्विर्वचनात्॥ ७॥**

सन्यङन्तस्य स्थाने द्विर्वचनं+ तत्र संप्रमुग्धत्वात्प्रकृतिप्रत्ययस्य नष्टः स भवति यः स एकाजुपदेशेऽनुदात्तः। अथापि द्विःप्रयोगो द्विर्वचनमेवमपि न दोषः। न ह्यस्य भिद्युपदेश उपदेशः। किं तर्हि। बेभिद्युपदेश उपदेशः। अथापि

प्र०—न्तरस्य सद्भावान्नाऽऽश्रितः। तदेव दर्शयति—**आनुपूर्व्या सिद्धमिति**। **थल्ग्रहणस्येति**। आरम्भसामर्थ्यादत एकहल्मध्येऽनादेशादेर्लिटीत्यनुवर्तनाच्चान्तरेणापि थल्ग्रहणं थल्येव सेटयेत्त्वाभ्यासलोपयोः सिद्धत्वात्थल्ग्रहणं क्ङिता समुच्चयार्थम्। ततश्चेटि कृत एत्त्वाभ्यासलोपयोर्विधाने पेचिवेत्यादीनि रूपाणि सिध्यन्तीति नार्थः क्रादिनियमेन। **उभयविशेषणत्वादिति**। एवं सत्युभयं विशेषणत्वेन संस्पर्शादनुगृहीतं भवति। एतदर्थं चोपदेश इति मध्ये पठितम्। उभयविशेषणे च क्रादिनियमात्पचादिभ्य इटः सिद्धत्वात्थलि च सेटीत्यत्र थल्ग्रहणं विस्पष्टार्थम्। **सन्यङन्तस्येति**। सन्यङोरिति षष्ठी। तत्र भिद्यशब्दस्य प्रकृतिप्रत्ययसमुदायस्य सर्वे सर्वपदादेशा इति शब्दान्तर आदेशे कृतेऽयं धातुरयं प्रत्यय इति विभागाभावादिट्प्रतिषेधाभावः। नन्वेवं बिभित्सतीत्यत्रापि प्रतिषेधाप्रसङ्गः। इडप्यस्मिन्पक्षे न प्राप्नोतीत्यदोषः। अथवाऽत्रासमाश्वासात्पक्षान्तराश्रयेणाऽऽह—**अथापीति**। **नह्यस्येति**। आचार्यस्य भिद्युपदेशाश्रये ह्येकाच्त्वादनुदात्तत्वाच्चेट्प्रतिषेधः स्यात्। यङन्तस्य तूप-

उ०—रिभाषाया अप्रवृत्तेरुक्तत्वाच्चिन्त्यमिदम्। **थल्येवेति**। अक्ङितः सेट्लिटस्थल एव संभावादित्यर्थः। **क्ङितेति**। सेटीत्युभयविशेषणम्। तत्र सेड्ग्रहणं कालावधारणार्थं थलीत्येव थलि पूर्वेण च क्ङिति सिद्धेस्तदाह—**इटि कृत इति**। **विस्पष्टार्थमिति**। प्रतिपत्तिलाघवार्थमित्यर्थः। **अत्रासमाश्वासादिति**। द्विःप्रयोगपक्षस्यैव युक्तत्वादिति भावः। इदंशब्दार्थमाह—**आचार्यस्येति**। **अनुदात्तत्वाच्चेति**। प्रत्ययस्वरेणान्तोदात्तत्वा-

* ६. ४. १२१. + ६. १. ९.

१ ख. °वृत्तिरितीचं एकाचोऽमिति सूत्रस्थं भाष्यं त्वेकदेशयुक्तिरिति भाव इति पाठः।

**भिद्युपदेश उपदेश एवमपि न दोषः । अकारेण व्यवहितत्वान्न भविष्यति । ननु च लोपे कृते* नास्ति व्यवधानम् । स्थानिवद्भावाद्व्यवधानमेव । न सिध्यति । पूर्वविधौ स्थानिवद्भावो+ न चायं पूर्वविधिः । एवं तर्हि पूर्वस्मादपि विधिः पूर्वविधिः । कः पुनरुपदेशो न्याय्यः । यः कृत्स्नः । कश्च कृत्स्नः । य उभयोः ।**

---

प्र०-देशे गृह्यमाणे तस्यानेकाच्त्वादुदात्तत्वाच्च प्रतिषेधाप्रसङ्गः । ननु च प्रत्यक्षमाख्यानमुपदेश इत्युक्तं यङादीनां च प्रत्ययानामुपदेशोऽस्ति नतु तदन्तानां शब्दानामनुमेयरूपाणाम् । नैष दोषः । संकीर्णावुद्देशोपदेशावित्यपि तत्रोक्तम् । अत एव चेत्संज्ञायां करणसाधन उपदेशशब्दः शास्त्रवाच्याश्रितः । इह तु भावसाधन आश्रीयते । तेन प्रतिपादनमात्रं गुणैर्वा प्रत्यक्षेण वोपदेश उच्यते । यङ्विधानद्वारेण च बोभिद्य इत्यस्य समुदायस्य क्रियाविशेषवचनस्याद्य प्रतिपत्तिरस्तीति बेभिद्युपदेश इत्युक्तम् । बेभिदशब्दादिक्तिश्तिपावितीक्प्रत्ययेऽल्लोपयलोपयोर्बेभिदीति भवति । अथवेत्संज्ञाविधावुच्चारणवचन उपदिशिर्गृह्यते । तदुक्तमुद्देशश्च प्रातिपदिकानां नोपदेश इति । इह तु प्रतिपादनवचन इति विरोधाभावः । **अथापि भिद्युपदेश इति** । उच्चारणवचनेऽप्युपदिशौ गृह्यमाणे प्रत्यक्षमाख्यानवचने वा न दोष इत्यर्थः । द्विःप्रकार उपदेश उक्ते पृच्छति—**कः पुनरिति** । किं भिद्युपदेशोऽथ बेभिद्युपदेश इत्यर्थः । **यः कृत्स्न इति** । कृत्स्नकारित्वात्कृत्स्नः स च भिद्युपदेश एव । स हि सर्वसाधारणो भेत्ता बेभिद्यत इत्येवमादीनां प्रतिपत्तिहेतुत्वात् । **उभयोरिति** । केवलस्य भिदेर्बेभिद्यादेश्च तदवयवसमुदायस्य धातोर्ग्राहक इत्यर्थः । एतदुक्तं भवति । भिदादीनामेवोपदेशोऽस्ति नतु सनाद्यन्तानामवयवसमुदायानामुपदेशशब्दस्य साक्षात्प्र-

---

उ०-दित्यर्थः । **इत्युक्तमिति** । उपदेशेऽजनुनासिक इत्यत्र । **गुणैः** । प्रकृतिप्रत्ययादिभिः । नन्वनिर्ज्ञातस्य स्वरूपज्ञानमुपदेश इति भिदेरेव स इति कथं बेभिद्युपदेश इत्यत्राऽऽह—**यङ्विधानद्वारेण चेति** । अथवेत्यादि प्रौढ्या । तत्रत्यभाष्यविरोधात् । **इह त्विति** । धातूनामनेकार्थत्वादिति भावः । वस्तुतस्तस्योपदेशत्वमेव नेति मनसि निधायाऽऽह—**अथापि भिद्युपदेश इति भाष्ये** । भाष्ये **पूर्वस्मादपीति** । तदभावेऽपि विहितविशेषणान्न प्रागुक्तः कोऽपि दोषः । स्पष्टं चेदमेकाचो द्वे इत्यत्र भाष्य इति बोध्यम् । कारणे कार्यवाचिशब्द उपचारप्रयुक्त इत्याह—**कृत्स्नकारित्वादिति** । अस्य कृत्स्नकारित्वं दर्शयति—**स हीति** । अत्रार्थे उभयोरिति भाष्यं योजयति—**केवलस्येति** । तदवयवेति बहुव्रीहिः । अवयवसमुदायानामिति षष्ठीतत्पुरुषः । तत्र हेतुमाह—**उपदेश-**

---

* ६. ४. ४८; ४९. + १. १. ५७.

---

१ ख. °दनिरस्तेऽपि ।

यदि तर्हि य उभयोः स कृत्स्नः स च न्याय्यो वध इट्प्रतिषेधः प्राप्नोति । आवधिषीष्टेति । नैष दोषः । आद्युदात्तनिपातनं करिष्यते स निपातनस्वरः प्रकृतिस्वरस्य बाधको भविष्यति । एवमप्युपदेशिवद्भावो वक्तव्यः । यथैव हि स निपातनस्वरः प्रकृतिस्वरं बाधत एवं प्रत्ययस्वरमपि बाधेत। आवधिषीष्टेति। नैष दोषः। आर्धधातुकीयाः सामान्येन भवन्त्यनवस्थितेषु प्रत्ययेषु । तत्राऽऽर्धधातुकसामान्ये वधिभावे कृते सति शिष्टत्वात्प्रत्ययस्वरो भविष्यति ।

अथ के पुनरनुदात्ताः । आदन्ता अदरिद्राः । इवर्णान्ताश्श्राश्रिश्विडीशीदीधीवेवीङः । उवर्णान्ता युरुणुक्षुक्ष्णुस्नूर्णुवर्जम् । ऋदन्ताश्चाजागृवृङ्वृञः । शकिः कवर्गान्तानाम् । पचिवचिसिचिमुचिरिचिविचिप्रच्छियजिभजिसृजित्यजिभुजिभ्रस्जिभञ्जिरुजियुजिणिजिविजिसञ्जिस्वञ्जयश्चवर्गान्तानाम् । सदिशदिहदिच्छिदितुदिस्विदिभिदिस्कन्दिक्षुदिखिद्यतिविन्दिविद्यतिराधियुधिबुधिशुधिक्रुधिरुधिसाधिव्यधिबन्धिसिध्यतिहानिमन्यतयस्तवर्गान्तानाम् । तपितिपिवपिशापिचुपिलुपिलिपिस्वप्यापिक्षिपिसृपितृपिदृपियभिराभिलभियभिरमिनमिगमयः पवर्गान्तानाम् । रुशिरिशिदिशिविशिलिशिस्पृशिदृशिक्रुशिमृशिदंशित्विषिकृषिश्लिषिविषि-

प्र०—तिपत्तिहेतुशास्त्रवाचिन आश्रयणात् । **वध इट्प्रतिषेध इति** । भिद्युपदेशस्थानीयो हन्त्युपदेशः । तत्र हन्तिरेकाजनुदात्तश्चेति सत्यपि वधेरुपदेशेऽनेकाच्त्वे हन्त्युपदेशधर्माश्रयेट्प्रतिषेधप्रसङ्गः । न चाकारलोपस्य यङन्त इवात्रापि स्थानिवद्भावेन व्यवधानम् । सत्यपि स्थानिवत्त्वे प्रकृतिप्रत्यययोरानन्तर्याद्यङन्ते तु स्थानिवत्त्वादकारेण भिदिप्रत्यययोरानन्तर्यविच्छेदात् । **आद्युदात्तनिपातनमिति** । तत्सामर्थ्यादुपदेशविषयानुदात्तत्वाश्रय इट्प्रतिषेधो न भवति । नह्येतदाद्युदात्तत्वं प्रयोगसमवायि । प्रत्ययस्वरेण तस्य बाधनात् । **आर्धधातुकीया इति** । आर्धधातुके भवा इति वृद्धाच्छः । यदि तर्ह्यार्धधातुकविशेषनिमित्ता अप्यनवस्थितेषु प्रत्ययेषु भवन्ति

उ०—**शब्दस्येति** । **शास्त्रवाचिन इति** । करणव्युत्पत्त्येति भावः । यथा शास्त्रपदेनोच्चारणमेवं भाववचन एव स इति बोध्यम् । यद्यप्येवंव्याख्याने वध इट्प्रतिषेध इत्युत्तरभाष्यानुत्थितिः । वधेः साक्षात्प्रतिपत्तिहेतुशास्त्रस्य तादृशोच्चारणस्य च सत्त्वात् । अवच्छेदकावच्छेदेनान्वयस्यौत्सर्गिकत्वेन लक्ष्यानुरोधेन चोपदेशत्वावच्छेदेनैकाच इत्यर्थात् । तथाऽप्येतदभिप्रायमजानानस्योभयोः स्थान्यादेशयोर्यस्तस्यैव ग्रहणमित्यर्थं मन्वानस्य सा शङ्का तथैव च सिद्धान्त्येकदेशिन उत्तरम्—**उपदेशविषयेति** । हन्त्युपदेशविषयेत्यर्थः । **अनवस्थितेषु प्रत्ययेष्विति** । आर्धधातुक इत्यादेर्विषयसप्तमीत्वाश्रयणादिति भावः । **तद्विरुध्यत इति** । वाचानिक एव तत्र विप्रतिषेध इति निरूपितमस्माभिः प्राक् । वस्तुतोऽत्रावच्छेदकावच्छेदेनान्वयरूपोऽस्मदुक्तः समाधिर्बोध्यः । भाष्ये—**उवर्णान्ता इति** । ष्वादि-

१ ख. °थिवद्भावेऽपि विषयसप्तमीति तदाशयः । इ० ।

पिषितुषिदुषिद्विषिघसिवसिदहिदिहिवहिदुहिनहिरुहिलिहिमिहयश्चोष्मान्तानाम् । वसिः प्रसारणी ।

**कृसृभृवृस्तुद्रुस्रुश्रुवो लिटि ॥ ७ । २ । १३ ॥**

**कृञोऽसुटः ॥ १ ॥**

कृञोऽसुट इति वक्तव्यम् । इह मा भूत् । संचस्करिव संचस्करिम । तत्तर्हि वक्तव्यम् । न वक्तव्यम् । गुणे* कृते रपरत्वे चानुगन्तत्वादिट्प्रतिषेधो+ न भविष्यति । एवमप्युपदेशाधिकारात्प्राप्नोति× । तस्मादसुट इति वक्तव्यम् ।

**श्वीदितो निष्ठायाम् ॥ ७ । २ । १४ ॥**

श्विग्रहणं किमर्थं न प्रसारणे कृते प्रसारणपूर्वत्वे चोगन्तादित्येव सिद्धम्÷ । अत उत्तरं पठति ।

---

प्र०—तदा यदुक्तं वधिभावात्सीयुटि चिण्वद्भावो विप्रतिषेधेनेति तद्विरुध्येत । अन्तरङ्गत्वाच्चिण्वद्भावस्य विप्रतिषेधायोगादिति चिन्त्योऽत्र समाधिः ।

**कृसृ०** । **कृञोऽसुट इति** । कृतेऽपि सुटि करोतिर्भवत्येवेति प्रतिषेधप्रसङ्गः । **गुणे कृत इति** । ऋतश्च संयोगादेर्गुण इत्यत्र संयोगादेर्गुणविधाने संयोगोपधग्रहणं कर्तव्यमिति वचनेन । **अनुगन्तत्वादिति** । श्र्युकः कितीत्यत उग्ग्रहणमिहानुवर्तेत इति मन्यते । **एवमपीति** । यद्यपि संप्रति नोगन्तस्तथाऽप्युपदेश उगन्त इति स्यात्प्रतिषेधः । किमर्थमुपदेश इत्यनुवर्तत इति चेत् । तुष्टोथेत्यादौ कृतेऽपि गुण इट्प्रतिषेधार्थं यद्येवमुक इत्यपि नानुवर्त्यम् । एवं तर्ह्येतदनेनोक्तं भवति । सत्यसति वोगधिकारे कृञोऽसुट इत्यवश्यं वाच्यमिति नार्थ उगधिकारेण ।

**श्वीदि०** । स्तीर्त्वा स्तीर्णमित्यादीनामुपदेशग्रहणानुवृत्तिमन्तरेण सिद्धेरभिधानाद्दुपदेशाधिकारोऽत्र नास्तीति मत्वाऽऽह—**श्विग्रहणं किमर्थमिति** । ननु च श्वि त इति स्थिते संप्रसारणात्परत्वादिट्प्राप्नोति नित्यत्वात्संप्रसारणं भविष्यतीति मन्यते । यस्य लक्षणान्तरेणेति क्वचिन्नाऽऽश्रीयत इति पूर्वमेवोक्तम् । संप्रसारणनिमित्तत्वादि-

---

उ०—पर्युदासाद्धृस्वोवर्णान्ता इत्यर्थः । अत एव बभूथाततन्थेति संगच्छते ।

**कृसृभृ०** । कृते सुटि शब्दान्तरत्वादप्राप्तेराह—**कृतेऽपीति** । यदागमा इति न्यायादिति भावः । नन्वत्रोक इत्यस्याभावेनानुगन्तत्वादित्ययुक्तमत आह—**श्र्युक इति** । वार्तिके वक्तव्यमित्यावश्यके कृत्य इति दर्शयति—**[illegible]** ।

**श्वीदितो** । ननु श्र्युक इत्यत्रोपदेश इत्यनुवृत्त्या श्वेरुपदेशेऽनुगन्तत्वात्प्रश्नोऽयमयुक्तोऽत आह—**स्तीर्त्वेत्यादि** । इटोऽनित्यत्वोपपादनायाऽऽह—**यस्य लक्षणान्तरेणेत्यादि** ।

---

* ७. ४. १०. + ७. २. ११. × ७. ४. १०. ÷ ६. १. १५; १०८; ७. २. ११.

श्विग्रहणमिदन्तत्वादुपदेशस्य ॥ १ ॥

श्विग्रहणं क्रियत इदन्तत्वादुपदेशस्य । उपदेश इगन्तादित्युच्यते श्वयतिश्चोपदेश इदन्तः ।

---

प्र०—इभावस्य तस्मिन्कृत इटोऽप्रवर्तनादनित्यत्वम् । संप्रसारणस्य तु कृताकृतप्रसङ्गित्वान्नित्यत्वम् । श्विग्रहणमिदन्तत्वादिति । एकाज्ग्रहणोत्तरार्थताप्रत्याख्यानायाऽऽनुपूर्व्या सिद्धमित्यादि तत्रोक्तम् । तत्त्वेकाज्ग्रहणमन्यार्थं स्थितं सदुत्तरत्रापि प्रतिपत्तिगौरवपरिहारायानुवर्त्यम् । ततश्च जागरित इत्यत्र श्र्युकः क्कितीतीट्प्रतिषेधो न भवति । ननु वध्यर्थमप्येकाज्ग्रहणं प्रत्याख्यातमेवाऽऽद्युदात्तनिपातनाश्रयेण हन्त्युपदेशे गृह्यमाणे तदुक्तम् । वध्युपदेशे त्वाश्रीयमाण एकाज्ग्रहणेनैव वधेरिट् साध्यते। आद्युदात्तनिपातने त्वाश्रीयमाणे वधिषीष्टेत्याद्युदात्तत्वप्रसङ्गनिवारणाय लिङीति विषयसप्तम्याश्रयणीया । तथा च घानिषीष्टेति विप्रतिषेधाच्चिण्वद्भावानुपपत्तिरन्तरङ्गत्वाद्वधिभावप्रसङ्गात् । यङ्लुङ्निवृत्त्यर्थं चैकाज्ग्रहणं कर्तव्यम् । तस्मिन्हि क्रियमाणे यत्रैकाज्ग्रहणं किंचित्पञ्चैतानि न यङ्लुकीति वचनाद्बेभिदितेत्यादावपीट् सिध्यति । उपदेशग्रहणमपि श्र्युकः क्कितीत्यत्रानुवर्त्यम् । अन्यथा स्तीर्त्वेत्यादिसिद्धयेऽनन्तप्रकार परिहाराश्रयणे प्रतिपत्तिगौरवानुषङ्गः । इदमेव श्विग्रहणमुपदेशाधिकारस्य तत्र ज्ञापकम् । अन्ये त्विह श्विग्रहणं सर्वविधिभ्य इड्विधिर्बलवानित्यस्य ज्ञापकमाहुः ।

---

उ०—नन्वेकाच इति सूत्र उपदेशग्रहणस्योत्तरत्र फलाभाव उक्तः । इह च तदाश्रयणमिति विरोधं परिहरति—एकाज्ग्रहणेति । ततश्च जागरित इति । एवं च स्तीर्णमिति यदुपाधेर्विभाषा तदुपाधेः प्रतिषेध इत्याश्रयणेऽपि सिद्धम् । तच्चावश्याश्रयणीयमित्युत्तर सूत्रे भाष्य एव स्फुटम् । वध्युपदेशे त्विति । उपदेशमात्रावच्छेदेन य एकाजित्यर्थेनेत्यर्थः । हन्तेर्विनाशोन्मुखत्वेन तत्र धातोरित्यस्याप्रवृत्त्या तत्स्थानिको वधिरप्यान्तरतम्यादुपदेशेऽनुदात्त एवोच्चारितः स्थान्यनुरूप इति भावः । तथा चेत्यादि तु चिन्त्यमित्युक्तमेव । इति वचनादिति । परे त्विण्निषेधविषये यङ्लुङन्तानामनभिधानमेव । अत एव पूर्वसूत्रे भाष्य इहार्थमेव तर्हि वध्यर्थमेकाज्ग्रहणमित्येवोक्तं नतु यङ्लुगर्थमित्यपि । एषा परिभाषा च न स्पष्टा । यत्त्वजर्घा बेभिदीतीत्यादौ श्यन्श्नमोरकरणात् श्तिपा शपेति परिभाषा भाष्यसंमतेति तन्न । चर्कीतं चेत्यादौ विशिष्य पाठेन तेषां तत्तद्गणप्रयुक्तकार्याप्रवृत्तेस्तस्मादियं परिभाषा भाष्यासंमतैव । वधेराद्युदात्तनिपातनादेव सिद्धे एकाज्ग्रहणमत्र प्रत्याख्येयमेव । यङन्तवारणं तूपदेशेऽनुदात्तादिहितस्येत्यर्थेनैवेति प्राहुः । आहुरिति । अत्रारुचिबीजं तूपदेशपदानुवृत्तिज्ञापनमात्रेणैव चारितार्थ्ये जाते विशिष्टवचनज्ञापकता न युक्ता भाष्यविरोधश्चेति ।

यस्य विभाषा ॥ ७ । २ । १५ ॥

यस्य विभाषाऽविदेः ॥ १ ॥

यस्य विभाषाऽविदेरिति वक्तव्यम् । इह मा भूत् । विदितः विदितवानिति । तत्तर्हि वक्तव्यम् । न वक्तव्यम् । यदुपाधेर्विभाषा तदुपाधेः प्रतिषेधः । शविकरणस्य विभाषा× लुग्विकरणश्चायम् ।

आदितश्च ॥ ७ । २ । १६ ॥

विभाषा भावादिकर्मणोः ॥ ७ । २ । १७ ॥

किमर्थो योगविभागो नाऽऽदितो विभाषा भावादिकर्मणोरित्येवोच्येत । केनेदानीं कर्तरि प्रतिषेधो भविष्यति । यस्य विभाषा [ ७. २. १५ ] इत्यनेन । एवं तर्हि सिद्धे सति यद्योगविभागं करोति तज्ज्ञापयत्याचार्यो यदुपाधेर्विभाषा

प्र०— यस्य । विभाषा गमहनविद्विशामिति क्सौ विकल्पविधानाद्वेत्तेर्निष्ठायां प्रतिषेधः प्राप्नोतीति मत्वाऽऽह—यस्य विभाषाऽविदेरिति । वेत्तिरत्र विवक्षितः । विद्लृ लाभ इत्यस्य तु प्रतिषेधो भवत्येव । विन्न इति विद्यतिविन्त्योस्त्वनुदात्तत्वादिट्प्रतिषेधः । यदुपाधेरिति । उपाधिरभिधेयादिर्भेदकः । शविकरणस्य विभाषेति । विशिना तौदादिकेन साहचर्यात्तौदादिकस्यैव लाभार्थस्य विभाषेति ज्ञानार्थस्य सत्यपि विदिरूपत्वेऽर्थस्य भेदकत्वेन रूपवदाश्रयणात्प्रतिषेधाभावः । यद्यपि हन्तिना साहचर्यं विशेस्तथाऽपि शब्दपरविप्रतिषेधाद्विशिर्व्यवस्थाहेतुर्न हन्तिः ।

आदितश्च । एवं तर्हीति । रूपाभेदेऽपि यद्युपाधीनां भेदकत्वं न स्याद्योगविभागोऽनर्थकः स्यात् । भेदकत्वे तु तेषां भावादिकर्मणोर्विकल्पविधानात्कर्तरि

उ०— यस्य विभाषा । विन्न इति । अभोगप्रत्यययोरिदम् । तयोस्तु वित्त इति । विद्यतिविन्त्योस्त्विति । परे तु तुदादेरप्यनुदात्तत्वादेव निषेधः । विंदिविद्यतीति ह्यनुदात्तगणने भाष्य उक्तम् । तत्रेका निर्देशे नुम इव श्नमोऽप्यप्राप्तिरिति । अबादिव्यावृत्तयेऽनुस्वारोच्चारणम् । तत्र भाष्यप्रामाण्याद्विकरण इति चेन्नुमोऽपि संभव इति विनिगमनाविरहादुभयोरपि ग्रहणम् । विन्दतिविन्दिविद्यतीति पाठे तु स्पष्टमेव तद्ग्रहणमिति चिन्त्योऽयं कैयट इत्याहुः । अभिधेयादिर्भेदक इति । अभिधेयमर्थः । विशेषणमात्रमत्रोपाधिशब्देन नत्वर्थविशेष उपाधिरिति लक्षित इत्यर्थः । शब्दपरविप्रतिषेधादिति । लुग्विकरणपरिभाषानुग्रहाय परसाहचर्यस्यात्राऽऽश्रयणमिति तत्त्वम् ।

आदितश्च । भाष्ये कर्तरीति । उपलक्षणमेतत् । कर्मणीत्यपि बोध्यम् । ननु यत्रार्थे

× ७, २, ६८,

तदुपाधेः प्रतिषेध इति। किमेतस्य ज्ञापने प्रयोजनम्। यस्य विभाषाऽविदेरित्युक्तं* तन्न वक्तव्यं भवति।

**क्षुब्धस्वान्तध्वान्तलग्नम्लिष्टविरिब्धफाण्टबाढानि मन्थमनस्तमःसक्ताविस्पष्टस्वरानायासभृशेषु ॥ ७। २। १८॥**

**क्षुब्धं मन्थाभिधाने ॥ १ ॥**

क्षुब्धं मन्थाभिधान इति वक्तव्यम्। क्षुभितं मन्थेनेत्येवान्यत्र। क्षुब्ध। स्वान्त।

**स्वान्तं मनोभिधाने ॥ २ ॥**

स्वान्तं मनोभिधान इति वक्तव्यम्। स्वनितं मनसेत्येवान्यत्र। स्वान्त। ध्वान्त।

**[ ध्वान्तं तमोभिधाने ॥ ३ ॥ ]**

ध्वान्तं तमोभिधान इति वक्तव्यम्। ध्वनितं तमसेत्येवान्यत्र।

---

प्र०—निष्ठायां प्रतिषेधो न स्याद्भावादिकर्मणोरपि विकल्पप्रतिषेधयोर्विरोधात्प्रतिषेधो न स्यादिति कर्तृकर्मनिष्ठार्थो योगविभागः। यदि तर्ह्युपाधिर्भेदकस्तत उदितो वेति क्त्वाप्रत्यये भाववाचिनि विकल्पविधानाद्भाववाचिन्यामेव निष्ठायां प्रतिषेधः स्यान्न कर्तृकर्मवाचिन्याम्। नैष दोषः। तेन निर्वृत्तं निर्वृत्तेऽक्षद्यूतादिभ्य इति लिङ्गात्प्रत्ययार्थो भेदकत्वेन नाऽऽश्रीयते।

क्षुब्ध०। क्षुब्धमिति। यदि धात्वर्थोपाधित्वेन मन्थादय आश्रीयेरन्मन्थादिसाधने धात्वर्थे क्षुब्धादयो निपात्यन्त इति तदा क्षुभितं मन्थेनेत्यत्रापि भावे क्तस्येट्प्रतिषेधः स्यादिति समुदायानामभिधेयभावेन मन्थादय इहोपात्ता इति प्रदर्श्यते। द्रवद्रव्यसंपृक्ताः सक्तवो मन्थः। क्षुब्धां गिरिनदीमिवेत्यादयस्तु प्रयोगा असाधव इत्याहुः। अन्ये तूपमानमाश्रित्य समर्थयन्ते। स्वान्तशब्देन बाह्येषु विषयेष्वविक्षिप्तमनाकुलं मन उच्यते।

---

उ०—विकल्प उक्तस्तत्रैव प्रतिषेधस्तर्हि कुतो नेत्यत्राऽऽह—भावादिकर्मणोरपीति। तथा च सूत्रवैयर्थ्यं स्यादिति भावः। प्रत्ययार्थो भेदकत्वेनेति। शब्देनाऽऽश्रीयमाण उपाधिरेव भेदक इत्यनेन ज्ञाप्यते। साहचर्यलभ्योऽपि शब्दोपात्त एव। क्त्वो भाववाचकत्वं तु न शब्देनाऽऽश्रितमिति भावः।

क्षुब्धस्वान्त०। ननु मन्थादयोऽर्थाः सूत्र एव क्रमेणोपात्ता इति मन्थाभिधान इत्यादि व्यर्थमत आह—यदीति। द्रवद्रव्येति। तथा च दधिमन्थान्मधुमन्थाश्चेति प्रयुज्यते। केचित्तु मथ्यतेऽनेनेति मन्थनदण्डो मन्थ इत्याहुः। मन्थादिषु क्षोभणादिक्रियायोगो यथाकथंचिद्द्रष्टव्यः। उपमानमिति। सादृश्यं च यथासंभवं द्रष्टव्यम्। सूत्रे मनःशब्देन विशिष्टं मन उच्यते तत्रैव स्वान्तप्रयोगादित्याह—बाह्येष्विति।

* ७. २. १५.

**घृषिशसी वैयात्ये ॥ ७ । २ । १९ ॥**

किमिदं वैयात्य इति । वियातभावो वैयात्यम् ।

**दृढः स्थूल-बलयोः ॥ ७ । २ । २० ॥**

दृढनिपातनं किमर्थं न दृहेर्नेड् भवतीत्येवोच्येत ।

**ढनिपातनं नकारहकारलोपार्थं परस्य च ढत्वार्थम् ॥ १ ॥**

दृढनिपातनं क्रियते नकारहकारलोपार्थम् । नकारहकारलोपो यथा स्यात् । परस्य च ढत्वार्थम् । परस्य च ढत्वं यथा स्यात् ।

**अनिड्वचने हि रभावाप्रसिद्धिरलघुत्वात् ॥ २ ॥**

अनिड्वचने हि रभावस्याप्रसिद्धिः । द्रढीयान् । किं कारणम् । अलघुत्वात्+ ।

**नलोपवचनं च ॥ ३ ॥**

नलोपश्च वक्तव्यः । इह च परिद्रढय्य गतः ल्यपि लघुपूर्वस्य [ ६. ४. ५६ ] इत्ययादेशो न स्यात् । इह च पारिदृढी× कन्येति गुरूपोत्तमलक्षणः ष्यङ् प्रसज्येत÷ ।

---

प्र०– **घृषिशसी** । **वियातभाव इति** । विरूपं यातं गमनं चेष्टनं यस्य स वियातोऽविनीतः ।

**दृढ० । न दृहेरिति** । दृह दृहि बृह बृहि वृद्धाविति धातुषु पठ्यते । तत्र दृहः स्थूलबलयोरितीट एव प्रतिषेधो विधेय इति मत्वा प्रश्नः । **दृढनिपातनमिति** । दादेर्धातोर्घ इति घत्वस्य प्रतिषेधो वक्तव्यः स्यात् । **अनिड्वचने हीति** । यदीटो घत्वस्य च प्रतिषेधो विधीयेत ततो ढत्वधत्वष्टुत्वढलोपेषु यद्यपि दृढ इति रूपं सिध्यति तथाऽपि पूर्वत्रासिद्धमिति ढलोपस्यासिद्धत्वात्संयोगे गुर्विति गुरुसंज्ञायां सत्यां तन्निबन्धनकार्यप्रसङ्गो लघुसंज्ञाहेतुकार्याप्रसङ्गश्च । **द्रढीयानिति** । रविधौ पृथु मृदु इत्यादिपरिगणनमनपेक्ष्योच्यते । परिगणने हि विशेषणानां प्रत्याख्यानाद्रभावः सिध्यति । **नलोपवचनं चेति** । दृंहेरिदित्वान्नलोपो न प्राप्नोति । दृहेस्तु स्थूलबलयोरपि दृहितमितीष्यते । दृहि बृहि वृद्धाविति द्वावेव धातू पठ्येते इति वार्तिककाराभिप्रायं केचिदाहुः । तथा च बृंहेरच्यनिटीति नलोपमुक्तवान् । भाष्यकारस्त्वेतद्वचनप्रत्याख्यानाद्धातुचतुष्टयमियेष । **पारिदृढीति** । इतो मनुष्यजातेरिति ङीष् ।

---

उ०– **दृढः स्थूल०** । प्रकृतकार्यात्कार्यान्तरसिद्ध्यर्थं हि निपातनं तन्नेह पश्याम इत्याशयेनाऽऽह–**दृहेति** । दादेर्धातोरित्यस्यान्यथेत्यादिः । भाष्येऽनिड्वचन इत्युपलक्षणमित्याह–**यदीट इति** । लघुसंज्ञाहेत्विति बहुव्रीहिः । **कार्याप्रसङ्गश्चेति** । घत्वप्रतिषेधारम्भगौरवं चेत्यपि बोध्यम् । **दृहेस्त्विति** । दृंहेर्निपातनाश्रयणादित्यर्थः । **एतद्वचनेति** । बृंहेरच्यनिटीत्येतदित्यर्थः । **इतो मनुष्येति** । परिदृढस्यापत्यमित्यत इञ् ।

---

+ ८. ३. १३; ८. २. १; ६. ४. १६१. × ४. १. ९५; ६५. ÷ ४. १. ७८,

**प्रभौ परिवृढः ॥ ७ । २ । २१ ॥**

परिवृढ इति किमर्थं निपात्यते न परिपूर्वाद्वृहेर्नेड् भवतीत्येवोच्येत ।

**परिवृढनिपातनं च ॥ १ ॥**

किम् । नकारहकारलोपार्थं परस्य च ढत्वार्थमनिड्वचने हि रभावाभसिद्धिरलघुत्वान्नलोपवचनं चेत्येव+ । परिव्रढीयानिति र ऋतो हलादेर्लघोः [ ६. ४. १६१ ] इति रभावो न स्यात् । इह च परिव्रढय्य गत इति ल्यपि लघुपूर्वस्य [ ६. ४. ५६ ] इत्ययादेशो न स्यात् । इह च पारिवृढी* कन्येति गुरूपोत्तमलक्षणः ष्यङ् प्रसज्येत× ।

**घुषिरविशब्दने ॥ ७ । २ । २३ ॥**

किमर्थमविशब्दन इत्युच्यते न विशब्दने चुरादिणिचा भवितव्यम् । एवं तर्हि सिद्धे सति यदयमविशब्दन इत्याह तज्ज्ञापयत्याचार्यो विशब्दने घुषेर्विभाषा णिज्भवतीति । किमेतस्य ज्ञापने प्रयोजनम् ।

महीपालवचः श्रुत्वा जुघुषुः पुष्यमाणवाः

एष प्रयोग उपपन्नो भवति ।

---

प्र०— प्रभौ । परिव्रढय्येति । कथं पुनरत्र ल्यबादेशो यावता परिवृढमाचष्ट इति णिचि कृते क्त्वाप्रत्यये च क्त्वान्तस्य कृदन्तत्वात्तत्रैव परेरन्तर्भावात्पुनः समासाभावः । नैष दोषः । संग्रामयतेरेव सोपसर्गात्प्रत्ययोत्पत्तिर्नान्यस्मादिति नियमात्परिशब्दं पृथक्कृत्वा वृढशब्दादेव णिच् क्रियते ततो वृढिशब्दस्य धातुत्वात् । क्त्वाप्रत्यये कृते परेः क्त्वान्तेन समास इति सिद्धो ल्यबादेशः । णाविष्ठवद्भावाद्रभावः ।

घुषिर० । किमर्थमिति । घुषिरविशब्दार्थ इति भ्वादौ पठ्यते । स विशब्दने नैव वर्तते । यस्तु घुषिर्विशब्दन इति चुरादौ पठ्यते तस्माण्णिचा भवितव्यम् । केवलश्चेह घुषिरुपात्त इति नार्थो विशब्दनप्रतिषेधेन । विशब्दनं स्वाभिप्रायस्य शब्देन प्रकाशनमुच्यते । एवं तर्हीति । अविशब्दन एवेड्भावे सिद्ध इत्यर्थः । किमेतस्येति । किं निष्ठायामेव घुषितं घोषितमिति रूपद्वयसिद्धिः प्रयोजनमथान्यदपीति प्रश्नः । जुघुषुरिति । घोषयांचक्रुरित्यपि भवति । अन्ये त्वनित्यण्यन्ताश्चुरादय इति सामान्येन ज्ञाप्यत इत्याहुः । केचिच्चिति स्मृत्यामिती

---

उ०— प्रभौ । परेरन्तर्भावादिति । परिवृढशब्दाण्णिचि तदन्तसमुदायस्य धातुत्वात्तत एव क्त्वेति क्त्वान्तेन समासाभाव इत्यर्थः ।

घुषिर० । केवलश्चेति । ण्यन्तनिर्देशे तु घोषिरिति स्यादिति भावः । नार्थ इति । अवि-

---

+ ७. २. ३०. * ४. १. ९५; ६५. × ४. १. ७८.

## णेरध्ययने वृत्तम् ॥ ७ । २ । २६॥

किमिदमध्ययनाभिधायिकायां निष्ठायां निपातनं क्रियत आहोस्विदध्ययने चेद्वृतिर्वर्तत इति । किंचातः । यद्यध्ययनाभिधायिकायां निष्ठायां निपातनं क्रियते सिद्धं वृत्तो गुणः वृत्तं पारायणम् वृत्तं गुणस्य वृत्तं पारायणस्येति न सिध्यति । अथ विज्ञायतेऽध्ययने चेद्वृतिर्वर्तत इति न दोषो भवति । यथा न दोषस्तथाऽस्तु । अध्ययने चेद्वृतिर्वर्तत इत्यपि वै विज्ञायमाने न सिध्यति । किं कारणम् । वृतिरयमकर्मकः । अकर्मकाश्चापि ण्यन्ताः सकर्मका भवन्ति ।

---

प्र०—दित्त्वं चुरादिणिचोऽनित्यत्वस्य ज्ञापकमाहुः । इदित्त्वेन नुम्विधाने प्रयोजनं चिन्तित इत्यादौ नलोपाभावः । यदि च चुरादिणिच् नित्यः स्यात्तदा चिन्त स्मृत्यामित्येवं पठ्येत । णिचि सति नलोपाप्रसङ्गात् ।

**णेरध्यय०** । **किमिदमिति** । किमभिधेयत्वेन क्तान्तस्याध्ययनमाश्रीयतेऽथ धात्वर्थसाधनत्वेनेति प्रश्नः । **अध्ययने चेदिति** । अध्ययनविषये धात्वर्थ इत्यर्थः । **वृत्तो गुण इति** । अध्ययनसामान्यं वृत्तशब्दस्याभिधेयं नतु तद्विशेष इति विशेषवाचिशब्दप्रयोगाविरोधः । गुणः पदक्रमसंहितारूपोऽध्ययनविशेषो वृत्तो निष्पादित इत्यर्थः । **वृत्तं गुणस्येति** । भावे निष्ठा । तस्या अध्ययनं नाभिधेयमिति वृत्तशब्दप्रयोगाप्रसङ्गः । **न सिध्यतीति** । ण्यन्तस्येति भावः । एवं तस्य सकर्मकत्वाद्वृत्तं गुणस्येति भावे निष्ठाया अप्रसङ्गात्तयोरेव कृत्यक्तखलर्था इत्यत्र भावेऽकर्मकेभ्य इत्यनुवर्तनात् । **वृतिरयमिति** । केवलस्य सकर्मकत्वाशङ्कां निरा-

---

उ०—शब्दन एव घुषेर्वृत्तेरित्यर्थः । **नलोपाप्रसङ्गादिति** । न च ण्यन्तात्क्विपि नलोपाभावाय तत्स्थानिवत्त्वं तु क्वौ लुप्ते क्वौ विधौ च निषिद्धमिति वाच्यम् । असिद्धवदत्रेति णिलोपस्यासिद्धत्वात् । अत्रान्ये त्वित्यादिमतद्वयेऽप्यरुचिबीजं तु गणेर्नित्यण्यन्तत्वपरणेरणाविति सूत्रस्थभाष्यविरोधः । घुषेर्विभाषेति प्रकृतसूत्रस्थभाष्यविरोधश्च । इरित्त्वेनैवेदित्त्वेनेव विकल्पस्य सिद्धत्वादेतज्ज्ञापकोपन्यासस्यायुक्तत्वापत्तिश्च । कुद्र्यादीनामिदित्त्ववदेतदिदित्त्वस्यापि सत्त्वं च । इरित्त्वमपि धात्वन्तरत्वाभावबोधनाय । तस्माच्चिन्ततीत्यादेः साधुत्वं चिन्त्यमेव ।

**णेरध्ययने** । **किमभिधेयत्वेनेति** । अध्ययनशब्दो बाहुलकात्कर्मल्युडन्तो ग्रन्थवाचीति भावः । अत एव च वक्ष्यति—संहितारूपोऽध्ययनविशेष इति । नन्वेवमध्ययने चेद्वृतिर्वर्तत इति भाष्यमनुपपन्नमत आह—**अध्ययनविषय इति** । **भावे निष्ठेति** । वृत्तं गुणस्येति नपुंसके भावे क्तस्य योग उपसंख्यानमिति षष्ठी शेषलक्षणा वा । **ण्यन्तस्येतीति** । णेरित्युक्त्या ण्यन्तस्येदं निपातनमिति लभ्यत इत्यर्थः । वृतिरयमित्यादेर्वैयर्थ्यं परिहरति—**केवलस्येति** । अकर्मकाणां भावे क्तो भवतीत्यादेरकर्मकत्वे हेतुत्व-

अकर्मकश्चात्र वृतिः। कथं पुनर्ज्ञायतेऽकर्मकोऽत्र वृतिरिति। अकर्मकाणां भावे क्तो भवतीत्येवमत्र भावे क्तो भवति+। तत्रोदितः क्त्वि विभाषा× यस्य विभाषा [ ७. २. १५ ] इतीट्प्रतिषेधो भविष्यति। अथ णिग्रहणं किमर्थम्।

**वृत्तनिपातने णिग्रहणमण्यन्तस्यावधारणप्रतिषेधार्थम् ॥१॥**

वृत्तनिपातने णिग्रहणं क्रियतेऽण्यन्तस्यावधारणं मा भूदिति। कैमर्थक्यान्नियमो भवति। विधेयं नास्तीति कृत्वा। इह चास्ति विधेयम्। किम्। ण्यधिकाद्वृतेरिट्प्रतिषेधो विधेयः। तत्रापूर्वो विधिरस्तु नियमोऽस्त्वित्यपूर्व एव विधिर्भविष्यति न नियमः। कुतो नु खल्वेतदधिकार्थ आरम्भे सति ण्यधि-

---

प्र०–कृत्य ण्यन्तस्य सकर्मकत्वं प्रतिपादयति। प्रयोज्यमन्तरेण णिचोऽभावात्तेनास्य सकर्मकत्वम्। तत्रैतत्स्याद्भवतु। सकर्मकत्वं कर्मण्येवात्र निष्ठा भवत्वित्याह—**अकर्मकश्चात्रेति**। वृत्तं गुणस्येत्यादावित्यर्थः। **अकर्मकाणामिति**। भावे क्तविधानादकर्मत्वं प्रतीयत इत्यर्थः। कर्मणि क्ते वृत्तो गुण इति सामानाधिकरण्येन भाव्यम्। भावे तु क्ते शेषविवक्षायां षष्ठी भवति। तस्मान्नैतण्ण्यन्तस्य वृत्ते रूपमपि तु केवलस्य। तस्य च यस्य विभाषेतीट्प्रतिषेधोऽस्त्येव। एवं चाध्ययनमभिधेयं भवतु विषयो वेति न कश्चिद्दोषः। अत्राऽऽहुः। वृत्तं गुणस्येति सकर्मकादपि ण्यन्तान्नपुंसके भावे क्त इति भावे क्तोऽस्त्येव। यस्तु निष्ठेति भूते क्तः स एवाकर्मकेभ्यो भावे भवति। वृत्तं गुणस्येत्यत्र च वर्तमानत्वं प्रतीयते न भूतत्वम्। अत्रोच्यते। नपुंसके भावे क्त इत्ययमपि क्तः सकर्मकेभ्यो न भवति। तयोरेव कृत्यक्तखलर्था इत्यत्र क्तमात्रस्य ग्रहणात्तत्र च भावे चाकर्मकेभ्य इत्यनुवर्तनादवश्यं चैतद्बोद्धव्यम्। अन्यथा नपुंसके भाव उपसंख्यानमित्यस्मिञ्छेषविज्ञानात्सिद्धमिति प्रत्याख्याते सकर्मकाद्भावे क्ते विधीयमाने कर्मणो द्वितीया प्रसज्येत ग्रामं गतमोदनं भुक्तमिति। अथ **णिग्रहणमिति**। केवलस्य यस्य विभाषेति प्रतिषेधस्य सिद्धत्वात्सामर्थ्याण्ण्यन्तस्य निपातनं ज्ञास्यते। **वृत्तनिपातन इति**। असति णिग्रहणे ण्यन्तस्यैवेदं निपातनं न तु सन्नन्तस्य यङन्तस्य चेति निश्च-

---

उ०–मुपपादयति—**भावे क्तेति**। **एवं चेति**। वृत्तं गुणस्येत्यस्य सिद्धत्वादिति भावः। वृत्तं गुणस्येत्यत्र निष्ठेति क्तः प्रत्ययः किं न स्यादत आह—**वृत्तं गुणस्येत्यत्रेति**। **प्रसज्येत ग्रामं गतमिति**। अत्र गत्यर्थाकर्मकेति क्ते क्तोऽधिकरणे चेति च क्तेऽयं प्रयोगो दुर्वार एव। अत एव आतं देशमित्यादिसिद्धिरिति चिन्त्यमिदमिति केचित्। ननु केवलस्य निपातनाभावाय णिग्रहणं स्यादत आह—**केवलस्येति**। **विधिरशक्य इति**। ण्यन्त-

---

+ ३. ४. ७०. × ७. २. ५६.

कल्प भवत्यति न पुनः सनधिकस्य वा स्यादङधिकस्य वेति। तस्माण्णिग्रहणं कर्तव्यम्। अथ किमर्थं निपातनं क्रियते।

निपातनं णिलोपेड्गुणप्रतिषेधार्थम् ॥ २ ॥

निपातनं क्रियते णिलोपार्थमिड्गुणप्रतिषेधार्थं च।

वा दान्तशान्तपूर्णदस्तस्पष्टच्छन्नज्ञप्ताः ॥ ७। २। २७॥

अथ दान्तशान्तयोः किं निपात्यते।

दान्तशान्तयोरुपधादीर्घत्वं च ॥ १ ॥

किंच। णिलोपेट्प्रतिषेधौ च+। उपधादीर्घत्वमनिपात्यम्। वृद्धया सिद्धम्। न सिध्यति। मितां ह्रस्वः [ ६. ४. ९२ ] इति ह्रस्वत्वेन भवितव्यम्। एवं तर्ह्यनुनासिकस्य क्विझलोः क्ङिति [ ६. ४. १५ ] इत्येवमत्र दीर्घत्वं भविष्यति। न सिध्यति। किं कारणम्। णिचा व्यवहितत्वात्। णिलोपे कृते नास्ति व्यवधानम्। स्थानिवद्भावाद्व्यवधानमेव प्रतिषिध्यतेऽत्र स्थानिवद्भावो दीर्घविधिं प्रति न स्थानिवदिति*।

अथ स्पष्टच्छन्नयोः किं निपात्यते।

स्पष्टच्छन्नयोरुपधाह्रस्वत्वं च ॥ २ ॥

किंच। णिलोपेट्प्रतिषेधौ च×।

---

प्र०—याभावाद्विधिरशक्योऽभ्युपगन्तुमिति नियमो विज्ञायेत। णिलोपार्थमिति। निष्ठायां सेटीति वचनादनिटि निष्ठायां णिलोपो न प्राप्नोति। णेरनिटीत्यनेनापि तक्रकौण्डिण्यन्यायेन सेटि निष्ठायां विधीयमानेन णिलोपेनानिटि निष्ठायां णिलोपस्य बाधनात्प्रत्ययलक्षणेन प्राप्तस्य गुणस्येटश्चाभावो निपात्यते।

वा दान्त०। उपधादीर्घत्वमिति। पूर्वत्रासिद्धे न स्थानिवदिति वक्तव्यम्। तस्मिंश्चोच्यमाने द्विर्वचनादीनि वरेयलोपस्वरपदान्तवर्जं न वक्तव्यानीति दीर्घविधौ स्थानिवत्त्वनिषेधाभावादनुनासिकस्य क्विझलोः क्ङितीति दीर्घत्वाप्रसङ्गः। सूत्रा-

---

उ०—स्यैव वृत्तेर्ग्रहणे हि तस्य निष्ठायां णिलोपेट्प्रतिषेधयोर्लक्षणान्तरेणाप्राप्त्या तद्विध्यर्थमिदं स्यान्नान्यथेत्यर्थः। नियम इति। अध्ययन एवेत्येवमित्यर्थः। भाष्ये णिलोपार्थमिति। वस्तुतो णिलुगेव निपात्यः। एवं हि गुणप्रतिषेधो न निपात्यः। यद्यपि वृतो गुण इति प्रयोगोऽन्तर्भावितण्यर्थमादाय सिद्धस्तथाऽपि ण्यन्तस्यानिष्टप्रयोगनिवृत्त्यर्थं सूत्रमिति तत्त्वम्। तक्रकौण्डिन्न्येति। येन नाप्राप्त्यभावादिदं चिन्त्यम्। निष्ठायां सेटीत्यत्र सेटीति योगविभागेन सेट्येव निष्ठायामिति नियमान्नेति वक्तुं युक्तम्। अत एव तत्र सूत्रे भाष्य उक्तं सेड्ग्रहणमनिटि प्रतिषेधार्थं संज्ञपितः पशुरिति।

वा दान्त०। द्विर्वचनादीनि वरेयलोपस्वरवर्जं नेति पाठः। सूत्रारम्भाश्रयेणेति। न पदा-

---

+ ७. २. २६. * १. १. ५८. × ७. २. २६.

रुष्यमत्वरसंघुषास्वनाम् ॥ ७ । २ । २८ ॥

घुषिस्वनोर्वावचनमिट्प्रतिषेधाद्विप्रतिषेधेन ॥ १ ॥

घुषिस्वनोर्वावचनमिट्प्रतिषेधाद्भवति विप्रतिषेधेन* । घुषेरिट्प्रतिषेधस्यावकाशोऽसंपूर्वादविशब्दनम् । घुष्टा रज्जुः घुष्टो मार्गः । वावचनस्यावकाशः संपूर्वाद्विशब्दनम् । संघुष्टं वाक्यम् संघुषितं वाक्यम् । संपूर्वादविशब्दन उभयं प्राप्नोति संघुष्टा रज्जुः संघुषिता रज्जुः । वावचनं भवति विप्रतिषेधेन । स्वन इट्प्रतिषेधस्यावकाशोऽनाङ्पूर्वान्मनोभिधानम् । स्वान्तं मनः । वावचनस्यावकाश आङ्पूर्वादमनोभिधानम् । आस्वान्तो देवदत्तः आस्वनितो देवदत्तः । आङ्पूर्वान्मनोभिधान उभयं प्राप्नोति । आस्वान्तं मनः आस्वनितं मनः । वावचनं भवति विप्रतिषेधेन ।

हृषेर्लोमसु ॥ ७ । २ । २९ ॥

हृषेर्लोमकेशकर्तृकस्येति वक्तव्यम् । हृष्टानि लोमानि हृषितानि लोमानि । हृष्टं लोमभिः हृषितं लोमभिः । हृष्टाः केशाः हृषिताः केशाः । हृष्टं केशैः हृषितं केशैः ।

विस्मितप्रतीघातयोरिति वक्तव्यम् । हृष्टो देवदत्तः हृषितो देवदत्तः । हृष्टा दन्ताः हृषिता दन्ताः ।

अपचितश्च ॥ ७ । २ । ३० ॥

अपचित इति किं निपात्यते । चायश्चिभावो निपात्यते । अपचितः । क्तिनि नित्यमिति वक्तव्यम् । अपचितिः ।

---

प्र०—रम्भाश्रयेण तु दीर्घत्वसिद्धिं भाष्यकृन्मन्यते ।

**हृषेः** । सूत्रकारो लोमशब्दं सामान्यशब्दं मत्वा केशग्रहणं न कृतवांस्तथा च लोमनखं स्पृष्ट्वा शौचं कर्तव्यमित्युक्ते केशस्पर्शेऽपि शौचं क्रियते । वार्तिककारस्तु मूर्द्धजाः केशाः, अङ्गान्तरजानि लोमानीति भेदं मत्वाऽऽह—**हृषेर्लोमकेशकर्तृकस्येति** ।

**अपचि०** । **चिभाव इति** । एतच्चोपलक्षणमिट्प्रतिषेधस्यापि निपातनात् । **क्तिनीति** । क्तिन्नाबादिभ्य इति क्तिन्प्रत्ययोऽयमन्यथा गुरोश्च हल इत्यकारः स्यात् ।

---

उ०—न्तेति सूत्रे दीर्घग्रहणारम्भेत्यर्थः । **भाष्यकृन्मन्यत इति** । वस्तुत एतद्भाष्याद्वरेयलोपस्वरवर्जमित्यत्र दीर्घग्रहणमप्युपलक्ष्यत इति परे ।

**हृषे०** । **भेदं मत्वेति** । तथा च प्रयोगोऽपि केशश्मश्रुलोमनखान्युदवसन्नानि कुर्वीति ।

---

*७. २. १८; २३.

## आर्धधातुकस्येड्वलादेः ॥ ७ । २ । ३५ ॥

आर्धधातुकग्रहणं किमर्थम् । यथा सार्वधातुकविशेषणं विज्ञायेत । आर्धधातुकस्येति । अथाक्रियमाणे आर्धधातुकग्रहणे कस्य वलादिग्रहणं विशेषणं स्यात् । अङ्गस्येति× वर्तते । अङ्गविशेषणम् । तत्र को दोषः । अङ्गस्य वलादेरादित इट् प्रसज्येत+ । तद्यथाऽडाटावङ्गस्यादितो भवतस्तद्वत् । क्रियमाणेऽप्यार्धधातुकग्रहणेऽनिष्टं शक्यं विज्ञातुम् । वलादेरार्धधातुकस्य यदङ्गमिति । अक्रियमाणे चेष्टम् । अङ्गस्य यो वलादिरिति । किंचाङ्गस्य वलादिः । निमित्तम् । यस्मिन्नङ्गमित्येतद्भवति । कस्मिंश्चैतद्भवति । प्रत्यये । यावता क्रियमाणे चानिष्टं विज्ञायतेऽक्रियमाणे चेष्टं तत्राक्रियमाण एवेष्टं विज्ञास्यामः । इदं तर्हि प्रयोजनम् । इह मा भूत् । आस्ते शेते । एतदपि नास्ति प्रयोजनम् । रुदादिभ्यः सार्वधातुके [ ७. २. ७६ ] इत्येतन्नियमार्थं भविष्यति । रुदादिभ्य एव सार्वधातुक इड् भवति नान्येभ्य इति । एवमपि वृक्षत्वम् वृक्षता अत्र प्राप्नोति । नैष दोषः । धातोरिति वर्तते । एवमपि लूभ्याम् पूभ्याम् अत्र प्राप्नोति । एवं तर्हि विहितविशेषणं धातुग्रहणम् । धातोर्यो विहितः । ननु धातोरेवायं विहितः । न चायं धातोरित्येवं विहितः । क्व पुनर्धातुग्रहणं प्रकृतम् । ऋत इद्धातोः [ ७. १. १०० ] इति । तद्वै षष्ठीनिर्दिष्टं पञ्चमीनिर्दिष्टेन चेह विहितः शक्यते विशेषयितुम् । अथेदानीं

---

प्र०— आर्ध० । रुदादिभ्य एवेति । सार्वधातुक एवेति नियमो रुदविदेति क्त्वासनोः कित्त्वविधानान्न भविष्यतीत्यनिटः, सनो रुदादेर्हलन्ताच्चेति कित्त्वस्य सिद्धत्वात्क्त्वोऽप्यनिट औपदेशिककित्त्वसद्भावात् । लूभ्यामिति । क्विबन्ता धातुत्वं न जहति रूपार्थवैकल्यात् । विहितविशेषणमिति । यद्यपि ऋत इद्धातोरित्यत्र धातुशब्दोऽर्थपदार्थकस्तथाऽपि सहशब्दान्तरानुमानादिह धातोरित्येतत्स्वरूपपदार्थकमाश्रीयते धातोरित्येवं विहितस्येति । पञ्चमीनिर्दिष्टेनेति । पञ्चम्यन्तानुकरणे धातोरित्यस्मिन्धातोरित्येवंविहितस्येति लभ्यते नान्यथा । अथेदानीमिति । धातुशब्दोऽत्र

---

उ०— आर्धधातुकस्य० । रूपार्थेति । तत्र रूपावैकल्यं स्पष्टमेव । अर्थो यद्यपि कर्तृरूपोऽधिकस्तथाऽपि धातुत्वप्रयोजकक्रियारूपस्यावैकल्यमस्त्येवेति भावः । यद्यपि तस्या उपसर्जनत्वं तथाऽप्युपसर्जनस्येति सूत्रेऽधातोरिति निषेधेन भूवादिसूत्र उपसर्जनभूताया अपि ग्रहणज्ञापनान्न दोषः । सहशब्दान्तरेति । शब्दस्वरूपम् आश्रीयत इत्यर्थः । पञ्चम्यनुकरण इति । प्रत्ययविधौ पञ्चम्यन्तस्य धातोरित्यस्याधिकारादिति भावः ।

---

× ६. ४. १. + ६. ४. ७१, ७२.

षष्ठीनिर्दिष्टेन चापि विहितः शक्यते विशेषयितुं शक्यमार्धधातुकग्रहणमकर्तुमिति ।

इति श्रीभगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये सप्तमस्याध्यायस्य द्वितीये पादे प्रथममाह्निकम् ॥

---

प्र०—धातुशब्दस्यानुकरणम् । तेन धातुशब्दस्य यः संबन्धी प्रत्ययस्तस्येड् भवति । यश्च धातुशब्दव्यापारोत्पन्नः स तत्संबन्धी भवति ।

इत्युपाध्यायजैयटपुत्रकैयटकृते महाभाष्यप्रदीपे सप्तमस्याध्यायस्य द्वितीये पादे प्रथममाह्निकम् ।

---

उ०— इति श्रीशिवभट्टसुतसतीगर्भजनागोजीभट्टकृते भाष्यप्रदीपोद्द्योते सप्तमस्याध्यायस्य द्वितीये पादे प्रथममाह्निकम् ।